GOVERNMENT OF INDIA
ARCHÆOLOGICAL SURVEY OF INDIA
CENTRAL
ARCHÆOLOGICAL
LIBRARY

ACCESSION NO 23617
CALL No. 091.4912/G.O.M.L.M.

D.G.A. 79

INDIA

# A DESCRIPTIVE CATALOGUE

OF THE

# SANSKRIT MANUSCRIPTS

IN THE

## GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

R.N. 3931

BY

S. KUPPUSWAMI SASTRI, M.A.,
CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY AND
PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY,
PRESIDENCY COLLEGE, MADRAS.

23617

*Prepared under the orders of the Government of Madras.*

VOL. XXI—KĀVYAS—(continued).

091.4912
G.O.M.L.M.
OFFICE OF THE DIRECTOR-GENERAL OF ARCHAEOLOGY
Libr. 1542
INDIA.

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1918.

# ERRATA.

| Page | Line | *For* | *Read* |
|---|---|---|---|
| 6431 | 18 | Bhāṇa | Bāṇa |
| 8495 | 32 | af | of |
| 8518 | 1 | विद्धसालभञ्जिकाव्याख्या मार्गदर्शिनीसहिता | विद्धसालभञ्जिका-मार्गदर्शिनी व्याख्यासहिता |
| 8584 | 12 | as the above | as that described under No. 12080 |

[illegible]

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No. 23617
Date 23.4.56.
Call No. 091.4912/G.O.M.L.M.

# CONTENTS.

CLASS X—KĀVYAS—*cont.*

5. *Biography and History.*


| Name of the work. | Numbers |
|---|---|
| Aṇumadhvavijaya ... | 12144 |
| Jayatīrthavijaya ... | 12145 |
| Jayatīrthavijayavyākhyā ... | 12146 |
| Tīrthaprabandha ... | 12147 |
| Tīrthaprabandhavyākhyā : Gurubhāvaprakāśikā ... | 12148, 12149 |
| Divyasūricarita ... | 12150 |
| Dhanyakumāracarita ... | 12151 |
| Nigamāntācāryacarita ... | 12152, 12153 |
| Madhvavijaya ... | 12154 to 12159 |
| Madhvavijayavyākhyā : Padārthadīpikā ... | 12160 |
| Madhvavijayavyākhyā : Padārthadīpikōdbodhikā ... | 12161 |
| Madhvavijayavyākhyā : Padārthaprakāśikā ... | 12162, 12163 |
| Yaśōdharacarita ... | 12164 |
| Yaśōdharacarita with Kanarese meaning ... | 12165 |
| Vardhamānacarita ... | 12166 to 12168 |
| Vallabhācāryacarita ... | 12169 |
| Vidvanmodataraṅgiṇī ... | 12170 |
| Śaṅkarācāryacarita ... | 12171, 12172 |
| Śaṅkaravijayavilāsa ... | 12173 |
| Saṁkṣēpaśaṅkaravijaya ... | 12174 |
| Sulaimaccarita ... | 12175 |


6. *Kathā (Stories).*


| | |
|---|---|
| Kathāsaritsāgara ... | 12176 to 12179 |
| Kauṭilyakathāsāra ... | 12180 to 12183 |
| Pañcatantra ... | 12184 to 12189, 12192, 12193 |
| Pañcatantra with Kanarese meaning ... | 12190, 12191, 12196 to 12198 |
| Pañcatantra with Telugu meaning ... | 12194, 12195 |
| Puṇyāsravakathā ... | 12199 |
| Prahlādavijaya ... | 12200 |
| Bṛhatkathāmañjarī ... | 12201 |
| Bhōjacaritra ... | 12202 to 12205 |
| Rājaśēkharacaritra ... | 12206 |
| Vikramārkacarita ... | 12207 to 12209 |
| Vētālapañcaviṁśatikathā ... | 12210, 12211 |
| Śukasaptatikathā ... | 12212 to 12214 |
| Hanumadvijaya ... | 12215, 12216 |
| Hitōpadēśa ... | 11217, 12218 |

## 7. *Campukāvya.*


| Name of the work. | Numbers |
|---|---|
| Uttaracampu ... | 12219 to 12221 |
| Uttaracampurāmāyaṇa ... | 12222, 12223 |
| Uttararāmāyaṇacampu ... | 12224 |
| Uṣāpariṇayacampu ... | 12225 |
| Kālindīmukundacampu ... | 12226, 12740 |
| Kṛṣṇabhūṣaṇa ... | 12227 |
| Kṛṣṇavilāsa ... | 12228 |
| Kṛṣṇavilāsacampu with the commentary Kalānidhi ... | 12229 |
| Gōdāpariṇayacampu ... | 12230 to 12232 |
| Campubhārata ... | 12233 to 12246 |
| Campubhāratavyākhyā ... | 12247 |
| Campubhāratavyākhyā : Sarasvatīvilāsa ... | 12248 to 12255 |
| Campurāmāyaṇa ... | 12256 to 12260, 12746 |
| Campurāmāyaṇavyākhyā : Padayōjanā ... | 12261 to 12264 |
| Campurāmāyaṇa with the commentary Sāhityamañjūṣikā ... | 12265 to 12269 |
| Campurāmāyaṇavyākhyā ... | 12290 |
| Jīvandharacampu ... | 12291 to 12294 |
| Tattvaguṇādarśa ... | 12295 |
| Tattvaguṇādarśavyākhyā ... | 12296 |
| Tīrthayātrāprabandha ... | 12297 to 12299 |
| Dattātrēyacampū ... | 12300, 12301 |
| Divyacāpavijayacampū ... | 12302 |
| Draupadīpariṇayacampū ... | 12303, 12304 |
| Nalacampū ... | 12305 |
| Nāthamunivijayacampū ... | 12306, 12307 |
| Nīlakaṇṭhavijayacampū ... | 12308 to 12315 |
| Nṛgamōkṣa ... | 12316 |
| Pāñcālīsvayaṃvara ... | 12317 |
| Puradēvacampu ... | 12318 |
| Bāṇāsuravijayacampu ... | 12319 |
| Bālabhāgavata ... | 12320 to 12322 |
| Bālabhāgavatavyākhyā : Sudhīcandrikā ... | 12323, 12324 |
| Bālabhāgavatavyākhyā : Kavirañjanī ... | 12325 |
| Bhāgavatacampu ... | 12326 to 12330, 12760 |
| Bhāgavatacampuvyākhyā : Ratnāvalī ... | 12331 |
| Bhāratacamputilaka ... | 12332 |
| Bhaiṣmīpariṇayacampu ... | 12333 |
| Madrakanyāpariṇayacampu with Viṣamapadaṭippaṇī ... | 12334 |
| Mānavēdacampubhārata ... | 12335 |
| Mārgasahāyacampu ... | 12336 |
| Mīnākṣīkalyāṇacampu ... | 12337 |
| Yatirājavijayacampu ... | 12338 |
| Rājasūyaprabandha ... | 12339 |
| Rāmānujacampu ... | 12340 to 12342 |
| Rāmābhiṣēkacampu ... | 12343, 12344 |
| Varadābhyudayacampu ... | 12345 to 12350 |
| Vibudhānandaprabandha ... | 12351 |

7. *Campukāvya*—cont.


| Name of the work. | Numbers |
| --- | --- |
| Viśvaguṇādarśa ... ... ... ... ... ... ... | 12352 to 12364 |
| Vēdāntācāryavijayacampu ... ... ... ... ... ... | 12365 to 12371 |
| Vedāntācāryavijayacampūvyākhyā ... ... ... ... ... | 12372, 12373 |
| Vaikuṇṭhavijayacampu ... ... ... ... ... ... | 12374, 12375 |
| Vyāghrālayēśāṣṭamīmahōtsavacampu ... ... ... ... | 12376 |
| Śaṅkarānandacampu ... ... ... ... ... ... ... | 12377 |
| Śivacaritracampu ... ... ... ... ... ... ... | 12378 |
| Santānagōpālaprabandha ... ... ... ... ... ... | 12379 |
| Ācāryadigvijaya ... ... ... ... ... ... ... | 12380 |
| Ānandaraṅgavijayacampu ... ... ... ... ... ... | 12381 |


8. *Gadyakāvya*.


| Name of the work. | Numbers |
| --- | --- |
| Kādambari ... ... ... ... ... ... ... ... | 12382 to 12396 |
| Daśakumāracarita ... ... ... ... ... ... ... | 12397 |
| Daśakumāracaritavyākhyā : Padacandrikā ... ... ... | 12398 |
| Draupadīcaritra ... ... ... ... ... ... ... | 12399 |
| Rāmakathā ... ... ... ... ... ... ... ... | 12400, 12401 |
| Rāmakathāvyākhyā ... ... ... ... ... ... ... | 12402 |
| Vāsavadattā ... ... ... ... ... ... ... ... | 12403 to 12413 |
| Vāsavadattāvivaraṇa ... ... ... ... ... ... ... | 12414 to 12416 |
| Vāsavadattāvyākhyā ... ... ... ... ... ... ... | 12417 to 12420 |
| Vāsavadattāvyākhyā : Tattvadīpanī ... ... ... ... | 12421, 12422 |
| Vēmabhūpālacarita ... ... ... ... ... ... ... | 12423 |
| Śaṅkaravijaya ... ... ... ... ... ... ... ... | 12424 to 12427 |
| Harṣacaritra ... ... ... ... ... ... ... ... | 12428 |


9. *Drama*.


| Name of the work. | Numbers |
| --- | --- |
| Anaṅgajīvana ... ... ... ... ... ... ... ... | 12429 |
| Anaṅgabrahmavidyāvilāsa ... ... ... ... ... ... | 12430 |
| Anaṅgavijaya ... ... ... ... ... ... ... ... | 12431 |
| Anargharāghava ... ... ... ... ... ... ... | 12432 to 12441 |
| Anargharāghavavyākhyā ... ... ... ... ... ... | 12442 to 12453 |
| Anargharāghavavyākhyā : Iṣṭārthakalpavallī ... ... ... | 12454 to 12459 |
| Anargharāghavavyākhyā : Tātparyadīpikā ... ... ... ... | 12460 |
| Anargharāghavavyākhyā : Pañjikā ... ... ... ... | 12461 |
| Anargharāghavaślōka ... ... ... ... ... ... ... | 12462 |
| Anumitipariṇaya ... ... ... ... ... ... ... | 12463 |
| Ambujavallīkalyāṇa ... ... ... ... ... ... ... | 12464 |
| Abhijñānaśākuntala ... ... ... ... ... ... ... | 12465 to 12481 |
| Abhijñānaśākuntalavyākyā : Arthadyōtanikā ... ... ... | 12482 |
| Abhijñānaśākuntalavyākhyā : Kumāragirirājīya ... ... ... | 12483 to 12487 |
| Abhijñānaśākuntalavyākhyā : Sāhityaṭīkā ... ... ... | 12488 |
| Abhijñānaśākuntalavyākhyāna ... ... ... ... ... | 12489 |
| Abhijñānaśākuntalaprākṛtavivṛti ... ... ... ... ... | 12490 |
| Abhijñānaśākuntalaślōka ... ... ... ... ... ... | 12491 |
| Abhiṣēkanāṭaka ... ... ... ... ... ... ... | 12492, 12493 |
| Arthapañcakanāṭaka ... ... ... ... ... ... ... | 12494 |
| Ānandarāghava ... ... ... ... ... ... ... | 12495 |

9. *Drama*—cont.


| Name of the work. | Numbers |
|---|---|
| Āścaryacūḍāmaṇināṭaka | 12496 to 12498 |
| Āścaryacūḍāmaṇināṭaka with commentary | 12499 |
| Uttararāmacarita | 12500, 12738 |
| Uttararāmacaritavyākhyā | 12501 to 12503 |
| Kandarpavijaya | 12504 |
| Kamalinīkalahaṁsa | 12505 to 12508 |
| Kamalinīrājahaṁsa | 12509 |
| Karpūramañjarīvyākhyā | 12510 |
| Kalāvatīkāmarūpa | 12511 |
| Kālikēliyātrābhāṇa | 12512 |
| Gōdāpariṇaya | 12513 |
| Caṇḍakauśika | 12514 |
| Candrakalākalyāṇa | 12515 |
| Candrarēkhāvilāsa | 12516, 12517 |
| Jānakīpariṇaya | 12518 |
| Ḍamaruka | 12519 |
| Tapatīsaṁvaraṇa | 12520 |
| Dānakēḷikaumudī | 12521 |
| Draupadīpariṇaya | 12522 to 12524 |
| Dhanañjayavijayavyāyōga | 12525, 12526 |
| Narakāsuravijaya | 12527 to 12530 |
| Navamālikā | 12531 |
| Nāgānanda | 12532 to 12534 |
| Nāgānandavyākhyā | 12535 |
| Nārāyaṇīvilāsa | 12536, 12537 |
| Pañcabāṇavijayabhāṇa | 12538, 12753 |
| Pārvatīpariṇaya | 12539 |
| Pūrṇapuruṣārthacandrōdaya | 12540, 12541 |
| Pratijñāyaugandharāyaṇa | 12542 |
| Pratimānāṭaka | 12543, 12544 |
| Pradyumnānandīya | 12545 to 12547 |
| Prapannasapiṇḍīkaraṇanirāsa | 12548, 12754 |
| Prabōdhacandrōdaya | 12549 to 12559, 12755 |
| Prabōdhacandrōdayavyākhyā : Prauḍhaprakāśa | 12560, 12561 |
| Prasannarāghava | 12562 to 12568 |
| Bālarāmāyaṇa | 12569, 12570 |
| Bhagavadajjuka | 12571 to 12573 |
| Bhaimīpariṇaya | 12574, 12575 |
| Madanagōpālavilāsa | 12576 |
| Madanamahōtsavabhāṇa | 12577 |
| Madālasānāṭaka | 12578 |
| Madālasāvivaraṇa | 12579 |
| Mallikāmāruta | 12580 |
| Mahānāṭaka | 12581, 12582 |
| Mahāvīracarita | 12583 to 12585 |
| Mahāvīracaritavyākhyā : Pradyōtinī | 12586, 12587 |
| Mahiṣamaṅgalabhāṇa | 12588 |
| Mālatīmādhava | 12589 to 12594 |

9. *Drama*—cont.


| Name of the work. | Numbers |
|---|---|
| Mālatīmādhavavyākhyā ... | 12596 to 12604 |
| Mālavikāgnimitra ... | 12605 to 12608 |
| Mālavikāgnimitravyākhyāna : Kumāragirirājīya ... | 12609, 12610 |
| Mālavikāgnimitravyākhyā ... | 12611 |
| Mālavikāgnimitravyākhyā : Guṇōttarā ... | 12612 |
| Mukundānandabhāṇa ... | 12613 to 12615 |
| Mudrārākṣasa ... | 12616 to 12619 |
| Mudrārākṣasavyākhyā : Tātparyabōdhinī ... | 12620 |
| Mudrārākṣasavyākhyā ... | 12621 to 12623 |
| Mṛcchakaṭikā ... | 12624 |
| Mṛcchakaṭikāvivaraṇa ... | 12625 |
| Yayātitaruṇānanda ... | 12626 |
| Yayātidēvayānīcarita ... | 12627 |
| Raghuvīracarita ... | 12628 |
| Ratnāvalī ... | 12629 to 12631 |
| Ratnēśvaraprasādana ... | 12632 |
| Rasikajanarasōllāsabhāṇa ... | 12633 |
| Rāmarājyābhiṣēkanāṭaka ... | 12634, 12635 |
| Rāmābhyudaya ... | 12636 |
| Rukmiṇīpariṇaya ... | 12637, 12638 |
| Rōcanānanda ... | 12639 |
| Lakṣmīsvayaṁvara ... | 12640, 12641 |
| Laṭakamēlaka ... | 12642 |
| Vallīpariṇaya ... | 12643 |
| Vasantatilakabhāṇa ... | 12644 to 12658, 12774 |
| Vasumaṅgalanāṭaka with commentary ... | 12659 to 12661 |
| Vāsantikāpariṇaya ... | 12662, 12663 |
| Vāsalakṣmīkalyāṇa ... | 12664 |
| Vikramōrvaśīya ... | 12665 to 12674 |
| Vikramōrvaśīyavyākhyā : Kumāragirirājīyā ... | 12675 |
| Vikramōrvaśīyavyākhyā ... | 12676 |
| Vijayēndirāpariṇayanāṭaka ... | 12677 |
| Vidagdhamādhava ... | 12678 |
| Vidagdhamādhavaprākṛtavivaraṇa ... | 12679 |
| Viddhasālabhañjikā ... | 12680 |
| Viddhasālabhañjikā with the commentary Mārgadarśinī ... | 12681 |
| Vidyāpariṇaya ... | 12682 |
| Vivēkavijaya ... | 12683, 12684 |
| Vṛṣabhānujānāṭikā ... | 12685 |
| Vēṅkaṭēśaprahasana ... | 12686 to 12690 |
| Vēṇīsaṁhāra ... | 12691 to 12694 |
| Vēṇīsaṁhāraṭīkā ... | 12695 |
| Vēdāntavilāsa ... | 12696 to 12700 |
| Śāradānandabhāṇa ... | 12701 |
| Śṛṅgāradīpakabhāṇa ... | 12702 |
| Śṛṅgārapāvanabhāṇa ... | 12703 |
| Śṛṅgārabhūṣaṇabhāṇa ... | 12704 to 12706 |

9. *Drama*—cont.


| Name of the work. | Numbers |
|---|---|
| Śṛṅgārarasōdayabhāṇa | 12707 |
| Śṛṅgārarājatilakabhāṇa | 12708 |
| Śṛṅgārasarvasvabhāṇa | 12709 |
| Saṅkalpasūryōdaya | 12710 to 12712, 12779 |
| Saṅkalpasūryōdayavyākhyā : Prabhāvilāsa | 12713, 12714 |
| Saṅkalpasūryōdayavyākhyā | 12715 to 12718 |
| Sampatkumāravilāsabhāṇa | 12719 |
| Sītādivyacaritra | 12720 |
| Sītārāghavanāṭaka | 12721 |
| Subālāvajratuṇḍanāṭaka | 12722 |
| Subhadrādhanañjaya | 12723 to 12726, 12728 |
| Subhadrādhanañjayavyākhyāna : Vicāratilaka | 12727 |
| Subhadrāpariṇaya | 12729 |
| Svapnavāsavadatta | 12730 |
| Sōmavallīyogānanda | 12731, 12732 |
| Harivilāsabhāṇa | 12733 |
| Hastigirimāhātmya | 12734 |


10. *Kāvya supplement.*


| | |
|---|---|
| Acyutarāyābhyudaya | 12735 |
| Āgnīdhrarāmāyaṇasāra | 12736 |
| Uttararāghavīya | 12737 |
| Kalividambana | 12739 |
| Kālindīmukundavyākhyā : Sāhityadarpaṇa | 12741, 12742 |
| Kṛṣṇaprabandha | 12743 |
| Kṛṣṇavijaya | 12744 |
| Gītagōvinda | 12745 |
| Cāṭuślōka | 12747 to 12749 |
| Cāṭuślōka with Telugu stanzas | 12750 |
| Navasāhasāṅkacaritra | 12751 |
| Nītisāra with Tamil commentary | 12752 |
| Prahēlikā | 12756 |
| Bhadrācalacampū | 12757 |
| Bhartṛharisubhāṣita | 12758, 12759 |
| Maṇimañjarī with commentary | 12761 |
| Mahānāṭakasudhānidhi | 12762 to 12769 |
| Yādavābhyudaya | 12770 |
| Raghuvaṁśa | 12771 |
| Rājakālanirṇaya | 12772 |
| Vallīpariṇaya | 12773 |
| Vikramasēnacarita | 12775 |
| Śiśupālavadha | 12776 |
| Śiśupālavadhavyākhyā | 12777 |
| Śrutakīrtivilāsacampū | 12778 |
| Sindūraprakara with Tamil meaning | 12780 |
| Subhāṣitatriśatīvyākhyāsaṅgrahaślōka | 12781 |
| Haribhaktisudhārṇava | 12782 |
| Hitōpadēśa | 12783 |

# A DESCRIPTIVE CATALOGUE
OF THE
# SANSKRIT MANUSCRIPTS.
## VOLUME XXI.

---

## CLASS X. KAVYAS—(*continued*).
### 5. BIOGRAPHY AND HISTORY.

---

### No. 12144. अणुमध्वविजयः.
### AṆUMADHVAVIJAYAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 72*a* of the MS. described under No. 10101.

Complete.

This work is, as its name indicates, a summary of the incidents in the life of Ānandatīrthācārya, the founder of the Dvaita Vēdānta, described in the Madhvavijaya in 18 Sargas, by the same author, as that of the latter, viz., Nārāyaṇapaṇḍitācārya, son of Trivikramapaṇḍitācārya. A commentary on this work has been described under R. No. 1320(*b*). This work is also called Pramēyanavamālikā.

**Beginning :**

श्रीशप्रीत्यै प्रजातः सुमहितमहिमा श्रीहनूमान्निदेशा-
द्रामस्योल्लङ्घिताब्धिः सहरिरथ गतः सेतुना पिष्टदुष्टः ।
भूभृन्नी रावणारिं पुरगमुरुदयं ’पूजयित्वा ससीतं
पश्यन् किम्पूरुषे तं सततमपि महाप्राणमुख्योऽवतान्नाम् ॥
भीमोऽभूद्यो न भेधश्चि(श्व)क्तिरिपुकृतापस्मणोदी सलीलं
रक्षोघ्नः प्रासकृष्णो मखकृदुत वने दुष्टहा कीचकघ्नः ।
हत्वा दुर्योधनादीन्·स्वपदमुपगतो यद्विषः क्रोधतन्वा
भूयाद्भू(त्वा भू)मौ कुशास्त्रं व्यधिषत मणिमत्पूर्वकाः पातु सोऽस्मान् ॥
अज्ञानोत्सादनार्थं सुरवरवचसा सूचितो रूप्यभर्त्रा
जातो मध्याल्यार्याद्गुरुमतितपसो वासुदेवाभिधानः ।

योऽ(गो)दात्रे मोक्षदाता रजतपतिपदासेवको भूतभर्त्रा
मान्यः प्राप्तः कुलस्थैरपि निजसहजातार्पितः प्रीयतां मे ॥
आनन्दं मन्दहासामृतरसकलया सन्दधानः प्रजाना-
मास्येन्दोः शोभमानैरपि कलवचनैर्बाललीलाविलासैः ।
गोपुच्छालम्बनाद्यैर्वृषपतिविहितापत्प्रणोदी प्रणुद्या-
दज्ञानाद्यापदं मे स्वयमिह भगवान् वासुदेवोऽसुदेवः ॥
एकाकी योजनाभ्यां व्यवहितमगमद्यस्त्रिवर्षोऽमरौको
यो लाल्यो लोकमात्रा स्वलिपिपरिचये तातविस्मेरताकृत् ।
प्राज्ञंमन्यं शिवाख्यं परिषदि जितवान् शाब्दिनाम(मा)र्थमूचे
दुर्गे पित्रोपनीतः सुरवरमहितो मद्यतां मे वचोभिः ॥
पायान्मां यो भुजङ्गं सदरिमदमयद् द्रागुपाध्यायसेवी
विश्वेभ्योऽवेगदूरप्लवनजवनियुद्धातिवीर्यातिशायी ।
येनास्ता मूढशङ्का श्रुतिशुचिवचसाऽलं गुरोः शीर्षशूलां
सख्युर्नारायणज्ञोऽथ य उपनिषदं व्याख्यतास्मै सुराद्यैः ॥
संन्यासे बद्धबुद्धिः कृतहरिनमनः पार्थपूज्यं पतिं प्राक्
प्राप्तं गुर्वाज्ञयालं सगुणहरिविदं सत्तपस्तृप्तदेवात् ।
प्राप्तं सर्वज्ञशिष्याख्यवरमुपगतो द्विः स्वतातं निषेद्धुं
प्राप्तं चानुत्तरं यो व्यधित सहजवान्मातरं चावतान्माम् ॥
पूर्णप्रज्ञाख्य आसीद्यतिकुलतिलको यः शुभाचार ईश-
प्रत्तोऽस्मा ईश्वराज्ञागतसुरसरिति स्नानकृज्जैत्रपत्रः ।
दुष्पद्यच्छिच्च लोके प्रवचनचतुरः सत्पुराणेतिहास-
स्योक्तौ मेधाप्रदर्शी प्रदिशतु सुदृशं मध्यमूज्ज्वग्रणीः सः ॥
साक्षादानन्दतीर्थोऽनुमितिभिरुरुजियोऽनुमातीर्थनामा
विद्याब्धि वादिसिंहं सपदि विजितवान् दुष्टभाष्यापनोदी ।
अच्छेद्योक्तिप्रमोदं पितुरपि कृतवान्नर्मगर्भं गुरूक्तो
भाष्यं कर्तुं ब्रवोचल्लियसखयतये सूत्रभावं स माव्यात् ॥

**End:**

दशममतिविक्रमं बहुविधात्मना हेमव-
त्सुमध्वविजयाभिधं व्यधित भावदीपाह्वयम् ।
प्रमेयनवमालिकां पुनरिमां च दक्षां च तां
सतां श्रवणभूषणं व्यतनुतैष नारायणः ॥

**Colophon:**

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायणपण्डिता-
चार्यविरचितप्रमेयनवमालिका समाप्ता ॥

The scribe adds:—

विरोधिसंवत्सरकार्तिकान्त्ये दिवाकरोमात्रनिशाकरेण ।
अहोवलेन(ना)लिखिते[च्छ]सुपुस्तकं पूर्णं सुकाले शुभशुक्रवारे ॥

---

No. 12145. जयतीर्थविजयः.

JAYATĪRTHAVIJAYAḤ.

Substance, palm-leaf. Size, 14¾ × 1⅝ inches. Pages, 61. Lines, 4 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Jayatīrthavijaya-vyākhyā 32*a*.

By Saṅkarṣaṇa. Same work as that described under R. No. 858(*a*) of the Triennial Catalogue, Vol. II, Part I-A, wherein see for the beginning.

Contains the first five Sargas.

**End:**

जयतीर्थवचस्सुरापगौघो भगवत्पादनितान्तसङ्गपूतः ।
कुमु(म)तोरुतटप्रपातवेगो भुवने पावनपावनः (पुनातु) ॥
जय जय जयतीर्थतीर्थराज[ा] प्रतमतिवाक्सुरनिम्नगाप्रवाहे ।
त्वदमलवचनेनजातमेते प्रदिश ममापि (रुचिं) सदातिपुण्ये ॥
मुखसहस्रकृ(सु)वर्ण्यचरित्रधेने(र्जे)यमुनेर्महिमेषदिहोच्यते ।
गुरुभक्तिलेशस्य विभूषणं भवतु कार्यकृतिप्रवरं मम (?) ॥
जयतीर्थहृदावासानन्दतीर्थरघूत्तमौ ।
प्रीयेतां जयतीर्थेन्द्रविजयेनामुना मम ॥

**Colophon:**

शेषाचार्यसुतश्रीमत्सङ्कर्षणकृते शुभे ।
जयतीर्थार्यविजये सर्गोऽयं पञ्चमोऽजनि ॥

---

No. 12146. जयतीर्थविजयव्याख्या.

JAYATĪRTHAVIJAYAVYĀKHYĀ.

Pages, 9. Lines, 4 on a page.

Begins on fol. 32*a* of the MS. described under the last number.

Contains the second Sarga incomplete.

A commentary on the work described under the last number. The name of the commentator is not known.

**Beginning :**

अक्षोभ्यतीर्थमहिमानं वर्णयति अनेन सर्गेण—

अक्षोभ्येति । गुरुहंसकुलावतंसः गुरुहंसानां परमहंसानां कुलस्यावतंसः शिरो(र)त्नभूतः ; अनेन हंसपक्षित्वं ध्वन्यते । संक्षोभिताखिलकुपक्षिगणः संक्षोभितः अखिलानां कुपक्षिणां कुत्सितसिद्धान्तिनां गणः येन स तथोक्तः ।

**End :**

अभ्रतलस्पृगग्रम्, अभ्रतलमाकाशतलं स्पृशतीत्यभ्रतलस्पृक् ; द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरमित्यमरः । तादृशमग्रभागो यस्य सः तथोक्तः । तरुं वृक्षमारुह्य ; तस्मादिति शेषः । पातमनसौ, पाते अधःपतने मनः ययोस्तौ तथोक्तौ अभूतां किल । भू सत्तायां लुङ् ।

---

No. 12147. तीर्थप्रबन्धः.

TIRTHAPRABANDHAH.

Substance, palm-leaf. Size, 11⅝ × 1¼ inches. Pages, 26. Lines, 8 on a page. Character, Nandinâgarî. Condition, fair. Appearance, old.

Begins on fol. 67*a*. The other work herein is Tîrthaprabandha-vyâkhyâ 1*a*.

Complete.

A short poem describing the greatness and importance of the holy waters, places and gods: by Vâdirâjayati, who states that he actually visited those places.

**Beginning :**

हरिक्षीराम्बुधेः स्वैरं भवघर्मरिपोर्मनः ।
विहराहरहश्चित्रचारित्रचतुरोर्मिषु ॥
हयग्रीवदयासिन्धुरन्धूकृतभवाम्बुधिः ।
प्रबन्धमप्रविद्वन्द्वं करोत्वेनमनेनसम् ॥
आजन्मभूमेरटतोऽखिलेषु तीर्थेषु तद्वर्णनभारमुद्रा ।
आयासमस्मन्मृदुमानसस्य वायुर्मुहुः कृन्ततु मध्वरूपी ॥
वागीशतीर्थमुनिवर्य भवद्दयाम्बुयोगेन पावय मनोगृहमन्वहं मे ।
नागेन्द्रतल्पमधिरोपय तत्पदाब्जरागेण रञ्जय कलिं जय तद्विविक्षुम् ॥
तीर्थक्षेत्रतदीशानां माहात्म्यानि यथामति ।

वादिराजो यतिः स्तौति पद्यैः कतिपयैः कविः ॥

कर्णे पदन्यस्तरुची रिरंसुर्वाराशिवस्त्रे जघनाद्रि यस्याः ।
अमूमुचद्बाणकरेण भूमेः श्रीमार्गवः सा जयति क्षितिर्नः ॥

काश्रीतले कृतपदापि सरित् सुराणामायाति यद्गतपवित्रसरोऽधुनापि ।
रुद्रादिदेवगणसेवितसर्वभागं तद्रौप्यपीठपुरमप्रतिमं त्रिलोक्याम् ॥

**End :**

पद्यानि प्रथितापगाच्युतयशोहृद्यानि तत्खण्डिता-
वद्येनामलवादिराजयतिना मध्वोक्तिशुद्धात्मना ।

बद्धान्यध्वरसिद्धसत्कृतचयोद्रिक्तोरुपुण्यप्रदा-
न्यद्धा यः पठते शृणोति स भवेदुद्दामधाम मि(श्रि)यः ॥

नानावृत्तं स्वयात्राक्रमपरिचितसुक्षेत्रमाहात्म्ययुक्तं
शब्दालङ्कारबद्धं समलकुलहरं श्लाघनीयार्थहृद्यम् ।
श्रीनाथप्रीतिहेतोर्हयवदनकृपाम्भोधिसम्भूतरत्नं
चक्रे तीर्थप्रबन्धं बहुगुणभरितं वादिराजो यतीन्द्रः ॥

**Colophon :**

इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजपूज्यचरणविरचिते तीर्थप्रबन्धे दक्षिणप्रबन्धः समाप्तः ॥

---

## No. 12148. तीर्थप्रबन्धव्याख्या—गुरुभावप्रकाशिका.

## TĪRTHAPRABANDHAVYĀKHYĀ : GURUBHĀVAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 181. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains the Pūrvaprabandha and the Dakṣiṇaprabandha only.

A commentary on the work described under the last number. The author is said to have made a pilgrimage to all the holy waters and places described in the work. By Nārāyaṇācārya.

**Beginning :**

तपोविद्याविरक्त्यादिसद्गुणौस(घा)करानहम् ।
वादिराजगुरून् वन्दे हयग्रीवदयाश्रयान् ॥

वादिराजमुखाम्भोजनिस्सृता वाक्सरस्वती ।
अश्वग्रीवयशोगङ्गासङ्गास्मान् पावयत्वलम् ॥

वादिराजमुनीन्द्रेण रचितं सज्जनामृतम् ।
तीर्थप्रबन्धमद्वन्द्वं व्याकुर्वेऽहं यथामति ॥

वादिराजोक्तिचातुर्यमशक्यं ज्ञातुमञ्जसा ।
तथापि वक्ष्ये तच्छिक्षामनुवृत्त्यैव लेशतः ॥

अथानवरतवाजिवदनाराधनलब्धविद्यातिशयः कविकुलाग्रणीर्वादिराजमुनिः स्वज(जन)नमहिमारभ्य स्वसंचरितसकलतीर्थक्षेत्रमहिमावलोकनेन समुल्लसितमनः-प्रसादस्तन्महिमानुवर्णनलोलुपतया तीर्थक्षेत्रस्तुत्यादिरूपप्रबन्धं चिकीर्षुः प्रारिप्सिताखिलशुभकार्येषु श्रीमन्नारायणगुणानुस्मरणरूपमङ्गलं कर्तव्यमिति स्वान्तोपलक्षितसज्जनान् प्रत्युपदिशति—हरिक्षीराम्बुधेरिति । हे मनः त्वं स्वस्य विष्णुभक्ततया स्वमनस्सदृशसकलविष्णुभक्तमनसां विहरणयोग्यत्वस्यापि लाभेन ग्रन्थस्य साधिकारिकत्वसूचनाय चेयं सम्बुद्धिः । भवघर्मरिपोः भवः संसारः स एव घर्मः तस्य रिपोः क्षीराम्बुधिरपि घर्मापहारी । अयमपि भवघर्मापहारी ।

See under the next number for the end.

**Colophon:**

इति श्रीमत्कविकुलतिलकवादिराजपूज्यचरणविरचिततीर्थप्रबन्धव्याख्यायां गुरुभावप्रकाशिकायां दक्षिणप्रबन्धः समाप्तः ।

---

No. **12149.** तीर्थप्रबन्धव्याख्या—गुरुभावप्रकाशिका.
TIRTHAPRABANDHAVYAKHYA: GURUBHAVA-PRAKAŚIKA.

Pages, 132. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 12147.

Complete. Wants one leaf in the beginning of the Pūrvaprabandha.

Same work as the above, but with slightly different readings. It is stated in the colophon that the commentator, Nārāyaṇācārya, was the son of Lakṣmīpatibhaṭṭa. In a stanza at the end, Vādirāja is said to have composed also Cakramīmāṁsā, Yuktimallikā and Mukundalīlā

**Beginning:**

हृञ् हरण इति धातोर्विपूर्वकाल्लोट् । उपसर्गवशादेव विहरणार्थकत्वं च । हरिचारित्रनिरूपकतयास्य ग्रन्थस्य विषयत्वं सूचितम् । स्मरणे स्वतन्त्रसाधनत्वान्मनसः कर्तृत्वमुपचारः । हरिक्षीराम्बुधेरित्यनेन सकलतीर्थानां पवित्रीकरणशक्तिरपि हरिसन्निधानादेव द्योत्यते । रूपकमलङ्कारः । पथ्या वृत्तम् ।

अनेन हयग्रीवदयासिन्धोरसदृशत्वमुपपाद्य स्वग्रन्थस्यापि असदृशत्वं प्रार्थयते हयग्रीवेति ।

**End:**

पद्यानि श्लोकान् यः पुरुषः श्रद्धा सम्यक् भक्त्यादिपूर्वकं पठते पठति शृणोति परैः पठ्यमानः सः श्रियः ऐहिकामुष्मिकसम्पदः उद्दामधाम उत्कृष्ट-का(वा)सः भवेत् जायते । तस्मिन् सर्वसंपदः सन्निहिता भवन्ति ।

"यत्सन्निधानतः तीर्थक्षेत्राणि भुवनत्रये ।
(महतां) महिमान्यासं तस्मै श्रीपतये नमः ॥"

यश्चक्रे चक्रमीमांसां यश्चक्रे युक्तिमल्लिकाम् ।
मुकुन्दलीलां यश्चक्रे तस्मै काव्यकृते नमः ॥

**Colophon:**

इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजपूज्यचरणविरचितस्य तीर्थप्रबन्ध-(स्य)टीकायां लक्ष्मीपतिभट्टोपाध्यायसूनुना नारायणाचार्येण विरचितायां गुरुभाव-प्रकाशिकायां समाप्तोऽयं दक्षिणप्रबन्धः ॥

तीर्थप्रबन्धः समाप्तः ॥

तीर्थप्रबन्धटीकाया लेखनं तु कृतं मया ।
नरसिंहाभिधानेन प्रीयन्तां गुरवो मम ॥

---

### No. 12150. दिव्यसूरिचरितम्.
### DIVYASŪRICARITAM.

Substance, palm-leaf. Size, 14 × 1¾ inches. Pages, 134. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Raṅganāthastōtra 68*a*.

Breaks off in the 12th Sarga.

A poem in 12 Sargas giving an account of the lives of the 12 Draviḍa saints, the proselytizers of the Śrī-Vaiṣṇava religion. It was composed by Śrīnivāsakavi of Kāśyapagōtra, also called Kavivaidya-purandara and Śrīraṅga-Garuḍavāhanapaṇḍita.

**Beginning:**

प्रभार्काविव संयुक्तौ भवभीतिनिवृत्तये ।
रक्षितारौ त्रिजगतां लक्ष्मीनारायणौ भजे ॥

क दिव्यसूरिचरितं क च मे मन्दशेमुषी ।
नियन्तुकामोऽस्मि गजं साहसात् बिसतन्तुना ॥

प्राचां प्रशस्ति पद्मानां प्रार्थये प्राकृताग्रणीः ।
पिपासोरगमाग्रस्थं क्षौद्रं पङ्गोः समोऽस्म्यहम् ॥

पूर्वाचार्यादृतं वृत्तं सूरीणामाद्रियेऽप्यहम् ।
द्युमणिद्योतितापि द्यौः खद्योतेनापि भासते ॥

प्राचीनवाचां विजयं चरितं वर्णयाम्यहम् ।
गजेन प्रस्थिते मार्गे किं न याति पिपीलिका ॥

दोषाश्लिष्टापि मे सूक्तिर्विद्वद्भ्यो रोचते भृशम् ।
चन्द्रिकेव चकोरेभ्यः सर्वाशान्तरचारिणी ॥

सतां भवतु मे वाणी चपलापि मुदे परम् ।
शिशोरव्यक्तवचनं गुरुभ्यः किं न रोचते ॥

श्रीशसङ्कल्पपात्राणां जगद्रक्षाकरात्मनाम् ।
भक्तिप्रपत्त्योरुद्रेकसमुद्रीकृतचेतसाम् ॥

* * *

सरोमुखानां भक्तानां लक्ष्मणार्यावसायिनाम् ।
अवतारापदानादीन् वक्ष्येऽहं विदितं यथा ॥

शृणुध्वं सात्त्विकोत्तंसाः सूक्तिं सूरिषु(कथाश्रयाम्) ।
पयोऽभिलाषात् पात्रं हि परिगृह्णन्ति सज्जनाः ॥

यन्नाथः फणिराजभोगशयनो रङ्गेश्वरो यत्पिता
सौम्यश्रीसखमङ्गलाधिपविभुः सर्वज्ञचूडामणिः ।
यन्माता भुवनाधिपा विहगराड्वाहाभिधश्रीसदः
काव्ये दीव्यति दिव्यसूरिचरिते सर्गोऽयमादिर्गतः ॥

**Colophon:**

इति काश्यपकुलतिलकस्य रङ्गाधिपारोग्यशालावल्लभस्य कविवैद्यपुरन्दरापरनामधेयस्य श्रीरङ्गगरुडवाहनपण्डितस्य श्रीनिवासकवेः कृतौ दिव्यसूरिचरिते महाकाव्ये प्रथमः सर्गः ॥

अस्ति प्रशस्ता भुवनेषु काञ्ची पुरी विरिञ्चोत्तरवीथिकाख्या ।
गण्याभवन्मुक्तिकरेषु पूर्वा पुण्याकृतिः सप्तसु या पुरेषु ॥

* * *

हेमाब्जिनीहेमसरोजगर्भात् श्रीपाञ्चजन्योऽजनि तत्र योगी ।
तारे हरेराश्वयुजाख्यमासे समस्तजीवावनकर्महेतोः ॥

सञ्जीवनत्वाद्बहुसत्त्वयोगात्संसारदावाग्निविनाशकत्वात् ।
शैत्योदयात्सूक्त्यमृतप्रवाहात्सरोऽभिधानं तमुदाहरन्ति ॥

**End:**

अथ सपदि गृहीत्वाऽनुमहायाः सकाशात्
सह सकलमुदन्तं लक्ष्मणा रङ्गनेतुः ।

समयम(पि) तदीयं वीक्षमाणास्त गोदा
दिवसपरिवृढस्य प्रोद्गमं पद्मिनीव ॥

**Colophon:**

यन्नाथः फणिराजभोगशयनो रङ्गेश्वरो यत्पिता
सौम्यश्रीसकलमङ्गलाधिपविभुः सर्वज्ञचूडामणिः ।
यन्माता भुवनाधिपा विहगराड्वाहाभिधश्रीसदः
काव्ये दीव्यति दिव्यसूरिचरिते सर्गोऽयमेकादशः ॥

श्रीविष्णुचित्तविबुधो दुहितुस्समीक्ष्य पश्चायुधाभ्युदयपल्लवितं वयश्च ।
भावं च कन्दलितरागमरं मुकुन्दे तस्मै पुनर्भगवते तनयामदित्सत् ॥

• • • •

पश्योपकावि परमेश्वरपुष्करेशश्रीपाटकेशशिशिरोपवनाधिनाथान् ।
पाथोनिवासपथिकामपूरीधुरीणज्योत्स्नेन्दुखण्डपतिवारिदधामनाथान् ॥

---

## No. 12151. धन्यकुमारचरितम्.
## DHANYAKUMARACARITAM.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{1}{4}$ inches. Pages, 161. Lines, 12 on a page. Character, Dēvanāgari. Condition, good. Appearance, old.

Complete.

By Bhaṭṭāraka Sakalakīrti. This poem gives the leading incidents in the life of Dhanyakumāra, son of a Vaiśya named Dhanapāla and Prabhāvatī of Ujjain, who is apparently a Jaina saint.

Contains the following Adhikāras:—

१. धन्यकुमारजन्मनिधिलाभवर्णनम्.
२. विघ्नशान्तिधर्मश्रवणम्.
३. अकृतपुण्यभवान्तरवर्णनम्.
४. अकृतपुण्यदानकरणवर्णनम्.
५. भवान्तरवर्णनम्.
६. धन्यकुमारराज्यप्राप्तिमातृपित्रादिबन्धुवर्गसङ्गमः.
७. तपस्सर्वार्थसिद्धिगमनम्.

**Beginning:**

नमः श्रीवर्धमानाय पञ्चकल्याणभागिने ।
जिनाय विश्वनाथाय मुक्तिभर्त्रे गुणाब्धये ॥

श्रीमन्तं त्रिजगन्नाथमादितीर्थप्रवर्तकम् ।
वृषभं वृषभाधीशं वन्देऽनन्तगुणाकरम् ॥

शेषांस्तीर्थकरान् सर्वान् विश्वमङ्गलकारिणः ।
लोकोत्तमान् शरण्यांश्च सतां नौमि जगद्धितान् ॥

द्वीपेषु अर्धतृतीयेषु विहरन्तो जिनाधिपाः ।
नृदेवखचराधीशैर्भूषिता गणनायकैः ॥
ये श्रीसीमन्धरस्वामिप्रमुखा धर्मवर्तिनः ।
मूर्ध्ना नमामि तान् विश्वान् मोक्षमार्गप्रकाशकान् ॥
एते तीर्थङ्कराश्चान्ये त्रिकालगोचरा मया ।
वन्दिताः संस्तुताः सन्तु मे प्रारब्धार्थसिद्धये ॥

* * * *

इत्यभिष्टुत्य तीर्थेशान् सिद्धांश्च सद्गुरून् परान् ।
स्वेष्टान् मङ्गलकर्तॄंश्च नत्वा माङ्गल्यसिद्धये ॥
स्वप्रारब्धार्थसिद्ध्यर्थं विघ्नहान्यै शिवाप्तये ।
स्वान्येषां हितमुद्दिश्य करिष्ये कर्महानये ॥
चरित्रं पावनं धन्यकुमारस्य शुभावहम् ।
वैश्यसत्कुलदीपस्य सर्वार्थसिद्धिगामिनः ॥
येन श्रुतेन भव्यानां हीयते रागशात्रवः ।
वर्धन्ते शुभसंवेगशमादिगुणराशयः ॥

* * * *

अथ द्वीपोऽस्ति जम्ब्वाख्यो जम्बूवृक्षोपलक्षितः ।
लक्षयोजनविस्तीर्णो वृत्ताकारोऽब्धिवेष्टितः ॥
मेरुर्हेममयो भाति तन्मध्येऽतीव सुन्दरः ।
लक्षैकयोजनोत्तुङ्गो जिनालयाप्सरोगणैः ॥
मेरोर्दक्षिणदिग्भागे राजते क्षेत्रमुत्तमम् ।

* * * *

तन्मध्ये नाभिवद्भाति महत्युज्जयिनी पुरी ।
विद्भिश्च धर्मिभिस्तुङ्गचैत्यालयैर्महोत्सवैः ॥

* * * *

इत्यादिवर्णनोपेतनगर्यां स्यान्महीपतिः ।
प्रताप्यवनिपालाख्यः पुण्यधीर्धर्मवत्सलः ॥
धनपालाभिधो वैश्योऽवसत्तस्यां शुभाशयः ।
तस्य प्रभावती भार्या पुण्यलक्षणभूषिता ॥
सप्त पुत्रास्तयोरासन् देवदत्तादयोऽखिलाः ।
परस्परमतिस्नेहाः समाना गुणलक्षणैः ॥

* * * *

तच्छ्रुत्वा सुतमाप्यैव सागमन्मुदमुल्बणम् ।
ततोऽस्या गर्भचिह्नानि प्रादुरासन् शुभाशया ॥
क्रमेणैषा मुदा नीत्वा नव मासान् शुभोदयान् ।
शुभे दिनमुहूर्तादौ सुखेनाजीजनत्परम् ॥

* * * *

अस्मिन् सुतोत्तमे जातेऽत्रास्मत्कुलप्रदीपके ।
जाता धन्याः कृतार्थाश्च वयमत्रेति बान्धवः ॥
अयं धन्यकुमारोऽत्र तस्येति नाम वै व्यधुः ।

* * * *

**Colophon :**

इति श्रीधन्यकुमारचरित्रे धन्यकुमारजन्मानिखिलामवर्णनो नाम प्रथमोऽधिकारः ॥

**End :**

सर्वे तीर्थकरा जगत्त्रयहितास्सिद्धा अनन्ता विदः
पञ्चाचारपरायणाश्च गुणिनः सत्पाठकाः साधवः ।
स्वर्मुक्त्यादिसुखाधिका वरतपोयुक्ताश्च धन्याः स्तुताः
भव्यौघैश्च मया दिशन्तु शिवदं सन्मङ्गलं मेऽत्र वः ॥
भवेयुः श्रीमतो धन्यकुमाराख्यसुयोगिनः ।
चरित्रस्याखिलाः श्लोकाः सार्धाष्टशतसङ्ख्यकाः ॥

**Colophon :**

इति श्रीधन्यकुमारचरित्रे भट्टारकश्रीसकलकीर्तिविरचिते तपस्सर्वार्थसिद्धिगमनवर्णनो नाम सप्तमोऽधिकारः ॥

The scribe adds—

युवसंवत्सरे मार्गशीर्षमासे शुद्धे त्रयोदश्यां तिथौ कुम्भलग्ने मृगशीर्षनक्षत्रे आदिवारे सिद्धयोगे इत्यादिशुभदिने सितक्षुद्रपर्वतग्रामे तेवविरायगोत्रजः अगस्त्यप्पश्रावकपुत्रः पार्श्वनाथश्रावकोऽस्ति तस्य पुत्रस्य श्वेत्वरश्चाख्यस्य धन्यकुमारचरितं तद्ग्रामस्थितनेमिनाथस्वामिसन्निधौ संपूर्णमभूत् ॥

---

No. **12152.** निगमान्ताचार्यचरितम्.

NIGAMĀNTĀCĀRYACARITAM.

Pages, 12. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 11604.

Contains the first two Vilāsas only.

A short account of the life of Vēdāntacārya or Vēdāntadēśika or Vēṅkaṭanātha, son of Anantasūri and Tōtārambā and a great teacher of the Śrī-Vaiṣṇava religion.

**Beginning:**

वन्दे वाञ्छितलाभाय वन्दारुजनकल्पकम् ।
वेदान्तगुरुपादाब्जमप्रतिद्वन्द्ववैभवम् ॥
निगमान्तार्यचरितं गुरुभिः प्राक्तनैरव(रिह)म् ।
करोमि बालबोधाय सुसुखं प्रकटीकृतम् ॥
अङ्गीकुर्वन्तु कृपया निरसूयं मनीषिणः ।
सरलार्थपदोपेतमिदं शुकवचो यथा ॥
तुण्डीरोऽनति(वनि)विख्यातो वर्तते मण्डलो भुवि ।
यत्र सत्यव्रतं नाम क्षेत्रं परमपावनम् ॥
पुरेषु सप्तसु श्रेष्ठा पुरी काञ्चीति तत्र तु ।
यस्यां हस्तिगिरिर्नाम द्योतते दृष्टिमङ्गलः ॥
पुण्डरीकाक्ष इत्यासीत् सोमसुत्कश्यनोत्तमः ।
विश्वामित्रकुलोत्पन्नस्तस्यां सर्वागमार्थवित् ॥
प्रीणयामास पितरौ जगतां दिव्यदम्पती ।
निस्सङ्गं बहुभिर्यज्ञैः पत्न्या सह सुशीलया ॥
अनन्तसूरिरुद्भूदमोघज्ञानशालिनः ।
तस्मात् कलशवाराशेः पारिजात इवानघः ॥

* * * *

आहूय प्रददावस्मै तोतारम्बाह्वयां स्वयम् ।
रङ्गराजगुरुः कन्यां सूदपौत्रो यतीशितुः ॥

* * * *

वेङ्कटाद्रिनिवासं मामागतं विद्धि कोविद ।
ब्रह्मसत्तममश्रान्तमखिलागमसत्कृतम् ॥
घण्टां मुक्तामयीं दिव्यां गृहाण्वागमरूपिणीम् ॥
पुत्रेच्छुरसि सूरीन्द्र धर्मपत्न्यै प्रदेहि च ।

* * * *

**Colophon:**

इति निगमान्ताचार्यचरिते प्रथमो विलासः ॥

* * * *

देवेन द्वादश समाः पिचण्डे ललनामणेः ।
राजर्षिणाश्मकेनेव नीता हन्तार्भकात्मना ॥
विसिष्मिरे जनाः सर्वे गर्भवासमनुत्तमम् ।
शिशोर्वीक्ष्य समं . . . . मद्भुतम् ॥
अब्दे च विभवे मासि नभसि श्रवणे हरेः ।
महातर्थिदिनेऽसूत साध्वी पुत्रमनुत्तमम् ॥

**End:**

क्रिया द्वितीयाश्रमजाः पत्न्यानुगुणया सह ।
गुरुश्चकार भगवन्मुखोल्लासाय केवलम् ।

**Colophon:**

इति निगमान्ताचार्यचरिते द्वितीयो विलासः ॥

---

## No. 12153. निगमान्ताचार्यचरितम्.
## NIGAMĀNTĀCĀRYACARITAM.

Pages, 23. Lines, 8 on a page.

Begins on fol. 63*a* of the MS. described under No. 9759.

Contains the first two Vilāsas only.

Same work as the above.

---

## No. 12154. मध्वविजयः.
## MADHVAVIJAYAḤ.

Pages, 126. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 10101.

Complete.

Same work as that described under R. No. 479 of the Triennial Catalogue, Vol. I, Part I-B.

The scribe gives his name and the date of the transcription of the MS.:

साधारणाब्दपितृभाद्रपदे सकृष्णे षष्ठीबुधे कृतपके द्विजचेत्रपट्टणे ।
अहोबलेन लिखितं दशधीरगीतं नारायणाय सगुणाय समर्पयामि ॥

---

## No. 12155. मध्वविजयः.
## MADHVAVIJAYAḤ.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 178. Lines, 6 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

The scribe gives the date of transcription and his name—

क्रोधने माघमासस्य आद्ये पक्षे च पञ्चमी ।
भानुवारे समाप्तोऽयं प्रीत्यै माधवमध्वयोः ॥

इदं पुस्तकम् अवलकी हनुमन्ताचार्यशिष्येण सेतुमाधवेन लिखितम् ॥

---

## No. 12156. मध्वविजयः.
## MADHVAVIJAYAḤ.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 166. Lines, 5 on a page. Character, Nandināgarī. Condition, much injured. Appearance, old.

Contains 1 to 14 Sargas complete, 7 stanzas in the 15th Sarga and the 16th Sarga from the 19th to 51st stanza.

Same work as the above.

---

## No. 12157. मध्वविजयः.
## MADHVAVIJAYAḤ.

Substance, palm-leaf. Size, 14 × 1⅞ inches. Pages, 144. Lines, 6 on a page. Character, Nandināgarī. Condition, much injured. Appearance, old.

Begins on fol. 1a. The other work herein is **Madhvavijayavyākhyā** 73a.

Complete.

Same work as the above.

---

## No. 12158. मध्वविजयः.
## MADHVAVIJAYAḤ.

Pages, 12. Lines, 8 on a page.

Begins on fol. 4a of the MS. described under **No. 2408**.

Contains the portion beginning from the 51st stanza of the 6th Sarga to the 4th stanza of the 8th Sarga.

Same work as the above.

---

## No. 12159. मध्वविजयः.
## MADHVAVIJAYAḤ.

Substance, Śrītāla. Size, 13, 12½ × 2½ inches. Pages, 12. Lines, 12 on a page. Character, Telugu and Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 27a. The other works herein are **Vēṇisaṃhāra 1a, Mithyātvabhaṅga 33a.**

Breaks off in the 2)th stanza of the 3rd Sarga.

Same work as the above.

---

### No. 12160. मध्वविजयव्याख्या—पदार्थदीपिका.
### MADHVAVIJAYAVYĀKHYĀ: PADĀRTHADĪPIKĀ.

Pages, 328. Lines, 7 on a page.

Begins on fol. 73a of the MS. described under No. 12157.

Breaks off in the 14th Sarga.

A commentary on the work described under the last number: by Vēdāṅgatīrtha.

**Beginning:**

लक्ष्मीपतिपदाम्भोजयुगं नौमि निरन्तरम् ।
श्रीमदानन्दतीर्थार्यपदाब्जं प्रणमाम्यहम् ॥
वृत्ति म(ा)धुकरी यत्र ह(वि)न्दन्तीन्द्रादयः सुराः ।
श्रीमध्वशास्त्रकमलाकरतिग्मभावं(नुं)
श्रीविष्णवाम्बोधि(म्बुधि)विबोधनशीतबिम्बम् ।
अद्वैतवाद(व)नदाहविवृद्धरोषात्
. . . . . . . . . . . . . . . . . . ॥
त्रिविक्रमार्यपुत्रेण नारायणविपश्चिता ।
कृतं श्रीमध्वविजयं विवृणोमि यथामति ॥

प्रारस्वत(रिप्सित)तया चित्तसंनिहितं काव्यमारभन्नारायणार्यः स्वेष्टदेवतां नारायणं नमस्करोति—कान्तायेति । अखिलकारणाय कल्याणगुणैकधाम्ने शोभमानगुणानां मुख्यधाम्ने । नवद्युनाथप्रतिमप्रभाय उद्यदादित्यसमासदृशाय । अखिलकारणाय अखिलस्य जगतः कारणभूताय वा । अखिलस्य सृष्टिस्थित्यादेः कारणभूतायेति । श्रीप्राणनाथाय श्रीवल्लभाय प्राणनाथो वल्लभः नारायणाय नमस्करोमि ।

**End:**

सतामानन्ददं त्रिविक्रमार्येऽपि तत्त्वविदुष . . प्राप्याभिवन्द्येत्यभिप्रायः ।

**Colophon:**

इति श्रीमध्वविजयटीकायां वेदाङ्गतीर्थरचितायां पदार्थदीपिकायां त्रयोदशः सर्गः ॥

परिव्यूढेति । परिव्यूढघनसङ्घस्तम्भविषयोद्भवग्रामण्याख्यघनसमूहे

* * * *

अनुपदं प्रतिपदम् उरसि अशनैः परिलोहिताभिः गतिवशाच्छत्रिताभिः वरहार-राजिभिः उत्तमहारसमूहः उपलक्षितासु । कथंभूताभिः हरिराजिभिः, कुच-कुम्भपूर्णतरकान्तिसुधारसशेषबिन्दुविसरद्भिः कुचकुम्भे पूर्णतरस्येति कान्तिसुधार-सस्य कान्त्याः सुधाजलस्य यः शेषस्तस्य बिन्दुपा(न्दू)नां व(वि)सरः प्रसारः तस्य.

---

## No. 12161. मध्वविजयव्याख्या—पदार्थदीपिकोद्बोधिका.
## MADHVAVIJAYAVYĀKHYĀ: PADĀRTHADĪPIKŌD-BŌDHIKĀ.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 228. Lines, 6 on a page. Character, Nandināgari and Telugu. Condition, good. Appearance, old.

Breaks off in the 54th stanza of the 6th Sarga.

Similar to the above. Although the name of the commentary herein is almost the same as that described under the last number, the commentaries are different and the commentator is Viśvapatitīrtha who is stated in the colophon to have been a disciple of Vēdāṅgatīrtha, who is probably the same as the commentator mentioned under the last number.

**Beginning:**

नारायणाय परिपूर्णगुणार्णवाय विश्वोदयस्थितिलयोनि(न्नि)यतिप्रदाय ।
ज्ञानप्रदाय विबुधासुरसौख्यदुःखसत्कारणाय वितताय नमो नमस्ते ॥

श्रीमन्तं विट्ठलं नत्वा पूर्णबोधेष्टदैवतम् ।
श्रीमध्वविजयव्याख्यादीपमुद्बोधयाम्यहम् ॥

श्रीमन्नारायणपरमानुग्रहपात्रभूतस्य सकलसुरवरगुरोः श्रीमुख्य(प्राण)मुख्या-वतारलीलां वर्णयितुकामा नारायणपण्डिताचार्याः शिष्टाचारपरम्पराप्राप्तमखिलेष्ट-साधनमिष्टदेवतानमस्काररूपं मङ्गलं कृत्वा सन्निहितशिष्यशिक्षार्थं . . . . आदौ निबध्नन्ति—कान्तायेति । कान्ताय रमणीयाय । कल्याणाः शोभना गुणाः ज्ञानानन्दबलैश्वर्यादिशुभधर्मास्तेषामेकं मुख्यं यद्धाम मन्दिरं तस्मै ।

* * * *

**Colophon:**

इति श्रीमद्वेदाङ्गतीर्थश्रीचरणविरचितश्रीमध्वविजयटीकाविवृतौ विश्वपति-तीर्थकृतौ पदार्थदीपिकोद्बोधिकायां प्रथमः सर्गः ॥

**End:**

सन्मण्डलं सतां मण्डलम् । तस्य मण्डनवदलङ्कारवदाचरतीति मण्डना-:यित । स्वानन्दतीर्थो वमौ ॥

**Colophon :**

इति श्रीमध्वविजयटीकायां पञ्चमः सर्गः ॥

ऐतरेयमिति । अथ श्रीमध्वदर्शनानन्तरम् । तत्र सदसि तस्यां सभायाम् । गरिष्ठः श्रेष्ठः । कश्चित् विद्वान् ऐतरेयशाखायां भवमैतरेयं तत्र किंचन सूक्तं सूचयन् सन् ।

**End :**

यद्वा विकसितसुमनसां सन्तुष्टदेवानां वा घटा गोष्ठी तां गच्छतीति तथोक्तस्तमिति वा । उच्चमुत्कटमुत्तमं वा । हरौ तु उच्चं सर्वोत्तमं मरतकरत्नमयानि यानि स्थिराणि तैरछ्या श्रेष्ठा शोभिता.

---

No. 12162. मध्वविजयव्याख्या—पदार्थप्रकाशिका.
MADHVAVIJAYAVYĀKHYĀ : PADĀRTHA-PRAKĀŚIKĀ.

Substance, palm-leaf. Size, 14 × 1¾ inches. Pages, 212. Lines, 6 on a page. Character, Nandināgari. Condition, injured. Appearance, old.

Contains the Sargas three to seven complete and wants the beginning and the end of the eighth Sarga.

A commentary on the Madhvavijaya of Ānandatīrtha which is described under R. No. 479 of the Triennial Catalogue, Vol. I, Part I-B : by Ānandatīrtha, son of Lakṣminṛsiṁhasūri.

**Beginning :**

वुक्तार्थे चाद्युनार्थे च साम्प्रतं पदमव्ययमिति रत्नमाला । अतः त्वं कनु कच यियाससि यातु(मिच्छसि) ; कनु प्रश्नवितर्कयोरिति रत्नमाला । या प्रापण इति धातोर्लो(स्सनि ल)ट् परस्मैपदं मध्यमपुरुषैकवचनम् । इत्युक्तप्रकारेण पथिकैः पन्थानं(गच्छ)न्तीति पथिकाः तैरुदितः उक्तः विभुः सर्वेद्गतः ; पत्यौ सर्वगते विभुरिति रत्नमाला ।

* * * *

**Colophon :**

इति श्रीलक्ष्मीनृसिंहसूरिसुतेन आनन्दतीर्थेन लिखितायां मध्वविजयटीकायां पदार्थप्र(काशिकायां तृतीयः सर्गः ॥)

**End :**

तथा देवौ व्यासवायू तत्राश्रमे तस्मिन् बदरिकाश्रमे तावत् साकल्येन सम्यगिति यावत् । जाज्वल्येते . . . . . ज्वल दीप्ताविति धातोः लोटा(यङि लड्वा)त्मनेपदं प्रथमपुरुषद्विवचनम् ॥

**Colophon:**

इति श्रीमध्वविजयटीकायां पदार्थप्रकाशिकायां सप्तमः सर्गः ॥

प्रतिभेति । अथ निजैः स्वाभाविकैः प्रतिभाप्रभाप्रमुखसद्गुणैः प्रतिभा ज्ञानं च प्रभा तेजश्च प्रतिभाप्रभे ते एव प्रमुखे येषां ते ।

* * * *

अस्मिन् सर्गे मञ्जुभाषिणीनामकं वृत्तम् । सहसा जगौ भवति मञ्जुभाषिणीति तल्लक्षणम् । सुविशेषेति । सुविशेषशेषवदशेषवर्णीति प्रतिबोद्धुः . . . सुविशेषास्तेषाम् ॥

---

No. 12163. मध्वविजयव्याख्या—पदार्थप्रकाशिका.
MADHVAVIJAYAVYĀKHYĀ: PADĀRTHA-PRAKĀŚIKĀ.

Substance, palm-leaf. Size, 14 × 1½ inches. Pages, 164. Lines, 6 on a page. Character, Nandināgarī. Condition, good. Appearance, new.

Contains the Sargas three to six, but wants 48 stanzas in the beginning.

Same work as the above.

---

No. 12164. यशोधरचरितम्.
YAŚŌDHARACARITAM.

Substance, paper. Size, 8¾ × 5⅜ inches. Pages, 140. Lines, 8 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1a. The other work herein is Śṛṅgāramañjarī 71a.

Complete.

A poem in four Sargas narrating the chief incidents in the life of Yaśōdhara, son of Yaśōdhara and Candramatī of Ujjain, who is apparently a Jaina saintly king: by Vādirājasūri alias Ṣaṇmukha.

**Beginning:**

श्रीमदारब्धदेवेन्द्रमयूरानन्दनर्तनम् ।
सुव्रताम्भोधरं वन्दे गम्भीरनयगर्जितम् ॥
अस्माकं जिनसिद्धश्रीसूर्युपाध्यायसाधवः ।
कुर्वन्तु गुरवः सर्वे निर्वाणपरमश्रियम् ॥
श्रीमत्समन्तभद्रार्याः काव्यमाणिक्यरोहणाः ।
सन्तु नः सन्ततोत्कृष्टाः सूक्तिरत्नोत्करप्रदाः ॥

इतिहाससमासोऽयमत्रावहितचेतसाम् ।
आस्रवन्ति शुभान्युच्चैर्निर्जीर्यन्त्यशुभान्यपि ॥
वर्धयत्येष संयो(वे)गं विधत्ते शुद्धदृष्टिताम् ।
प्रध्वस्तीकुरुते व्याधीनाडी(धी)नपहरत्यलम् ॥
श्रीपार्श्वनाथकाकुत्स्थचरितं येन कीर्तितम् ।
तेन श्रीवादिराजेन दृब्धा याशोधरी कथा ॥
इहास्ति भारते वास्ये देशे यौधेयनामनि ।
पुरं राजपुरं नाम्ना राजराजपुरोपमम् ॥

* * * *

उपाभ्यां(दीच्यां)दिशि तस्यास्ति चण्डमारीतिदेवता ।
एकान्ततः प्रिया यस्याः प्राणिनामुपसंहृतिः ॥

* * * *

ततस्तदर्चनाकालं विलम्बयितुमक्षमः ।
देवतावासमासीदन्मारिदत्तो नराधिपः ॥
पौराः पुरपतेस्तस्य नियोगादविलम्बितम् ।
आनिन्युरखिलाशाभ्यो युग्मं युग्मं तनूभृताम् ॥
कुक्कटच्छागसारङ्गवराहमहिषादयः ।

* * * *

**Colophon:**

इति श्रीवादिराजसूरिविरचिते यशोधरचरिते महाकाव्ये प्रथमः सर्गः ॥

अस्त्यूर्जिताऽवन्तिषु कान्तभोगैः पुरी जगत्युज्जयिनी प्रसिद्धा ।
महोदयामाह्वयते समृद्ध्या या राजधानीं शतयज्वनोऽपि ॥
अनेकयुद्धेष्ववलिप्तवैरिविध्वंसनाविष्कृतविक्रमश्रीः ।
बभूव तस्यां नयविस्तरेन्द्रो यशोध(अ)इत्यूर्जितनामधेयः ॥
स शंसते यत्कुमुदाव(दा)तं यशो दिशां भित्तिषु बद्धलेपम् ।
ततस्तमाहुः कवयो यशोधः(अ)पृषोदराद्युक्तनिरुक्तयभिज्ञाः ॥
तस्यार्पिता प्रत्युरसं रहस्ये चर्चेव नित्यं हरिचन्दनस्य ।
प्रच्छद्रागा स्मरतापमुच्चैश्चन्द्रानना चन्द्रमती जहार ॥
तयोरतुल्यो नयविक्रमाभ्यामासीत्सुपुत्रस्स यशोधराख्यः ।
अभ्युद्धरन्दिक्षु यशः प्रकाशं क्षीरोदकल्लोलकलापशुभ्रम् ॥

देवी तु तस्यामृतमत्यभिख्या सिन्धो रसांशैरिव निर्मिताङ्गी ।
तामेव कुर्वन्नलिकामजस्रं तन्मानसास्वादमवेधि कामः ॥

**End:**

गुरुषु विनयवृत्तिं बन्धुषु प्रेमबन्धं रिपुषु करकृपाण्पि(णं)दर्शयन्नाहवेषु ।
अधिगतनयसिन्धुः सत्यसन्धः स राजा रणमुखजयसिंहो राज्यलक्ष्मीं बभार ॥

धर्मे(र्म्ये)वर्त्मनि तेजसा नियमयन् वर्णांस्तथैवाश्रमान्
वृद्धाराधनया हृषीकविजयादुत्तीर्णविद्यार्णवः ।
पारावारपरम्परीणपरमख्यातिं नयोत्कृष्टवी-
रासेविष्ट यशोधरो नरपतिर्दीर्घं त्रिवर्गश्रियम् ॥

**Colophon:**

इति षण्मुखापरनामधेयस्य द्वादशविद्यापतिश्रीवादिराजसूरिविरचिते महाकाव्ये चतुर्थः सर्गः ॥

काणादं कोणमेकं भजतु भयवशात्सौगतस्यागतोऽयं
मृत्युर्मीमांसकाद्याः किमिति जडधियः कुर्वते गर्वक्लृप्तिम् ।
येनायं न्यायमार्गप्रकटपटुवचःप्रौढपर्यायरूढो
वादं दुस्तर्कगाढग्रहणपरिवृढान् वादिराजस्तृणोति ॥

शकवर्ष १७१७ राक्षससंवत्सरफाल्गुनबहुलत्रयोदशी . . .

---

**No. 12165.** यशोधरचरितम्, कर्णाटकभाषार्थसहितम्.

**YAŚODHARACARITAM WITH KANARESE MEANING.**

Substance, Śrītāla. Size, 10¼ × 2¼ inches. Pages, 47. Lines, 9 on a page. Character, Kanarese. Condition, good. Appearance, old.

Complete.

Same work as the above.

---

**No. 12166.** वर्धमानचरितम्.

**VARDHAMĀNACARITAM.**

Substance, paper. Size, 11 × 9 inches. Pages, 306. Lines, 21 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

A poem in 18 Sargas narrating the life-history of Vardhamāna, the founder of the Jaina religion: by Asaga. The subjects dealt with in the various Sargas are given below.

१. नन्दनभववर्णनम्.
२. मुनिवन्दनाभक्तिगमनम्.
३. मनिजीवोत्पत्तिः.
४. विशाखनन्दीनिदानाभिनिवेशः.
५. त्रिविष्टपसंभवः.
६. हयग्रीवसत्वाक्षोभः.
७. सेनानिवेशः.
८. दिव्यायुधः.
९. त्रिविष्टपविजयः.
१०. वलदेवसिद्धिगमनम्.
११. सिद्धभागोपगमनम्.
१२. कनकध्वजकापीष्ठागमनम्.
१३. हरिषेणमहाशुक्रगमनम्.
१४. प्रियमित्रचक्रवर्तिसंभवः.
१५ सूर्यप्रभसंभवः.
१६. पुष्पकविमानगमनम्.
१७. भगवत्केवलोत्पत्तिसंभवः.
१८. भगवन्निर्वाणगमनम्.

Restored from the MS. described under the next number.

**Beginning:**

श्रियं त्रिलोकीतिलकायमानामात्यन्तिकीं ज्ञातसमस्ततत्त्वाम् ।
उपागतं सन्मतिमुज्ज्वलोक्तिं वन्दे जिनेन्द्रं हतमोहतन्द्रम् ॥
दत्तार्ध्यमप्यात्महितैरनर्घ्यं मुक्तिश्रियो मौक्तिकहारभूतम् ।
रत्नत्रयं नौमि परं पवित्रं तत्त्वैकपात्रं दुरितच्छिदक्षम् ॥
सुदुस्तरानादिदुरन्तदुःखग्राहावकीर्णोरुभवार्णवौघात् ।
दक्षा समुद्धर्तुमशेषभव्यान् जयत्यजय्या जिनशासनश्रीः ॥
गणाधिपैरुक्तमुदारबोधैः क्व तत्पुराणं जडधीः क्व चाहम् ।
मनोजवैर्वारिनिधेः खगेन्द्रैः पारं गतं गच्छति किं मयूरः ॥
नापीक्षतेऽर्थापचयं न कष्टं न वृत्तभङ्गं भुवि नापशब्दम् ।
मूढीकृतस्सन् रसिकत्वतृष्ण्या कविश्च वेश्यार्पितमानसश्च ॥
तथापि पुण्यास्रवहेतुभूतमित्यात्मशक्त्या चरितं प्रवृत्तम् ।
श्रीवर्धमानस्य समुद्यतोऽहं फलार्थिनां नास्ति हि दुष्करेच्छा ॥
द्वीपेऽथ जम्बूद्रुमचारुचिह्ने श्रीभारतं क्षेत्रमवाच्यमस्ति ।
जिनेन्द्रधर्मामृतवृष्टिसेकैरसक्तमाह्लादितभव्यसस्यम् ॥
तत्र स्वकान्त्या विजितान्यदेशो देशोऽस्ति पूर्वोपपदेन युक्तः ।
दिवौकसोऽपि स्पृहयन्ति यत्र प्रसूतये स्वर्गकृतावताराः ॥

* * * *

तत्रास्ति पुण्यात्मकृताधिवासा पुरी सुराणां नगरीव रम्या ।
श्वेतातपत्रा कृतनामधेया श्वेतातपत्रस्य सदा निवासा ॥

* * * *

अथेश्वरो विश्वजनीनवृत्तिः तस्याः पुरोऽभूत् पुरुहूतभूतिः ।
प्राङ्नन्दिशब्दान्वितवर्धनाख्यो विख्यातवंशो रिपुवंशदावः ॥

* * * *

तस्याश्च शान्तेरधिदेवतेव वेलेव लावण्यमहार्णवस्य ।
मूर्ता जयश्रीरिव पुष्पकेतोरासीत्प्रिया वीरवतीति नाम्ना ॥

* * * *

प्रबुद्धपद्माकरसेव्यपादं जगत्प्रदीपं क्षितिपस्य तस्याम् ।
उत्पादयामास सुतं यथार्कं प्राच्यां प्रतापानुगतं प्रभातः ॥

* * * *

जिनेन्द्रपूजां महतीं विधाय चक्रे नरेन्द्रो दशमेऽह्नि सूनोः ।
सर्वप्रजामानसनन्दनत्वादर्थानुगां नन्दन इत्यभिख्याम् ॥

* * * *

लग्ने गुरौ शुभदिने वसुवृष्टिपूर्वं सामन्तमन्त्रिबलवर्गगणेन सार्धम् ।
कृत्वाभिषेकममलं परया विभूत्या तस्मै दिदेश युवराजपदं नरेन्द्रः ॥

**End :**

अग्नीन्द्रमौलिवररत्नविनिर्गतेऽग्नौ कर्पूरलोहहरिचन्दनसारकाष्ठैः ।
सन्धुक्षिते सपदि वातकुमारनाथैरिन्द्रा मुदा जिनपतेर्जुहुवुः शरीरम् ॥
इत्थं कल्याणमुच्चैस्सपदि जिनपतेः पञ्चमं तस्य कृत्वा
भूयान्नोऽप्यस्य भक्त्या प्रवमवति चिरात्सिद्धिसौख्यस्य सिद्धिम् ।
इत्यन्तश्चिन्तयन्तस्स्तुतिमुखरमुखास्तं प्रदेशं परीत्य
प्रीतास्शक्रादयस्स्वं प्रति ययुरमरा धाम सम्पूज्यसम्पत् ॥

**Colophon :**

इत्यसगकृते वर्धमानचरिते महाकाव्ये भगवन्निर्वाणगमनो नाम अष्टादशः सर्गः ॥

The scribe adds—

इति श्रीविजयाभ्युदयशालिवाहनशकवर्षे १७७८ सिद्धार्थिसंवत्सरमाघबहुलत्रयोदशी आदिवासरे श्रीमद्बेळुगुलविन्ध्याद्रिशिखरविराजमानश्रीदोर्बलिजिनपादारविन्दमत्तमधुकरायमाणश्रीमदभिनवचारुकीर्तिपण्डिताचार्यवर्यस्वामिनामन्तेवासी श्रीमद्द्राविडदेशे देदीप्यमानश्रीशैलग्रामस्थवृषभनाथसूनुना इदं वर्धमानस्वामिचरितं लिखित्वा चारुकीर्तिस्वामिनः अग्रे पठित्वा समाप्तिरासीत् ॥

## No. 12167. वर्धमानचरितम्.
## VARDHAMĀNACARITAM.

Substance, Śrītāla. Size, 15¾ × 2 inches. Pages, 209. Lines, 7 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

---

## No. 12168. वर्धमानचरितम्.
## VARDHAMĀNACARITAM.

Substance, Śrītāla. Size, 8 × 1¾ inches. Pages, 262. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains Sargas 1 to 11 complete and breaks off in the 54th stanza of the 12th Sarga. Wants some leaves in the middle.

Same work as the above.

---

## No. 12169. वल्लभाचार्यचरितम्.
## VALLABHĀCĀRYACARITAM.

Pages, 38. Lines, 14 on a page.

Begins on fol. 47*a* of the MS. described under No. 5145.

Complete.

For description and extracts see M. Seshagri Sastri's Report No. 1, pages 23 and 158.

---

## No. 12170. विद्वन्मोदतरङ्गिणी.
## VIDVANMŌDATARAÑGIṆĪ.

Substance, paper. Size, 10½ × 4½ inches. Pages, 84. Lines, 7 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, new.

Incomplete.

There lived a Brahmin named Kāśīnātha of Kāśyapagōtra in the Rāṭapura or Rādhāpura of the Gauḍa country. He had three sons called Rājēndra, Rāghavēndra and Mahēśa, of whom Rāghavēndra was a very learned and intelligent Pandit. He is said to have written Mantrārthadīpa and Kālatattvārṇavasētu. He was the disciple of Bhavānandasiddhāntavāgīśa and had the titles of Bhaṭṭācārya, Śatāvadhānin, etc. His son Rāmadēva alias Cirañjīvakavi composed the work under notice. The work is a popular exposition of the various systems of Hindu philosophy and religion—vide No. 629 of the Oxford Catalogue. It is also called Rājataraṅgiṇī.

**Beginning :**

तमोगणवि(ना)शिनी सकलकालविद्योतिनी
धरातलविहारिणी जडसमाजविद्वेषिणी ।
कलानिधिसहायिनी लसदलोलसौदामिनी
मदन्तरवलम्बिनी भवतु कापि कादम्बिनी ॥
दक्षो दक्षोपमे(मे)यः समजनि जनतारम्भसम्भावनीयो
रक्षोविक्षोभनीतः प्रथितजनपदो रक्षितो येन गौडः ।
यस्याशीर्वाददूर्वादलकलितशिखो भूपतेर्यज्ञयूपः
संजातोऽनेकशाखः स्फुटमिव निगमो व्यासतो व्यासमाप्तः ॥
क्रियादक्षस्य दक्षस्य राढापुरनिवासिनः ।
सौजन्यजनिता कीर्तिर्गौडदेशमपूरयत् ॥
तस्य काश्यपगोत्रस्य कश्यपस्येव सन्ततिः ॥
प्रचुरो गौडदेशीयकुलीनाग्रसराभवत् ॥
ब्राह्मण्याचारधाराचरणरसवशो हंसरूपोऽस्य वंशे
काशीनाथाभिधानः समजनि विनतो गोषु च ब्राह्मणेषु ।
येनानीय प्रयत्नाद्द्विजचरणरजो मूर्ध्नि विन्यस्तमात्रं
पुत्रादेरत्र सिद्धौषधमिव सहसानेकरोगान् जहार ॥
सामुद्रके सोऽथ समुद्रकल्पः सामुद्रकाचार्य इति प्रसिद्धिम् ।
लेभे नृणामाकृतिदर्शनेन फलं वदन् भूतभविष्यति(दादि) ॥
अथ तस्य त्रयः पुत्राः जाताः पितृपरायणाः ।
राजेन्द्रो राघवेन्द्रश्च महेशश्चेति(हि)क्रमात् ॥
तेषामेव गुणोत्तमः समजनि श्रीराघवेन्द्रः कृती
बाल्ये यं समुदीक्ष्य लक्षणयुतं तातोऽनुरक्तोऽभवत् ।
लेभे षोडशवार्षिकः कृतिमतामानन्दवृन्दाङ्कुरो
भट्टाचार्यशतावधानपदवीं संतीर्णविद्यार्णवः ॥
बाल्येऽधीत्य समस्तशास्त्रमभितः सिद्धान्तवागीशतो
वागीशप्रतिमो बभूव विजयी वादेषु विद्यावताम् ।
यस्यास्वाद्य सरस्वतीरससुधाधारैकसारा गिरो
मूर्धान्दोलनशालिनो हि कवयो गायन्ति नित्यं यशः ॥

एकैकमेकैककविप्रयुक्तं श्लोकस्थितं वर्णमपव्यवस्थम् ।
आकर्ण्य तत्संख्यमथ प्रयुङ्क्ते स्वयंकृतश्लोकगतं च वर्णम् ॥
रीत्यानया श्लोकशतं कवीनां शतस्य निर्वक्त्यवधारयित्वा ।
समस्यया पूर्तिमतीमथैतां स्वयंकृतश्लोकशती तथैव ॥
अतोऽभिधानेन शतावधानो बभूव लोके विदितप्रभावः ।
अनन्यसाधारणशक्तिशाली संख्यावतां संसदि माननीयः ॥
श्रुत्यर्थसार्थानवबोधहेतोर्महान्धकारे पततां चिराय ।
सञ्चारहेतोर्विविधक्रियार्थे मन्त्रार्थदीपं कृतवान् कृती यः ॥
नानाव्यवस्थाभ्रमवन्तमन्तर्विद्वद्विचारोचलदुत्तरङ्गम् ।
यः कालतत्त्वार्णवमुत्तरीतुं रामप्रकाशं निबबन्ध सेतुम् ॥

यस्य च कविद्वयकृतमेतत् श्लोकद्वयम्—

अहं हरिहरास्सिद्धेरवलम्बे सरस्वतीः ।
साक्षात् शतावधानत्वमवतीर्णा सरस्वती ॥
पुंरूपा हरिणी साक्षादवतीर्णा सरस्वती ।
जितश्शतावधानोऽतो विष्णुनापि न जिष्णुना ॥

किंच—

अधीयानमुद्दिश्य चाध्यापकोऽसौ भवानन्दसिद्धान्तवागीश ऊचे ।
अयं कोऽपि देवोऽनवद्यातिविद्याचमत्कारधारामपारां बिभर्ति ॥
तस्मादहं समुत्पन्नो महापुरुषतः पुमान् ।
धर्मैकनिधितः सूर्योत्किरणैककणो यथा ॥
विचार्य तारकं चक्रं पिता मे करुणानिधिः ।
मन्नाम रामदेवेति कृतवान्नामकर्मणि ॥
नाम्नैव सम्बोध्य जनः कथायां यदेतमाकारयेता तदाशीः ।
ततोऽग्रजो मामतिवत्सलत्वाच्चिरं चिरंजीवतया जुहाव ॥
सोऽहं पुरस्समधिगम्य पितुः प्रसादं ब्रह्मैकतां गतवतः शिवराजधान्याम् ।
यत्नादधीतमनधीतमथापि शास्त्रमध्यापयामि निभृतं निपुणं विचार्य ॥
न्यायादिशास्त्रेषु मया कृता ये काव्येषु ये वा रुचिराः प्रबन्धाः ।
भवन्ति विद्यासु च यासु यासु ये ये बुधास्ते परितोषकान्ते ॥

सम्प्रत्यसौ सर्वमहीसुराणामपण्डितानामपि सन्मतीनाम् ।
विलासहेतोरथ पण्डितानां विरच्यते कोऽपि मया प्रबन्धः ॥
पुनः पुनः पण्डितमण्डली तां याचे यया भूरपि मण्डितेयम् ।
मात्सर्यमुत्सृज्य कृतिं ममैतां सर्वे भवन्तोऽपि विलोकयन्तु ॥
ज्ञाने कदाचिदपि नैव शिवस्वरूपात् तातात् परं परमदैवतमन्यदत्र ।
तस्मादिमां कृतिमिहाद्य तरङ्गिनीत्व(णीं तां) पाद्याय तच्चरणयोः परिकल्पयामि ॥
एतां मदीयामवगाह्य सम्यक् तरङ्गिणीं शुद्धधियो मनुष्याः ।
विद्यार्णवालोडनमन्तरेण भवन्तु षट्शास्त्रमतप्रवीणाः ॥
द्वैताद्वैतमतादिनिर्णयविधिप्रोद्बुद्धबुद्धिश्रुतो
भट्टाचार्यशतावधान इति यो गौडोद्भवोऽभूत् कविः ।
विद्वन्मोदतरङ्गिणी ननु चिरंजीविन तज्जन्मना
शास्त्रे वा रचितेोचितः प्रथमकस्तस्यास्तरङ्गो गतः ॥

अथ समाहूताः पुरुहूतपुरोहिता इव विद्वांसः क्रमशः प्रविशन्ति स्म । ततः प्रथमतः प्रविशन्तं वैष्णवमालोक्य हसन् कोऽप्येकः सकलकलाभिज्ञ उदितपरमतत्त्वो निजगाद प्रभुं प्रति—

आनासमूर्धतिलकी बहुशङ्खचक्रपद्माङ्कितोज्ज्वलवपुर्धृतपीतवासाः ।
कण्ठे ललामतुलसीस्रजमादधानः श्रीमानयं हरिकथां कथयन्नुपैति ॥

**End:**

अनेन रूपेण च भीषणेन स्वरूपहानिर्न भवेत् कदाचन ।
किंच —
सुखं वाद(कु)तस्तस्य दुःखं क्कत(कुतो)वा कुतः सुन्दरत्वं कुतोऽसुन्दरत्वम् ।
अनेकैस्स्वरूपैरनेकप्रकारैः सदा लीलया खेलतश्चिन्मयस्य ॥
आकर्णय तावद्रूपान्तरमपि भगवतो म.

---

## No. 12171. शङ्कराचार्यचरितम्.

## ŚAṄKARĀCĀRYACARITAM

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 61. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Hastāmalakastōtra 31*a*.

Complete in nine Adhyāyas.

Same work as that described under No. 50 of M. Seshagiri Sastri's Report No. 2, wherein see pages 101, 102 and 257 to 259.

Copying is said to have been finished on the 10th day of the Phālguna month in the year Virōdhi.

---

No. 12172. शङ्कराचार्यचरितम्.
ŚAṄKARĀCĀRYACARITAM.

Substance, paper. Size, 16¾ × 8¼ inches. Pages, 82. Lines, 21 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in nine Adhyāyas.

Same work as the above.

---

No. 12173. शङ्करविजयविलासः.
ŚAṄKARAVIJAYAVILĀSAḤ.

Pages, 24. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 9573.

Contains Adhyāyas 26 to 29 complete, and the 30th incomplete.

Similar to the above. As stated in the colophon the work is in the form of a dialogue between Cidvilāsayati and Vijñānakandatapōdhana.

**Beginning:**

ततः श्रीशङ्कराचार्यो वेङ्कटेश्वरमीक्षितुम् ।
शिष्यैस्तैस्तैस्समायुक्तो निर्जगाम महोदयः ॥
गत्वा क्रमेण मार्गेषु क्षेत्राणि प्रविलोकयन् ।
नत्वा गोविन्दराजेशं भक्ताभीष्टफलप्रदम् ॥
प्रदक्षिणं परिक्रामन् शेषाचलमतन्द्रितः ।
गिरेरूर्ध्वं समारुह्य स्नात्वा पुष्करिणीजले ॥
वेङ्कटेशं विलोक्याथ नमः कृत्वा च भक्तितः ।
स्तुत्वा बहुविधैस्स्तोत्रैः श्रीभूकान्तासमन्वितम् ॥
तत्रत्यान् ब्राह्मणान् दृष्ट्वा श्रीमान् देशिकपुङ्गवः ।
वैखानसागमाचारान् श्रुत्युक्तपथकल्पितान् ॥
शुद्धाद्वैतपरान् कृत्वा बोधयामास तत्त्वतः ।

* * * *

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीचिद्विलासयतीन्द्रविज्ञानकन्दतपोधनेन्द्रसंवादे शङ्करविजयविलासे षड्विंशोऽध्यायः ॥

**End:**

क्रमेण पश्यन् क्षेत्राणि दिव्यानि विविधानि च ।
शङ्कराचार्यवर्योऽसौ श्रीशैलं प्राप सत्वरम् ॥

विज्ञा—

कृत्वा बौद्धनिबर्हणं मृण(ड)पुरे गोकर्णमासेदिवान्
नत्वा तत्र महाबिलेशमसकृल्लब्ध्वा तदाज्ञां ततः ।
श्रीशैलं स जगाम देशिक इति श्रीचिद्विलासाव(द)चः
तत्रत्यं कथय त्वमद्य चरितं तस्यैव सर्वं क्रमात् ॥

चिद्विलासः—

विज्ञानकन्द विनयान्वितमानसोऽसि श्रीदेशिकेन्द्रचरिते महती तवास्था ।
तस्माच्छृणु स्वगुरुवर्यमहो विचित्रे तत्र स्मृते विरचयत्यमलं मनोऽब्धिम् ॥

**Colophon:**

इति श्रीशङ्करविज(य)विलासे एकोनत्रिंशोऽध्यायः ॥

ततः श्रीशङ्कराचार्यदेशिकेश्वरभास्करः ।
श्रीशैलेशं नमस्कृत्य तद्भ्रमोन्नतमद्वयम् ॥

* * * *

उपविष्टास्सदः कृत्वा वाङ्मुखं कर्तुमुद्यताः ।
सर्वज्ञः शङ्कराचार्यदेशिकस्तानलोकयत् ॥
निर्मिता राजसेनैव तदा भवति निर्वृतिः ।
फाले त्रिपुण्ड्रं सन्त्यज्य कुङ्कुमं ध्रियते कथम् ॥

---

## No. 12174. सङ्क्षेपशङ्करविजयः.

## SAṄKṢEPAŚAṄKARAVIJAYAḤ.

Substance, palm-leaf. Size, 16 × 1¾ inches. Pages, 154. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains the Sargas 1 to 13 complete, and the 14th incomplete.

This work purports to be a summary in 16 Sargas of Vyāsācala's Śaṅk-ravijaya and gives an account of the life of Śaṅkarācārya. The contents of the 16 Sargas are given in the extracts below. By Vidyāraṇya.

**Beginning:**

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
प्राचीनशङ्करजये सारस्सङ्गृह्यते स्फुटम् ॥

व्यासाचलप्रमुखपूर्वकपण्डितक्ष्माभृत्संभृतोचतरकाव्यतरोस्सुरीतेः ।
विद्वन्मधुव्रतसुखोरुरसानि सर्वाण्यादातुमर्थकुसुमान्यहमक्षमोऽस्मि ॥

यत्नादुदस्यविषणाद्घ्राणिना गृहीतुं शक्यं तदत्र सरसं सकलं गृहीत्वा ।
काञ्चिन्महेश्वरगुरुस्मृतिभिन्नमोहः सङ्क्षेपशङ्करजयस्रजमातनोमि ॥
यद्वद् घटानां पटलो विशालो विलोक्यतेऽल्पे किल दर्पणेऽपि ।
तद्वन्मदीये लघुसङ्ग्रहेऽस्मिन्नुद्वीक्ष्यतां शङ्करकाव्यसारः ॥
यथालिरुच्ये मधुरेऽपि रुच्युत्पादाय रुच्यान्तरयोजनार्हा ।
तथेक्ष्यतां प्राक्कविहृद्यपद्येष्वेषापि मत्पद्यनिवेशभङ्गी ॥
स्तुतोऽपि सम्यक् कविभिः पुराणैः कृत्वापि नस्तुष्यतु भाष्यकारः ।
क्षीराब्धिवासी सरसीरुहाक्षः क्षीरं पुनः किं [न] चकमे न गोष्ठे ॥

* * * *

पयोऽब्धिनिबिरीसनिस्सृतसुधाझरीमाधुरी-
धुरीणफणिताधरीकृतफणाधराधीशितुः ।
शिवङ्करसुशङ्कराभिधजगद्गुरोः प्रायशो
यशोहृदयशोधकं कलयितुं समीहामहे ॥
केमे शङ्करसद्गुरोर्गुणगणा दिग्जालकूलङ्कषाः
कालोन्मीलितमालतीपरिमलावष्टम्भमुष्टिन्धयाः ।
काहं हन्त तथापि सद्गुरुकृपापीयूषपारम्परी-
मग्नोन्मग्नकटाक्षवीक्षणबलादस्मि प्रशस्तोऽर्हताम् ॥

* * * *

नेता यत्रोल्लसति भगवत्पादसंज्ञो महेशः
शान्तिर्यत्र प्रभवति रसश्शेषवानुज्ज्वलाद्यैः ।
यत्राविद्याक्षतिरपि फलं तस्य काव्यस्य कर्ता
धन्यो व्यासाचलकविवरस्तत्कृतिज्ञाश्च धन्याः ॥
तत्रादिम उपोद्घातो द्वितीये तु तदुद्भवः ।
तृतीये तत्तदमृतान्धोऽवतारनिरूपणम् ॥
चतुर्थसर्गे तच्छुद्धाष्टमप्राकृचरितं स्थितम् ।
पञ्चमे तयोग्यसुत्वाश्रमप्राप्तिनिरूपणम् ॥
महतानेहसा यैषा सम्प्रदायागता गता ।
तस्याश्शुद्धात्मविद्यायाः षष्ठे सर्गे प्रतिष्ठितिः ॥
तद्व्यासाचार्यसन्दर्शविचित्रं सप्तमे स्थितम् ।
स्थितोऽष्टमे मण्डनार्यसंवादो नवमे मुनेः ॥

वाणीसाक्षिक(सार्वज्ञ्य)निर्वाहोपायचिन्तनम् ।
दशमे योगशक्त्या भूपतिकायप्रवेशनम् ॥
बुद्ध्वा मीनध्वजकर्त्तां(लाः)त्तत्र सङ्ग्रपञ्चनम् ।
सर्गे एकादशे तूग्रभैरवाभिधानिर्वयः ॥
द्वादशे हस्तधात्र्यार्यतोटकोभयसंक्षयः ।
वार्तिकान्तब्रह्मविद्याचालनं तु त्रयोदशे ॥
चतुर्दशे पद्मपादतीर्थयात्रानिरूपणम् ।
सर्गे पञ्चदशे तूक्तं तदाशाजयकौतुकम् ॥
षोडशे शारदापीठवासस्तस्य महात्मनः ।
इति षोडशभिस्सर्गैर्व्युत्पाद्या शाङ्करी कथा ॥
सैषा कलिमलच्छेत्री सकृच्छ्रुस्यापि कामदा ।
नानाप्रश्नोत्तरै रम्या विदामारभ्यते मुदे ॥

* * * *

एकदा देवता रूप्याचलस्थमुपतस्थिरे ।
देवं देवास्तुषारांशुमिव पूर्वाचलस्थितम् ॥
प्रसादानुमितस्वार्थसिद्धयः प्रणिपत्य तम् ।
मुकुलीकृतहस्ताब्जा विनयेन व्यजिज्ञपन् ।
विज्ञानमेव भगवन विद्यते य(द्वितीय)नः ।
वञ्चयन्नासुरान् बुद्धवपुर्धारी जनार्दनः ॥
तत्प्रणीतागमालम्बैर्बौद्धैर्दर्शनदूषकैः ।
व्यासेदानीं प्रभो धात्री रात्रिस्सन्तमसैरिव ॥

* * * *

तद्भवान् लोकरक्षार्थमुत्साद्य निखिलान् खलान् ।
वर्त्म स्थापयतु श्रौतं जगद्येन सुखं व्रजेत् ॥
इत्युक्त्वोपरतान् देवानुवाच गिरिजाप्रियः ।
मनोरथं पूरयिष्ये मानुष्यमवलम्ब्य वः ॥
दुष्टाचारविनाशाय धर्मसंस्थापनाय च ।
भाष्यं कुर्वन् ब्रह्मसूत्रतात्पर्यार्थविनिर्णयम् ॥
मोहनप्रकृतिद्वैतध्वान्तमध्याह्नभानुभिः ।
चतुर्भिः सहितः शिष्यैश्चतुरै(र्हरि)वद्वि(द्रु)जैः ॥
यतीन्द्रः शङ्करो नाम्ना भविष्यामि महीतले ।

* * * *

**Colophon:**

इति श्रीमाधवीये तदुपोद्घातकथापरः ।
सङ्क्षेपशङ्करजये सर्गोऽयं प्रथमोऽभवत् ॥

ततो महेशः किल केरलेषु श्रीमद्वृषाद्रौ करुणासमुद्रः ।
चूर्णानदीपुण्यतटे स्वयम्भूलिङ्गात्मनानङ्गद आविरासीत् ॥
तच्चोदितः कश्चन राजशेखरस्वप्ने मुहुर्दृष्टतदीयवैभवः ।
प्रासादमेकं परिकल्प्य सुप्रभं प्रावर्तयत्तस्य समर्चनं विभोः ॥
तस्येश्वरस्य प्रणतार्तिहर्तुः प्रसादतः प्राप्तनिरीतिभावः ।
कश्चित्तदभ्याशगतोऽग्रहारः कालट्यभिख्योऽस्ति महान् मनोज्ञः ॥
कश्चिद्द्विपश्चिदिह निश्चलधीर्विरेजे विद्याधिराज इति विश्रुतनामधेयः ।
रुद्रो वृषाद्रिनिलयोऽवतरीतुकामो यत्पुत्रमात्मपितरं समरोचयत्सः ॥
पुत्रोऽभवत्तस्य पुराद्यपुण्यैः सुब्रह्मतेजाः शिवगुर्वभिख्यः ।
ज्ञाने शिवो यो वचने गुरुश्चान्वर्थनामाकृत लब्धवर्णः ॥
स ब्रह्मचारी गुरुगेहवासी तत्कार्यकारी विहितान्नभोजी ।
सायम्प्रभातं च हुताशसेवी व्रतेन वेदं निजमध्यगीष्ट ॥

* * * *

[कामौ ।
आजन्मनो गणयतो ननु तान् गताब्दान् माता पिता परिणयं तव कर्तु-
पित्रोरियं मकृतिरेव पुरोपनीतिं यध्यायतस्तनुभवस्य ततो विवाहम् ।

* * * *

उद्वाह्य शास्त्रविधिना विहिते मुहूर्ते तौ सम्मुदं बहुमवापतुराप्तकामौ ।
तत्रागतो भृशममोदत बन्धुवर्गः किं भूषितेन बहुना मुदमाप वर्गः ॥

* * * *

देवः कृपापरवशो द्विजवेषधारी प्रत्यक्षतां शिवगुरुं गत आत्तनिद्रम् ।
प्रोवाच भोः किमभिवाञ्छसि किन्तपस्ते पुत्रार्थितेति वचनं स जगाद विप्रः ॥
देवोऽप्यपृच्छदथ तं द्विज विद्धि सत्यं सर्वज्ञमेकमपि सर्वगुणोपपन्नम् ।
पुत्रं ददाम्यथ बहून् विपरीतकांस्ते भूयोयुषस्तनुगुणानवदद् द्विजेशः ॥
पुत्रोऽस्तु मे बहुगुणः प्रथितानुभावः सर्वज्ञतापदमितीरित आबभाषे ।
दद्यामुदीरितपदं तनयं तपोऽतिपूर्णो भविष्यति गृहं द्विज गच्छ दारैः ॥

* * * *

लग्ने शुभे शुभयुते सुयुवे कुमारं श्रीपार्वतीव सुखिनी शुभवीक्षिते च ।
जाया सती शिवगुरोर्निजतुङ्गसंस्थे सूर्ये कुजे रविसुते च गुरौ च केन्द्रे ॥

यत्पश्यतां शिशुरसौ कुरुते शमस्वं तेनाकृतास्य जनकः किल शङ्कराख्याम् ।
यद्वा चिराय किल शङ्करसम्प्रसादात् सूतस्ततो व्यधित शङ्करनामधेयम् ॥

**End:**

प्रारब्धकर्मपरिपाकवशात्पुनस्त्वं वाचस्पतित्वमधिगम्य वसुन्धरायाम् ।
भव्यं विधास्यसितमां मम भाष्यटीकामामूलसंभवमविक्षिति सा च
[जीयात् ॥

इत्येवमुक्त्वाथ यतीश्वरोऽसावानन्दगिर्यादिमुनीन् स मत्वा ।
कुरुध्वमद्वैतपरा निबन्धानित्यन्वशात् सन्मुनिसार्वभौमः ॥
ते सर्वेऽप्यनुमतिमाप्य देशिकेन्दोरानन्दाचलमुखरा महाप्रतिष्ठाः ।
आतेनुर्जगति यथास्वमात्मतत्त्वावबोधा(म्भोजा)र्कान् विशदतरान् बहून्
[निबन्धान् ॥

**Colophon:**

इति श्रीमाधवीये तद्वार्तिकान्तनिबन्धनः ।
सङ्क्षेपशङ्करजये पूर्णः सर्गस्त्रयोदशः ॥

अथाब्जपात्कर्तुमनाः स तीर्थयात्रामयाचिष्ट गुरोरनुज्ञाम् ।
देया गुरो मे भगवन्ननुज्ञा देशान् दिदृक्षे बहुतीर्थयुक्तान् ॥

विप्राढ्याणां वसतिविततिर्ये . . . जनितजनैः शीघ्रमुद्दिष्टदेशम् ॥
सद्भिः सङ्गो विधेयः स हि सुखनिचयं सु.

---

## No. 12175. सुलैमचरितम्. SULAIMACCARITAM.

Substance, paper. Size, $9\frac{1}{2} \times 6\frac{3}{8}$ inches. Pages, 54. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in four Paṭalas.

This work is a Sanskrit version of the story, in the Old Testament, of Sulaimon (Solomon), son of Dāvūd (David). The author of the work is Kalyāṇamalla who is said to have composed this at the instance of Lāḍakhān, son of Ahmad of the Lodi family and reigning at Ayōdhyā (Oudh). The author has also composed the Anaṅgaraṅga.

The subject headings of the four chapters are :—

| | |
|---|---|
| १. दावूदुमोहाविर्भावः. | ३. सुलेमत्प्रादुर्भावः. |
| २. दावूदुमनोरथावाप्तिः. | ४. चित्रकथापादनम्. |

**Beginning :**

श्रीशमीशं च वागीशं लक्ष्मीं गौरीं सरस्वतीम् ।
गणेशमपि वाल्मीकिं व्यासं चापि नमाम्यहम् ॥
आसीदयोध्याधिपतिर्बलवान् बलभित्समः ।
वैभवे विक्रमे तस्य नास्ति तुल्योऽपरः प्रभुः ॥
विद्वान् विशेषविच्छूरः प्रजापालनतत्परः ।
लोदिवंशावतंसश्च दयादाक्षिण्यतत्परः ॥
अहमन्नृप इत्येवं विख्यातो धरणीतले ।
तस्य पुत्रः सुधर्मात्मा नीतिमान् प्रीतिमान् वशी ॥
गाम्भीर्यौदार्यसौन्दर्यधैर्यशौर्यादिसद्गुणः ।
मेधावी जितदेवेज्यः रूपनिर्जितमन्मथः ॥
कामसिद्धान्तविद्वांश्च कामिनीनां मनोहरः ।
लाडिखानि इति ख्यातो लालित्यगुणमण्डितः ॥
स कदाचित्समासीनः सभायां सह पण्डितैः ।
कथाभिरभिरामाभिरितिहासैः पुरातनैः ॥
शास्त्रवादैः कलावादैर्धातुवादैरनेकशः ।
विद्वद्विशेषं विज्ञाय दानमानादिभिश्च तान् ॥
संभावयन् समासीनो महापुरुषसत्कथाम् ।
श्रोतुकामस्तदा सूरिमण्डले स्वाश्रितं बुधम् ॥
पप्रच्छ कविराजेन्द्रं काव्यनिर्माणकौशलम् ।
कल्याणमल्लनामानं कविं संस्तुत्यवाच्यसम् ॥
त्वमस्मदास्थानकविः सर्वशास्त्रार्थपारगः ।
पुरा ब्रनङ्गरङ्गाख्यं कलाशास्त्रं कलास्पदम् ॥
गीर्वाणभाषया विद्वन्मानसानन्ददायकम् ।
कृतवानसि मर्त्यानां बन्धुरं लोकसुन्दरम् ॥
इदानीमपि सद्विद्वच्छ्लाघ्यं सर्वार्थगोचरम् ।
सुलेमचरितं ब्रूहि चित्रं गीर्वाणभाषया ॥



23617

दावूदुतनयो विद्वान् सुलैमान् ज्ञानविग्रहः ।
द्वापरान्ते च कल्यादौ म्लेच्छवंशे महातपाः ॥
समुत्पन्नः सत सुता गर्भाब्धौ चन्द्रमा इव ।

**End:**

एवं भूपतिरात्तमित्रमतुलैर्वस्त्रैर्महाभूषणैः
अश्वैर्वारणगोखरोष्ट्रमहिषीश्वाजाविकैर्विश्रुतैः ।
सम्पूज्यात्मजनैः समं स्वनगरीं संप्रेषयामास त-
द्भार्याकार्यमवार्यमात्मनि महाश्चर्येण संस्मारयन् ॥

**Colophon:**

इति श्रीमदयोध्यापुराधिनाथसकलकलासनाथविद्वज्जनैर्जेगीयमानगान-
विद्यानिदानदानजितकानीनलाडखानप्रमोदसन्धानकृकविहद्वल्लकल्याणमहाकवि-
राजविरचिते सुलैमचरित्रे चित्रकथापादनं नाम च,र्थः पटलः ॥

---

## 6 KATHĀ (STORIES).

---

### No. 12176 कथासरित्सागरः.

### KATHĀSARITSĀGARAḤ.

Substance, paper. Size, 13¼ × 7¼ inches. Pages, 348. Lines, 21 on a page. Character, Dēvanāgari. Condition, injured. Appearance, old. Breaks off in the seventh Taraṅga of the tenth Lambaka.

This is an abridgment in Sanskrit in 18 Lambakas of Guṇādhya's Bṛhatkathā in the Paiśācī language. By Bhaṭṭasōmadēva, son of Rāmabhaṭṭa. The author is said to have lived in the court of Ananta who, according to M.A. Stein, ruled in Kashmir in 1028—1063. The work has been printed in the Nirṇayasāgara Press.

**Beginning:**

इदं गुरुगिरीन्द्रजाप्रणयमन्दरान्दोलनात्
पुरा(किल कथामृतं हरमुखाम्बुधेरुद्गतम् ) ।
प्रसह्य रसयन्ति ये विगतविघ्नलब्धर्द्धयो
धुरं दधति वैबुधीं भुवि भवप्रसादेन ते ॥
श्रेयो ददातु वः श्यामः शम्भोः कण्ठो मनोमुवा ।
अ(ङ्कस्थपार्वतीदृष्टिपाशैरिव विवेष्टितः) ॥
सन्ध्यानृत्योत्सवे ताराः करेणोद्धूय विघ्नजित् ।
सीत्कारशीकरैरन्याः कल्पयन्निव पातु वः ॥

प्रणम्य वाचं निःशेषपदार्थोद्योतदीपिकां ।
बृहत्क(थायाः सारस्य सङ्ग्रहं) रचयाम्यहम् ॥

आद्यमत्र कथापीठं कथामुखमतः परम् ।
ततो लावनको नाम तृतीयो लम्बको भवेत् ॥

नरवाहनदत्तस्य जननं च ततः परम् ।
स्याच्चतुर्दारिका चाथ ततो मदनमञ्चुका ॥

ततो रत्नप्रभा नाम लम्बकः सप्तमो भवेत् ।
सूर्यप्रभाभिधानश्च लम्बकः स्यादथाष्टमः ॥

अलङ्कारवती चाथ ततः शक्तियशो भवेत् ।
वेलालम्बकसंज्ञश्च भवेदेकादशस्ततः ॥

शशाङ्कवत्यपि ततस्ततश्च मदिरावती ।
महाभिषेकानुगतस्ततः स्यात्पञ्चलम्बकः ॥

ततः सुरतमञ्जर्यप्यथ पद्मावती भवेत् ।
ततो विषमशीलाख्यो लम्बकोऽष्टादशो भवेत् ॥

यथामूलं तथैवैतन्न मनागप्यतिक्रमः ।
ग्रन्थविस्तरसङ्क्षेपमात्रभाषा च विद्यते ॥

औचित्यान्वयरक्षा च यथाशक्त्या विधीयते ।
कथारसाविघातेन काव्यांशस्य च योजना ॥

वैदग्ध्यख्यातिलोभाय मम नैवायमुद्यमः ।
किन्तु नानाकथाजालस्मृतिसौकर्यसिद्धये ॥

अस्ति किन्नरगन्धर्वविद्याधरनिषेवितः ।
चक्रवर्ती गिरीन्द्राणां हिमवानिति विश्रुतः ॥
माहात्म्यमियती भूमिमारूढं यस्य भूभृताम् ।
यद्भवानी सुताभावं त्रिजगज्जननी गता ॥
उत्तरं तस्य शिखरं कैलासाख्यो महागिरिः ।

* * * *

चराचरगुरुस्तत्र निवसत्यम्बिकासखः ।
गणैर्विद्याधरैस्सिद्धैः सेव्यमानो महेश्वरः ॥

* * * *

तं कदाचित्समुत्पन्नविस्रम्भा रहसि प्रिया ।
स्तुतिभिस्तोषयामास भवानी पतिमीश्वरम् ॥
तस्याः स्तुतिवचोहृष्टस्तामङ्कमधिरोप्य सः ।

किन्ते प्रियं करोमीति बभाषे शशिशेखरः ॥
ततः प्रोवाच गिरिजा प्रसन्नोऽसि यदि प्रभो ।
रम्यां काञ्चित्तदाख्याहि कथामभिनवां मम ॥
भूतं भवद्भविष्यद्वा किं तत्स्याज्जगति प्रिय ।
भवती यन्न जानीयादिति शर्वोऽप्युवाच ताम् ॥
ततः सा वल्लभा तस्य निर्बन्धमकरोद्विभोः ।
प्रियप्रणयहेवाकि यतो मानवतीमनः ॥
ततस्तच्चाटुबुद्ध्यैव तत्प्रभावनिबन्धनाम् ।
तस्याः स्वल्पां कथामेव शिवः सम्प्रत्यवर्णयत् ॥
अस्ति मां वीक्षितुं पूर्वं ब्रह्मा नारायणस्तथा ।
महीं भ्रमन्तौ हिमवत्पादमूलमवापतुः ॥
ततो ददृशतुस्तत्र ज्वालालिङ्गं महत्पुरा ।
तस्यान्तमीक्षितुं प्रायादेक ऊर्ध्वमधोऽपरः ॥

* * * *

**Colophon:**

इति श्रीभट्टसोमदेवविरचिते कथासरित्सागरे कथापीठलम्बके प्रथमस्तरङ्गः ।

* * * *

इति भट्टश्रीसोमदेवविरचिते कथासरित्सागरे शक्तियशोलम्बके षष्ठस्तरङ्गः ॥

**End:**

इति प्रतार्य जलधाववतार्यावलम्ब्य च ।
वानरं शिशुमारश्च गन्तुं प्रववृतेऽथ सः ॥
गच्छन्तं तं स दृष्ट्वा च वानरश्चकिताकुलम् ।
सखे तादृशमद्य त्वां न पश्यामीति पृष्टवान् ॥
निर्बन्धेनाथ पृच्छन्तं मत्वा हस्तस्थितं च तम् ।
प्लवङ्गमं जगादैवं शिशुमारो जडाशयः ॥
अस्वस्था मे स्थिता भार्या सा च पश्यो(थ्यो)पयोगि माम् ।

---

No. 12177. कथासरित्सागरः.

KATHĀSARITSĀGARAḤ.

Substance, paper. Size, 13 × 6¼ inches. Pages, 653. Lines, 9 on a page. Character, Dēvanāgari. Condition, injured. Appearance, old.

Contains one to nine Lambakas.

Same work as the above.

## No. 12178. कथासरित्सागरः.

## KATHĀSARITSĀGARAḤ.

Substance, paper. Size, $10\frac{3}{4} \times 6\frac{1}{2}$ inches. Pages, 236. Lines, 13 on a page. Character, Dēvanāgari. Condition, fair. Appearance, old.

Contains one to nine Lambakas.

Same work as the above.

---

## No. 12179. कथासरित्सागरः.

## KATHĀSARITSĀGARAḤ.

Substance, paper. Size, $13 \times 8\frac{1}{2}$ inches. Pages, 396. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains one to six Lambakas.

Same work as the above.

---

## No. 12180. कौटिल्यकथासारः.

## KAUṬILYAKATHASĀRAḤ.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 37. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 78*a*. The other works herein are Nīlakaṇṭha-vijayacampu 1*a*, Mahāvīracarita 97*a*.

Complete.

A short poem purporting to relate the story of Cāṇakya, the chief character in the Mudrārākṣasa. It actually gives the story contained in the said drama. The author Ravinartaka states that he proposes to render into verse the story of Cāṇakya which existed in prose.

**Beginning:**

स्वभावमहितैर्वेषैः पुष्णन् विबुधसम्पदम् ।
स्थापितो गीर्भिरग्र्याभिः श्रीमान्नारायणो जयेत् ॥
बुद्धिरेव जयत्येका पुंसः सर्वार्थसाधनी ।
यद्बलादेव किं किं न चक्रे चाणक्यभूसुरः ॥
चाणक्यस्य कथा सेयं विद्यते गद्यरूपिणी ।
अद्य तां पद्यतां नेतुमुद्यतो रविक(न)र्तकः ॥
नयप्रयोगप्राचण्ड्यस्फुरद्धीराद्भुतात्मना ।
अनया कथया को नु मतिमानतिमाद्यति ॥

अस्ति सुस्थितभूपालवृन्दमन्दाकिनीतटे ।
रत्नाश्मपटलीभूतं पाटलीपुत्रकं पुरम् ॥

**End:**

प्रतिज्ञां नीत्वैवं विपुलमतिराबध्य च शिखां
निराशोऽपि प्रीत्या नरपतिकृताशेषविभवः ।
सकौटिल्यो धर्मान् विधिवदकरोदात्मभवने
वदन् काले काले हितमखिलमस्मै नृपतये ॥
नमश्शिवाभ्यां नवयौवनाभ्यां परस्पराश्लिष्टवपुर्धराभ्याम् ।
नगेन्द्रकन्यावृषकेतनाभ्यां नमो नमः शंकरपार्वतीभ्याम् ॥

**Colophon:**

कौटिल्यकथासारः संपूर्णः ॥

---

## No. 12181. कौटिल्यकथासारः.
## KAUṬILYAKATHĀSĀRAḤ.

Substance, palm-leaf. Size, 15¾ × 1½ inches. Pages, 27. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

Same work as the above.

---

## No. 12182. कौटिल्यकथासारः.
## KAUṬILYAKATHĀSĀRAḤ.

Substance, paper. Size, 8½ × 5½ inches. Pages, 97. Lines, 8 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Incomplete.

Restored from the MS. described above. This work is also called Mudrārākṣasakathāsaṅgraha.

---

## No. 12183. कौटिल्यकथासारः.
## KAUṬILYAKATHĀSĀRAḤ.

Substance, palm-leaf. Size, 10 × 1⅝ inches. Pages, 40. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Similar to the above. This work is also called Mudrārākṣasakathāsaṅgraha.

**Beginning:**

नत्वा गुरुपदाम्भोजं मुद्राराक्षसनाटके ।
अतिगूढं कथासारं सङ्क्षेपात् कथयाम्यहम् ॥

अस्ति कश्चिज्जनपदः पाटलीपुत्रकाभिधः ।
सर्वार्थसिद्धिनन्दाख्यो राजाभूत् तत्र धार्मिकः ॥
तस्याभूत् सचिवो मुख्यो राक्षसो नीतिकोविदः ।
अन्येऽपि नम्रनासाद्याः बहवो मन्त्रिणोऽभवन् ॥
तस्याभवन् धर्मपत्न्यां नव पुत्रास्सुबुद्धयः ।
भोगार्थं सुगृहीतान्या मुराख्या वृषली तु या ॥
तस्यां पुत्रो बभूवैको बुद्धिमान् नयकोविदः ।
स राजा पुत्रसौभाग्यसम्पन्नो रञ्जयन् प्रजाः ।
शिल्पिभिः कारयामास नवं पुष्पपुराभिधम् ॥

**End:**

प्रतिज्ञां तीर्त्वैवं विपुलमतिराबध्य च शिखां
निराशोऽपि प्रीत्या नरपतिकृताशेषविभवः ।
स कौटिल्यो धर्मान् विधिवदकरोदात्मभवने
वदन् काले काले हितमहितमस्मै नरभुजे ॥

स चन्द्रगुप्तोऽपि च भाग्यवान् क्रमात् कुर्वन् पितृभ्रातृवधप्रतिक्रियाम् ।
गुणोत्तरं राक्षसमाप्य मन्त्रिणं नवे वयस्यन्वशिषन्मही सुखम् ॥

**Colophon:**

मुद्राराक्षसकथासङ्ग्रहः समाप्तः ॥

---

## No. 12184. पञ्चतन्त्रम्.
## PAÑCATANTRAM.

Substance, paper. Size, $9\frac{5}{8} \times 7\frac{1}{4}$ inches. Pages, 96. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new. Complete.

A work by Viṣṇuśarman inculcating principles of morals and polity by means of easy illustrative fables. The following is a note in C.P. Brown's handwriting found in the book. "This is the Pañchatantra; the original Sanskrit text: transcribed from a valuable original remarkably correct; in some places it differs from the text printed in Germany and England."

**Beginning:**

मनवे वाचस्पतये शुक्राय पराशराय ससुताय ।
चाणक्यस्य(क्याय)च विदुषे नमोऽस्तु नयशास्त्रकर्तृभ्यः ॥

ग्रन्थविस्तरभीरूणां बालानामल्पचेतसाम् ।
बोधाय पञ्चतन्त्राख्यमिदं संक्षिप्य कथ्यते ॥
अन्यदीयोऽपि लिखितश्लोकोऽत्र क्रममागतः ।
स्वल्पत्वाद्ग्रन्थविस्तीर्णदोषस्तेन न जायते ॥

अस्ति सकलदेवताधिष्ठानं सकलविद्वज्जननिवासं पाटलीपुरं नाम नगरम् । तत्र सकलगुणोपेतः सुदर्शनो नाम राजासीत् । स चात्मीयपुत्राणामनधिगतनीतिशास्त्रार्थानामनुष्ठानानुपयोगेनोद्विग्नमनाश्चिन्तयामास । किमिति ।

* * * *

को नाम मम पुत्राणां नित्यमुन्मार्गवर्तिनाम् ।
नीतिशास्त्रोपदेशेन पुनर्जन्म करिष्यति ॥

अथाभ्यन्तरे विष्णुशर्मा नाम ब्राह्मणः सकलशास्त्रार्थतत्त्वज्ञो बृहस्पतिरिवोत्थाय प्रतिज्ञातवान् । देव अथाहं षण्मासाभ्यन्तरे तव पुत्रान् नीतिशास्त्राभिज्ञान् करोमि ततो मामपकामयितुमर्हेत् भवानिति श्रुत्वा प्रहृष्टमना राजा बहुमानपुरस्सरं तस्मै विष्णुशर्मणे सुतानर्पितवान् ।

**End:**

तस्मात् त्वमपि तादृश एव मूर्खः । अतः मतिमतां सर्वाणि कार्याणि सुपरीक्षितान्येव करणीयानि ।

प्रज्ञावमानहीनश्च कर्महीनश्च यो नरः ।
निरर्थाश्च क्रियास्तस्य भस्मन्याहुतयो यथा ॥

तथाच—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ॥
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥

**Colophon:**

समाप्तमसमीक्ष्यकारित्वं पञ्चमतन्त्रम् ॥

---

No. **12185.** पञ्चतन्त्रम्.

PAÑCATANTRAM.

Substance, palm-leaf. Size, 15¾ × 1¾ inches. Pages, 94. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old. Complete.

Date of transcription—Jayavāra (Tuesday), the 10th of Āśvayuja Bahula of the Akṣaya year.

Name of scribe, etc.—Avasarala Veṅkaṭācala who copied it for Kōṭagiri Śrinivāsarāya from the copy written by Īrigupatiyanna.

Same work as the above.

The scribe adds—

कोटिगिरिगोत्रजन्मा धर्मात्मा श्रीनिवासरायोऽसौ ।
मुळकुलान्वयजाय श्रीधवभक्ताय पेरुभट्टाय ॥ दद्यात् पञ्चतन्त्रम् ।

---

## No. 12186. पञ्चतन्त्रम्.
## PAÑCATANTRAM.

Substance, palm-leaf. Size, 12 × 1¼ inches. Pages, 208. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the third Tantra.

Same work as the above.

---

## No. 12187. पञ्चतन्त्रम्.
## PAÑCATANTRAM.

Substance, palm-leaf (Śrītāla). Size, 9¼ × 1¼ inches. Pages, 152. Lines, 6 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Breaks off in the fourth Tantra; wants the beginning.

Same work as the above.

---

## No. 12188. पञ्चतन्त्रम्.
## PAÑCATANTRAM.

Substance, palm-leaf. Size, 14¾ × 1¼ inches. Pages, 78. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete. Many leaves are lost in the book.

Same work as the above.

---

## No. 12189. पञ्चतन्त्रम्.
## PAÑCATANTRAM.

Substance, palm-leaf. Size, 12¼ × 1¼ inches. Pages, 66. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Breaks off in the second Tantra.

Same work as the above.

No. **12190.** पञ्चतन्त्रम् , कर्णाटकटीकासहितम्.

PAÑCATANTRAM WITH KANARESE MEANING.

Substance, palm-leaf. Size, 15¼ × 1¼ inches. Pages, 161. Lines, 7 on a page. Character, Kanarese. Condition, fair. Appearance, new.

Breaks off in the second Tantra.

Same work as the above.

---

No. **12191.** पञ्चतन्त्रम् , कर्णाटकटीकासहितम्.

PAÑCATANTRAM WITH KANARESE MEANING

Substance, palm-leaf. Size, 10¾ × 1¼ inches. Pages, 170. Lines, 7 on a page. Character, Kanarese. Condition, fair. Appearance, old.

Complete.

Same work as the above.

---

No. **12192.** पञ्चतन्त्रम्.

PAÑCATANTRAM.

Substance, paper. Size, 11¾ × 9¼ inches. Pages, 32. Lines, 35 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

---

No. **12193.** पञ्चतन्त्रम्.

PAÑCATANTRAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 62. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

Scribe's name—Viñjimūri Subbarāyaḍu.

---

No. **12194.** पञ्चतन्त्रम् , आन्ध्रटीकासहितः.

PAÑCATANTRAM WITH TELUGU MEANING.

Substance, paper. Size, 12¼ × 8 inches. Pages, 67. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

Date of transcription—Monday, the 9th day of the bright fortnight in the Bhādrapada month of the Pramādica year which is said to correspond to 12th September 1853.

### No. 12195. पञ्चतन्त्रम्, आन्ध्रटीकासहितम्.
### PAÑCATANTRAM WITH TELUGU MEANING.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 90. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the Mitrabhēda-tantra complete.

Same work as the above.

Date of transcription—Thursday, the 12th day of the bright fortnight of the Māgha month in the year Manmatha. Name of scribe—Pōlāpragaḍa.

---

### No. 12196. पञ्चतन्त्रम्, कर्णाटकटीकासहितम्.
### PAÑCATANTRAM WITH KANARESE MEANING.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 136. Lines, 6 on a page. Character, Kanaruse. Condition, much injured. Appearance, old.

Incomplete and imperfect.

Same work as the above.

---

### No. 12197. पञ्चतन्त्रम्, कर्णाटकटीकासहितम्.
### PAÑCATANTRAM WITH KANARESE MEANING.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 188. Lines, 9 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Incomplete and in a disorderly condition.

Same work as the above.

---

### No. 12198. पञ्चतन्त्रम्, कर्णाटकटीकासहितम्.
### PAÑCATANTRAM WITH KANARESE MEANING.

Substance, palm-leaf. Size, $13 \times 1\frac{1}{4}$ inches. Pages, 104. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Incomplete and imperfect.

Same work as the above.

---

### No. 12199. पुण्यास्रवकथा.
### PUṆYĀSRAVAKATHĀ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 312. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Wants the beginning and the end.

A Jaina work describing the importance and benefits arising from certain religious observances, etc.: by Rāmacandra, disciple of Kēśavanandi.

**Beginning:**

गृहीत्वा गृहमागच्छन्त्या मार्गस्थजिनालयस्य देह एका

* * * *

श्रेष्ठी सुगुप्तमुनिनिकटे तपसा दिवं गतः । इतः पद्मावत्या जीवाङ्कुरो जातः । कथम् । ये पू . . रेऽथपथा कुले वृद्धापत्यं स्वयमङ्कुशं गृहीत्वा पुरुषवचनादिवं चलित्वा पृष्ठे राजानं कृत्वा पत्तनात् बहिः भ्रमाव इति तत्स्वरूपे राज्ञः कुले तेन स्वमित्रवायुवेगशीभरेण मेघडम्बरादिकं कारितम् ।

* * * *

**Colophon:**

इति पुण्यास्रवाभिधानग्रन्थे केशवनन्दिदिव्यमुनिशिष्यरामचन्द्रमुमुक्षुविरचिते पूजाफलवर्णनाष्टकं समाप्तम् ॥

* * * *

इति पुण्या(स्रवाभिधानग्रन्थे केशवनन्दिदिव्यमुनिशिष्यरामचन्द्रमु)मुक्षुविरचिते पञ्चनमस्कारफलकृतिवर्णनाष्टकं समाप्तम् ॥

* * * *

इति पुण्यास्रवाभिधानग्रन्थे केशवनन्दिदिव्यमुनिशिष्यरामचन्द्रमुमुक्षुविरचिते व्रतोपयोगफलव्यावर्णनाष्टकं समाप्तम् ॥

* * * *

इति पुण्यास्रवाभिधानग्रन्थे केशवनन्दिदिव्यमुनिशिष्यरामचन्द्रमुमुक्षुविरचिते शीलफलव्यावर्णनाष्टकं समाप्तम् ॥

* * * *

इति पुण्यास्रवाभिधानग्रन्थे केशवनन्दिदिव्यमुनिशिष्यरामचन्द्रमुमुक्षुविरचिते उपवासफलव्यावर्णनाष्टकं समाप्तम् ॥

* * * *

इति पुण्यास्रवाभिधानग्रन्थे केशवनन्दिदिव्यमुनिशिष्यरामचन्द्रमुमुक्षुविरचिते ॥

* * * *

इति पुण्यास्रवाभिधानग्रन्थे केशवनन्दिदिव्यमुनिशिष्यरामचन्द्रमुमुक्षुविरचिते ॥

---

## No. 12200. प्रह्लादविजयम्.

## PRAHLĀDAVIJAYAM.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 265. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete in 26 Adhyāyas.

A compilation of the stanzas narrating the story of Prahlāda as found in the Bhāgavata, the Mahābhārata, and in some of the chief Purāṇas: by Tiruvēṅkaṭanātha, probably of the Tinnevelly district. He salutes God Gōpāla and His two consorts Lakṣmī and Bhūmi

**Beginning:**

श्रीभारते भागवते च विष्णुधर्मोत्तरे वैष्णवमात्स्ययोश्च ।
श्रीनारसिंहेऽप्यथ नारदीये कौर्मे पुराणेषु तथाऽपरेषु ॥
प्रह्लादमुद्दिश्य कथाः प्रवृत्ता यास्तास्समाहृत्य तदानुपूर्व्या ।
श्लोकांश्च तानेव सुसङ्गतार्थं संयोज्य मोदं विदुषां करिष्ये ॥
जेष्यामीति प्रतिज्ञाय समितावमितौजसाम् ।
जितवानजितं विष्णुं यः परां भक्तिमुद्वहन् ॥
तस्य भागवताग्र्यस्य प्रह्लादस्य महात्मनः ।
प्रह्लादविजयं नाम वक्ष्ये चरितमद्भुतम् ॥
ताम्रा तनोति तिरुवेङ्कटनाथभक्तिः
प्रह्लादयोगिरचितं परमं चरित्रम् ।
सिन्धुं विगाह्य जनितानि विमुक्तिमुक्ता-
जालानि हस्तसुलभानि रसाश्रयाणाम् ॥
श्रीमद्वेङ्कटनाथभूसुरवराज्ञागस्त्यकूटोद्भवा
श्रेयःप्रीतिकरी समस्तजगतां तद्भक्तिताम्रा नदी ।
प्रह्लादाभिधभक्तवर्यरचितप्रख्यानगाथाम्बु(धेः)
स्वात्मेशानुभवान्न चित्रमिह किं सुते विमुक्तात्मजा(का)न् ॥
प्रह्लादं नितरां निजाङ्घ्रिशरणं कुर्वन्यथार्थाभिधं
यस्तम्भादुदमूद्भीरनिनदैर्दैत्यान् मुहुस्तम्भयन् ।
तं भक्तावनबद्धकङ्कणमहं लक्ष्मीमहीसेवितं
श्रीगोपालमहर्निशं हृदि भजे सर्वार्थसंसिद्धये ॥
ओन्तत् सत ।

श्रीमन्नारदीये—

श्रीमत्पद्मजतार्क्ष्यफल्गुनशुकप्रह्लादभीष्मोद्धव-
व्यासाक्रूरपराशरध्रुवमुखान् वन्दे मुकुन्दप्रियान् ।
यैस्तीर्थैरिव भावितं त्रिभुवनं रत्नैरिवालङ्कृतं
सद्दीपैरिव रक्षितं सुखकरैश्चान्द्रैरिवाप्यायितम् ॥

अस्ति त्रैलोक्यविख्यातं वनं नैमिशसंज्ञितम् ।
पवित्रं गोमतीतीरे नित्यपुण्यफलर्द्धिमत् ॥
स्वलङ्कृता महात्मानः श्रीभागवतलक्षणैः ।
ऋषयो यत्र सत्रेण चिरं हरिमपूजयन् ॥

* * * *

तस्मिन् महाश्रमे पुण्याः शौनकाद्या महर्षयः ।
अवसन् विष्णुपादाब्जद्वन्द्वध्यानपरायणाः ॥
ते कदाचित्समासीनं सूतं पप्रच्छुरादरात् ।

ऋषयः—

वयं पुण्यार्जनक्लिष्टाः प्राप्तास्त्वां पुण्यसागरम् ।
दैवाद्धनार्जनासक्ता निधानं कृपणा इव ॥
त्वमान्तरं हंसि तमो जनानां मुहुः स्वगोभिस्तरणिस्तु बाह्यम् ।
अतोऽद्य नः श्रीशयशस्तवाख्यैस्सुधारसैः प्लावय मानसानि ॥

मात्स्ये—

दैत्येन्द्रनिधनार्थाय धर्मसंस्थापनाय च ।
स्तम्भादाविर्भवद्विष्णुर्नरसिंहवपुर्धरः ॥
हिरण्यकशिपोः पुत्रं प्रह्लादं शरणागतम् ।
उज्जहारापदम्भोधेर्भगवानिति शुश्रुम ॥

* * * *

**Colophon:**

इति प्रह्लादविजये प्रथमोऽध्यायः ॥

**End:**

श्रीपराशरः—

एवंप्रभावो दैत्येन्द्रो मैत्रेयाभून्महामतिः ।
प्रह्लादो भगवद्भक्तो यं त्वं मामनुपृच्छसि ॥
यस्त्वेतच्चरितं तस्य प्रह्लादस्य महात्मनः ।
शृणोति तस्य पापानि सद्यो गच्छन्ति संक्षयम् ॥
अहोरात्रकृतं पापं प्रह्लादचरितं नरः ।
शृण्वन् पठंश्च मैत्रेय व्यपोहति न संशयः ॥

* * * *

श्रीभागवते—

एतद्य आदिपुरुषस्य मृगेन्द्रलीलां दैत्येन्द्रयूथपवधं प्रयतः पठेत ।
दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वाऽनुभावमकुतोभयमेति लोकम् ॥

**Colophon:**

इति श्रीमद्वेङ्कटनाथ[य] संयोजिते श्रीप्रह्लादविजये षड्विंशोऽध्यायः ॥

---

## No. 12201. बृहत्कथामञ्जरी.

## BṚHATKĀTHĀMAÑJARĪ.

Substance, palm-leaf (Śrītāla). Size, 24⅛ × 1⅝ inches. Pages, 302. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

The colophon in this MS mentions the name of the work as Bṛhatkathā.

This work is a summarized version of Guṇāḍhya's Bṛhatkathā in as many Lambas as that of the original (viz, 18); by Kṣēmēndra also called Vyāsadāsa, who lived in the court of Ananta who, according to M. A. Stein, ruled in Kashmir (1028—1063 A.D.). It has been printed in the Kāvyamālā. Although this MS. contains many omissions of words, it supplies some of the omissions found in the printed edition.

Contains the following Lambakas:—

१ कथापीठः.
२. कथामुखम्.
३. लावानकम्.
४ नरवाहनजन्म.
५. चतुर्दारिका.
६. सूर्यप्रभ.
७. मदनमञ्चुका.
८. वेला.
९. शशाङ्कवती.
१०. विषमशील.
११. मदिरावती.
१२. पद्मावती.
१३. पञ्च.
१४. रत्नप्रभा.
१५. अलङ्कारवती.
१६. शक्तियशाम्

**Beginning:**

उमाप्रणामसङ्क्रान्तचरणालक्तकश्शशी ।
सन्ध्यारुण इवाभाति यस्य पायात्स वश्शिवः ॥
सरस्वतीविभ्रमदर्पणानां सूक्तामृतक्षीरमहोदधीनाम् ।
सन्मानसोल्लाससुधाकराणां कवीश्वराणां जयति प्रकर्षः ॥
दोषालोकननिपुणाः परुषगिरेदुर्जनाश्च बकाश्च ।
दर्शनमपि भयजननं तेषामनिमित्तपिशुनानाम् ॥
ओजोरञ्जनमेव वर्णरचनाश्रित्रा न कस्य प्रिया
नानालङ्कृतयो न कस्य मनसस्सन्तोषमातन्वते ।

काव्ये किन्तु सतां चमत्कृतिकृतस्सूक्तिप्रबन्धाः स्फुटं
तीक्ष्णाग्रा झटिति श्रुतिप्रणयिनः कान्ताकटाक्षा इव ॥

**End:**

अयं मे व्यथते बाहुस्त्वयाकृष्टः करोमि किम् ॥
इति तद्वचसा क्षिप्रं स ययौ भृशमार्द्रता(म्) ।
लभ्यते स्त्रीपिशाचीभिरुच्छिष्टा इव रागिणः ॥
सोऽवदद्दयितो(ते)पापं तव मिथ्यापकार(रि)णम् ।
त्वन्ताडय लताभिर्वा(र्मा)तेन कोपः प्रयातु ते ॥

---

## No. 12202. भोजचरित्रम्.

## BHŌJACARITRAM.

Substance, palm-leaf. Size, 13¾ × 1½ inches. Pages, 124. Lines, 7 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Complete.

An account of the leading incidents in the life of Bhōja, the king of Dhārā: by Vallabhapaṇḍita who is mentioned in the printed editions as Ballāla. This king is commonly said to be the same as the one who is said to be the author of the Campūrāmāyaṇa.

**Beginning:**

श्रीमतो धाराधीशस्य राज्ञो भोजस्य प्रबन्धो लिख्यते—

आदौ धारायां राज्ये सिन्धुलसंज्ञो राजा सुचिरं प्रजाः पालितवान् । (तस्य च वृद्धत्वे) भोज इति पुत्रोऽभूत् । स यदा पञ्चवर्षस्तदा आत्मपिता आत्मनो मरणसमयं विदित्वा मुख्यामात्यानाहूयानुजं मुञ्जं च महाबलमालोक्य पुत्रं च बालं (समालोच्य) विचारयामास । यद्यहं राजलक्ष्मीधारणसमर्थं सोदरमपहाय पुत्राय राज्यं प्रयच्छामि तदा लोकापवादः । अथवा बालकं मे पुत्रं मुञ्जो राज्यलोभात् (विषादिना) मारयिष्यति राज्यं वृथा पुत्रहानिर्वंश-च्छेदश्च ।

**End:**

देव कोऽपि विद्वान् द्वारि तिष्ठति ।

राजा—प्रवेशय । ततस्स विद्वान् सभां प्राप्य राज्ञः स्वस्तीत्युक्त्वा प्राह ।

राजा तस्मै कवये प्रत्यक्षरं लक्षं ददौ ।

**Colophon:**

इति पण्डितवल्लभविरचितो भोजप्रबन्धस्समाप्तः ॥

No. 12203. भोजचरित्रम्.
BHŌJACARITRAM.

Pages, 162. Lines, 14 on a page.

Begins on fol. 1*a* of the MS. described under No. 12106.

Incomplete.

Same work as the above.

No. 12204. भोजचरित्रम्.
BHŌJACARITRAM.

Pages, 132. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 12098.

Complete.

Same work as the above.

**Colophon:**

भोजचरित्रं सम्पूर्णम् ॥

No. 12205. भोजचरित्रम्.
BHŌJACARITRAM.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 131. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above. By Vallabhapaṇḍita.

No. 12206. राजशेखरचरित्रम्.
RĀJAŚĒKHARACARITRAM.

Pages, 72. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 11836.

Complete.

A poem inculcating morals by means of stories abridged from those which are said to have been related originally in the court of Rājaśēkhara and which were afterwards repeated by Rasikaśēkhara to Subuddhi. It was composed by Kavikuñjara and is called also Sabhārañjanaprabandha.

**Beginning:**

श्रेयांसि मम भूयांसि दत्तां किमपि दैवतम् ।
भूषणं भीषणं यस्य मदनस्सदनं रुषः ॥

नवीनकालिदासस्य शिष्यो भूष्यतमस्सताम् ।
काव्यामृतरसाभिज्ञो नाम्ना रसिकशेखरः ॥
सुबुद्धिनाम्ने मित्राय पात्राय विविधाः कथाः ।
कथयामास यास्तासां सङ्ग्रहोऽयं विधीयते ॥
कविकुञ्जरनाम्नो मे प्रबन्धो रसबन्धुरः ।
समाराञ्जननामायं जयतु क्लेशभञ्जनः ॥
प्राक्तनान्येव सूक्तानि ग्रथितान्यत्र यद्यपि ।
रससङ्ग्राहकस्यैव तथापि स्याद्यशो मम ॥

अत्र खलु प्रशस्तमतिरभिनवकालिदासस्य सुकवेरन्तेवासी चिरतरतदीयसहवाससमुपचितरसिकतोत्सेकः श्रीमान् रसिकशेखरो नाम । तस्य खलु बालमित्रं सुबुद्धिर्नामान्वर्थनामा कदाचित् सुभाषितशुश्रूषया स्वमित्रं रसिकशेखरमवादीत् ।

सुभाषितामृतास्वादसादरोऽस्मि चिरादहम् ।
परिपूरय कामं मे सखे रसिकशेखर ॥

तदेतद्वयस्यवचनमाकर्ण्य रसिकशेखरः प्रत्यवादीत् । स्निग्ध सुबुद्धे यदि तव सुभाषितशुश्रूषा तर्हि

राजशेखरभूपस्य सभायां मधुरा गिरः ।
नवीनकालिदासादिगदिताः श्रोतुमर्हसि ॥

इदमाकर्ण्य सुबुद्धिरवादीत् ।

**End :**

स्कन्धे कृषीवल हलं कलयन् क यासि ।!

माणव्यः—गच्छामि ते निकटमेव विभो ।

राजा—किमर्थम् ?

हा हन्त कर्षणपरास्तव वैरिभूपा
वृत्तिं हरन्ति न इति त्वरयाभिधातुम् ॥

राजा—नितान्तसन्तुष्टस्तस्मै निजकर्णगते स्वकुण्डले प्रायच्छत ॥

**Colophon :**

इति श्रीकविकुञ्जरकृतौ राजशेखरचरित्रे समाराञ्जनप्रबन्धे प्रथमोल्लासः ॥

राजशेखरचरितं सम्पूर्णम् ॥

## No. 12207. विक्रमार्कचरितम्.
## VIKRAMARKACARITAM.

Pages, 158. Lines, 10 on a page.

Begins on fol. 233*b* of the MS. described under No. 11613.

Complete.

A poem containing a series of 32 stories which are said to have been narrated to king Bhōja by 32 images placed on 32 steps attached to Vikramāditya's throne when the former wanted to ascend on it for seating himself therein. This work is also called Dvātrimśat-sālabhañjikā.

**Beginning:**

पुरा लङ्केश्वरभुजाकेयूरनिकषोपले ।
शैले शैलेन्द्रसुतया जगदे जगदीशिता ॥
देव चित्रकथाः काश्चिदन्तरालस्यमोचनी ।
मह्यं शुश्रूषवे ब्रूहि मनःप्रह्लादिनीश्शुभाः ॥
अथोवाच महादेवो भवानीं प्रीतमानसः ।
शरच्चन्द्रांशुनिष्यन्दसुधामधुरया गिरा ॥
अस्ति सिंहासनं किंचिद्दृहणीयं महत्तरम् ।
परितस्तस्य विद्यन्ते द्वात्रिंशत्सालभञ्जिकाः ॥
कदाचिदुचिते काले कलाकुशलसङ्कुले ।
भोजराजसभामध्ये कथयन्ति स्म ताः कथाः ॥

देव्युवाच—

कस्येदमासनन्देव किन्दिव्यं रूपलक्षणम् ।
कुत्र स्थानमभूत्पूर्वं वशे कस्य महीपते ॥
प्राप भोजमहीपालः कस्मादेतद्वरासनम् ।
तच्चित्रमिव मे भाति पूर्वमारभ्य मे वद ॥
एवमुक्तो महादेवो वभाणे दन्तकान्तिभिः ।
मौलिचन्द्रमसः कुर्वन्नाकस्मिकमहोत्सवम् ॥

**Colophon:**

इति सिंहासनद्वात्रिंशत्सालभञ्जिकायां प्रथमालापनिका ॥

अस्ति विस्तृतसंपत्तिः पृथ्वीमण्डलमण्डनम् ।
सुपर्वालयसौभाग्यं जयिन्युज्जयिनी पुरी ॥

अनुजे विक्रमादित्ये युवराजेऽनुवर्तिनि ।
राज्ञा भर्तृहरिर्नाम कान्ताजनमनोरमः ॥
अनङ्गसेना महिषी भार्या भर्तृहरेः प्रिया ।
तस्यामासक्तहृदयो नान्यद्वेद स भूपतिः ॥
तस्मिन्नेव पुरे कश्चिद्द्विजो दुर्गतिपीडितः ।
चिरकालं तपस्तप्त्वा भद्रकालिमतोषयत् ॥

**End:**

इत्युक्तः पुत्रिकावृन्दैः भोजराजोऽवदत्पुनः ।
पुत्रिका वः प्रसादेन सर्वमाशास्यमस्ति मे ।
युष्मद्दर्शनतोऽन्यत्र किं वा श्रेयो मयार्थ्यते ।
तथापि विक्रमार्कस्य भवतीभिर्ममेरितम् ॥
चरितं शृण्वतां पुंसां सन्तु सर्वा विभूतयः ।
तथेति भोजभूपालं पुण्यश्लोकशिखामणिम् ॥
अभिष्टुत्याभवन्सर्वाः प्रसन्नाः पुत्रिका भृशम् ।
भोजोऽपि भुवनश्लाघ्यं सिंहासनमुपेयिवान् ॥
शशास धरणीसेनां शङ्कराराधनोत्सुकः ।

**Colophon:**

इति विक्रमादित्यचरिते सिंहासनद्वात्रिंशत्सालभञ्जिकायां द्वात्रिंशतिकथा ॥
इति द्वात्रिंशत्सालभञ्जिका समाप्ता ॥
विक्रमार्कचरित्रं संपूर्णम् ॥

---

No. 12208. विक्रमार्कचरितम्

VIKRAMĀRKACARITAM.

Substance, palm-leaf. Size, 18¼ × 1½ inches. Pages, 87. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains 22 stories.

A work in prose narrating the birth, and the other leading incidents in the life of Vikramārka who is said to have reigned in Ujjain.

**Beginning:**

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुभ्रा सरस्वती ॥
श्रीपुराणपुरुषं(महेश्वरं)पद्मसम्भवमुमासुतं मया ।
संप्रणम्य सुभगां सरस्वतीं विक्रमार्कचरितं विरच्यते ॥

पुरा किल कैलासवासिनं जगदम्बिका समवदत् । किमिति
वेदशास्त्रविनोदेन कालो गच्छति धीमताम् ।
इतरेषान्तु मूर्खाणां निद्रया कलहेन वा ॥

इत्युक्त्वा कालयापनार्थं कापि सकललोकचमत्कारिणी कथा कथनीया । ततः परमेश्वरः पार्वतीं प्रत्याह । भुवनेश्वरि श्रूयताम् । सकलजनहृदयहारिणी कथा मया कथ्यते । अस्ति समस्तवस्तुविस्तीर्णतागुणपराभूतपुरन्दरावासोज्जयिनी नाम नगरी । तत्र चन्द्रगुप्तो नाम ब्राह्मणो राजाभूत् । स राजा ब्राह्मणक्षत्रियवैश्यशूद्रकुलानां कन्यकाविवाहमनुगृह्य स्थितः । तासां नामानि ब्राह्मणी, भाग्यवती, भानुमती, सोमवती, सिन्धुवती इत्यादिभिः, तासां पुत्राः क्रमेण वलरुचिभट्टः, विक्रमार्कः, भट्टः, भर्तृहरिः ।

**End:**

तदा दरिद्रः कश्चिद्ब्राह्मणस्समागत्य स्वस्त्यस्तु ते राजन्नित्याशिषं चकार। तं प्रति राजा भणति । भो विप्र अत्यन्तवीभ्रः कुत्र गच्छसि । तद्वाक्यं श्रुत्वा भो राजन् बहुकालं मरणसदृशदारिद्र्यदुःखमनुभूय देशान्तरं गच्छामीत्युक्तवान् । तथाचोक्तं शास्त्रे—

उत्तिष्ठ क्षणमेनमुद्वह सखे दारिद्र्यभारं (मम)
(श्रान्तस्तावद)हं चिरं मरणजं सेवे त्वदीयं सुखम् ।
इत्युक्तं धनवर्जितस्य वचनं श्रुत्वा श्मशाने शवो
(दारिद्र्यान्मरणं वरं वरमिति ज्ञात्वैव तूष्णीं स्थितः) ॥

---

## No. 12209. विक्रमार्कचरितम्.

## VIKRAMĀRKACARITAM.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 104. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains stories 1 to 16 complete and the 17th incomplete. At the end 18 leaves are half-broken.

Same work as the above.

---

## No. 12210. वेतालपञ्चविंशतिकथा.

## VETĀLAPAÑCAVIṀŚATIKATHĀ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 106. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants the beginning in the first Vetālakathā and breaks off in the 25th Vētālakathā.

Same work as that described under R. No. 1070 of the Triennial Catalogue, Vol. II, Part I-A, wherein see for the beginning.

**End:**

कथयित्वेति वेताल(ः) पप्रच्छ वसुधाधिपम् ।
अनुरागोऽधिकः कस्य राजन्नेतेषु कथ्यताम् ॥
राजा तमवदन्मन्ये च . . . . तो यतस्स्फुटम् ।
इति श्रुत्वैव वेतालो गत्वा पुनरलम्बत ॥

**Colophon:**

इति चतुर्विंशो वेतालः ॥

नृपोऽप्यारुह्य तं तूर्णं . . . . . . . नुते ।
सुक्ष(हृत्व) गत्वा श्रियं राज(न्) न वेदेकां कथां शृणु ॥
दाक्षिणात्ये नरपतिर्धर्मो नाम महाबलिः ।

* * * *

इति तौ सत्यवचसा बद्धौ विनिमयेन ते ।
बद्धा(तु) सुरतं काले प्रापतुस्तनयं तथा ॥

---

## No. 12211. वेतालपञ्चविंशतिकथा.
## VĒTĀLAPAÑCAVIMŚATIKATHĀ.

Pages, 173. Lines, 15 on a page.

Begins on fol. 277a of the MS. described under No. 1197.

There are many omissions as this was copied from a injured palm-leaf manuscript of the Library described above.

Contains stories 1 to 24 complete and the 25th incomplete.

---

## No. 12212. शुकसप्ततिकथा.
## ŚUKASAPTATIKATHĀ.

Substance, paper. Size, $12\frac{2}{3} \times 8$ inches. Pages, 696. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 70 Ālāpanikās.

A didactic work in poetry containing 70 stories alleged to have been related to a king by a parrot kept by one Dēvadāsa whose wife the said king endeavoured to seduce. Each story is stated to be capable of conveying some useful lesson. The subjects treated of in the 70 stories are mentioned in the extracts from the end given below.

**Beginning:**

सुधर्मायां पुरा राजन् महेन्द्रो देवतागणैः ।
इमं प्रश्नं तदापृच्छन्नारदो देवसन्निधौ ॥
परतत्त्वार्थविल्लोके तदा तत्प्रतिबोधकः ।
अस्ति चेत् परमं गुह्यं यथा वक्तुमिहार्हसि ॥

नारदः—

शुक एवोभयं वेत्ति नान्यं वेद्मि शचीपते ।
स्वयं तत्त्वार्थविद्वक्ता परस्मै बोधितुं क्षमः ॥
तद्वचस्तत्सभामध्ये वह्निश्श्रुत्वा तदाब्रवीत् ।
स्वयं वेत्ति विरागी च न वक्ता परबोधकः ॥
सर्ववित्तत्त्वविल्लोके न परेषां विचक्षणः ।
संवादस्सुमहानासीदुभयोर्देवसन्निधौ ॥
तिरोहिते देवगणे सेन्द्रे विस्मयं गते ।
वह्निर्भूमण्डले राजा जातः क्षत्रकुलोत्तमे ॥
नारदस्सर्वमाचष्टे शुकायामिततेजसे ।
तत्प्रबोधार्थमाचष्टे शुकः पादजमन्दिरे ॥
शुको भूत्वा परीक्षार्थं स्वर्णपञ्जरमाविशत् ।
शृणु राजन् कथामेतां पवित्रां पापनाशिनीम् ॥
पुरातनीं पुराणोक्तां शुकोक्तां वह्निभूभुजे ।
अस्ति भूमण्डले राजा सर्वशास्त्रार्थतत्त्ववित् ॥
सर्वज्ञः कुशलो दक्षो नीतिशास्त्रार्थपारगः ।
सदा विद्वज्जनासेवी यायजूको महामतिः ॥

* * *

एवं पालयतः पृथ्वीं तस्यासीद्भृत्यपुङ्गवः ।
स्वामिकार्यहितासक्तः सभार्यः खड्गमुद्वहन् ॥
प्रत्यहं राजसन्मानी युद्धे चाप्यनिवर्तितः ।
भृत्यधर्मरतो नित्यं राजसेवापरायणः ॥

* * *

शुकस्तिष्ठति तद्गेहे तेन भृत्येन पोषितः ।
अतीतानागतस्सम्यग्वेत्ति ज्ञानप्रभावतः ॥

स्वामिनं प्रत्यहं शिक्षन् गुरुः शिष्यं यथा द्विजः ।
प्रत्यहं प्रातरुत्थाय पञ्जरस्थं शुकं सदा ॥
करिष्यद्राजकार्याणि कुर्वन् तद्वचनं सदा ।

* * * *

एवं पालयतस्तस्य प्रणिधिस्ते पुरे तथा ।
रहः प्राञ्जलिरभ्येत्य राजानं प्राह सर्ववित् ॥
राजन् शृणु यथावृत्तं स्वदेशे यन्मयोदितम् ।

* * * *

तत्र दृष्टा मया नारी देवदासस्य वै प्रिया ।
सौन्दर्ये कमलाकारा भवानीसदृशा गुणैः ॥

* * * *

गौरीपूजाफला नित्यं हरिद्रैः कुङ्कुमादिभिः ।
अलङ्कृत्य स्वदेहं सा सर्वदा कञ्चुकान्विता ॥
शुकं वा वदते कापि स्वभर्त्राघोषितं प्रियम् ।
न दासी न च भृत्यश्च नान्यस्तत्र प्रवर्तते ॥
सर्वं तस्याः प्रभावेन जलकाष्ठादिकं च यत् ।
तत्सर्वं सहसा प्राप्तं पातिव्रत्यप्रभावतः ॥

* * * *

देवदासं समाहूय दत्त्वा च बहुशो धनम् ।
उदकार्णवमासाद्य मद्वाक्यमनुपालयन् ॥
चन्द्रिकागिरिमाश्रित्य स्थित्वा तत्रैव सर्वदा ।
विष्णुब्रह्मण्यदेवेशं नत्वा स्तुत्वा जगद्गुरुम् ।
ससत्या दिवसैः कार्यं साधयाशु ममाज्ञया ॥
चन्द्रिकागिरिमध्यस्थं गृहीत्वा नायकं माणम् ।
पुनरागच्छ भद्रं ते मत्समीपमशङ्कितः ॥

* * * *

देवदासस्तथेत्युक्तः स्वगृहं पुनराविशत् ।
कथयामास तत्सर्वं स भार्यायै शुकाय हि ॥
शुकस्तत्सर्वमाकर्ण्य राजानं कामचारिणम् ।
हृदि सर्वमवष्टभ्य देवदासमथाब्रवीत् ॥

जाने त्वां तं च राजानं कामार्तं चारवाक्यतः ।
राजानो वञ्चितास्सर्वे परचारैर्धनादिभिः ॥

* * * *

एवमुक्तस्तदा तेन त्रिः परिक्रम्य पक्षिणम् ।
गतो मुहूर्तमात्रेण यत्रास्ते चन्द्रिकागिरिः ॥
शुकोक्तं साधयामास राजकार्यमतन्द्रितः ।
तत्पत्नी तेन मार्गेण प्रत्यहं शुकचोदिता ।
गौरीपूजापरा नित्यं मौनव्रतपरायणा ।
ध्यायन्ती निर्मलं देवं दयालुं भक्तवत्सलम् ॥

**Colophon:**

इति शुकसप्ततिकथासु पीठिकावतरणम् ॥

**End:**

कराग्रेण शुकं स्पृष्ट्वा वसिष्ठो वाक्यमब्रवीत् ।
कथानां पूर्वमुक्तानां मध्ये कां वेदसम्मिताम् ॥
यः शृणोति नरो लोके स मुक्तः परमं पदम् ।
प्रथमं मुनिवैराग्यं द्वितीयं साहसं स्त्रियाः ॥
श्रीशैलस्यैव माहात्म्यं तृतीयं परिकीर्तितम् ।
चतुर्थं रजकीगाथा विप्रस्यैव तु पञ्चमम् ॥
पितापुत्रस्य संवादं षष्ठं च परिकीर्तितम् ।
सप्तमं शूद्रमाहात्म्यं सागरं चाष्टमं तथा ॥
देवस्वामीति नवमं दशमं ब्रह्मराक्षसम् ।
एकादशं मृत्युरूपं वारुणं द्वादशं तथा ॥
द्राक्षारामेश्वरश्चै(रं चै)व कथां सुन्दोपसुन्दयोः ।
स्त्रीजातकं तदा प्रोक्तं षोडशं तु शकुन्तला ॥
कलाशास्त्रं सप्तदशमनसूयाकथा तथा ।
त्रयोविंशद्बन्धनं च देशभेदास्ततः परम् ॥
कृतघ्नं पञ्चविंशत्या रत्नलक्षणकं तथा ।
त्रिंशद्द्रवतीगाथा उक्ता परमशोभना ॥

पातिव्रत्यं ततः पश्चात् वेदयामाहात्म्यमेव च ।
त्रयस्त्रिंशद्यमपुरं ततस्तुलसिसंभवः ॥
दीर्घध्वज इति ख्यातं कार्तिकस्य शुभावहम् ।
वैशाखमाघमाहात्म्यं गयामाहात्म्यमेव च ॥
काशीमाहात्म्यकं चैव प्रयागाख्यमनन्तरम् ।
चिदम्बरं ततः पश्चात् सामुद्रिकमतः परम् ॥
श्वेतोपाख्यानकं चैव ततस्त्वेकादशीव्रतम् ।
रजस्वलाकथा चैव श्राद्धविस्तारमेव च ॥
द्रव्यशुद्धिस्ततः पश्चादाशौचं तदनन्तरम् ।
ततो वर्णाश्रमाचारो गृहधर्मास्ततः परम् ॥
पुराणश्रवणं चैव सर्वेषामनुकीर्तितम् ।
वन्ध्यास्नानं ततः पश्चात् धनार्जनमनन्तरम् ॥
पुत्रगोपालकं नाम व्रतं पुत्रप्रदायकम् ।
गोपालप्रतिमादानमद्भुताश्च ततः परम् ॥
दानप्रकरणं चैव व्यवहारस्ततः परम् ।
प्रायश्चित्तं ततः प्रोक्तं रोगाश्चैव ततः क्रमात् ॥
युगधर्मास्ततः पश्चात् प्रयत्नेन प्रकीर्तिताः ।
पितापुत्रस्य संवादो भृगोर्वारुणकं तथा ॥
ज्ञानोपदेशनं नाम तथा ब्रह्मोपदेशनम् ।
तत्त्वबोधस्ततः पश्चात् सन्न्यासस्तदनन्तरम् ॥
यतिधर्मास्तथा प्रोक्ता व्यासपूजा ततः परम् ।
योगमार्गस्ततः पश्चात् कथानां संहतिस्तथा ॥
एतासां श्रवणाद्वापि पठनाद्वा विज्ञाम्यते ।
सर्वपापविनिर्मुक्तः स याति परमं पदम् ॥
वन्ध्या नियमपूर्वेण पूजयित्वाथ पुस्तकम् ।
आरभ्य नियमान्नित्यं कथां वा द्वयमेव वा ॥
शुकं स्वर्णमयं कृत्वा पूजयित्वा दिने दिने ।
श्रुत्वा नियमपूर्वेण दिनान्ते दानमाचरेत् ॥

वन्ध्या पुत्रमवाप्नोति रोगी रोगात् प्रमुच्यते ।
अधनो धनसम्पन्नः स कामी काममाप्नुयात् ॥

* * * *

य इदं शृणुयान्नित्यं वाचयेद्वा समाहितः ।
सर्वपापविनिर्मुक्तः प्रपेदे वैष्णवं पदम् ॥

**Colophon:**

इति शुकसप्ततिकथासु सप्ततिदिनालापनिका ॥

---

### No. 12213. शुकसप्ततिकथा.
### ŚUKASAPTATIKATHĀ.

Substance, palm-leaf. Size, 12⅞ × 8 inches. Pages, 474. Lines, 30 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Complete.

Same work as the above.

The scribe adds—

श्रीवाधूलसगोत्रजेन विदुषा कृष्णेन चाङ्गीरसे
वर्षे श्रावणशुक्लपक्षदशमीयुक्तार्कसूनोर्दिने ।
स्वीयं पुस्तकमेतदाशु लिखितं धीमद्विनोदाय हि
श्रीमत्या शुकसप्ततीति कथया चासीत्समग्रं भुवि ॥

---

### No. 12214. शुकसप्ततिकथा.
### ŚUKASAPTATIKATHĀ.

Substance, palm-leaf. Size, 17½ × 1⅝ inches. Pages, 194. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the Alāpanikās 1 to 37 complete, and the 38th incomplete.

Same work as the above.

---

### No. 12215. हनुमद्विजयः.
### HANUMADVIJAYAḤ.

Substance, palm-leaf. Size, 16⅛ × 1¼ inches. Pages, 118. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete in 20 Adhyāyas.

It is a portion of the Jaimini-Bhārata and is also called Mairāvaṇa-caritra. Same work as that described under No. 2082 of the D.C.S. MSS., Vol. IV, Part I, but with a different colophon which is given below:—

इति श्रीजैमिनिभारते मारुतिमैरावणचरित्रे विंशोऽध्यायः ॥

Date of transcription—the 3rd day of the latter half of the Nala year. Place of transcription—The place of the junction of the rivers Kāvēri and Bhavāni. Name of the scribe—Nārāyaṇa.

---

No. 12216. हनुमद्विजयः.

HANUMADVIJAYAḤ.

Substance, paper. Size, 11¼ × 8¾ inches. Pages, 230. Lines, 20 on a page. Character, Dēvanāgari. Condition, good. Appearance, new. Complete in 63 Sargas.

This work is also called Mairāvaṇacaritra. Same work as that described under No. 2086 of the D.C.S. MSS., Vol. IV, Part I, wherein see for the beginning.

**End:**

यः पठेदिदमाख्यानं शृणुयाद्यश्च मानवः ।
तावुभौ वैष्णवे लोके वसेतां प्रलयावधि ॥
हनुमद्विजयं यश्च शृणोति प्रतिवासरम् ।
स नित्यं पूजितो देवैर्विष्णुलोके महीयते ॥
एवमेतत् ( . . . ) प्रवर्धताम् ॥

**Colophon:**

इति श्रीपूर्ववासिष्ठे मैरावणवधे हनुमद्विजये त्रिषष्टितमस्सर्गः ॥

---

No. 12217. हितोपदेशः.

HITOPADEŚAḤ.

Substance, paper. Size, 13 × 8¾ inches. Pages, 149. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new. Complete. Written on one side of paper.

A moral poem like the Pañcatantra of which it is an abridgment: by Viṣṇuśarman.

**Beginning:**

सिद्धिस्साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः ।
जाह्नवीफेनलेखेव यन्मूर्ध्नि शशिनः कला ॥

श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु ।
वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥
अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥
सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।
अहार्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा ॥

* * * *

अत्रान्तरे विष्णुशर्मा नाम महापण्डितः सकलशास्त्रतत्त्वज्ञो बृहस्पतिरिवाब्रवीत् । देव महाकुलसंभूता एते राजपुत्रा मया नीतिं ग्राहयितुं शक्यन्ते ।

* * * *

राजपुत्रैरुक्तम्—आर्य कथ्यताम् ।

विष्णुशर्मोवाच—शृणुत संप्रति मित्रलाभः प्रस्तूयते । यस्यायमाद्यः श्लोकः—

असाधना वित्तहीना बुद्धिमन्तस्सुहृत्तमाः ।
साधयन्त्याशु कार्याणि काककूर्ममृगाखुवत् ॥

राजपुत्रा ऊचुः—कथमेतत् ।

विष्णुशर्मा कथयति ।

**End:**

राजपुत्रा ऊचुः—आर्य तव प्रसादात् सकलराज्यव्यवहाराङ्गं ज्ञातम् । ततस्सुखिनो भूता वयम् ॥

विष्णुशर्मोवाच—यद्यप्येवं । तथापि ।अपरमपीदमस्तु—

सन्धिस्सर्वमहीभुजां विजयिनामस्तु प्रमोदस्सदा
सन्तस्सन्तु निरापदस्सुकृतिनां कीर्तिश्चिरं वर्धताम् ।
नीतिर्वारविलासिनीव सततं वक्षःस्थले संस्थिता
वक्त्रं चुम्बतु मन्त्रिणामहरहर्भूयान्महानुत्सवः ॥

**Colophon:**

इति हितोपदेशे नीतिशास्त्रे सन्धिर्नाम चतुर्थः कथासङ्ग्रहः ॥

## No. 12218. हितोपदेशः.

### HITŌPADĒŚAḤ.

Substance, palm-leaf (Śrītāla). Size, 17⅜ × 1⅝ inches. Pages, 58. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants six leaves in the beginning and breaks off in the Sandhi.

Same work as the above

---

## 7. CAMPU-KĀVYA.

---

## No. 12219. उत्तरचम्पुः.

### UTTARACAMPUḤ.

Substance, palm-leaf. Size, 18¼ × 1⅛ inches. Pages, 76. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Nīlakaṇṭhavijaya-campu 39*a*, Cāṭuślōkas 83*a*.

Complete.

A Campukāvya by Vēṅkaṭādhvarin of Ātrēyagōtra, son of Raghunātha and grandson of Appaya. The author is the same as that of Viśvaguṇādarśa. He states that the first five Kāṇḍas of the Rāmāyaṇa were composed into a Campukāvya by Bhōja, and the sixth Kāṇḍa by Lakṣmaṇakavi and that he composes a Campu based on the story of the seventh Kāṇḍa of the Rāmāyaṇa which is widely known as the Uttara Rāmāyaṇa.

**Beginning:**

श्रीमद्धाम समामनन्ति कमलं तद्वान्धवं वा ययो-
रक्षीन्दीवररूपमाहुरथवा तद्बन्धुरूपं बुधाः ।
सावर्ण्यं तटिता वपुः शुभतरं धत्तेऽथवा तद्वता
भूयास्तां भुजगेन्द्रशैलवसती तौ दम्पती सम्पदे ॥
वैदेहीरघुनाथयोः परिणये कल्याणवेदीमणि-
स्तम्भालम्बमिहानुबिम्बयुगलं बोभोतु नस्सम्पदे ।
व्रीलाविघ्नितदर्शनावपि चिरं यत्रैव दत्तेक्षणा-
वेतावालिखिताविवान्वभवतामन्योन्यवीक्षासुखम् ॥

अपिच—

श्रीमान् पुष्यतु जानकीप्रियसखः श्रेयांसि भूयांसि नः
पादाम्भोजरजःकणैरपि शिलां प्रागारचय्याबलाम ।
एनां प्लावयतैव येन जलधावश्मप्लवोल्लापिनः
वेदस्याप्यसदर्थवाद इति तन्निर्यापितं दुर्यशः ॥

नन्दद्वृन्दारकाणि क्षपितकुपितहृत्ताटकानाटकानि
कन्दत्सुन्दात्मजानि क्षणकृतचलवद्वालिकेलिक्षयाणि ।
क्षुभ्यत्तव्याब्धिकानि क्षतनिशिचरराट्कण्ठकाण्डच्छटानि
प्रत्यूहव्यूहभङ्गं दधतु रघुपतेः पत्रिणां नर्तनानि ॥
नत्वा पितुः पदयुगं रघुनाथसूरेः भक्त्या पपथ च पितामहमप्पयार्यम् ।
आत्रेयवेङ्कटकविर्नवपद्यगद्यैरुज्जृम्भते भणितुमुत्तररामवृत्तम् ॥
श्रुतिचक्षुर्योगिजनश्चक्षुःश्रुतिरपि न पण्डितो यत्र ।
तत्र हि रामचरित्रे कविर्भविष्यन् कथं न लज्जेऽहम् ॥
चित्ते रिक्तगुणापि तत्रभवतां वाणी ममाणीयसी
श्रीमद्रामकथासुधारसपरिष्वङ्गादियं गाहते ।
संपर्कं नवशर्कराभिरुदकं कूपोद्धृतं याति चेत्
अस्वादिष्ठमपि स्वतो रसविदामास्वादनीयं न किम् ॥
यः काण्डान्निबबन्ध चम्पुविधया पञ्चापि भोजः कविः
यो वा षष्ठमचष्ट लक्ष्मणकविस्ताभ्यामुभाभ्यामपि ।
कारुण्यादवशेषितं किल मम क्षेमाय रामायणे
काण्डं सप्तममुद्धृणातु रसना चम्पुप्रबन्धात्मना ॥
आनन्दतुन्दिलमना दमनादरीणां सामन्तमौलिमणिशोणपदारविन्दः ।
नाके महेन्द्र इव भूसुतयैव साकं साकेतपुण्यनगरे विजहार रामः ॥

* * * *

तदा पुनरुदारविक्रमन्यक्कृतशक्रादिक्रतुभुक्चक्राणां नक्राणामिव जलाशयैकसंसर्गिणां व्याघ्राणामिव निर्घृणानां

* * * *

दोषाचराणां निश्शेषनिर्मूलनश्रवणपरिशोषितविषादसागराः सादरमगस्त्यवसिष्ठप्रेष्ठाः काष्ठासु चतसृषु विश्रुताः बहुश्रुतास्तपोधना रिपुजनप्रशमनस्वस्थकाकुत्स्थप्रतिनन्दनास्थया तदीयमास्थानमुपस्थातुमनसः निजाश्रमेभ्यो निश्चक्रमुः ।

**End :**

भगवानखिलजगदभिरामः निखिलगुणाभिरामः रामचन्द्रः चन्द्र इवोदयाद्रिं भद्रासनमधिरूढः भ्रातृभिरमात्यैः पौरवर्गैश्च उपासितः शतक्रतुरिवामरावतीं शशास सुचिरमयोध्यानगरीम् ॥

**Colophon :**

इत्युत्तरचम्पुस्समाप्ता ॥

The scribe's name—

अण्णास्वामिना लिखितम् ॥

## No. 12220. उत्तरचम्पुः.
## UTTARACAMPUH.

Substance, palm-leaf. Size, 15¾ × 1½ inches. Pages, 39. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, new.

Incomplete.

Same work as the above.

---

## No. 12221. उत्तरचम्पुः.
## UTTARACAMPUH.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 134. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, new.

Incomplete.

Same work as the above.

---

## No. 12222. उत्तरचम्पुरामायणम्.
## UTTARACAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 15¾ × 1¼ inches. Pages, 66. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, new.

Begins on fol. 1a. The other work herein is Caṭuślōka 34a.

Complete.

A Campu poem describing the story of Rāma and Sītā after their coronation. It was composed by Vēṅkaṭakṛṣṇakavi, son of Vēṅkaṭādri and Maṅgā, at the instance of Lakṣmaṇa of Vidarbha. The author refers to Bhōja and his work, the Campurāmāyaṇa.

**Beginning:**

अव्यादव्याजभक्तिप्रचयपरिचयस्फीतविज्ञानसम्प-
त्सम्पन्नानन्दसान्द्रामृतरसशिशिरस्वान्तसिंहासनाग्रे ।
कृत्वा रामाङ्घ्रियुग्मं किमपि भरतवन्मोक्षसाम्राज्यलक्ष्मीं
प्राप्यापश्यद्रघूणामधिपतिमपि यस्सोऽयमस्मद्गुरुर्नः ॥
दुर्लभं जयति देशिकवर्यान्मन्त्ररत्नमतुलं मम लब्धम् ।
कर्णयोर्यदधिकाशि मुमुक्षोस्सादरं दिशति चन्द्रवतंसः ॥
श्रीभोजलक्ष्मणकवीन्द्रकृते प्रबन्धलग्नं वचोऽल्पमपि मे भविता रसाढ्यम् ।
कल्याणरत्नकलशोदरसंभृतेन क्षीरेण वारि सहितं महितं किल स्यात् ॥
प्राप्तराज्यमभिराममेकदा प्राप्य नन्दयितुमात्तकौतुकाः ।
अंशुमालिवरवंशवर्धनीमागताः किल महर्षयः पुरीम् ॥

तदानीं सदा नीयमानतपोबलसमुत्तम्भितानां ब्रह्मरन्ध्रत्रविजृम्भितानां ब्रह्मवर्चसच्छटाभिरिव जटाभिः परिष्कृतशिरस्कतया प्रचलन्तमिव शिखावन्तं

* * * *

लोपामुद्रावल्लभं पुरोधाय पुरोधावमानपटुतरवटुजनपरिसूचितनिजागमं समभिव्रजन्तं मुनिव्रजं तं समालोक्य सरभसमुत्थाय बद्धाञ्जलिर्विरचितविविधोपचारैराचारैरासादिततदाशीर्विधिरधिकसादरैस्सोदरैस्सह ननन्द रघुनन्दनः । *

**End:**

सरयूमासाद्य सर्वैस्समन्तात् सलिलमवजगाहे—

सद्यः शङ्खगदासिचक्रसाचिवैर्युक्तश्चतुर्भिर्भुजैः
वक्षस्सीम्नि रमां वहन् मणिवरश्रीवत्सचिह्नोज्ज्वलः ।
प्रत्युद्गम्य सभाजितो रघुपतिर्ब्रह्मादिभिर्दैवतैः
दिव्यं धाम जगाम देवतनुभिस्संस्तूयमानोऽनुगैः ॥

इत्थं सोऽयमुदारधीरनुयुगं भूत्वा रघूणां कुले
शौर्यासादितसर्वदिग्विजयघूः श्रीमानयोध्यापुरे ।
वैदेहीमुपलालयन् निजगुणैर्वीरासनालङ्कृतः
सोदर्यैर्मुनिसेवितो विजयते साम्राज्यलक्ष्मीसखः ॥

वाधूलान्वयसिन्धुशीतमहसो विद्वज्जनश्लाघितात्
मान्यायामपि वेङ्कटाद्रिविदुषो मङ्गाम्बिकायां गुणैः ।
सञ्जातो न विदर्भलक्ष्मणकृते चम्पुप्रबन्धे कृतः
काण्डो वेङ्कटकृष्णधीरकविना जीयाच्चिरं सप्तमः ॥

**Colophon:**

उत्तरचम्पुरामायणं समाप्तः(म्) ॥

---

## No. 12223. उत्तरचम्पुरामायणम्.
## UTTARACAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 14 × 1¼ inches. Pages, 68. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 84a. The other works herein are Mahānāṭakasudhānidhi 1a, Rāmāyaṇasāra 76a.

Complete.

Same work as the above.

## No. 12224. उत्तररामायणचम्पुः.
## UTTARARĀMĀYAṆACAMPUḤ.

**Pages**, 60. **Lines**, 21 on a page.

Begins on fol. 37*a* of the MS. described under No. 11836, wherein it has been wrongly stated as beginning on fol. 73*a* in the list of other wroks.

Complete.

A Campukāvya similar to the one described above: by Rāghava, son of Veṅkaṭārya and Śrīśailāmbā of Śrīvatsagōtra. The author refers to the work of Lakṣmaṇakavi; and in the benedictory stanza salutes the Goddess worshipped in the temple at Trivellore. At the end he mentions the God worshipped in the same place and the tank adjoining the temple therein.

**Beginning:**

वदनहसितचन्द्रा वल्गुवात्सल्यसान्द्रा विमलचरितहृद्या वेदवेदान्तवेद्या ।
मम शुभगुणनीवीमङ्गलार्थाय देवी भवतु कनकवल्ली भक्तसङ्कल्पवल्ली ॥
आनन्दावहलक्ष्मणादिभणितीराकर्ण्य संमानयन्
आदिष्टो विबुधै(स्सस)त्त्वविभवैरत्यादरादुत्तरम् ।
श्रीवत्सान्वदलङ्कृतिः प्रथयितुं श्रीमच्चरित्रं निजं
त्राताशेषभुवः प्रियाय सुधियामैच्छद्गुरू राघवः ॥
वाल्मीकितादृशवचोविभवैकवर्ण्यो ग्रश्नाति राघवचरित्रमयं जनो यत् ।
तद्युक्तमेव विबुधप्रकरैकभोग्यां चान्द्रीं कलां त्यजतु किन्तु चकोरशाल:(ब): ॥
निन्दन्ति चेदहह मन्दधियः कवीनामुन्मत्सरास्सुकवितां किमनेन तस्याः ।
घोराः किमुज्ज्वलतरानिह लोकबन्धून् कोशाः करान् हिमकरस्य न कुत्सयन्ति ॥
अम्भोजजन्मवरगर्वितमाजिभूमौ निर्जित्य रावणमिलातनयासमेतः ।
रामस्समेत्य रुचिरां नगरीमयोध्यां राज्यं ररक्ष मुदितस्त्रिदिवं यथेन्द्रः ।
तदानीमुदारसुरभिकुसुमकिसलयमधुरमधुरस्य

* * * *

रामचन्द्रभुजपालिता रराज राजकरलेलितेव कुमुदिनी मेदिनी ।

**End:**

रामः स्वयं कनकवल्लिकया ससीतः श्रीवीरराघव जगन्ति हि रक्षसि त्वम् ।
हृत्तापनाशनपरस्सरयूतटे त्वां दीक्षामु . . . सन्नगरीमयोध्याम् ॥
अवधारयाप्यहृदयंगमामिमां सरसां सदा सुरभिलां स्वलङ्कृतिम् ।
नवमालिकामिव मया समर्पितां सचमत्कृतिं शुभगुणां च मत्कृतिम् ॥

श्रीवत्सान्वयसिन्धुकौस्तुभमणेः श्रीवेङ्कटार्यः पिता
साध्वी यस्य हि राघवस्य विदुषः श्रीशैलनाम्नी प्रसूः ।
तेनैवं रचितं सतां किल कृपामालम्ब्य लोकोत्तरं
सर्वस्मिन् जयतु श्रियोत्तरमिदं रामायणं सन्ततम् ॥

**Colophon:**

उत्तररामायणचम्पुः समाप्तः ॥

---

No. 12225. उषापरिणयचम्पुः.

USĀPARIṆAYACAMPUḤ.

Substance, paper. Size, 8¾ × 6⅞ inches. Pages 52. Lines, 16 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Begins on fol. 172*a*. The other works herein are Sītārāghava 1*a*, Kalāvatīkāmarūpa 106*a*.

Complete.

A Campukāvya celebrating the marriage of Uṣā, the daughter of Bāṇāsura, with Aniruddha, the grandson of Śrī-Kṛṣṇa. The author's name is not given. He praises the Supreme unqualified Brahman, Goddess Dēvī, God Śiva, Kṛṣṇa, Pāṇini, and Vēdavyāsa and Śuka.

**Beginning:**

यद्रूपबोधसमयेऽत्र जगच्चरितं स्वप्नोपभोगसदृशं प्रतिभाति कृत्स्नम् ।
स्पष्टं नयन्मुनिमनोवचनैः प्रवृत्तैरिष्टं ददातु शिवनिर्गुणरूपितं नः ॥
यामाहुर्गिरिजा मुकुन्दसहजा पद्मायताक्ष्यम्बिका
दुर्गा कासरवाहना भवसुता भीमेति वाचंयमाः ।
भक्तध्यानसमाकृतिं त्रिजगतस्सर्गादिहेतुं परां
वाणीमाश्रितकामकल्पलतिकां तां योगनिद्रां भजे ॥
उमेशं वैदर्भीरमणमपि भा(दा)क्षीसुतमुनिं
गुरून् वेदव्यासं शुकमपि च सन्नम्य सरसम् ।
उषायास्साश्चर्यं परिणयकथां श्रोत्रसुखदां
ब्रुवे गद्यैः पद्यैस्सहृदयमनोमोहनकृते ॥
भूभारसंहरणकर्मसकेलिभेदैस्स्वाभाविकं प्रकटयन् दनुजैककालः ।
शोभातिरस्कृतफणीन्द्रफणौघसौधसौभाग्यवत्स्वपुरमध्यवसन् मुकुन्दः ॥
पूर्वावतारनिकरेषु गतेषु तेषु नैवं परां मुदमवाप स कामतातः ।
जायासहायगुरुसेवकबन्धुपुत्रपौत्रैर्यथा यदुपुरे न्यवसन्मुरारिः ॥

तत्कालेऽतिप्रशस्तस्थिरतरहरसेवाप्तघोरप्रतापः
पुत्रो वैरोचनेः सन्त्रुटितरिपुबलः पूर्वदेवाधिनाथः ।
मध्याह्नातिप्रदीप्तप्रतिभयदिनकृन्मण्डलक्रान्तिदायि-
स्वोष्मा बाणाभिधानो दनुजकुलपुरे शोणिताख्ये रराज ॥
तदनु गिरिशकारुण्यामृतासारसिन्धोरपरसरसिजाक्षप्राणनाथासमाना ।
सुमसृदुतरगात्री पश्यदानन्ददात्री समजनि दनुजेन्द्रात्सा ह्युषा नाम कन्या ॥
सा तं कलायकुसुमोपमचारुकान्तिं कामात्मजं सरसिजेक्षणमात्मनाथम् ।
लावण्यसञ्चयसुधापरिसृष्टगात्रमाजानुबाहुमनिरुद्धमुषा ददर्श ॥

**End:**

मन्मथात्मजेन मुकुलितकोमलारुणसरोजशोभमतिमनोहररत्नखचिताङ्गुलीयतल्ल-
जोल्लसितं दितिजराडनन्दिनीकरारविन्दं ग्राहयामास ।
इतः परं मन्मथसङ्गराय शराः कराङ्कस्य इमा उपायाः ।
इतीव मत्वाम्बुजकोमलं तत्करं सुहृष्टो जगृहेऽनिरुद्धः ॥
क्षितिभरममुमेवं संहरन् शिष्टदुःखं सकलमपि दयालुर्द्वारवत्यां मुकुन्दः ।
नृगनरपतिमोक्षव्याजतो वृष्णिवर्यानुदितविमलबोधान् सन्निकीर्षुर्न्यवात्सीत् ॥

---

## No. 12226. कालिन्दीमुकुन्दचम्पुः.

## KĀLINDĪMUKUNDACAMPUḤ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 138. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Haribhaktisudhārasa 70*a*.

Complete.

This Campukāvya celebrates the marriage of Yamunā and Lord Kṛṣṇa. The author, whose name is not given, mentions the poets Kālidāsa, Amaruka, Bhavabhūti, Bāṇa, Cōra and Harṣa.

The copyist's name is given as Cakrapakavi.

**Beginning:**

पद्मा पद्मासनस्था सहृदयसदया शारदा शारदाभ्रा-
दभ्रश्रीरक्षमालाभयवरसकलकाणवीणाङ्कपाणिः ।
सानन्दस्पन्दमन्दस्मितमधुरसुधार्द्रांबरान्तागमान्ता-
म्नाता माता गिरां मे नटतु च रसनैकान्तरङ्गेऽन्तरङ्गे ॥
या सद्यू रूपसृष्टिव्यवहतिसदुपायात्मनामप्रपञ्चा-
कारस्वैरस्वखेलासहनकलहसन्नाहवाक्पारतन्त्र्यात् ।

ह्रीतस्याजस्य कोपापनयनमनसाश्लेषहर्षप्रकर्षा
सेयं श्रेयांसि देयात्सनवनवरसासारसारस्वतानि ॥
भक्षैर्लक्षैः प्रपूर्णोदरदरणदरोयन्त्रिताहीन्द्रबन्ध-
ग्रन्थावाभोगपुच्छं गलति निगलितान्वकतुण्डेन मृद्गन् ।
मन्दं तुन्दादधस्ताद्भ्रमयितुमुदयद्दोषनिघ्नांश्च विघ्नान्
निघ्नन्विघ्नेश्वरस्सन्दिशतु च कुशलश्रीसमृद्धिं सुबुद्धिम् ॥
विष्वक्चञ्चज्जटालीदलितगलदुडुव्यञ्जवर्षोदबिन्दु-
भ्रान्त्या थानापयानानवसरविसरच्चातकव्रातकं यत् ।
क्षुभ्यद्भूद्यत्सुमेरुभ्रमणचकितहृन्मानवयौवतद्रा
गाश्लेषप्राप्तिहृष्यन्मरुदभिलषितं नर्तनं शार्वमव्यात् ॥
कल्याणानि क्रियात्नः क्षितिधरकमठश्रीफणिग्रामणीदि-
ग्दन्तिव्रातातिभाराश्रवगलदसृगारम्भशुम्भन्निशुम्भम् ।
शम्भोरुत्सम्भ्रान्तमूर्धक्षुभितसुरसरिच्चन्द्रनिष्यन्दबिन्दु-
त्रुट्यत्तारालिहारात्य[क]मलकमलजाताण्डवचाण्डवं यत् ॥
स्वेशः स्वःपद्मिनीसंग्रहण(विधि)शठयद्भ्रान्तिकोपोपशान्त्या
नत्या नम्रेशमौलेर्गलदमरसरित्क्षालितस्वाङ्घ्रिरव्यात् ।
सूर्यार्थिस्नेहमोहादशिथिलपरिरम्भादरात्सूचयन्ती-
वार्यो वा एष इत्याशयमपि च शिवः सृष्टिदक्षो मयेति ॥
कालिन्दीकच्छपुञ्जे गलितनिजसुखान्तर्मृणाली मराली-
पाली नालीकनेत्राः प्रमदसमुदयादुच्छ्वसन्नीविबन्धाः ।
गावो यत्पारवश्यादवसितयवसग्रासलिप्साश्च सद्यः
श्रेयांसि श्रावयेयुर्मुरहरमुरलीमाधुरीधीरनादाः ॥
सेवाहेवाकदेवाशरशरजमुखीवक्त्रचित्रानुबिम्ब-
च्छद्मोद्यत्पद्ममालाभ्रमजनकमणीमालिकामध्यरत्ने ।
संक्रान्तप्रान्तलोकप्रतिफलनवशाद्दर्शयन्तीव नृणां
स्वप्राणत्राणतुल्यादरभरणमसौ शर्म निर्मातु मे श्रीः ॥

फलभ्रान्त्या श्रान्त्या गलितरविसन्त्यागचतुरं
महारक्षोवक्षोदलनविषमाक्षोपमबलम् ।
सदा श्रीमद्रामस्मृतिविनतिमूमप्रकृतिकं
हनूमन्तं शान्तं कनकगिरिकान्तं सुकलये ॥

एवमिष्टदेवाननिष्टनिवृत्तयेऽभिष्टूयेलामण्डलसकलपाण्डित्यहिण्डमानसरस-पण्डितपुण्डरीकचण्डभानून्विद्वत्कवीन् सविनयमानमामि । यथा ॥

सकलकलाधरास्सरसमानससन्मतयः
कृतिमुपशीलयन्तु गुणदोषविचारपराः ।
पयसि विमिश्रनीरमिव हंसवरा विबुधा-
स्तदभिनुतिं करोमि यदि नो मयि मत्सरता ॥

मूलं वल्मीकजन्मा मुनिरगणितवाग्व्यासमौनिः प्रकाण्डः
शाखालिः कालिदासोऽप्यमरुकभवभूत्याह्वयौ बाणचोरौ ।
हर्षाद्या यस्य काव्यान्यपि कुसुमकुलं श्रीकवित्वद्रुमस्य
श्रेयश्छायां श्रयामो यदिह सकलधर्मार्थकामाः फलानि ॥

नासौ वन्ध्यः प्रबन्धो न गलति न जरन् सप्तसन्तानपङ्क्त्या-
मन्वाशं चानुदेशं त्वनुनगरमनुग्राममन्वग्रजात(हार)म् ।
प्रत्युर्वीशं प्रयातः प्रतिवदनविधूद्यत्सुधाहारजीवी
येनाखेदोऽस्त्वविघ्नः स्वपितुरमृतसन्तानसारातिलाभः ॥

जाता प्रौढकवेः स्वयंवरगुणश्रीनायका श्लेषण-
श्रीमान्याकृतिकन्यका तदुभयोर्वंशप्रतिष्ठास्पदम् ।
यां नेतुस्सुहृदां पितुश्च सुमनस्स्वामोदसन्तानमू-
जात्युच्चैः फलदायिनीं निजगदुः स्वानन्दसन्धायिनीम् ॥

सरसामोदिकालिन्दीमुकुन्दमरविन्दवत् ॥
जयतु श्रीप्रियपदं कविवागूर्मिवर्जितम् ॥

अथ कथामुखम्—

अथ कदाचिन्नैमिशारण्ये पुण्यमृगविहगगणशरण्ये चारण्यकतपश्श्रीफलके शौनकादयो वनौकसस्तपस्यन्तस्सन्तः । अथ कदाचित् ।

सूतं समायान्तमिमे विलोक्यसम्पूज्य चार्घ्यादिभिरर्हणीयम् ।
सम्पूर्णपौराणिकचित्रगाथारत्नाकरं चाच्युतचित्तरत्नम् ।
श्रीकृष्णचारित्रसुधासमुद्रे संस्नातुकामा वयमित्यवोचन् ।
त्रिपूरुषानन्दनपावनं तत्पादाम्बुजाम्बुप्रतिमं वदाशु ॥

तत्रापि—

कलिन्दकन्याकरपीडनं तत् कथं नु जातं कमलेक्षणस्य ।
कथामृतेनाथ कुतूहलानि कुरुष्व पौराणिक कर्णयोर्नः ॥

इतीरितः श्रोत्रमनोऽभिरामं कथामवादीज्जगतां स सूतः ।
मुकुन्दपादाब्जनिवेशितात्मा शृणुध्वमानन्दनिधिं ब्रवीमि ॥
अथालोकालोकभूलोकलोकास्तोकानन्दसन्दायिनी राजधानी काचिदस्ति ।
मधुरा नगरी मरालपालीसमुदञ्चद्यमुनातटे चकास्ति ।
निभृतप्रसवालिनीलवेणीकमनीयक्षितिकामिनीमुखश्रीः ॥

**End:**

भक्तालीहृदयाम्बुजान्तरलसज्ज्योतिः परं भास्वरं
मायादुर्लतिकासमूललवनक्रीडालवित्राथितः ।
विश्वोत्पत्तिविपत्तिपालनकरो लीलावतारीभवन्
श्रीकृष्णः स्वकथाप्रबन्धसततात्ध्येतॄन् सदा रक्षतु ॥

तदेतत् काव्याशीर्वचनम्—

श्रीकृष्णपूर्णकृपया जगती ससस्या शस्याः प्रजास्सकलसम्पदनन्तभोगैः ।
सत्याशिषो द्विजवरास्सततं भवन्तु धात्रीभुजोऽवनिमनाग्रहिणोऽत्यवन्तु ॥
श्रीदक्षिणामूर्तिकृपामपारामुपाश्रयन् चकपनामसत्कविः ।
व्यलीलिखत् काव्यमुदारसेव्यं नव्यं रसालंकृतिरीतिभव्यम् ॥

---

## No. 12227. कृष्णभूषणम्.
## KṚṢṆABHŪṢAṆAM.

Substance, palm-leaf. Size, 12¼ × 1⅝ inches. Pages, 31. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the first 2 Sargas of 50 and 58 stanzas, respectively.

A small work describing in verse and prose the leading incidents in the life of Kṛṣṇa of Nārkēḍimalli family, a Vaiśya by caste. Himself and his wife Narasimhā were extolled as none other than God Viṣṇu and Goddess Lakṣmī born as mortals in this world. The names of the father, of the grandfather and of the great grandfather of Kṛṣṇa are given as Śaṅkara, Bhagirtiliṅga and Kāmaya, respectively.

**Beginning:**

श्रीमद्धराधरसुतातनयस्य हस्तशाखारविन्दममितश्रियमातनोतु ।
कृत्वादिकर्मसु भवन्ति विधूतविघ्नाः कृत्वा सुरासुरमुखाः खलु यत्सपर्याम् ॥
श्रियं दत्वा पायादनुदिवसमस्माकममितामजस्रं तद्वाणीचरणकमलं निर्मलतरम् ।
नराः प्रज्ञावन्तो यदुपभजनादेव सकलाः कवीन्द्रास्स्युर्मूढाखिदशवरगीतं यद्-
[निशम् ॥
दयापयोनिधिं धनञ्जयादिसेवितं मरुद्भयोपभञ्जनं सुधामयूखशेखरार्चितम् ।
रघूत्तमं विभूत्तमं सुरोत्तमं नरोत्तमं कलाविदुत्तमोत्तमं सदुत्तमं समाश्रये ॥

केचिच्छन्दविचारबद्धरतयः केचिद्रसानन्दिनः
केचिच्छ्लेषपरम्पराप्रणयिनः केचिद्गुणग्राहिणः ।
केचिल्लक्षणतत्परास्सुमनसः केचित्कृतौ दूषकाः
कोऽहं जातमहो न दैवबलतस्तेषां हि नूनं सताम् ॥

काव्यं करोम्यकविमार्गविदुत्तमानां सत्कृष्णभूपणमहं विदुषां मुदे हि ।
क्षारोदकाच्छनमखप्रमुखास्समुद्राज्जातं न रत्ननिचयं किमु दाधर(धारय)न्ति ॥

(गद्यम्) अनन्तरमनन्तान्तरायोपशान्तदक्षदक्षजागर्भनिर्भरपदारविन्दमतिमधुरोल्लसितार्थश्लेषालङ्कारशब्दाभियुक्तसरसकवित्वप्रदानप्रमोदमानभारतीचरणसरसिजमभिवन्द्य, समस्तकल्याणपरम्पराभिरामस्य रामस्यात्मभक्तजनपारिजातस्य भगवतश्श्रीमतस्स्मरणं च विधाय, सुधीवराशेषविद्याविद्धरासुरविद्वत्कवीन्द्रसन्निधावबन्द्रमुपेत्य नम्रतां प्रशस्तप्रज्ञाभियुतः प्रस्तुतमुपस्तौति—

आभाति गोत्रममितोत्तमवैश्यधाम क्षोणीतले महति नार्केडमिल्लिनाम ।
क्षीरार्णवस्सकलदीपितरत्नशाली नित्यं यथा पृथुतरङ्गविराजमानः ॥

किंच—

समस्तविषयोल्लसत्सुजनचक्रवालस्तुतं पयोनिधितनूभवाभवनमार्यसम्पूजितम् ।
पवित्रममितं लसद्विमलकीर्तिकान्तायुतं निरस्तकलुषच्छटं पट्टनराधिपाराधितम् ॥

(गद्यम्) तत्र विचित्रितपवित्रगुणाभिरामो रामनामाभिनन्दितस्वान्तश्शान्तालयः कामयाख्यो वैश्यमुख्यो बभूव ।

देवावनिमरुद्योगः कीर्तिसम्पादनादरः ।
निजाश्रितसुरक्षाजो राजराजप्रपूजितः ॥
वाणिज्यविद्वरः श्रीमाञ्छ्रीमान्विद्वज्जनस्तुतः ।
सद्गुणालङ्कृतः प्राज्ञः पापनिर्मुक्तविग्रहः ॥
धर्मैकतत्परश्शान्तः कान्तान्ताक्षतिभासुरः ।
धैर्यैकगिरिप्रायश्शिवपूजारतिस्सदा ॥

(गद्यम्) ततस्तस्मिन्समस्तप्रशस्तलोकविस्तारितसद्गुणमणिगणाभियुक्ते मुक्तातपत्रीकृतपवित्रतरकीर्तिसम्पन्ने विराजमाने निजाश्रितार्तिनिरासनस्फूर्तिर्भागिर्तिलिङ्गाख्यस्तनूजस्समुदभूत् ।

महेन्द्रश्रीयुक्तः कविजनपरित्राणनपरः कलासङ्गः प्राज्ञस्सुरधरणिदेवार्चनरतः ।
दयासिन्धुर्बन्धुप्रकरविनुतः पुण्यचरितः प्रसन्नात्मा श्रीमत्सुजनगणसम्पूजितमतिः ॥

तस्मिन्भागीर्तिलिङ्गे विलसति सति सद्वृन्दमानन्दमाप
क्ष्मापास्सन्तोषभाजस्स्तुतिमनुदिवसं सम्प्रकुर्वन्ति नूनम् ।
उल्लासं चारुलक्ष्मीकरविभवयुतं बन्धुसन्दोहमाहो
दीनास्सत्यं विहाय क्षितिपतिविसरानाश्रयन्ति प्रभूंश्च ॥

End:

तथा समेतस्त्वनु कृष्णयाद्वयस्सदा रसायां परिपालयन्नरान् ।
अतिहृद्यत्यन्तविशुद्धविग्रहस्सपुत्रपौत्रः प्रभुलोकपूजितः ॥
सर्वे मनोरथान् प्राप्य तस्मात्सत्यमनेकशः ।
कृष्णयाख्यात्सदा प्रापुस्सन्तोषमधिकं शुभम् ॥

**Colophon:**

इति श्रीमत्त्रिभुवनाभिरक्षकपुण्डरीकाक्षकटाक्षोपयुक्तेन नरसिंहेन विरचिते कृष्णभूषणे द्वितीयस्सर्गः ॥

---

## No. 12228. कृष्णविलासः.

## KṚṢṆAVILĀSAḤ.

Substance, palm-leaf. Size, 14¾ × 1⅝ inches. Pages, 62. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

The first leaf as well as leaves 21 to 36 are lost. Contains the Stabakas 1 complete, 2 and 3 incomplete, 4 only the latter portion, and 5 incomplete.

A Campukāvya describing the birth of God Vilāsakṛṣṇa in Ceñji (Gingee) with a view to confer wealth and prosperity on Kṛṣṇarāja, king of the place and a devotee of Lord Kṛṣṇa: by Lakṣmaṇakavi, son of Rāmānuja and Ramā, brother of Kṛṣṇa and grandson of Koṭṭapādu Teluṅgārya.

**Beginning:**

. . . . . . पि का हानिरुदेति शुभ्रतायाः ।
अधरीकृतमप्यतीव पङ्कैर्न मृणालं किमुपैति निर्मलत्वम् ॥
गुणिनां यशसे विनिर्मि . . . वोऽपि महत्तरः खलैः ।
करपत्रविदारणेऽधिकं लभते चन्दनदारु सौरभम् ॥
नवकविजनवाक्यैर्नार्पयन्त्येव कर्णे . . . (ग)रिम्णा कर्णयुग्मामृतेऽपि ।
सरसमसरसं वा सर्वमेवोक्तिजालं गुडरसमधुमिश्रं मन्यते प्राकृतानाम् ॥
ये केऽपि ड . . . . मणयो यतन्ते जेतुं जगत्त्रयमनक्षरकुक्षयोऽपि ।
तानेव तद्गुणविदोऽप्यलमाद्रियन्ते डम्भः कलावपि . . . ददाति ॥

भ।पादोषगवेषणाय धिषणा केषामपि प्रोन्मिषे-
त्केषाश्चिद्विषमा समा च विदुषामाविर्भवेच्छेमुषी ।
तूष्णीं . . . . कः कतिचन प्रोद्भासयेयुस्सभां
श्लाघाकम्पनसम्पदस्स्वशिरसां सम्पादयेयुः परे ॥
वाणीविलासविलसद्वदनाम्बुजानां लक्ष्मीविशेषपरिरम्भलसत्तनूनाम् ।
सर्वज्ञता(तां)विभवलाभसमेधितानां को वारयेज्जगति वक्तृकवीश्वराणाम् ॥
(द्वावेतौ जि)ह्मगौ लोके सर्पो दुर्जन इत्यपि ।
गुणं सुमनसां पूर्वः श्लाघतेऽन्यो निरस्यति ॥
वृत्तशब्दार्थवैचित्री यत्र विद्योतते कृतौ ।
त . . . . . . कारं मोदते न सतां मनः ॥
रसिकानां मुदे भूयात्सरसा मामिका कृतिः ।
मञ्जुला चञ्चरीकाणां यथा माकन्दमञ्ज(री ॥)
अस्ति श्रियाध्यासितसर्वरथ्या चेञ्जीति मञ्जुर्नगरी जगत्याम् ।
यस्यौषमासामिव सङ्गमेन वियत्स्रवन्ती विशदा विभ(ाति ॥)
. . रेण नियतं निशि चन्द्रशालां शाला ममेयमिति सादरमेत्य चन्द्रः ।
केलीकलाध्ययनकोरकितश्रमाणां शर्माधिकं सृजति यच्छप(फरेक्षणानाम्) ॥

* * * *

या खलु निखिलदिङ्मुखविख्यातया शिलामुखरिङ्खणजनितखलखलात्कार-मुखरया . . . . . . . विरजयेव वैकुण्ठनगरी मन्दाकिन्येव पुरन्दरपुरी कवेरकन्ययेव श्रीरङ्गराजधानी क्षीरतरङ्गिण्येव काञ्चीपुरी विद्योतते ।

* * * *

तत्राविरासीच्चतकौतुकश्रीर्विलासकृष्णो विहर्तिं चिकीर्षुः ।
कृतश्रियं कृष्णनृपं विधातुं स्वनाममाजं प्रथितस्वचिह्नम् ॥

* * * *

**Colophon**:

इति विलासकृष्णप्रसादलब्धमधुरकविताविर्तीर्णकीर्तिस्फूर्तेर्लक्ष्मणकवेः कृतौ चम्पुकृष्णविलासे प्रथमस्स्तबकः ॥

श्रीकोर्रपादतेळुङ्गार्यतनूभ(व)स्य रामानुजस्य तनयेन रमावरस्य ।
श्रीलक्ष्मणेन कविना जयतु प्रणीतः कृष्णानुजेन नवकृष्णाविलास एषः ॥

**End:**

इति विलासकृष्णप्रसादलब्धमधुरकवितावितीर्णकीर्तिस्फूर्तेर्लक्ष्मणकवेः कृतौ चम्पुकृष्णविलासे चतुर्थस्स्तबकः ॥

कविचर्याः समर्यादास्तुर्ये स्तबकतल्लजे ।
चातुर्यमेकमेवात्र निर्मर्यादं विलोक्यते ॥

स्फुरद्रसश्रीस्सुमनोमनोहरश्रवोऽवतंसस्स्तबकः कृतिश्रियः ।
विलोकयन्तं पुरुषोत्तमं मुहुर्न काममामोदभरान् नयेत् कथम् ॥

कदापि रूपेण भिदा न किञ्चिन्ममादिवर्णेन मनाग् भिदैव ।
तदावयोस्सख्यमितीव मत्वा चमत्कृतिं मत्कृतिमालिलिङ्ग ॥

* * *

त्यजत युवतिलोका गौरवेणाभिमानं भुवनविजयहेलालम्पटः पञ्च . . ।

---

No. 12229. कृष्णविलासचम्पुः, कलानिधिव्याख्यासहितः.
## KṚṢṆAVILĀSACAMPUḤ WITH THE COMMENTARY, KALĀNIDHI.

Substance, paper. Size, 11¼ × 8½ inches. Pages, 531. Lines, 18 on a page. Character, Dēvanāgari. Condition, good. Appearnce, new.

The text is complete; but the commentary breaks off in the 19th stanza of the 14th Āśvāsa (Kallōla)

A Campu in 16 Āśvāsas based on the story of the Bhāgavata: by Narasiṁhasūri, son of Lakṣmī and Anantanārāyaṇa of Ātrēyagōtra. The commentary is called Kalānidhi and the commentator's name is not given.

**Beginning:**

(मूलम्) ॥ आनन्दे चिति सत्यनन्ययुजि च स्वस्मिन्नविद्याकृत-
प्रारम्भादसतो निवृत्तमनसामस्मादवुद्धात्मनाम् ।
एतत्तथ्यमिव स्वसङ्गततया तन्वन् जगद्यस्स्वरा-
डात्मैवात्मविदां विभाति स सदा वो वासुदेवोऽवतात् ॥

* * *

(व्या) ॥ श्रीमत्कृष्णविलासमप्रतिममुद्धृतं नृसिंहात्मके
कालिन्दीपुलिने समस्तविबुधामोदावहं चान्वहम् ।
उत्सार्योरु तमो विवक्षितरसाविष्कारसंवारकं
गोभिस्साधु कलानिधिस्तु विशदीकर्तुं कृती द्योतताम् ॥
कोशव्याकरणप्रबोधितवचश्शक्तिग्रहाणां सतां
सेयं निर्विशयं सुबोधपदसन्दोहाकृतिर्दृश्यते ।

मोदन्ते विबुधास्तथापि विवृते व्याख्यानतस्स्वाशये
मोचानां मृदितत्वचामिव मुदादाने जवादम्बराः ॥
ब्रूयुश्चेत्पदवाक्यवर्णततिषु व्यासेन वा संहिता-
क्रृप्त्या वा सुधियः कुशाग्रमतयोऽसूयाविमुक्तान्तराः ।
सारस्यं किमपीह हापयति हि व्याख्या न तन्मामिका
दुग्धान्धस्यथिते सिताश्च ददतं को वा निषेधेद्बुधः ॥

इह खलु देवदेवं वासुदेवमनवरतमपि हृदये चिन्तयन् नरसिंहसूरिस्त-त्प्रसादप्रचुरितया वाक्चन्द्रिकया तदीयलीलाविकासं समुल्लिलासयिषुरीप्सितार्था-नुपलब्धिकृत्तमश्शमनाय सन्ततमपि स्वान्त एवाधिष्ठाय सर्वेन्द्रियावभासकम-प्रतिहतभासं तमेव प्रार्थयते—आनन्देति । आनन्दे आनन्दात्मनि । "आनन्दो ब्रह्मे" ति श्रुतेः । चिति ज्ञानात्मनि । सति अभावप्रतियोगिनि "सत्यं ज्ञानम-नन्तं ब्रह्मे" ति श्रुतेः । असन्नेव स भवति । असद्ब्रह्मेति वेद चेदित्यादि-श्रुत्या आत्मनः अभावप्रतियोगित्वोक्तेः । अनन्ययुजि च युजिर्योग इति धातोः युजेरसमास इति किनि(नुमि)कृते युक्(ङ्) इति रूपम् । अन्येन युक्(ङ्) अन्ययुक्(ङ्) । तृतीया तत्कृतार्थेन गुणवचनेनेति समासः । तथा न भवतीत्यनन्ययुक्(ङ्) तस्मिन् । अनन्ययुजि । अद्वितीय इति यावत् ॥

* * * *

(मू.) ॥ शौरेर्विश्वजनीनमद्भुतमतिब्रह्मेन्द्रमत्यर्गलं
गम्भीरं कृतकार्भकत्वमिह यत्प्राचां कवीनां कृतिम् ।
नारोहद्भगवत्कटाक्षकलितं तद्भागधेयं ममे-
त्यानन्दं नरसिंहसूरिरिदमुद्युङ्क्ते विवक्षन् मुदा ॥

(व्या) ॥ शौरेरिति । विश्वजनेभ्यो हितमद्भुतमाश्चर्यकरमतिब्रह्मेन्द्रम् ।

* * * *

नरसिंहसूरिर्मुदेदमर्भकत्वं वक्तुमिच्छन् उद्युङ्क्ते उद्युक्तो भवतीति निदर्शना ।

* * * *

(मू.) ॥ श्रीवत्सोज्ज्वलवक्षसि श्रितवति स्वां वासुदेवे कलां
धर्मात्मा वनदुर्हृदाहतिलसल्लीलाकृतार्थोदये ।
कौन्तेयेऽपि सहोदरैस्सह महाप्रस्थानमासेदुषि
श्रीमानाहितलक्षणः पतिरभूद्भूमेः परीक्षिन्नृपः ॥

(व्या) ॥ पुराणप्रस्तावस्योपोद्धातमाह—श्रीवत्सेति । श्रीवत्सो लाञ्छनं मतमित्यमरः । तेनोज्ज्वलं वक्षः यस्य तस्मिन् धर्मात्मनामवनेन ।

* * * *

परीक्षिदिति । नृपः भूमेः पतिरभूदित्यन्वयः ।

(मू) ॥ श्रीमान् स स्वपितामहातुलयशःशुभ्रीकृते भूतले
शीतांशावुदितं कलङ्कमिव संपश्यन्नवश्यं कलिम् ।
एतस्यापनुनुत्सया स्वसमये युक्तं चतुर्भिर्हयै-
रारुह्य व्यचरद्रथं वसुमतीं पार्थोपदानाङ्कितम् ॥

* * * *

अथ तत्र कुत्रचिद्विविक्ते देशे भृशमुद्विग्नामुत्स्रवदश्रुपरिप्लुतापाङ्गां गामेकां तदन्तिके विषीदन्तमनर्गलगलितबाष्पधारानियन्त्रितनयनयुगलं धवलं विलूनचरणं वृषभं च तदुपान्ते वृषलमप्यतिनिशितकृपाणपाणिं कृपाशून्यमपश्यदप्राक्षीच्च स सव्यथं तन्मिथुनम् ।

* * * *

**Colophon:**

आत्रेयान्वयदुग्धसिन्धुशशिनो योऽनन्तनारायणात्
संजज्ञे नरसिंहसूरिरजितैकान्ती च लक्ष्मीसुतः ।
श्रीमत्कृष्णविलासनामनि कृतौ तस्य प्रवाचः कवेः
आश्वासः प्रथमश्चिराय विदुषां मोदाय जीयादयम् ॥

* * * *

श्रीमत्कृष्णविलासविशदीकरणविचक्षणे कलानिधिनाम्नि व्याख्याने प्रथमकल्लोलः सम्पूर्णः ॥

**End:**

आनन्दस्स त(स)नातनोऽखिलजगज्जन्मादिहेतुस्त्वरा-
ढात्मा जन्मगुहाशयो हरिरसावव्यादभव्यापहः ।
ऊतीः स्वाः पिबतस्सतः श्रुतिरसज्ञेनान्वहं सादरं
साचूत्पादितसम्पदापुरगदापेक्षैः कटाक्षैश्चिरम् ॥
मार्कण्डेयवयःप्रमाणकलितैराकल्पशोभान्वितै-
राश्वासैस्सहितान् स्वजाड्यहरणादस्मादपूर्वं पदम् ।
व्युत्पत्तेरपि दुर्गमां जिगमिषोः पारीणतां धीमतः
चम्पोः किं हरितोषणाद्विजयते विज्ञानदानक्षमम् ॥

**Colophon:**

आत्रेयान्वयदुग्धसिन्धुशशिनो योऽनन्तनारायणात्
संजज्ञे नरसिंहसूरिरजितैकान्ती च लक्ष्मीसुतः ।
श्रीमत्कृष्णविलासनामनि कृतौ तस्य प्रवाचः कवेः
आश्वासो भुवि षोडशोऽपि विदुषां मोदाय जीयाच्चिरम् ॥
आत्रेयान्वयदुग्धसिन्धुलसितानन्ताह्वनारायण-
स्फायन्नाभिसमुत्थितो मधुरया श्रुत्याहितानन्दथुः ।
भारत्या चतुराननो भुवि कविः कोऽपीशितुर्निर्ममो
वाचाबोदयनप्रपञ्चमजितक्रीडास्पदं निर्ममे ॥

---

No. **12230.** गोदापरिणयचम्पुः.
GODĀPARIṆAYACAMPUḤ.

Pages, 78. Lines, 20 on a page.

Begins on fol. 37*a* of the MS. described under No. 1904.

Complete in five Stabakas.

This Campukāvya treats of the marriage of Gōdā or Āṇḍāḷ, daughter of Viṣṇucitta, with Raṅganātha, the deity worshipped at Śrīraṅgam; and was composed by Vēdadhināthamahācārya.

**Beginning:**

कल्याणं करुणासारशीतलापाङ्गवीक्षणैः ।
कुर्वती पातु मां नित्यं गोदा वेदान्तदीपिका ॥
गोविन्दानन्दजननीं कोमलार्थपदावलीम् ।
गोदा ददातु मे वाणीं मोदाय कविचेतसाम् ॥
गोदापरिणयं वक्तुं तदादेशेन निर्भया ।
चपला मम जिह्वेयं चम्पुमारभते बुधाः ॥
अस्ति प्रशस्ता दिशि दक्षिणस्यां श्रीधन्विनव्येति पुरी पुराणी ।
यद्वैभवो विष्णुपदाभिलाषवार्तां च दूरीकुरुते नराणाम् ॥

* * * *

यत्र चारुणमणिकिरणैरेव निरस्तेषु समस्तेषु तमिस्रेषु

* * * *

चम्पकारण्यमित्यारण्यशरण्यमस्त्यरण्यम् ।

* * * *

वटेश्वरपुराख्यया मुनिभिरीडिता या त्वभूत्
पुरा तदनु धन्विना शबरवंशजातेन च ।

नवीकृतमहोदया पुनरभूत्तदीयाख्यया
प्रसिद्धनिजवैभवा जगति धन्विनव्येति च ॥
तस्याममूत्तनुभृतां भुवि मुक्त्युपायानादेष्टुतो मुररिपोरनुदर्शयिष्यन् ।
तार्क्ष्यस्स्वयं द्विजवरस्य मुकुन्दनाम्नः श्रीविष्णुचित्त इति शान्तगुणस्तनूजः ॥

* * * *

काले तस्मिन् कलिकलुषितं कालमालोक्य भीतः
राजा पाण्ड्यो निशि स मधुरां शोधयिष्यन् पुरीं स्वाम् ।
तस्यां पुर्यां द्विजवरशुभाचारसंवीक्षणार्थं
वेषच्छन्नो निजपरिजनानभ्युपेतः प्रतस्थे ॥

* * * *

इत्याकर्ण्य नरेन्द्रभाषितमिदं सभ्याश्च तत्त्वं परं
निश्चेतुं विवदन्त एव बहुधा तन्निश्चयार्थं पुनः ।
मन्त्रैर्व्योम्नि निबध्य शुल्कमवदंस्ते संविदं यः परं
तत्त्वं निश्चिनुते तदस्य निपतेच्छुल्कं च पाणाविति ॥
काले तस्मिन्नथ वटमहाधामनामा परत्वं
स्वस्यैवेति प्रचुरकृपया प्राह विष्णोः परत्वम् ।
नान्यस्यास्ति स्फुटमिति वदन् पाण्ड्यभूपालगोष्ठ्यां
विद्याशुल्कं हर तदधुना विष्णुचित्ताशुसेति ॥

* * * *

**Colophon:**

इति गोदापुरोहितेन वेदाधिनाथमहाचार्येण विरचिते गोदापरिणये चम्पुकाव्ये चतुर्थस्तबकः ॥

**End:**

गोदापरिणयसन्तोषेण स तत्कालोचितशीघ्रवाहिने विनयवते वैनतेयाय व्यादिशदेकासनेऽप्येकदेशाध्यासनम् ॥

कन्यानुरागस्य तथात्मभर्त्रे श्रीविष्णुचित्तस्सदृशं सभायाम् ।
भूषाम्बरालेपनपुष्पमाल्यैरपूजयच्चं त्रिदशादिपूज्यम् ॥
पश्यन्त्यस्तं सुरुचिरवरं गोदया भक्तियुक्ताः
तस्याः पुर्यामखिलजनता नित्यहृष्टा बभूवुः ।
गेहे गेहे निरवधिरभूत् सर्वसम्पत्समृद्धिः
काले काले निरमुचदपि प्राणिनां वृष्टिमिन्द्रः ॥

**Colophon:**

इति गोदापरिणये चम्पुकाव्ये पञ्चमस्तबकः ॥

गोदापरिणयस्समाप्तः ॥

No. 12231. गोदापरिणयचम्पुः.
GŌDĀPARIṆAYACAMPUḤ.

Substance, palm-leaf. Size, 16⅜ × 1½ inches. Pages, 57. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above. The name of the author is here given as Kēśavanātha.

इति गोदापुरोहितेन वेदाधिनाथभट्टाचार्येण श्रीकेशवनाथेन विरचितगोदापरिणये चम्पुकाव्ये पञ्चमस्तबकः ॥

**Colophon:**

गोदापरिणयस्सम्पूर्णः ॥

No. 12232. गोदापरिणयचम्पुः.
GŌDĀPARIṆAYACAMPUḤ.

Substance, palm-leaf. Size, 12¾ × 1⅝ inches. Pages, 84. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

No. 12233. चम्पुभारतम्.
CAMPUBHĀRATAM.

Substance, paper. Size, 12⅜ × 7½ inches. Pages, 237. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 162a. The other work herein is Pratāparudrīya 1a.

Complete in 12 Stabakas.

A Campukāvya narrating the story of the Mahā-Bhārata: by Anantabhaṭṭa.

**Beginning:**

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

शरदिन्दुविकाससमन्दहासां स्फुरदिन्दीवरलोचनाभिरामाम् ।
अरविन्दसमानसुन्दरास्यामरविन्दासनसुन्दरीमुपासे ॥

कल्याणं वो विधत्तां करटमदधुनीलोलकल्लोलमाला-
खेलल्लोलम्बकोलाहलमुखरितदिक्चक्रवालान्तरालम् ।
प्रत्नं वेतण्डरत्नं सततपरिचलत्कर्णतालप्ररोह-
द्वाताङ्कूराजिह्विषोदरविवृतफणाशृङ्गभूषाभुजङ्गम् ॥

तुहिनकिरणवंशस्थूलमुक्ताफलानां विपुलभुजविराजद्वीरलक्ष्मीविभूत्राम् ।
हसितसुरपुरश्रीरस्ति सा हस्तिनाख्या रिपुजनदुरवापा राजधानी कुरूणाम् ॥

**End:**

राज्ञां मौलिपरम्परां चरणयोः पाणौ प्रदानश्रियं
बुद्धौ राजनयोदयं हृदि कृपां सत्यं रसज्ञाञ्चले ।
बाहौ सागरमेखलां वसुमतीं मस्ते किरीटं मुदा
कुर्वन् धर्मतनूभवश्चिरमसौ गोपायति स्म प्रजाः ।

**Colophon:**

इत्यनन्तभट्टविरचिते चम्पुभारते द्वादशस्तबकः ॥
दिगन्तरलसत्कीर्तिरनन्तकविकुञ्जरः ।
प्राणैस्तुल्यं सरस्वत्याः प्राणैषीचम्पुभारतम् ॥

---

## No. 12234. चम्पुभारतम्.

## CAMPUBHĀRATAM.

Substance, palm-leaf. Size, 15¼ × 1¾ inches. Pages, 192. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains 1 to 11 Stabakas complete.

Same work as the above.

The scribe adds—

कीलकाब्दे कृष्णपक्षे नवम्यां भृगुवासरे ।
श्रीशैलनाम्ना लिखितं प्रबन्धं चम्पुभारतम् ॥

---

## No. 12235. चम्पुभारतम्.

## CAMPUBHĀRATAM.

Substance, palm-leaf. Size, 15¼ × 1½ inches. Pages, 106. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains one to seven Stabakas complete, and the eighth incomplete.

Same work as the above.

No. 12236. चम्पुभारतम्.
CAMPUBHĀRATAM.

Substance, palm-leaf. Size, 14½ × 1¼ inches. Pages, 146. Lines, 7 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Foll. 37 to 53 and Stabakas 4 to 6 are lost.

Contains Stabakas 1 to 12 complete, excepting 4 to 6.

Same work as the above.

---

No. 12237. चम्पुभारतम्.
CAMPUBHĀRATAM.

Substance, palm-leaf (Śrītāla). Size, 9¾ × 1½ inches. Pages, 34. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 6a. The other work herein is Campurāmāyaṇa 1a.

Contains Stabakas five, seven and eight only, but wants the beginning in the fifth Stabaka and the end in the eighth Stabaka.

Same work as the above.

---

No. 12238. चम्पुभारतम्.
CAMPUBHĀRATAM.

Substance, palm-leaf. Size, 17¾ × 1½ inches. Pages, 72. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains Stabakas one to five complete, and the sixth incomplete.

Same work as the above.

---

No. 12239. चम्पुभारतम्.
CAMPUBHĀRATAM.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 66. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains Stabakas one and two complete and three and seven incomplete.

Same work as the above.

---

No. 12240. चम्पुभारतम्.
CAMPUBHĀRATAM.

Substance, palm-leaf. Size, 17¼ × 1½ inches. Pages, 156. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains Stabakas 1 to 12 complete.

Same work as the above.

## No. 12241. चम्पुभारतम्.
## CAMPUBHÂRATAM.

Substance, palm-leaf. Size, 14¾ × 1½ inches. Pages, 160. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Contains Stabakas one to seven complete, and the eighth incomplete.

Same work as the above.

---

## No. 12242. चम्पुभारतम्.
## CAMPUBHÂRATAM.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 69. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

Contains Stabakas one to three complete.

Same work as the above.

---

## No. 12243. चम्पुभारतम्.
## CAMPUBHÂRATAM.

Substance, palm-leaf. Size, 15½ × 1½ inches. Pages, 18. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1a. The other work herein is Campubhârata with commentary 10a.

Contains the first Stabaka only.

Same work as the above.

---

## No. 12244. चम्पुभारतम्.
## CAMPUBHÂRATAM.

Substance, palm-leaf. Size, 16 × 1¾ inches. Pages, 118. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains Stabakas 1 to 12 complete.

Same work as the above.

The scribe adds the following stanzas :—

उन्मीलदम्बुजकदम्बकसौरभीणामुन्नृत्यदीशमकुटीतटिनीसखीनाम् ।
आचान्तवैरियशसाममृतोर्मिलानां वाचामनन्तसुकवेः वसुधाप्यमूल्यम् ॥

निडिगण्ठिवंशतटिनीशचन्द्रमा वटमूरुहोटजनिवासिसेवकः ।
विबुधो लिलेख भुवि वेङ्कटेश्वरः शुभचम्पुभारतमनन्तनिर्मितम् ॥

615-A

### No. 12245. चम्पुभारतम्.
### CAMPUBHĀRATAM.

Substance, palm-leaf. Size, 15¾ × 1¾ inches. Pages, 162. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains Stabakas 1 to 12.

Same work as the above.

---

### No. 12246. चम्पुभारतम्.
### CAMPUBHĀRATAM.

Substance, palm-leaf. Size, 17¾ × 1½ inches. Pages, 160. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains Stabakas 1 to 12 complete.

Same work as the above.

This book is said to have originally belonged to Śrīnivāsan, son of Arāvamudu Ayyangār of Kāmākṣipuram.

---

### No. 12247. चम्पुभारतव्याख्या.
### CAMPUBHĀRATAVYĀKHYĀ.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 184. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains Stabakas six to ten complete.

A commentary on the Campubhārata of Anantabhaṭṭa by Rāmakavi of Kuravi family.

**Beginning:**

अस्मिन् स्तबके अज्ञातवार्षिकवृत्तान्तं वर्ण . . . . . निस्तरणानन्तरं व्यवधायाः आ(च्छादनस्य) वेषान्तरस्येति यावत् । . . . . . व्यवधेत्याच्छादनपर्यायेत्यमरः । चरमस्य अन्तिमस्य, हायनस्य अज्ञातवाससंवत्सरस्य लङ्घनं यापनं काङ्क्षन्त इति काङ्क्षिताः अत एव ते भरताः धर्मात्मजादयः ।

* * * *

**Colophon:**

षष्ठः स्तबकः समाप्तः ॥

इति श्रीसदाशिवपादारविन्दवन्दनक(न्द)लितानन्दसान्द्रस्य कुरविकुलचन्द्रस्य रामकवीन्द्रस्य कृतौ चम्पुभारतव्याख्याने सप्तमस्तबकविवरणम् ।

**End:**

धृतेति । स धृतराष्ट्रसुतः दुर्योधनोऽपि दिने अह्नि जपाङ्कुरस्येव विना द्रोणसैन्धवादिवधशोकेन अतिम्लानदीप्तिः . . . . . . . . घटोत्कचस्य सम्बन्धिनः

अश्मनां पाषाणानां वर्षात् शकलीकृतं खण्डितं बाहू च कर्णौ च नासौ(से)च बाहुकर्णनास येषान्तैः योधैस्सह गेहं शिबिरं प्रत्यगात् गतवान् । औपच्छन्दसिकम् ॥

**Colophon:**

इति श्रीसदाशिवपदारविन्दवन्दनकन्दलितानन्दसान्द्रस्य कुरविकुलचन्द्रस्य रामकवीन्द्रस्य कृतौ चम्पुभारतव्याख्याने दशमस्तबकविवरणम् ॥

---

No. 12248. चम्पुभारतव्याख्या—सरस्वतीविलासः.

CAMPUBHĀRATAVYĀKHYĀ: SARASVATĪVILĀSAḤ.

Substance, palm-leaf. Size, 14⅞ × 1½ inches. Pages, 144. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Contains Stabakas one to three complete.

A commentary on the Campubhārata: by Narasiṁhācārya, son of Vēdāntācārya of Kauśikagōtra. The author salutes the image of Viṣṇu at Kumbakōṇam.

**Beginning:**

अस्ति(स्तु)श्रीनिगमान्तदेशिकगुरूत्तंसाय चन्द्रायते
श्रीमत्कौशिकवंशदुग्धजलधेः स्वाभीष्टदेवात्मने ।
पित्रे श्रीनरसिंहनामविदुषा पुत्रेण सप्रश्रयं
दासेनाचरितं शरीरवचनस्वान्तैर्नमः पादयोः ॥

किंच—

उत्पाद्य स्वयमात्मजं तदनु यो जातक्रियाद्याः क्रियाः
कृत्वा चाक्षरवाचने कुशलतामन्यादृशीं भूयसीम् ।
दत्वा चोपनयं विधाय विधिवत्स्वाध्यायमध्याप्य च
स्वीयं मन्त्रगणं तदर्थसहितं तापादिना संस्कृतम् ॥
दत्वा धर्ममपि प्रकाश्य नितरां मन्वादिभिर्निश्रिता(तं)
न्यासस्व(स्या)र्थमपि स्वरू(प)मपि च प्रोज्जीवकं जीवतः ।
तत्त्वं सम्यगथोपदिश्य सुदृढां वृत्तिं च भूम्यर्पणीं
कृत्वा चैव महागुरुत्वमगमत् ताताय तस्मै नमः ॥
सौवर्णकासारसुवर्णपद्मभूप(श्रा)पिया(य)स्यामृतनिर्झरायितः ।
कृपाक्षभूमा मम कुम्भघोणप्रदीपमूतस्य ददातु वाञ्छितम् ॥

वेदान्ताचार्यकृपया चम्पुभारतदीपिका ।
सरस्वतीविलासाख्या नृसिंहार्येण लिख्यते ॥

नालङ्कारो न शब्दस्य प्रक्रियापि विलिख्यते ।
ग्रन्थविस्तरतो भीत्या तात्पर्यार्थस्तु वर्ण्यते ॥

इह खलु प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्त्यर्थं निखिललोकप्रसिद्ध[त्]स्वार्ति(र्भाष्ट)देवतानार्थनारूपं सिद्धाचारपरम्पराप्राप्तं स्वकृतं मङ्गल पठितॄणामपि तत्सिद्ध्यर्थं श्लोकतो निबध्नाति कल्याणमिति । करटयोः गण्डस्थलयोः । काकेभगण्डे करटाविव्यमरः । मदवृन्यां मदजलप्रवाहे ।

See R. No. 737 of the Triennial Catalogue of MSS., Vol. I, Part I-C, for the end.

---

No. **12249.** चम्पुभारतव्याख्या—सरस्वतीविलासः.

CAMPUBHĀRATAVYĀKHYĀ : SARASVATĪVILĀSAḤ.

Pages, 64. Lines, 8 on a page.

Begins on fol. 22*a* of the MS. described under No. 3975.

Contains the fourth Stabaka complete and the fifth incomplete.

Same work as the above.

Copied by Candraśekhara.

---

No. **12250.** चम्पुभारतव्याख्या—सरस्वतीविलासः.

CAMPUBHĀRATAVYĀKHYĀ : SARASVATĪVILĀSAḤ.

Pages, 78. Lines, 14 on a page.

Begins on fol. 8*a* of the MS. described under No. 3968.

Contains the Stabakas one and two.

Same work as the above. The colophon at the end of the second Stabaka attributes the authorship wrongly to Kumāratātācarya.

The following are the colophons :—

इति श्रीकौशिककुलकलशपारावारशरद्राकाचन्द्रस्य चतुःशास्त्रपारीणस्य श्रुतिस्मृत्युदितधर्मावबोधा[न]नुष्ठानप्रवचनमन्वायपरावतारस्य श्रीमद्रामानुज-दर्शनप्रवर्तकस्य प्रतिप्र(ह)निवर्तमानस्य सततभगवद्भागवताचार्याराधनतत्परस्य सकलराजाधिराजमणिमकुटोपलालितचरणक(मल)स्य मूर्तीकृतशान्तिगुणस्य ब्रह्मवित्सन्ततिकस्य श्रीमद्वेदान्तदेशिकापरावतारस्य श्रीमद्वेदान्तदेशिकनामधेयस्य महागुरोः कटाक्षविषयीभूतस्य तदाहितशक्तिकस्य तत्सन्निधिप्राप्तरहस्यजालकस्य श्रीनृसिंहाचार्यनाम्नः तत्कुमारस्य कृतिषु चम्पुभारतव्याख्यायां सरस्वतीविलास इत्याख्यायां प्रथमस्तम्बकः समाप्तः ।

इति श्रीमत्कुमारताताचार्यविरचितचम्पुभारतविवृतौ द्वितीयस्तबकः ॥

The names of the scribes are thus given:

श्रीकौण्डिन्यकुलतिलकश्रीनिवासराघवाचार्यपुत्रस्य वेदाध्ययनशीलस्य राघवार्यस्य लिखितं भारतचम्पुव्याख्यानं प्रथमस्तबकः समाप्तः।

Said to have been transcribed by Veṅkaṭarāghava for Śaṭhakōpa.

---

No. 12251. चम्पुभारतव्याख्या—सरस्वतीविलासः.

CAMPUBHĀRATAVYĀKHYĀ: SARASVATĪVILĀSAḤ.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 246. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete in 12 Stabakas, but the leaves are in disorder.

Same work as the above.

---

No. 12252. चम्पुभारतव्याख्या—सरस्वतीविलासः.

CAMPUBHĀRATAVYĀKHYĀ: SARASVATĪVILĀSAḤ.

Substance, palm-leaf. Size, 16 × 1⅝ inches. Pages, 220. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains Stabakas one, two, six and seven complete, and the eighth incomplete.

Same work as the above, but without the introductory stanzas numbering two to four.

---

No. 12253. चम्पुभारतव्याख्या—सरस्वतीविलासः.

CAMPUBHĀRATAVYĀKHYĀ: SARASVATĪVILĀSAḤ.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 277. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains Stabakas 7 to 12 complete.

Same work as the above.

The scribe adds—

सुब्रह्मण्यस्य पुत्रेण वाञ्छीनाथसुतेन च ।
चम्पुभारतव्याख्येयं लिखिता सर्वसम्पदे ॥

---

No. 12254. चम्पुभारतव्याख्या—सरस्वतीविलासः.

CAMPUBHĀRATAVYĀKHYĀ—SARASVATĪVILĀSAḤ.

Substance, palm-leaf. Size, 18¼ × 1¼ inches. Pages, 135. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains Stabakas one to three complete.

Same work as the above, but without the introductory stanzas.

No. 12255. चम्पुभारतव्याख्या—सरस्वतीविलासः.
CAMPUBHĀRATAVYĀKHYĀ : SARASVATĪVILĀSAḤ.

Substance, palm-leaf. Size, 15¾ × 1½ inches. Pages, 230. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the first Stabaka without the text, and the second and the third with text, the third being incomplete.

Same work as the above.

---

No. 12256. चम्पुरामायणम्.
CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 12 × 1½ inches. Pages, 116. Lines, 12 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete in six Kāṇḍas.

This Campukāvya in six Kāṇḍas was composed by Bhōjarāja and Lakṣmaṇa (author of the last Kāṇḍa). The latter was the son of Gaṅgādhara and Gaṅgāmbikā. It is based on the story contained in Vālmiki's Rāmāyaṇa.

**Beginning:**

लक्ष्मीं तनोतु नितरामितरानपेक्षमङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम् ।
हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं विघ्नाद्रिभेदशतधारधुरन्धरं नः ॥
उच्चैर्गतिर्जगति सिध्यति धर्मतश्चेत् तस्या(ः) प्रमा च वचनैः कृतकेतरैश्चेत् ।
तेषां प्रकाशनदशापि महीसुरैश्चेत् तानन्तरेण निपतेत् क्नु मत्प्रणामः ॥
गद्यानुबन्धरसमिश्रितपद्यसूक्तिर्हृद्या हि वाद्यकलया कलितेव गीतिः ।
तस्माद्दधातु कविमार्गविदां सुखाय चम्पूप्रबन्धरचनां रसना मदीया ॥
वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशैस्तृप्तिं करोमि कथमप्यधुना बुधानाम् ।
गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः किं तर्पणं न विदधाति जनः पितृणाम् ॥
वाचं निशम्य भगवानथ नारदस्य प्राचेतसः प्रवचसां प्रथमः कवीनाम् ।
माध्यन्दिनाय नियमाय महर्षिसेव्यां पुण्यामवाप तमसां तमसां निहन्त्रीम् ॥
तत्र कंचन क्रौञ्चमिथुनादेकं पञ्चशरानुविद्धमपि व्याधेनानुविद्धं निध्यायतो बद्धानुकम्पस्य भगवतो वाल्मीकेर्वदनारविन्दाच्छन्दोमयी काचिदेवं निस्ससार सरस्वती ॥

* * * *

छन्दोमयीनां निलयस्य वाचामन्तेवसन्तौ मुनिपुङ्गवस्य ।
एतौ कुमारौ रघुवीरवृत्तं यथाक्रमं गातुमुपाक्रमेताम् ॥

**End:**

साकेतं समुपेयिवान् सविनयैरासेवितो भ्रातृभि-
स्सुग्रीवप्रमुखानपि प्रियसखान् स्वे स्वे पदे स्थापयन् ।
स्वच्छन्दं सुचिरं सुखान्यनुभवन् देव्या तया सीतया
रामः पालयति स्म कीर्तिविभवैरामोदिनीं मेदिनीम् ॥

**Colophon:**

साहित्यादिकलावतास(र)नगरग्रामावतंसायित-
श्रीगङ्गाधरदुग्धसिन्धुविधुना गङ्गाम्बिकासूनुना ।
प्राग्भोजोदितपञ्चकाण्डविहितानन्दप्रबन्धे मुहु(महा)न्
काण्डो लक्ष्मणसूरिणा विरचितश्शेषोऽपि जीयाच्चिरम् ॥
इति श्रीभोजलक्ष्मणविरचितं चम्पुकाव्यं समाप्तम् ॥
श्रीमत्सखारामविचक्षणैरिदं(?) रामायणं चम्पुमुखं निजेच्छया ।
श्रीवेङ्कटेशाय ददौ प्रसन्नतां प्रकाश्य रामेश्वरपूर्निवासिने ॥

---

## No. 12257. चम्पुरामायणम्.
## CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 17¼ × 1¾ inches. Pages, 58. Lines, 8 on a page. Character, Telegu. Condition, injured. Appearance, new.

Contains one to three Kāṇḍas complete and the fourth, viz., the Kiṣkindhakāṇḍa incomplete.

Same work as the above.

---

## No. 12258. चम्पुरामायणम्.
## CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 15¾ × 1¾ inches. Pages, 126. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the Kāṇḍas one to six complete.

Same work as the above.

Copying was finished on Friday, the 13th day of Mina Śukla in the year Śarvari.

---

## No. 12259. चम्पुरामायणम्.
## CAMPURĀMĀYAṆAM.

Pages, 8. Lines, 10 on a page.

Begins on fol. 8a of the MS. described under No. 11585.

Contains the Bālakāṇḍa incomplete.

Same work as the above.

No. 12260. चम्पुरामायणम्.
CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 15¾ × 1½ inches. Pages, 44. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Ayōdhyākāṇḍa (from the 7th stanza owing to the loss of the 1st leaf), the Āraṇyakāṇḍa complete and the Kiṣkindhākāṇḍa (breaking off in the 19th stanza).

Same work as the above.

---

No. 12261. चम्पुरामायणम्.
CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 48. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Yuddhakāṇḍa complete.

Same work as the above.

---

No. 12262. चम्पुरामायणम्.
CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 17½ × 1¼ inches. Pages, 86. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the Bālakāṇḍa and the Ayōdhyākāṇḍa complete, and the Āraṇyakāṇḍa and the Yuddhakāṇḍa incomplete.

Same work as the above.

---

No. 12263. चम्पुरामायणम्.
CAMPURĀMĀYAṆAM.

Pages, 120. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 8684

Contains one to six Kāṇḍas complete.

Same work as the above.

---

No. 12264. चम्पुरामायणम्.
CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 122. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the Kāṇḍas one to three complete. Breaks off in the tenth stanza of the fourth Kāṇḍa.

Same work as the above

---

No. 12265. चम्पुरामायणम्.
CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 16 × 1¾ inches. Pages, 154. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

Contains the Kāṇḍas one to six complete.

There is an index of six leaves which gives the initial words of the stanzas of the work.

Same work as the above.

---

No. 12266. चम्पुरामायणम्.
CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 19¾ × 1⅝ inches. Pages, 108. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains the Kāṇḍas two to five complete and the sixth incomplete.

Same work as the above.

Name of the scribe is Śēṣādri.

---

No. 12267. चम्पुरामायणम्.
CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 14 × 1¼ inches. Pages, 168. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains one to five Kāṇḍas complete.

Same work as the above.

Date of transcription—The Bālakāṇḍa on the 14th of Makara in the year Virōdhikṛt, the Ayōdhyākāṇḍa on Monday, the 10th day of the Puraṭṭāśi month in the year Krōdhi. Name of the scribe—Kṛṣṇa of Kāmākṣipuram.

---

No. 12268. चम्पुरामायणम्.
CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 18⅜ × 1¼ inches. Pages, 21. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Campurāmāyaṇa-vyākhyā 12*a*.

Contains the Bālakāṇḍa complete.

Same work as the above.

---

No. 12269. चम्पुरामायणम्.
CAMPURĀMĀYAṆAM.

Substance, palm-leaf (Śrītāla). Size, 14 × 1½ inches. Pages, 106. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 31*a*. The other works herein are Śāradānandabhāṇa 1*a*, Vasantatilakabhāṇa 14*a*.

Contains the Kāṇḍas one to six complete.

Same work as the above.

## No. 12270. चम्पुरामायणम्.
## CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 17¼ × 1⅝ inches. Pages, 180. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, new.

Contains the Kāṇḍas one to six complete.

Same work as the above.

The first fol. contains the names of the 56 countries known to Indian geographers in Puranic times. It is written in Grantha character.

---

## No. 12271. चम्पुरामायणम्.
## CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 174. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, new.

Contains the Kāṇḍas one to six complete.

Same work as the above.

The former owner of the MS. is said to be Śrīnivāsan, son of Pattaṅgi Raṅgācāriyar of Lakṣmīnārāyaṇapuram. Name of the scribe—Śrīnivāsan.

---

## No. 12272. चम्पुरामायणम्.
## CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 13⅝ × 1½ inches. Pages, 147. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Contains the first six Kāṇḍas complete.

Same work as the above.

---

## No. 12273. चम्पुरामायणम्.
## CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 13¼ × 1¼ inches. Pages, 115. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the first six Kāṇḍas complete.

Same work as the above.

Copying was finished on Monday, the 10th day of Jyeṣṭha-bahula of the Prabhava year.

The leaves are numbered from 61 to 118.

---

## No. 12274. चम्पुरामायणम्.
## CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 15¼ × 1½ inches. Pages, 52. Lines, 5 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Contains the first three Kāṇḍas complete and the fourth incomplete.

Same work as the above.

### No. 12275. चम्पुरामायणम्.
### CAMPURĀMĀYAṆAM.

Pages, 58. Lines, 7 on a page.

Begins on fol. 13*a* of the MS. described under No. 9055.

Contains the Bālakāṇḍa, the Ayōdhyākāṇḍa and the Āraṇyakāṇḍa complete and the Kiṣkindhākāṇḍa incomplete.

Same work as the above.

---

### No. 12276. चम्पुरामायणम्.
### CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 17⅜ × 1¼ inches. Pages, 92. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the Bālakāṇḍa, the Ayōdhyākāṇḍa, the Āraṇyakāṇḍa and the Kiṣkindhākāṇḍa complete.

Same work as the above.

---

### No. 12277. चम्पुरामायणम्.
### CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 8¾ × 1½ inches. Pages, 178. Lines, 8 on a page. Character, Malayālam. Condition, injured. Appearance, old.

Contains one to six Kāṇḍas complete.

Same work as the above.

---

### No. 12278. चम्पुरामायणम्.
### CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 16⅝ × 1⅜ inches. Pages, 68. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Contains the Bālakāṇḍa, the Ayōdhyākāṇḍa and the Āraṇyakāṇḍa complete, and a small portion of the Kiṣkindhākāṇḍa.

Same work as the above.

The scribe adds—

इति श्रीवत्सगोत्रसंभवस्य मुडुम्बिवंशवारिधेः भगवतः श्रीनिवासपौत्रस्य रङ्गनाथाचार्यपुत्रस्य वेङ्कटवरदाचार्यस्य स्वहस्तलिखितम् ॥

---

### No. 12279. चम्पुरामायणम्.
### CAMPURĀMĀYAṆAM.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 142. Lines, 4 on a page. Character, Telugu. Condition, very much injured. Appearance, old.

Contains the Kāṇḍas one to six complete.

Same work as the above.

No. 12280. चम्पुरामायणम्.
CAMPURĀMĀYAṆAM.

Pages, 10. Lines, 9 on a page.

Begins on fol. 1a of the MS. described under No. 12237.

Contains the Bālakāṇḍa incomplete.

Same work as the above.

---

No. 12281. चम्पुरामायणव्याख्या—पदयोजना.
CAMPURĀMĀYAṆAVYĀKHYĀ : PADAYŌJANĀ.

Substance, palm-leaf. Size, 17½ × 1¼ inches. Pages, 294. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the Kāṇḍas one to five complete.

The commentary here is by Nārāyaṇa, son of Nāgēśvarayajvan and Narasakka of Kōlacala family, and disciple of Gōpālendrasarasvati. His genealogy is thus given in the work :

Mallinātha
(of Kōlacala family)
|
Kapardi
(author of the Śrautakārikāvṛtti)
|
Mallinātha — Peddubhaṭṭa
(author of a commentary on the Naiṣadha, Jyautisa, etc.)
|
Kumārasvāmin
(author of a commentary on the Pratāparudrīya)
|
Mahādēva
(and three others)
|
Śambhu
|
Bhāskara
|
Nāgēśvara
|
Koṇḍōbhaṭṭa (second son)
|
Nāgēśvara
(married Narasakka)
|
Nārāyaṇa
(the author of the work now described)

Mallinātha, one of the ancestors of the author, is said to have been bathed (in gold) by Vīrarudra (Warangal). Peddubhaṭṭa is said to have been bathed (in gold), by (the King) Sarvajña (Śiṅga). **Nāgeśvara,** son of Bhāskara, is said to have performed a sacrifice with the help of his four sons, four grandsons, four sons-in-law and four daughters' sons.

**Beginning:**

श्रीरामं(श्रि)तकल्पद्रुं कल्पोज्वलसमप्रभम् ।
लक्ष्मणानिलपुत्रादिसेवितं सततं भजे ॥
श्रीगोपालपदारविन्दभजनप्राप्तात्मविज्ञानदा-
दात्मानन्दसुधानिधाननिचितः स्वान्तात् स्वसंपीत्वराम् ।
विद्यासन्धितवेदनाद्वतविदो वेदार्थसंवेदनात्
गोपालेन्द्रसरस्वतभिगवतो नोनोमि नित्यं गुरून् ॥
नोनूमो नयविघ्नेयं नित्यं वैनायकं महः ।
नानशीति हि यद्ध्यानात् सद्यः प्रत्यूहजं तमः ॥
परादिभिर्जगत्राणी राणीं वाणीं स्वसम्पदः ।
प्रणमामि चतुर्भागां चतुरर्थप्रदायिनीम् ॥
कुम्भयोनिमगस्त्यं च वाल्मीकिप्रभृतीनृषीन् ।
हनूमन्तं रामभक्तं नमामि नियतव्रतम् ॥
कोलचल्लान्वयाब्धीन्दुः मल्लिनाथो महायशाः ।
शतावधानविख्यातो वीररुद्राभिवर्षितः ॥
मल्लिनाथात्मजः श्रीमान् कपर्दी मन्त्रकोविदः ।
अखिलश्रौतकल्पस्य कारिकावृत्तिमातनोत् ॥
कपर्दितनयो धीमान् मल्लिनाथोऽग्रजस्स्मृतः ।
द्वितीयस्तनयो धीमान् पेद्दुभट्टो महोदयः ॥
महोपाध्याय आख्यातः सर्वदेशेषु सर्वतः ।
मातुलेयकु(क)तौ दिव्ये सर्वज्ञेनाभिवर्षितः ॥
गणाधिपप्रसादेन प्रोचे मन्त्रवरं(रान्) च(हून्) ।
नैषधज्यौतिषादीनां व्याख्याताभूज्जगद्गुरुः ॥
पेद्दिभट्टसुतः श्रीमान् कुमारस्वामिसंज्ञिकः ।
प्रातापरुद्रीयाख्यानव्याख्याता विद्वदग्रिमः ॥

तनयास्तस्य चत्वारो महादेवस्तदग्रजः ।
महादेवात्मजः शम्भुः सप्तक्रतुभिरिष्टवान् ॥
ततो विश्वजितं कृत्वा यज्ञं सर्वस्वदक्षिणम् ।
शम्भुयज्वात्मभूर्धीमान् भास्करो भास्करप्रभः ॥
श्रीनागेश्वरयज्वाख्यो भास्करस्यात्मसम्भवः ।
पुत्राः पौत्राश्च दौहित्राः चत्वारो वेदवेदिनः ॥
जामातरोऽपि चत्वारः एतैर्निर्वर्तिताध्वरः ।
सर्वतोमुखपद्मान्तैः सर्वक्रतुभिरिष्टवान् ॥
तस्यात्मजः कोण्डुभट्टो द्वितीयो वेदवित्कविः ।
श्रीनागेश्वरयज्वाख्यः कोण्डुभट्टसुतः सुधीः ॥
नरसक्काख्यवध्वाश्च श्रीनागेश्वरयज्वनः ।
नारायणेन पुत्रेण कोलचल्लान्वयेन्दुना ॥
चम्पुरामायणाख्यस्य प्रबन्धस्यार्थहारिणः ।
विवृतिः क्रियते प्रेम्णा यथामति समासतः ॥

तत्रभवान् भोजराजः श्रीराममनूपासनालब्धमहिमा तत्प्रेरितो भूत्वा चम्पूरामायणाख्यं प्रबन्धं प्रारिप्सुः प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय प्रचयगमनाय च प्रेक्षावत्प्रवृत्तिसिद्धये च ग्रन्थादौ मङ्गलस्यावश्यं कर्तव्यत्वेन आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्यालङ्कारिकवचनप्रामाण्यादाशीरा-द्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च आशीर्वचनपूर्वकं नमस्कारोत्तरं मङ्गलं ग्रन्थादौ निबध्नाति—लक्ष्मीमित्यादिना । निगमा वेदाः त एव शाखिनो वृक्षाः तेषां शिखाः अग्राणि उपनिषदिति यावत् । तासां प्रवालं प्रवालतुल्यं ; प्रवाले पल्लवेऽपि स्या-देति विश्वः । सर्ववेदान्तप्रतिपाद्यमित्यर्थः ।

See under the next number for the end.

---

No. 12282. चम्पुरामायणव्याख्या—पदयोजना.

CAMPURĀMĀYAṆAVYĀKHYĀ: PADAYŌJANĀ.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 152. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the Āraṇya, the Kiṣkindhā and the Sundara Kāṇḍas complete and the Yuddhakāṇḍa incomplete.

Same work as the above.

See under the previous number for the beginning.

**End**:

. . . . . . . . . निरुपमं संभासयन् भास्वताम् ।
यद्भासानुविभाति विश्वभुवनं चैतन्ययुक्तं सदा
श्रीगोपालयतीन्द्रयोगिनिधये तस्मै नमो ब्रह्मणे ॥
. . . . . . . . . . . प्रणमामि जगद्गुरुम् ।
भर्जनं कर्मबीजानां वर्जनं निखिलापदाम् ॥
नारायणेन विदुषा कोलचल(ल्लान्वयेन्दुना) ॥

. . . . . . . . . . . . . . वंशसुधाम्बुधिकौस्तुभो लक्ष्मणभट्टारकः श्रीमद्भोजराजप्रणीतचम्पुरामायणस्य परिपूर्तये अवशिष्टं युद्धकाण्डं प्रारिप्सुः . . . . . . . . . . . . . . गमनाय चाशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्यालङ्कारिकवचनप्रामाण्यादाशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात् ग्रन्थादौ श्रीगुरुचरणारविन्दस्मरणरूपं . . . . . . चरणारविन्दे भोजराजे च यदृच्छया अवज्ञेनापि दृष्टे सति द्रष्टॄणां नृणां पुरः वचसां देवी वागीश्वरी वर्तते प्रादुर्भवति ।

* * * *

तत्रेति । त . . . . . स्वार्थमाहतः क्षणः आनन्दः याभ्यां ताभ्यां कालविशेषोत्सवयोः क्षण इत्यमरः । लक्ष्मणशत्रुघ्नाभ्यामभितः पार्श्वद्वयविधूते वालव्यजने यस्य सः तथा सन् परिजनेन भृत्यजनेन समनुपचारकरणे निरतेन आसक्तचित्तेन भरतेनोदस्तमुत्क्षिप्त . . . . . तपत्रं यस्मै सः तथा सन् समारूढा विचित्रास्तरणोपेता मातङ्गा गजा यैस्ते असुरप्लवगवाहिनीपतिभिरनुगम्यमान . . . . . . तस्सन् ।

---

No. 12283. चम्पुरामायणव्याख्या—पदयोजना.

CAMPURĀMĀYAṆAVYĀKHYĀ : PADAYOJANĀ.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 167. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains one to three Kaṇḍas complete.

Same work as the above.

---

No. 12284. चम्पुरामायणव्याख्या—पदयोजना.

CAMPURĀMĀYAṆAVYĀKHYĀ : PADAYOJANĀ.

Pages, 74. Lines, 7 on a page.

Begins on fol. 12*a* of the MS. described under No. 12268.

Contains the Bālakāṇḍa complete and the Ayōdhyākāṇḍa incomplete.

Same work as the above.

---

No. 12285. चम्पुरामायणम्, साहित्यमञ्जूषिकाव्याख्यासहितम्
CAMPURĀMĀYAṆAM WITH THE COMMENTARY, SĀHITYAMAÑJŪṢIKĀ.

Pages, 102. Lines, 9 on a page.

Begins on fol. 11a of the MS. described under No. 1099.

Contains the first three Kāṇḍas only.

The commentary is by Rāmacandra, son of Gaṅgāmbikā and Koṇḍōpaṇḍita of Śāṇḍilyagōtra, and a native of the Telugu country

**Beginning:**

सीताकल्पलतान्वितं दशरथाम्भोरा(शि)जं सोदरो-
दारस्कन्धमभीष्टदं सुमनसां श्रेणीभिरामोदितम् ।
नित्यं स्वाश्रितनन्दनं किसलयश्रीपञ्चशाखोज्वलं
श्रीरामामरभूरुहं हृदि सदा सेवेऽर्थसंसिद्धये ॥
सुधाकरसुधाकराच्छरदभास्वराभा स्वरा
चितक्रमविपञ्चिकाक्कणनसादरा सादरा ।
विरिञ्चनविमोहनागमविशारदा शारदा
मदीयरसनाङ्गणे नटतु सर्वदा सर्वदा ॥
यत्पादाम्भोजरेणुं विबुधकविवराः प्राप्य सिद्धाञ्जनं वा
प्रज्ञादृष्टेः प्रमीलां पटुतरतमसा प्राप्तवत्या निजायाः ।
आसाद्योन्मेषमूलं निधिमिव कवितां प्राप्य(पु)रुयद्गुणार्घा
निष्प्रत्यूहं सदास्मान्स सुरवरनुतः पातु हेरम्बदेवः ॥
श्रीमान् कै(त्रै)लिङ्गदेशे स जयति विबुधश्रेणिकोटीरकोटी-
(कोटी)माणिक्यमूतागणितगुणगणोऽखण्डपाण्डित्यशौण्डः ।
धीरश्शाण्डिल्यगोत्रस्सकलकविकुलाह्लादिसूक्तिप्रवीणो
वीणोदाहार्यविद्याविवरणनिपुणो रामचन्द्रो बुधेन्द्रः ॥
नित्यं सह्व(म्भ्र)मजृम्भिता नटति यज्जिह्वाङ्गणे भारती
जायन्ते कविपुङ्गवास्तनुभृतो यद्भक्तिनिर्वर्णनात् ।
भोजक्षोणिभुजामुना विरचितश्चम्पूप्रबन्धोऽधुना
व्याख्यां तस्य करोमि मञ्जुलतरां साहित्यमञ्जूषिकाम् ॥

व्याकुर्वन्ति निबद्धगौरवभयात्नैव स्फुटं युक्तिभि-
र्ये तेऽध्येतृजनप्रतारणपराः का नैपुणी वा ततः ।
वैखर्या वचसां कवीशहृदयं प्रख्यापयन्नन्वय-
द्वारैवाहमिहाखिलं प्रविवृणोम्युक्तिप्रजोज्जृम्भितम् ॥

अथ खलु मञ्जर्यामोदिताशेषविबुधसमाजोऽनवद्यसकल(विद्याभि)ज्ञः सर्वज्ञ-सार्वभौमः(भोजनामा महाराजस्समस्त)सद्गुणमणिगणारामस्य तारकब्रह्मरूपिणस्त-त्रभवतः(श्रीरामस्य चरितानुवर्णनं निःश्रेय)सनिदानं निजान्तरङ्गे निर्वर्ण्य "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मित-तयोपदेशयुजे ॥ इत्यालङ्कारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयस्साधनतां काव्यालापांश्च वर्जयेदिति निषेधशास्त्रस्यासत्काव्यविषयताय(तां च) पश्यन् सकलकल्याणपरायणं श्रीरामायणं चम्पूप्रबन्धात्मना चिकीर्षुश्चिकीर्षितानन्तराय-परिसमाप्तिप्रचयगमनलक्षणफलसाधनत्वादाशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्याचार्यदण्डिवाक्यादाशीरायन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च तत्रादौ लक्ष्मीशब्दपूर्वकमाशिषं प्रयुङ्क्ते ॥

लक्ष्मी तनोतु ( . . . . . ) धुरन्धरं नः ॥

लक्ष्मीति । आदौ लक्ष्मीशब्दप्रयोगाद्वर्णगणादिशुद्धि(द्धे)रभ्युपचयः । तदुक्तम्—

देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा इति ।

निगमा वेदास्त एव शाखिनो वृक्षाः । 'वृक्षो महीरुहश्शाखी' इत्य-मरः ।

* * * *

**Colophon:**

इति श्रीमत्परमयोगीन्द्रवृन्दमाने(नसे)न्दीव(न्दिन्दि)रसन्दोहामन्दा-नन्दलाभाभिनन्दितरघुनन्दनचरणारविन्दमकरन्दास्वादनकन्दलितसारस्वतेनाखण्ड-तपःप्रचण्डमुनिप्रकाण्डमण्डलेश्वरशाण्डिल्यनाममहामुनिगोत्रावतंसस्य पद्मान्वय-(सुधापारावार)पारिजातस्य धन्वन्तर्यवतारान्तरस्य युक्ते (आयुर्वेदप्रमुखनि)खि-लविद्यासारसर्वज्ञसार्वभौमस्य कोण्डोपाण्डितवर्यस्य तनूजेन गङ्गाम्बिकागर्भरत्नाकर-सुधाकरेण रामचन्द्रेण विरचितायां चम्पुरामायणव्याख्यायां साहित्यमञ्जूषिका-समाख्यायां बालकाण्डस्समाप्तः ॥

See under R. No. 1077(*b*) of the Triennial Catalogue, Vol. II, Part I-A, for the end.

No. 12286. चम्पुरामायणव्याख्या—साहित्यमञ्जूषिका.
CAMPURĀMĀYAṆAVYĀKHYĀ: SĀHITYAMAÑJŪṢIKĀ.

Substance, palm-leaf. Size, 15¾ × 1⅜ inches. Pages, 332. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Ayōdhyā and the Āraṇya Kāṇḍas complete, and the Kiṣkindhākāṇḍa incomplete.

Same work as the above.

Copying was finished on Friday, the 1st of the Kārttika Bahula of the Vikāri year, the book having been copied from Vāṇiyambāḍi Kaṇḍē Rao's book.

---

No. 12287. चम्पुरामायणव्याख्या—साहित्यमञ्जूषिका.
CAMPURĀMĀYAṆAVYĀKHYĀ: SĀHITYAMAÑJŪṢIKĀ.

Pages, 168. Lines, 7 on a page.

Begins on fol. 1a of the MS. described under No. 6178.

Contains the Ayōdhyā and the Āraṇya Kāṇḍas complete.

Same work as the above.

The scribe adds—

ध्रुवसंवत्सरपुष्यशुक्लप्रतिपादि सौम्यवासरेऽस्मिन् । लिखितमिदं पुस्तकं श्रीदशरथप्रभुकार्पितं च ॥

शुभकृच्छुक्रशुक्लेऽह्नि पूर्णिमाबुधवासरे । अरण्यकाण्डव्याख्येयं लिखिता घण्टया मया ॥

---

No. 12288. चम्पुरामायणव्याख्या—साहित्यमञ्जूषिका.
CAMPURĀMĀYAṆAVYĀKHYĀ: SĀHITYAMAÑJŪṢIKĀ.

Substance, palm-leaf. Size, 16¼ × 1⅝ inches. Pages, 202. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Ayōdhyākāṇḍa without the beginning and the Sundarakāṇḍa complete.

Same work as the above.

---

No. 12289. चम्पुरामायणव्याख्या—साहित्यमञ्जूषिका.
CAMPURĀMĀYAṆAVYĀKHYĀ: SĀHITYAMAÑJŪṢIKĀ.

Substance, palm-leaf. Size, 16¼ × 1⅜ inches. Pages, 56. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Sundarakāṇḍa only.

Same work as the above.

## No. 12290. चम्पुरामायणव्याख्या.
## CAMPURĀMĀYAṆAVYĀKHYĀ.

Substance, palm-leaf. Size, 17½ × 1⅝ inches. Pages, 56. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Three foll. in the beginning are lost.

Contains the Āraṇyakāṇḍa incomplete.

The name of the commentator is not given.

Similar to the above.

**Beginning:**

विना संभवतीति . . . . कारादुत्प्रेक्षालङ्कारो वा । ततो विराधेन किम-कारि इत्यत्राह । विराधोऽपीति । अपरिग्राह्यम् । तथाचाय

* * * *

अत्र विराधपक्षे रामलक्ष्मणकृतो यो गतिनिरोधः तत्परिहाराय स्कन्धे निधाय गत इत्यर्थः । अन्यत्र सूर्यचन्द्रयोर्मार्गनिरोधः । तस्य परिहाराय करणाये-त्यर्थः । उपसर्गवशाद्धातूनामनेकार्थत्वाङ्गीकारादेवं व्याख्यानम् ।

**End:**

ननु कथमेतादृगनुग्रहो रामस्य म्लेच्छवनितायामित्यत आह—आर्य-शील इति । आर्येषु पूज्येषु शीलं स्वभावो यस्य सः तथा च शबरी यद्य-प्यपि तपस्विनी.

---

## No. 12291. जीवन्धरचम्पूः.
## JĪVANDHARACAMPUḤ.

Substance, paper. Size, 13½ × 8¼ inches. Pages, 67. Lines, 27 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 85a. The other works herein are Kandarpavijaya 1a, Sūktimuktāvali 51a.

Contains one to five Lambhas complete and the sixth incomplete.

A Campukāvya by Haricandra, a Jain. The story relates to a Jaina prince, named Jīvandhara, son of King Satyandhara and Vijayā, and is said to have been related by Sudharma to King Śrāṇika.

The subject-headings of the 11 Lambhas of the work are given below:—

| | |
|---|---|
| १. सरस्वतीलम्भः. | ७. कनकमालालम्भः. |
| २. गोविन्दालम्भः. | ८. विमलालम्भः. |
| ३. गन्धर्वदत्तालम्भः. | ९. सुरमञ्जरीलम्भः. |
| ४. गुणमालालम्भः. | १०. लक्ष्मणालम्भः. |
| ५. पद्मालम्भः | ११. मुक्तिलम्भः. |
| ६. क्षेमश्रीलम्भः | |

**Beginning:**

यस्य श्रीनखकान्तिनागसरितः कूर्मायतेऽङ्घ्रिद्वयं
सेवानम्रसुरेन्द्रवज्रमकुटीमाला मरालायते ।
पश्यन्निर्जरयोषिदम्बकततिर्मीनप्रपञ्चायते
क्षोणीशाञ्जलयः पयोजमुकुलंत(न्त्या)द्यो जिनस्सोऽवतु ॥
श्रीपादाक्रान्तलोकः परमहिमकरोऽनन्तसौख्यप्रबोधः
पापध्वान्तापनोदप्रथितनिजरुचिस्सत्समूहाधिनाथः ।
श्रीमान् दिव्यध्वनिप्रोल्लसदखिलकलावल्लभो मन्मनीषा-
नीलाब्जिन्या विकासं वितरतु जिनपो धीरचन्द्रप्रभेशः ॥
हरीशपूज्योऽप्यहरीशपूज्यस्सुरेशवन्द्योऽप्यसुरेशवन्द्यः ।
अनङ्गरम्योऽपि शुभाङ्गरम्यः श्रीशान्तिनाथः शुभमातनोतु ॥
आयतदिव्यशरीरं शिवसौख्यकरं सुदृग्भिराशास्यम् ।
रतिरागहीनमीडे पूर्वं श्रीवर्धमानकन्दर्पम् ॥
लोकोर्ध्वभागविजने मुक्तिकान्ताविराजितान् ।
नष्टकर्माष्टकान् सिद्धान् विशुद्धान् हृदि भावये ॥
भजे रत्नत्रयं प्रत्नं भव्यलोकैकभूषणम् ।
तोषणं मुक्तिकान्तायाः पूषणं ध्वान्तसन्ततेः ॥
वाणी कर्मकृपाणी द्रोणी संसारजलधिसन्तरणे ।
वेणीजितघनमाला जिनवदनाम्भोजभासुरा जीयात् ॥
अरन्ध्रसद्वृत्तमणिमनन्तगुणगुम्भिताम् ।
अपूर्वमालां मन्येऽहं पूर्वाचार्यपरम्परान्(म्) ॥
गद्यावली पद्यपरम्परा च प्रत्येकमप्यावहति प्रमोदम् ।
हर्षप्रकर्षं तनुते मिलित्वा द्राक् बाल्यतारुण्यवतीव कान्ता ॥

या काथा(था)भूतधात्रीस(शं, श्रेणितं(कं) प्रतिवर्णिता ।
सुधर्मगणन(नाथेन) तां वक्तुं प्रयतामहे ॥
मदीयवाणीरमणी चरितार्था चिराद्भूत् ।
वन्दे जीवन्धरं देवं या भावैर्निजनायकम् ॥
जीवन्धरस्य चरितं दुरितस्य हन्तृ प्राप्ता मलीमसतमापि मदीयवाणी ।
धीरान् धिनोति नियतं मलिनाञ्जनश्रीः बिम्बाधरीनयनपङ्कजसङ्गतेव ॥

अथ लवणरत्नाकरनिर्लोलकल्लोलशयकुशेशयप्रक्षिप्तमुक्ताविद्रुमराजिविराजितवेलालङ्कृते ।

* * * *

अस्ति निस्तुलं हेमाङ्गदं नाम मण्डलम् ।
तत्रास्ति राजनगरी जगति प्रसिद्धा(वत्)सालनीलमणिदीधितिरुद्धमार्गः ।
राहुभ्रमेण विवशस्तरणिः सहस्रैः पादैर्युतोऽपि न हि लङ्घयति स्म सालम् ।
यत्सौधानवलोक्य निर्जरपतिः द्राङ्निर्निमेषोऽभव-
धस्या वीक्ष्य सरोजशोभि परिखां गङ्गा विषादं गता ।
यत्रत्यानि जिनालयानि कलयन् मेरुः स्वकार्तस्वरं
स्वीचक्रे च वलद्विपं सुरपुरी यां वीक्ष्य शोकाकुला ॥
शास्ति स्म शस्तमहिमा महनीयवृत्तिस्तां भूपमौलिमणिरञ्जितपादपीठः ।
सत्यन्धरक्षितिपतिर्भुवि यस्य कीर्तिः प्रत्यर्थिभिस्सह दिगन्तमवाप शुभ्रा ॥

* * * *

तस्य सत्यन्धरस्यासीत् कान्ता कान्त्यधिदेवता ।
वेला लावण्यपाथोधेः विश्रुता विजयाख्यया ॥

* * * *

निद्रावती सा नरपालकान्ता स्वप्नं ददर्श स्वशुभाशुभान्तम् ।
अस्वप्नगम्यं किल भावि तस्याः स्व ो न गम्यं बत संबभूव ॥

* * * *

आर्यपुत्र जितामित्र दृष्टास्स्वप्नास्त्रयो भृशम् ।
वाचालयन्ति मां चूतकोरकाः कोकिलामिव ॥

आर्यपुत्र सुत्रामविभव विभावर्याः पश्चिमे यामे कश्चन तरुरशोकोऽपि केनचित्कुठारपाणिना छेदेन शोकं प्रापितो जातश्च हाटकमकुटघटितो बालाशोकविटपी तत्परिसरे अष्टापि माला दृष्टा इति ॥

* * * *

पुत्रं नृपालतिलकं कुलरत्नदीपं प्राप्नोषि देव सुरराजदिशेव सूर्यम् ।
दृष्टो यतस्समकुटो नवबालवृक्षः कान्ता भवन्ति खलु तस्य तदष्टमालाः ॥

* * * *

**Colophon :**

इति महाकविहरिचन्द्रविरचिते श्रीमति चम्पुजीवन्धरे सरस्वतीलम्भो नाम प्रथमो लम्भः ॥

See under the next number for the end.

---

No. **12292.** जीवन्धरचम्पूः.

JĪVANDHARACAMPŪḤ.

Substance, palm-leaf (Śrītāla). Size, $20 \times 2\frac{1}{4}$ inches. Pages, 140. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete in 11 Lambhas.

Same work as the above.

Copied in the Kṛṣṇapakṣa of the Dhanurmāsa in the Śubhakṛt year.

See under the previous number for the beginning.

**End :**

देव्यो गन्धर्वदत्ताद्यास्सहिता(श्च)स्वमातृभिः ।
समीपे चन्दनार्यायास्संयमं जगृहुः परम् ॥
जीवन्धरोऽयं तपसि प्रवीणो यथाक्रमं नष्टघनाष्टकर्मा ।
रत्नत्रयं पूर्णमवाप धीरो महामुनिर्मान्यगुणाभिरामः ॥
अष्टाभिस्स्वगुणैरयं कुरुपतिः पुष्टोऽथ जीवन्धर-
स्सिद्धश्रीहरिचन्द्रवाङ्मयमधुस्यन्दिप्रसूनोच्चयैः ।
भक्त्याराधितपादपद्मयुगलो लोकातिशायिप्रभां
निस्तुल्यां निरपायसौख्यलहरीं सम्प्राप्तमुक्तिश्रियम् ॥
प्रजानां क्षेमाय प्रभवतु महीशः प्रतिदिनं
सुवृष्टिस्सम्भूयाद्व्रजतु शमनं व्याधिनिचयः ।
विधत्तां वाग्देव्या सह परिचयं श्रीरनुदिनं
मतं जैनं जीयाद्विलसतु च भक्तिर्जिनपतौ ॥
कुरुकुलपतेः कीर्तिः राकेन्दुसुन्दरचन्द्रिका-
विमलविशदा लोकेष्वानन्दिनी परिवर्धताम् ।
मम च मधुरा वाणी विद्वन्मुखेषु विनृत्यता-
द्विलसितरसा सालङ्कारा विराजितमन्मथा ॥

**Colophon:**

इति महाकविहरिचन्द्रविरचिते श्रीमति चम्पुजीवन्धरे मुक्तिलम्भो नाम एकादशलम्भः ॥

---

No. 12293. जीवन्धरचम्पूः.

JĪVANDHARACAMPŪḤ.

Substance, paper. Size, 11×8½ inches. Pages, 250. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

Same work as the above. Restored from the MS. described under the previous number.

---

No. 12294. जीवन्धरचम्पूः.

JĪVANDHARACAMPŪḤ.

Substance, palm-leaf. Size, 20¾ × 1¾ inches. Pages, 126. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, new.

Contains one to five Lambhas complete and the sixth incomplete.

Same work as the above.

---

No. 12295. तत्त्वगुणादर्शः.

TATTVAGUṆĀDARŚAḤ.

Pages, 36. Lines, 17 on a page.

Begins on fol. 129*a* of the MS. described under No. 4459.

Complete.

A work similar to the Viśvaguṇādarśa of Vēṅkaṭādhvarin and probably written in imitation thereof. It brings out the tenets of Vaiṣṇavism and Śaivism in the form of a conversation between two persons Vijaya and Jaya, a Śaivite and a Vaiṣṇavite, respectively. By Aṇṇayārya, son of Śrīnivāsa Tātārya and grandson of Aṇṇayārya of Śrīśaila family. The author is apparently the brother of Śrīnivāsācārya, the author of the Tattvamārtāṇḍa and the Jijñāsādarpaṇa, and is said to have been the Court Pandit of King Vēṅkaṭa, son of Rāghava of the Kōsala family.

**Beginning:**

श्रीमच्छयामाभिरामच्छविहृदयगुहाध्वान्तसङ्घातिगुप्तं
प्रत्नं देवेषु रत्नं न विशदमभवद्यन्ततोऽप्याश्रितानाम् ।
इत्येतद्व्यक्तिकृत्यै मधुमथनहृदास्थानमास्थाय क्लृप्ता
मन्दस्मेरस्मितेन्दुद्युतिरतिकृपया श्रेयसे स्तान्छ्रियो नः ॥

श्रीमच्छ्रीशैलपूर्णान्वयकलशपयोराशिराकासुधांशो-
रासेतुस्यूतविद्वत्प्रवरनुतमतेरण्णयार्यस्य पौत्रः ।
पुत्रः प्रख्यातधाम्नो नृपसदसि रमावासतातार्यनाम्नः
श्रीमानण्णार्यनामा विलसति कविराट् ज्ञातयज्ञो ह्यभिज्ञः ॥
स च प्राज्ञकृतानुज्ञः प्रज्ञया शास्त्रविस्तरान् ।
वदिष्य तत्त्वगुणादर्शमाचचक्षे मिताक्षरम् ॥
लोके श्लोकाननेकान्विदधति कृतिनः श्रीकरास्तोकपाका-
नेके गद्यानि हृद्यान्यतिमधुरपदान्याचपद्यानि चान्ये ।
पार्श्वाभिव्यक्तमुक्ताफलकलनकनत्पद्मरागोज्ज्वलल-
स्बन्धच्छायानुबद्धं रचयति कविराडेष चम्पूप्रबन्धम् ॥
तत्त्वार्थनिर्धारणबद्धबुद्धी मत्वा स्वमत्या निखिलं च शास्त्रम् ।
मोदान्मिथश्चक्रतुरप्रमादं वादं मुदा शाम्भववैष्णवौ द्वौ ॥

तत्र—

शाम्भवस्तमसा बुद्धेः स्तम्भनादतथात्वदृक् ।
वैष्णवस्त्वभवद्विष्णुः सत्त्वतस्तत्त्ववित्तमः ॥

ततः कदाचन मुदा समुपजाते प्रभाते विरचितस्नानः कृतसन्ध्यावन्दका-(ना)द्यनुष्ठानः पुरस्कृतश्रुतिस्मृतिपुराणेतिहासादिप्रमाणानुसन्धानः परमपुरुषं भगवन्तमरविन्दनयनमवन्दत स्वसमयनियतनियमनिष्णातः श्रीवैष्णवः ।

**End:**

इति विनिश्चित्य सुनिश्चलप्रश्नः सपत्नविजयकथावलोकसंप्रवृत्तमहत्तराभ्यनुज्ञया विज्ञाततद्विधानविधानुकलनः सुधाशनधुनीप्रमुखनिखिलपुण्यतीर्थसार्थप्रवेशनसमर्थितप्रकर्षहरिण्यां स्वामिपुष्करिण्यां कृताघमर्षणस्नानं तमेनं श्रीनिवासस्य सन्निधानं प्रापय्य यथाविधि तापादिभिः पञ्चभिः समश्रितैस्संस्कारैः श्रीभागवतस्वाभाविकालङ्कारैरङ्कितं विधाय

* * * *

कर्मन्दिपुरन्दरकृतनिबन्धनबन्धुरानुसन्धानसन्दानितभावः स्वाविष्कृततदनुगुणप्रबन्धनिबन्धनव्यासङ्गाशिथिलितनिस्सारसंसारबन्धनः सुखमतिष्ठत ॥

**Colophon:**

मुग्धस्तत्त्वगुणादर्शं स्निग्धं कृत्वाण्णयाध्वरी ।
मुख्यसौख्यपरिष्कृत्यै सख्युर्लक्ष्म्या मुदार्पयत् ॥

श्रीमत्कोसलवंशमौक्तिकमणेः श्रीराघवक्षोणिभृ-
द्गर्भक्षीरपयोधिशीतमहसः श्रीवेङ्कटक्ष्माभृतः ।
आस्थाने स्थितिमास्थितेन भजता धुर्यो तदाचार्यतां
श्रीशैलाण्णयदीक्षितेन रचितस्तत्त्वार्थधीदर्पणः ॥

The scribe adds:—

श्रीशैलवंशजनुषा तोलप्पार्येण धीमता ।
तत्त्वार्थधीदर्पणोऽयं व्यलेखि महतां मुदे ॥
तत्त्वार्थधीदर्पणस्य लेखनात् स्वर्णशैलपः ।
नरपञ्चाननो देवः प्रीयतामिष्टदायकः ॥

---

## No. 12296. तत्त्वगुणादर्शव्याख्या.
## TATTVAGUṆĀDARŚAVYĀKHYĀ.

Pages, 109. Lines, 16 on a page.

Begins on fol. 146*b* of the MS. described under No. 4459, wherein this work has been omitted to be mentioned in the list of other works given therein.

Incomplete.

A commentary on the Tattvaguṇādarśa described above: by the same author as that of the original who salutes, among others, his brother Vēṅkaṭācārya and Kauṇḍinya Śrīnivāsa.

**Beginning:**

श्रीशः श्रीशांशभाजः शठमथनमुखा देशिका देशिकेन्द्रः
श्रीशैलाख्यान्ववायच्छलजलधिविधू वेङ्कटार्याण्णयार्यौ ।
तातस्तातार्यवर्योऽग्रजनुरनुपदो(मो) वेङ्कटाचार्यनामा
कौण्डिन्यश्रीनिवासाध्वरिगुरुरपि मे सुप्रसन्ना भवन्तु ॥
कृत्वा तत्त्वगुणादर्शं तत्त्वविज्ञीतये स्वयम् ।
व्याकुर्वे मृदुलैर्वाक्यैस्तेषां तोषाय विस्फुटम् ॥

इह खलु ग्रन्थकृत् प्रत्यूहव्यूहप्रशमनायाभीष्टदेवतामभिष्टुवन्नभिधेयमप्यभिधत्ते—श्रीमदित्यादिना । श्रीर्वेषरचना यस्मिन् तत्तथोक्तम् । श्रीर्वेषरचनाशोभासम्पत्सरलशालिषु । वाणीलक्ष्मीलवङ्गेतिवन्ध . . . ध्वित्येकाक्षररत्नमाला । भगवत्पक्षे वेषरचना मत्स्यकूर्महयग्रीवादिनानाविधविग्रहपरिग्रहः । रत्नपक्षे चतुरश्रत्ववर्तुलत्वादिरूपवत्ता ।

* * * *

रमावासततार्यनाम्नः श्रीनिवासतातामार्याभ्यस्य पुत्रः श्रीमान् वाग्मी श्रीर्वाणी यस्यासाविति व्युत्पत्तेः त्रातयज्ञः भगवदाराधनात्मकयज्ञानुष्ठानात् त्रातः संरक्षितो यज्ञो येन स तथोक्तः यो वै सप्तदशं प्रजापतिं यज्ञमन्वायत्तं वेद प्रति यज्ञेन तिष्ठतीति श्रुतिरत्र कटाक्षिता । अत एवाभिज्ञः कविराट् विलसतीत्यन्वयः ।

* * * *

तत्त्वगुणादर्शं । तत्त्वानां चिदचिदीश्वराणां ये गुणाः नियाम्यत्वनियन्तृत्वदासत्व-शेषत्वशेषित्वादयः तेषामादर्शमादर्शवत् स्फुटप्रतिपत्तिजनकं ग्रन्थं मिताक्षरं परि-मिताक्षरम् । आचचक्षे उक्तवानित्यर्थः ॥

**End:**

अयं भावः । मत्तो व्यतिरिक्त इतीत्यत्रेतिर्न रुद्रवाक्यसमाप्तौ, तथासति सोऽहमित्यादौ पुनः सोऽब्रवीदित्यध्याहारापातात् । अतः परमात्मनः खल्वेतादृशस्व-भावः, तव तु कथं स्यादिति देवाशङ्कायां तद्विशदीकरणार्थतया प्रकारार्थकः । तमेव प्रकारं सोऽन्तरादित्यादिनाह । तस्य चायमर्थः—स इति तच्छब्दः परमा-त्मपरः तस्य बुद्धिस्थत्वात् । तच्छब्दस्य बुद्धिस्थार्थकत्वं तेन रक्तं रागादित्यत्र दृष्टम् । अन्तरादचेतनवर्गादन्तरं जीववर्गम्.

---

No. 12297. तीर्थयात्राप्रबन्धः.

TĪRTHAYĀTRĀPRABANDHAḤ.

Substance, paper. Size, 12 × 8¼ inches. Pages, 200. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Breaks off in the ninth Āśvāsa.

A Campukāvya by Samarapuṅgavadīkṣita, son of Anantama and Vēṅkaṭēśa of Vādhūlagōtra who was a nephew of Dharmaśivayōgin of Bhāradvājagōtra at Tiruvālaṅgāḍu. It describes the holiness of the several sacred places and waters found in the course of the pilgrimage of the author's brother and collegue named Dharma who was a disciple of Appayadīkṣita. The author had another brother named Sūryanārāyaṇa.

**Beginning:**

श्रियं स पुष्यातु वृषध्वजो मे जिगीषतो यस्य पुरानुपूर्वम् ।
चक्रीभवद्भूधरचापसङ्गी बाणोऽपि चक्री भवति स्म चैत्रः ॥
पौलोम्यर्पितपादुकाचरणयोः पाणिस्पृशा देवतया
भारत्या पुरतो निवारितजना पश्चात्करालम्बिनी ।
प्रक्रान्तस्तुतिरद्रिराजतनया प्राचीनवाचा गणे-
राया(न्ती) पतिमन्दिरं निजगृहादन्तर्मम पोतले ॥

वामस्तनचलदाननमन्यकुचाद्दानतरलहस्ताग्रम् ।
आत्मजमवलोकयतोः शिवयोरेकः सिताङ्कुरो जयति ॥

सरलीभवकवि(द्वि)लोकनतरलीकृतगोप(भीरुचैतन्यम्) ।
करलीलया मुखार्पितमुरलीना(वा)दनपरं(महः)सेवे ॥

आनन्दायास्तु कालिन्दी पुरस्स्यान्मे सरस्वती ।
निहतां जह्नतनया रेहसा राशिमंहसाम् ॥

कार्मीमुखानि परमार्थपिकाशिकानि पुण्यस्थलानि कतिचिन्निशितमूषणानि ।
चारूणि योजयितुमग्रजसत्कथायां कुर्वे मतिं गुणलताविव मौक्तिकानि ॥

देशिकस्य कृपया हि देहिनामापतन्ति पुरुषार्थसम्पदः ।
तत्कथारसनिमज्जनं विना भक्तुलेरनघता कथं भवेत् ॥

कल्याणनिधिमाचार्यकटाक्षं किमिति स्तुमः ।
ईश्वराणां प्रसादोऽपि यस्यादसरमीक्षते ॥

कालिदासकविमुख्यभारतीपारणाकृतिन एव पण्डिताः ।
भारती(मापिते) मम भजेयुरादरं स्वादुसेविन इवाम्लवस्तुनि ॥

फाणिताञ्चितपयस्सहोदरे गद्यपद्यमयकाव्यगुम्भनः(ने) ।
नाफला (चापलं कि)मपि मे रसज्ञया स्वानुरूपमनयानुभूयते ॥

पद्येषु बाहुल्यमिह प्रबन्धे मितानि गद्यानि तु तावतापि ।
अस्त्येव लक्ष्मानुगमो रसज्ञैर्विच्छित्तिभेदाः परमीक्षणीयाः ॥

महाकविसरस्वतीमधुरकाव्यनिर्वर्तने
प्रसन्नपदवीक्ष(लिप्स)या परमुखानि नापेक्षते ।
अलङ्कृतिविधौ मणेरधिगमाय (किं) माहते
मुखं त्रिदशधाम वा भुजगराजसीमन्तिनी ॥

गद्यम्—अस्ति समस्तविघ्नपण्डखानोच्चण्डताण्डवोदञ्चितचरणकङ्कणस्वन-शङ्कोदयसङ्कोचितभद्रकालीमुखनालीकस्य भ्रमणाटोपपर्यस्तजटाजूटगभस्तिमाटि-घटनाम्रेडिततदरिपुत्रपिञ्जरिम्णो डामरडमरुडात्कारप्रतिर(व)पूरितामरालयस्य

* * * *

वटवनाभिधाना राजधानी ॥

यस्यां वचस्स्वादिमनिक्षुरिक्षुर्गानप्रशंसारुत एव हंसाः ।
वन्दी मुखस्येन्दुरणूदरीणामिन्दीवरश्रीर्नयनांशुबन्धी ॥

गद्यम्—तत्र जयति पवित्रतरचरित्रातिशायसपत्नीकृतात्रिमुखतपोधनानुभावः, स्वभावविमलमनीषादर्शदर्शनीयषड्दर्शनीरहस्यः, भगवत्स्वतरप्रादेशनयशोदेशि-

कान्तेवसदरविन्देशसुतमन्दारजलदचिन्तामणिशैवागमजैवातृकोदयशैवाब्लिनीपतिः नैष्ठिकाचारप्रतिष्ठापनगरिष्ठापदानो मन्मथविजयकर्मण्यपर इव पिनाकी धर्मशि-(व)योगी ।

व्यत्यासं व्याससूनोर्विनिमयममराचार्यवर्यस्य दे(वी)प्सां
पाराशर्यस्य मैत्रावरुणगुणनिकां धर्मसूनोर्विभाषाम् ।
प्रत्यादेशं दधीचेस्सनकपरिणतिं नाममेदं मृकण्डो-
स्तंवो(स्तण्डो)ः पर्यायमत्रेर्यमकमिह सुधीधुर्यमाहुर्यमार्याः ॥
कलानिधेरस्य विधोरिव श्रीः कापि स्वसा काञ्चनपेशलाङ्गी ।
श्रीवेङ्कटेशव्यपदेशभाजो वरस्य जाया हृदयङ्गमासीत् ॥

गद्यम्—अस्याः किल रमणीमणेरपर(खिल)गृहिणीसमाजदुरवापा गुण कलापास्तरुणिमारम्भ एव जजृम्भिरे ॥

तस्याश्चदु(श्चङ्क्रम)णे विलम्बनमभूत्तन्व्या न दीनावने
तारल्यं दृशि नेन्द्रियेषु तनुता मध्ये न नित्योत्सवे ।
वामत्वं भ्रुवि न प्रियानुसरणव्यापारनिष्ठाविधौ
काठिन्यं च कुचे न चेतसि कचे नाभाषणे वक्रिमा ॥
एनां भरद्वाजकुलैकभूषामनन्तमाख्यामधिगम्य योषाम् ।
वाधूलवंशप्रभवोऽनुरूपां सुधीमणे(णि)स्सोऽयमवाप शोभाम् ॥

गद्यम्—निरतिशयानुकूल्यनिष्ठागरिष्ठयोररुन्धतीवसिष्ठयोरिव परस्परानु-भूतिसुभगभावसुभ(वानुब)न्धमेदुरमनुपलम्भसरणीगोचरविप्रलम्भरसोदयमलघुवि-स्रम्भभरनिवारितरहस्यार्थनिगूहनमनिवेदितोपपादितहिताहितविधिप्रकारमखिलगृह-मेधिपरिषदनुकरणीयसाङ्गत्यमनयोरजायत दाम्पत्यम् ॥

नारीललामश्चरितैरुदारैर्दूरीकृतस्वर्गसुखाभिलाषः ।
प्रज्ञाधिभूरेष पिनाकपाणेराज्ञाधिया कर्म समाचचार ॥

गद्यम्—एष पुनरशेषधर्माचरणकर्मणि साचिव्यमाचरन्त्या नितान्तम-सितेक्षणया प्रतिक्षणमापादितमनस्समाजनस्सदनवर्तनमेव सकलपुरुषार्थहेतुमव-धारयन् कदाचिदपि न वाराणसीप्रभृतिसेवानुभावमाबबन्ध ।

* * * *

यथोदितसमयविधेयनियतकार्यपरायणमनाः सूर्यनारायणसमरपुङ्गवाभिधाना-भ्यामसमानविनयधुर्याभ्यां सोदर्याभ्यामश्रान्तरचितचरणारविन्दपरिचरणः निरव-

चिस्नेहपरिवाहिजनकलिहितामिलषितकर्मा सहधर्मिणीप्रणीतसमधिकानुरोधविविरति-महान्तमन्वभूदानन्दम् ।

सौभागिनेयस्स तदा शोभायै श्रुतिसम्पदाम् ।
असेवत शिवाकल्पकल्पमप्पयदीक्षितम् ॥

* * * * * *

कर्णश्रीचिन्नबोम्मक्षितिपतिरभितो लम्भयन् शातकुम्भ-
स्तोमं हेमाभिषेकप्रणय(न)समये यस्य मूर्तिं प्रशस्याम् ।
रेजे श्रीरङ्गराजाध्वरिवरकलशाम्भोधिलब्धप्रसूते-
र्विद्याकल्पद्रुमस्य स्वलमिव रचयन् जातरूपालवालम् ॥
नीलकण्ठमतनिर्वहणोत्कादुक्तिवृष्टिमुपलभ्य तदग्रात् ।
ईश्वयोम्यमयमाशयभूमौ बोधशालिभरमेधयति स्म ॥

**Colophon:**

इति श्रीवाधूलकुलतिलकस्यातियात्रयाजिनः समरपुङ्गवदीक्षितस्य कृतौ तीर्थयात्राप्रबन्धे तृतीयाश्वासः ॥

**End:**

प्रालेयाद्रिसुतासहायभजनप्रेमानुबद्धस्पृशी
विद्याशीलविनीत . . . (त)पोविश्राणनासङ्गिने(?) ।
आस्यश्रेण पराङ्मुखाय करुणामूर्तेषु सम्बिभ्रते
मूर्ध्ना सन्नतिमग्रजाय महते मोदान्मुहुः कुर्महे(?) ॥

**Colophon:**

इति श्रीवाधूलकुलजलधिकौस्तुभस्यातिरात्रयाजिनस्साहित्यगुरोः कनकालवालबिरुदाङ्कस्य वेङ्कटेशसुमतिसहधर्मिणीमण्यनन्तमागर्भशुक्तिमुक्तामणेस्समरपुङ्गवदीक्षितस्य कृतौ चम्पुकाव्ये तीर्थयात्राप्रबन्धे परिपूर्तिशोभितविलासो नाम नवम आश्वासः ॥

वीतस्पृहाय विरजस्तमसे समस्तशास्त्र(श्रुति)स्मृतिविदे समदर्शनाय ।
सिद्धाशिषे भगवदङ्घ्रिसमग्रभक्तिसान्द्रप्रसन्नव(म)नसे सदसे नमोऽस्तु ॥

---

No. 12298. तीर्थयात्राप्रबन्धः.

TĪRTHAYĀTRĀPRABANDHAḤ.

Substance, paper. Size, $13\frac{3}{8} \times 8\frac{1}{2}$ inches. Pages, 190. Lines, 20 in a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Contains one to five Āśvāsas complete and the sixth incomplete. Same work as the above.

## No. 12299. तीर्थयात्राप्रबन्धः.
## TĪRTHAYĀTRĀPRABANDHAḤ.

Substance, palm-leaf. Size, 19¼ × 2 inches. Pages, 69. Lines, 16 on a page. Character, Grantha. Condition, injured and imperfect. Appearance, old.

Begins on fol. 1*a*. The other works herein are Sannyāsaviṣayavacana 36*a*, Kaliviḍambana 44*a*, Yakṣapraśna 47*a*.

Cantains the Āśvāsas one to eight complete, but in a disorderly condition.

Same work as the above.

---

## No. 12300. दत्तात्रेयचम्पूः.
## DATTĀTRĒYACAMPŪḤ.

Substance, palm-leaf. Size, 14 × 1½ inches. Pages, 82. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

This is a Campukāvya dealing with the greatness of Dattātrēya, considered as an incarnation of Viṣṇu by Dattātrēya, son of Kuppama and Vīrarāghava of Ātrēyagōtra and disciple of Mīnākṣyārya.

The transcription was completed on the 18th of Vaiśākha in the year Ānanda, when the moon in its third phase was in the constellation of Puṣya.

**Beginning :**

भजे गजाननं-चित्ते प्रत्यूहविनिवृत्तये ।
देवासुरनृपे स्कन्दो यमश्वाति सतीसुतम् ॥
वेद(त)ण्डाननमाबोक्तिनलिनीमानसौकसम् ।
प्रत्यूहशैलबिन्दु(भिदु)रशुण्डादण्डमुपास्महे ॥
सम्पदे भवतु भारती (गि)रामम्बुजासनमुखाब्जहंसिका ।
नादरूपतनुभासुरा नमल्लोकमानसचकोरचन्द्रिका ॥
पीठे पाणितले गले कुचयुगे पादद्वये मानसे
दन्तालौ कचसीम्नि निर्भरकृपापूर्णे कटाक्षाङ्कुरे ।
भक्ताभीष्टफलाप्तये नव निधीन्धत्तेऽनिशं या क्रमात्
प्रेम्णा सा कमलालया कमलया(लयतां) श्रेयांसि भूयांसि नः ॥
सुखबोधसत्स्वरूपं दत्तात्रेयाभिशब्दितं तेजः ।
अज्ञानतिमिरशान्त्यै विलसतु सततं मदीयहृदयाब्जे ॥

यदनुग्रहकतकान्मे मानससलिलं बभूव मलिनमपि ।
समलं (विमलं) तादृशतपसं मीनाक्ष्यार्याख्यदेशिकं वन्दे ॥
श्रीवीरराघवविपश्चितमन्त्रियोगिसङ्घाग्रमत्र तपसा जनकं नमामि ।
शीलेन मातरमहं शुचिनानसूयादेव्यास्समामपि भजे हृदि कुप्पमुख्यम्
(माख्याम्) ॥
कवीनुद्दामवचसः प्राचेतसपुरोगमान् ।
वन्दे सुरससाहित्यसम्प्रदायप्रवर्तकान् ॥
अज्ञातशास्त्रतत्त्वार्थान्मूढान्पाण्डितमानिनः ।
दुष्कवीन् न स्मराम्येष ग्रन्थादौ मङ्गलाप्तये ॥
विद्वदानन्दिनी भूयात्तथा मम सरस्वती ।
लोकसन्तोषजननी यथा स्याद् बालभारती ॥
दत्तात्रेयोदयकथामधिकृत्य गरीयसीम् ।
दत्तात्रेयकविश्चक्रे चम्पुकाव्यमनुत्तमम् ॥

अस्ति किल निखिलमुनिकुलनिरन्तरनिवासरुचिरे परमपावनपयःपूरभरित-गोदावरी(सरि)त्परिसरे

* * * *

अतिमनोहरमाश्रमं सुधर्माश्रमं नाम ।

* * * *

तदधिवसति तपोनिधिर्विश्वसर्गोत्सुकहिरण्यगर्भमानसपयःपारावारसुधाकरः

* * * *

छाययेव चित्रभानुसेवाजागरूकया जायया सह भगवान् ब्रह्मर्षिरत्रिर्नाम ।
निजधर्मरतस्तत्र सत्यात्रिरनसूयया ।
तपस्तेजोज्ज्वलन्मूर्तिर्न्यवसत्सुखितश्चिरम् ॥

* * * *

तनयसंभवलालससूचकं वचनमात्मवधूसमुदीरितम् ।
झटिति सोऽपि निशम्य कुतूहलात्तमधिगन्तुमियेष मनोरथम् ॥

* * * *

**Colophon:**

इति श्रीमदात्रयगोत्रपयःपारावारसुधाकरवीरराघवविपश्चिद्वरतनयदत्तात्रेयगुरुचरणकमलभृङ्गायमाणान्तरङ्गदत्तात्रेयकविविरचिते श्रीमद्दत्तात्रेयचम्पुकाव्ये प्रथमोल्लासः ॥

**End:**

यत्पादसङ्गजनितेन महामहिम्ना लोकस्य सन्ततनया सकलार्थदाभूत् ।
ताद्दग्महस्त्वनिषिरात्रिसुपुत्ररूपस्सह्याचले जयति दत्तगुरुश्चिराय ॥
वाङ्मौक्तिकावलिमिमां हृदयेऽतिहर्षाद्धृत्वा स्वगी(की)यगुणसन्ततिभासमानाम्।
मायाविमोहमपहृत्य कटाक्षलक्ष्म्या दद्यात् प्रबोधमनिशं मम दत्तमूर्तिः ॥

**Colophon:**

इति श्रीमद्दत्तात्रेयगोत्रपयःपारावारसुधाक(र)वीरराघवविपश्चिद्वरतनयदत्तात्रेयगुरुचरणारविन्दभृङ्गायमाणान्तरङ्गदत्तात्रेयकविविरचिते श्रीमद्दत्तात्रेयचम्पुकाव्ये तृतीयोल्लासः ॥

The scribe adds—

कुम्भेन संयुते देवे सगुरौ सपराभवे ।
रामेण लिखितं चम्पुकाव्यं च गवि सत्यपि ॥

---

## No. 12301. दत्तात्रेयचम्पूः. DATTĀTRĒYACAMPŪḤ.

Pages, 65. Lines, 16 on a page.

Begins on fol. 130*a* of the MS. described under No. 11541.

Restored from the manuscript described under the previous number, on 1st December 1907.

Complete in three Ullāsas.

Same work as the above.

---

## No. 12302. दिव्यचापविजयचम्पूः. DIVYACĀPAVIJAYACAMPŪḤ.

Substance, paper. Size, 11¼ × 8¾ inches. Pages, 198. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new. Complete.

This Campukāvya describes the holiness and religious importance of Tiruppullāṇi. The origin of Phullarṣi and other holy legends connected with the place are also given. By Cakravarti Vēṅkaṭācārya, son of Śrīśailavārya and disciple of his grandfather Vēṅkaṭācārya. The author studied Vēdānta under Gōpāladēśika, a descendent of Vēdāntōdayanācārya, and mentions with respect his mother's father Kṛṣṇasūri and his brothers Vēṅkaṭakṛṣṇa and Raghunātha.

**Beginning:**

लीलालोलाम्बुरुहव(नि)लयाबल्लिकाश्लेषधन्यो
बाहाशाखाङ्गुलिकिसलयश्रीर्नखांशुप्रसूनः ।
भक्तैस्सेव्यो निखिलफलदश्छायया श्यामलात्मा
सन्तापं मे शमयतु श्रियः कृष्णसन्तानशाखी ॥

यस्याकृत्रिमसूक्तिराह विभवं केशीविषस्येत्यसा-
वम्भोराशिविजृम्भमाणगरलास्वादप्रकारोद्भुतम् ।
अन्योन्यं समुपेत्य यस्य नयने लोकानिमान् पुष्णतः
श्रीमानस्तु स मे समस्तदुरितच्छेदाय मोदाय च ॥

यस्याध्वरेषु हविषां सुहिता . . . योऽपि पुत्रा बभूवु . . . तियुक्तिमूला ।
सन्तो वद द्विगुणरत्नपयःपयोधिर्मातामहो हृदि ममास्तु स कृष्णसूरिः ॥

यस्याग्रजो वेङ्कटकृष्णवर्यो यस्यानुजः श्रीरघुनाथसूरिः ।
तुल्यं कुला . . . . . . गुणै . . . . . . . प्रपद्ये ॥

तर्कातर्किकथाहवोद्भटमदप्रत्यर्थिविद्वज्जनो
. . . . केसरिणो जय . . . . शिष्या यदीया भुवि ।
. . . श्रीमान् करुणासुधाजलनिधि . . . . .
र्येगुरूत्तमो विजयते भूम्नातुलो मातुलः ॥

श्रीचक्रवर्तिकुलदुग्धपयोधिचन्द्रं सान्द्रं कलाभिरुपदर्शितसत्प्रकर्षः ।
निर्धूतस . . . . . वितप्रसादं चेतः पितामहमुपाश्रय वेङ्कटार्यम् ॥

सौजन्यैकनिधिः समुज्ज्वलकलासौभाग्यसङ्केतभूः
साहित्यप्रथमावतारसरणिस्सारज्ञचिन्तामणिः ।
दर्पो . . . प्रति . . . गर्वतिमिरप्र . . . सद्गुण-
स्तातस्सन्ततमाविरस्तु हृदि नः श्रीशैलवर्यो गुरुः ॥

गोपालदेशिकपदाम्बुजभक्तिभाजा नित्यं सतां (च)रणकिङ्करचक्रवर्ती ।
श्रीवेङ्कटार्यकविरातनुते प्रबन्धं श्रीदिव्यचापविजयं नवगद्यपद्यैः ॥

. . . . पदारबिन्दयुगलीनिध्यानमाध्वीझरी-
जम्बाले हृदि कापि वेङ्कटकवेस्साहित्यवल्लयुद्भभौ ।
श्रीमद्दिव्यशरासकीर्तिसुमनःसौरभ्यलोभभ्रमद्-
सत्स्वान्तालिकुलाकुलातुलफला सेयं समुज्जृम्भते ॥

कवयः कति वा न सन्ति तेषां कृतयो वातुलचातुरीगुणाः ।
रचयन्ति तथापि काव्यमन्ये रसयन्त्येव तदत्र(त्र)पण्डिताः ॥

भक्त्यारब्धं भगवति हरौ दिव्यचापे मयैतत्
सद्वासद्वा विषयविभवादाद्रियध्वं सुधीन्द्राः ।

मल्लीमालामतुलविभवां धर्तुमादित्सवस्त-
त्सन्दर्भार्थं जगति रसिकाः(त)न्तुमुज्झन्ति किं वा ॥

अखिलमुनिशरण्ये नैमिशारण्ये निभृतसमाधिका अपि निरस्तसमाधिकाः शौनकादयो मुनयो निगमचूडापीडचरणारविन्दं

* * * *

तत्र सत्रे समेधमाने,

पराशरसुतच्छात्रं मुनयो रोमहर्षणिम्
अभ्ययुर्हरितत्त्वस्य करीरमिव लम्भकम् ॥

सूत, सुजनसुकृतप्रसूत भवता भवतापहृता जगदानन्दथुना कथामधुना वयमाप्यायनीयाः । कथितं च सिद्धिक्षेत्रप्रसङ्गात् फुल्लारण्यं नाम भगवदभिव्यक्ति

* * * *

धर्मोऽपि तपसि निष्ठां प्रत्यपद्यत गरिष्ठाम् । तदाले कलिकृदिद्धना मुनिना कलिरेवं निजगदे । वत्स कले त्वमिव तव प्राणोऽपि सद्वापरणसंवृत्तिः । यद्धर्मं त्वद्विजिगीषया तपस्यत्यश्वत्थ इति ।

तच्छ्रुत्वा नारदाकृष्टः कलिस्सद्वापरोऽभ्यगात् ।
तं हन्तुं राक्षसतनुः कृतान्त इव भीषणः ॥

धर्मोऽपि अपराविव मधुकैटभौ तौ दृष्ट्वा जनितरणरणकस्तमेवाश्वत्थं शरणमभजत ।

तदाहं निर्गतस्तस्माद्दिव्यचापधरस्तरोः ।
शरेणैकेन युगपत्तावाविध्य मुदायुधौ ॥

तौ चैकेन पत्रिणा प्रेतप्रतीकौ निपतितौ निरीक्ष्य मम लीलोपकरणभूताविति दयया पुनरुज्जीवितौ ततस्सतिष्यः सस्नुर्मां नत्वा स्तुत्वा च नेतः परमिदमाश्रमं प्रविशाव इति निगद्य निरगाताम् । तदाप्रभृति दिव्यचापः कलिजिदिति च कथयन्ति तं मुनयः । धर्मोऽपि तं दिव्यचापं तत्र चिरमाराध्य . . . . प्रार्थयामास ।

* * * *

वसुचक्रवर्तीपावनी . . . . मामधिगम्य तपसा परमेधते ।

* * * *

श्रीधर्मतीर्थस्य तटे मुकुन्दः प्रादुर्भविष्यत्यचिरात्स तुभ्यम् ।
दद्याद्विमुक्तिं तपसा नृपालमनन्यसाध्ये हि बुधाय . . . ॥

इति क्षितिभृते तस्मै दत्वा वाणीपतिर्वरम् ।
सह तेनामरेन्द्रैश्च धर्मारण्यमियाय सः ॥

**Colophon:**

इति श्रीचक्रवर्तिवेङ्कटाचार्यपदकमलमधुव्रतमानसस्य श्रीमद्गोपालदेशिककटाक्षलब्धवेदान्तरहस्यजातस्य श्रीवेङ्कटाचार्यस्य कृतिषु श्रीदिव्यचापविजये चम्पुप्रबन्धे प्रथमस्तवकः ।

**End:**

तादृशीं नगरीं रत्नचित्राकारां स राघवः ।
स्वप्रीत्यर्थमुपायातां मेने तत्रामरावतीम् ॥

तावत्स्वभिरेवाहोभिस्त्वद्विशतियोजनायामविस्तारं सेतुमुदधौ वलीमुखभटा बबन्धुः ।

* * * *

लङ्कां विभीषणसात्कृत्य प्रत्येष्यामीति प्रतिज्ञाय तत्रस्थितमहिकुलान्तकं शङ्करवरोद्धतमेघनादपन्नगाविध्वंसनार्थमागन्तव्यमित्यादिश्य सत्वरं प्रतस्थे । ते च मुनयः . . . कृतेः दिव्यचापा . . . . पापादानं चरणरजसायकाणां दिव्यदेहदानं समुद्रोच्छोषणं द्रुमकुल्यशोधनं सेतुकरणश्चेत्यतिमानुषानि कर्माणि रामस्य विचिन्त्य विस्मितमनसः पश्यन्तो दर्शनादपि ब्रह्महत्यापनोदनं सेतुमासेव . . . जगन्नाथराघवौ तत्र सुखमध्यासाञ्चक्रुः ।

जयति जलधिकन्यावल्लभो दिव्यचापो जयति रघुकुलेन्दुर्दर्भतल्पे शयानः ।
जयति निरुपमश्रीः श्रीधरोऽश्वत्थरूपो जयति जनिकृदेनोवारणं चक्रतीर्थम् ॥

**Colophon:**

इति चक्रवर्तिकुलकलशजलधिकलानिधिश्रीवेङ्कटाचार्यचरणकमलमधुव्रतमानसस्य श्रीमद्वेदान्तोदयनाचार्यान्ववायकमलाकरबालदिवाकरश्रीगोपालदेशिक-करुणारस(शिशिरकटा)क्षलब्धवेदान्तद्वयसम्पदः श्रीवेङ्कटाचार्यस्य कृतिषु दिव्यचापविजये चम्पूप्रबन्धे षष्ठः स्तवकः ॥

---

## No. 12303. द्रौपदीपरिणयचम्पूः.
## DRAUPADĪPARIṆAYACAMPŪḤ.

Substance, palm-leaf. Size, 14 × 1¼ inches. Pages, 103. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

A Campukāvya based on the story of the marriage of Draupadi with the Pāṇḍavas: by Cakrakavi, son of Lōkanātha and Ammā. It extends to six Āśvāsas. The poet was patronized by Pāṇḍya kings. His other works are Damayantipariṇaya, Sītākalyāṇa, Pārvatipariṇaya and Citraratnākara. He was a contemporary of Nilakaṇṭhamakhin and mentions Kālidāsa, Bhavabhūti, Murāri, Māgha, Śrīharṣa and Bhāravi.

**Beginning:**

हस्ताग्रोदस्तमम्भोनिधिजलमखिलं पातुमिच्छन्द्विजेन
क्षुण्णा . . . . . . . . . . . . चकार ।
मल्लूहव्यूहनिर्भेदननिपुणपदाम्भोजसेवाप्रभावः
कल्याणानां कदम्ब . . . . . . . पुराणः ॥
प्राणेषु पञ्चस्विव पाण्डवेषु प्रकाशयन् प्रीतिम . . . ।
. . . पालयति स्म कृष्णां कृपानिधिं कृष्णमुपास्महे तम् ॥
सौधे . . . . . . . . केषु मुखाभिधानेषु चतुर्मुखस्य ।
आभाति पारावतभामिनीव सा भारती मद्वदने चकास्तु ॥
वन्दे मुनिं तं प्रथमं कवीनां प्रकाशिता यस्य न चेद्वचोभिः ।
गणा गुणानां रघुनन्दनस्य ज्ञातुं क ईष्टेऽथतनः कविस्तान् ॥
आख्यातुमर्थं निगमैरनुक्तं कर्तुं तदुक्तं च सुबोधमर्थम् ।
चकार यो भारतसंज्ञमन्यं वेदं भजे तं मुनिसार्वभौमम् ॥
प्राचेतसे या जगति प्ररूढा या पुष्पिता सत्यवतीकुमारे ।
सा कालिदासे फलिता कवीनामेकोपमाने कविताललताभूत् ॥
अन्येऽपि सन्ति भवभूतिमुरारिमाघश्रीहर्षभारविमुखाः प्रथिताः कवीन्द्राः।
तेषां प्रशंसनविधौ पटुता कुतस्स्यात् तत्ता न मे यदुत यत्न च तादृशत्वम् ॥
विधेस्सकाशाद्विहितावतारः . . . धराया दिवमारुरुक्षुः ।
स्थिरीकृता येन हि गीरिहैव श्रीलोकनाथं जनकं भजे तम् ॥
वि . . . . . . . . श्रीरामचन्द्रं नमिकर्म कुर्मः ।
चित्ते सदा यस्य वसन् हरो न सस्मार कैलासवटद्रुमूलम् ॥
. . . . . शैलमूलविपुलग्रावावलीनिष्ठुरा-
घातेन क्षुभितां सुतां हसति यद्वाणी प्रसादान्विता ।
. . . . . . . . . . वन्दे न वाचस्पति-
स्तुल्यो येन निरन्तरार्जवजुषा शश्वद्वजन्वक्रताम् ॥

गद्यम्— . . . . . . . . . . . . . . मिश्रचम्पुप्रबन्धचतुष्टय-सन्दर्भणधुरन्धरेण, निर्यत्नरचितचित्ररत्नाकरेण, चक्रकविना क्रियते . . . . . श्लोकानां . . . . . . . चरितकथनेन अर्थौघविघटनप्रतिभूः अनवद्यैः पद्यैरतिहृद्यैश्च निरन्तरः तरङ्गितध्वनि . . . . . जयकम्बुः द्रौपदीपरिणयचम्पुः।

आर्याः पर्यामेकचक्राभिधायां सत्रा मात्रा पाण्डुभूपस्य पुत्राः।
स्फारेऽगारे चक्रिरे विप्रवेषच्छन्ना वासं कस्यचिद्भूसुरस्य ॥

उद्धृत्य मध्याद्भवतीति शब्दं कृत्वा तमादौ धृतविप्रवेषाः।
भिक्षामटन्तो द्विजयोषितस्ते सविस्मयाश्चकुरमर्त्यभासः ॥

**Colophon:**

पुत्रं चक्रकविं गुणैकवसतिः श्रीलोकनाथस्सुधी-
रम्मा सा च पतिव्रता प्रसुषुवे यं मानितं सज्जनैः।
तस्याभूद्द्रुपदात्मजापरिणये चम्पुप्रबन्धे महा-
नाश्वासः प्रथमो विदर्भतनयापाणिग्रहभ्रातरि ॥

प्रथमाश्वासस्समाप्तः ॥

**Colophon:**

पुत्रं चक्रकविं गुणैकवसतिं श्रीलोकनाथस्सुधी-
रम्मा सा च पतिव्रता प्रसुषुवे यं मानितं सूरिभिः।
आश्वासस्समभूद्द्वितीय इह तच्चम्पुप्रबन्धे शुभे
पाञ्चालीपरिणीतिनाम्नि धरणीपुत्रीविवाहानुजे ॥

द्वितीयाश्वासस्समाप्तः ॥

**Colophon:**

पुत्रं . . . . वसतिः . . . . .
. . . . . . . . . . . . सूरिभिः।
आश्वासस्समभूत्तृतीय इह तच्चम्पुप्रबन्धे नवे
पाञ्चालीपरिणीतिनाम्नि गिरिजापाणिग्रहभ्रातरि ॥

तृतीयाश्वासः ॥

**Colophon:**

पुत्रं . . . . . वसतिः . . . . .
. . . . . . . . . . . . . सूरिभिः।
तस्याभूद्द्रुपदात्मजापरिणये चम्पुप्रबन्धे महा-
नाश्वासः खलु तुर्य एष विनुते पाण्ड्येन भूमीभुजा ॥

**Colophon:**

पुत्रं . . . . . वसतिः . . . . .
. . . . . . . . . . . . सूरिभिः ।
तस्यासीद्द्रुपदात्मजापरिणये चम्पुप्रबन्धे महा-
नाश्वासः खलु नीलकण्ठमखिनश्श्लाघास्पदे पञ्चमः ॥

इति विदुरभाषितेन पार्षदे(ते)न प्रस्थापितैर्जनर्नायाज्ञसेनीसहितैः पाण्डवैस्साकं कंसहिंसनः तदभ्युदयालुलोकिषया तस्मान्नगरान्निरगात् ॥

श्रीरावलोकितान् पौराः पाण्डुपुत्रान्निरीक्ष्य तान् ।
सममानन्दबाष्पेण मुमुचुः शोकमञ्जसा ॥

**End:**

इत्थं राज्यमवाप्य पाण्डुतनया विद्वज्जनैस्सङ्गता-
स्तत्तादृक्कविचक्रगीतचरितास्तत्काहितार्थप्रदाः ।
इन्द्रप्रस्थजुषः प्रजाहितपुषः कीर्तिप्रतापान्विताः
पाञ्चालप्रभुकन्ययाञ्चितवपुश्श्रीधन्यया रेमिरे ॥

**Colophon:**

पुत्रं चक्रकविं गुणैकवसतिः श्रीलोकनाथस्सुधी-
रम्भा सा च पतिव्रता प्रसुषुवे यं मानितं सूरिभिः ।
आश्वासोऽजनि तस्य षष्ठ इह स श्रीचित्ररत्नाकर-
भ्रातर्येष हि पार्व(र्ष)तीपरिणये चम्पुप्रबन्धे महान् ॥
द्रौपदीपरिणयचम्पुस्समाप्तः ॥

The scribe gives his name—

मृत्युञ्जयस्वहस्तलिखितम् ॥

---

## No. 12304. द्रौपदीपरिणयचम्पूः.

## DRAUPADĪPARIṆAYACAMPŪḤ.

Pages, 183. Lines, 16 on a page.

Begins on fol. 164*a* of the MS. described under No. 11541, wherein it has been apparently wrongly stated as beginning on fol. 134*a* in the list of other works.

Restored from the manuscript described under the previous number, on 1st December 1907.

Complete.

Same work as the above

## No. 12305. नलचम्पूः.
## NALACAMPUḤ.

Substance, palm-leaf (Śrītāla). Size, 18¼ × 1⅝ inches. Pages, 93. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Breaks off in the sixth Ucchvāsa.

A proso-poetical work narrating the story of the marriage of Damayanti and Nala: by Trivikramabhaṭṭa, son of Siṁhāditya and grandson of Śrīdhara of Śāṇḍilyagōtra. This work has been printed; and in the Nirṇayasāgara Press edition the name of the author's father is given as Dēvāditya.

**Beginning:**

जयति गिरिसुताया . . . . . . . . . . . . . . . . श्चन्द्रमौलिः ।
तदनु च विजयन्ते कीर्तिभाजां कवीनामसकृदमृतबिन्दुस्यन्दिनो वाग्विलासाः ॥
जयति मधुसहायः सर्वसंसारवल्लीजननजठरकन्दः कोऽपि कन्दर्पदेवः ।
तदनु पुनरपाङ्गोत्सङ्गसञ्चारितानां जयति तरुणयोषिल्लोचनानां विलासः ॥

हृद्य(अ)गाधान्तःपरिस्पन्दि विबुधानन्दमन्दिरम् ।
वन्दे रसान्तरप्रौढं स्रोतस्सारस्वतं महत् ॥
प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविचक्षणाः ।
भवन्ति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः ॥

* * * *

अस्ति समस्तमुनिमनुजवृन्दवृन्दारकवन्दनीयपादारविन्दस्य भगवतो विधेः विश्वव्यापिव्यापारपारवश्यादवतीर्णस्य संसारचक्रकतुक्रियाकाण्डका(शौ)ण्डस्य शाण्डिल्यनाम्नो मुनेर्महर्षेर्वंशः । श्रूयन्ते च श्रवणोचिताश्चन्दनपल्लवा इव तत्र केचिदनूचानाः शुचयस्सत्यवाचो विरिञ्चवर्चसोऽचर्याचारा ब्रह्मवादिनो ब्राह्मणाः ।

* * * *

तेषां वंशे विशदयशसां श्रीधरस्यात्मजोऽभूत्
सिंहादित्यः स्वमतिविकसद्वेदविद्याविवेकः ।
उत्कल्लोलं दिशि दिशि जनाः कीर्तिपीयूषसिन्धुं
यस्याद्यापि श्रवणपुटकैर्घूर्णिताक्षाः पिबन्ति ॥
तैस्तैरात्मगुणैर्येन त्रैलोक्यास्तिलकायितम् ।
तस्मादस्मि सुतो जातो जाड्यपात्रं त्रिविक्रमः ॥

सोऽहं हंसायितुं मोहाद्वकः पङ्गुर्यथेच्छति ।
मन्दधीस्तद्वदिच्छामि कविवृन्दारकायितुम् ॥
भङ्गश्लेषकथाबन्धं दुष्करं कुर्वता मया ।
दुर्गस्तरितुमारब्धो बाहुभ्यामम्भसां निधिः ॥
उत्फुल्लगल्लैरालापाः क्रियन्ते दुर्मुखैस्सुखम् ।
जानाति हि पुनस्सम्यक् कविरेव कवेः श्रमम् ॥
सङ्गता सुरसार्थेन रम्या मे रुचिराश्रया ।
नन्दनोद्यानमालेव स्वस्थैरालोच्यतां कथा ॥
उदात्तनायकोपेता गुणवद्वृत्तमुक्तका ।
चम्पूश्च हारयष्टिश्च कस्य न म्रियते हृदि ॥

* * * *

किं बहुना—

देशः पुण्यतमोद्देशः कस्यासौ न प्रियो भवेत् ।
युक्तोऽनुक्रोशसंयुक्तैर्योजनैरिव यो जनैः ॥
तस्य विषयस्य मध्ये निषधो नामास्ति जनपदः प्रथितः ।
तत्र पुरी पुरुषोत्तमनिवासयोग्यास्ति निषधेति ॥

* * * *

धन्यास्ते दिवसास्त येषु समभूद्भूपालचूडामणि-
र्लोकालोकगिरीन्द्रमुद्रितमहाविश्रान्तकीर्तिर्नलः ।
लोकास्तेऽपि चिरन्तनास्सुकृतिनस्तद्वक्त्रपङ्केरुहे
यैर्विस्फारितनेत्रयन्त्र(पत्र)पुटकैर्लावण्यमास्वादितम् ॥

* * * *

**Colophon:**

इति श्रीत्रिविक्रमभट्टविरचितायां हरचरणसरोजाङ्कः प्रथमोच्छ्वासः ॥

* * * *

**Colophon:**

इति श्रीत्रिविक्रमभट्टविरचितायां हरचरणसरोजाङ्कायां दमयन्तीकथायां पञ्चमोच्छ्वासः ॥

**End:**

तदेतदात्मपरिग्रहेणानुगृह्यतामित्यभिधाय विश्रान्तवाचि तस्मिन् स किन्नरयुवा किमप्युपसृत्य मृगमदमिलन्मलयजरसोल्लासितरेखालाञ्छितललाटपट्टार्पितकरकमलमुकुलप्रणतिप्रेङ्खितमणिकर्णावतंसया सह प्रियया प्रणाममकरोत् । उक्तवांश्च लब्धार्धचन्द्र ईशः कृतकं समयं च . . . . .

No. 12306. नाथमुनिविजयचम्पूः.
NĀTHAMUNIVIJAYACAMPŪḤ.

Substance, palm-leaf. Size, 13¼ × 1¼ inches. Pages, 132. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1a. The other works herein are Veṅgalāryaguruparamparā 67a, Upaniṣadarthavicāra 72a, Bhagavadarādhanaprayōga 90a.

Contains one to four Ullāsa complete.

A Campukāvya giving an account of the lives of the teachers of the Viśiṣṭādvaita-Vēdānta commencing from Nāthamuni and ending with Rāmānuja: by Rāmānujadāsa, son of Kṛṣṇamācārya of Maitrēyagōtra.

The author mentions Śrīśailādhipa and Sundaravara and also his preceptors Vēṅkaṭārya and Narasiṁha.

**Beginning:**

श्रीशश्रीपृतनाधिनाथशठजिन्नाथाब्जदृग्राघव-
श्रीमद्यामुनयोगिपूर्णयतिराड्गोविन्दभट्टारकान् ।
सेवे वेदशिरोमुनीन्द्र(कलिजित्)कृष्णान् जगद्देशिक-
श्रीशैलाधिपयोगिसुन्दरवरान् ह्यानवद्यान् गुरून् ॥
श्रीनारसिंहगुरुशेखरवेङ्कटार्य . . . . रतातगुरून् गुणाढ्यान् ।
श्रीश्रीनिवासगुरुवेङ्कटशिङ्गरार्यश्रीवेङ्कटार्यनरसिंहगुरून् नमामि ॥

* * * *

सत्सूक्तिसञ्जातसुदोहलश्रीः सत्कीर्तिपुष्पालिविराजमानः ।
सद्देशिकस्तोत्रफलैकभव्यः कवित्वसन्तानतरुश्चकास्ति ॥

तथाहि—वसिष्ठवासिष्ठपराशरपाराशर्यशुकशौनकात्रिमैत्रेयवाल्मीकसनकसनन्दनादिसकलमुनिजननुतदिव्यभव्यचारित्रैः ।

* * * *

भवतिमिरशठः शठमर्षणाभिधानब्रह्मर्षिश्रेष्ठः ।

* * * *

भगवन्तं तत्रभवन्तं श्रीमन्नारायणमद्राक्षीत् । तत्स्वरूपगुणविभूतिप्रतिपादकवाक्सुधाधाराभिरुज्जीवयितुं च वीरनारायणपुरत्रातुः पुत्रीयतः धात्रीसुरसुत्राम्णः शठमर्षणगोत्रिणः ईश्वरसूरिभट्टार्यस्य पुत्रतामवाप । तत्क्षणं क्षमायां मुमुक्षुजनक्षेमङ्करः क्षणस्सर्वोऽप्यभूत् ।

मानाथवद्रमो नाथो बुधोऽपि गुरुरात्मना ।
सुमङ्गलोऽपि सुकविः सन्मित्रोऽपि कलानिधिः ॥

शास्त्रोक्तिशस्त्रधाराभिः परजीवविभेदकृत् ।
विशिष्टाद्वैतसिद्धान्तं सन्तुष्टं सचकार सः ॥

तथाहि—

अचिज्जीवेश्वराणां हि तत्त्वं तेन प्रकाशितम् ।
भेदाद्वैतप्रमाणानां घटकानां विरोधतः ॥
भेदवाक्यैः परं भेदः वैशिष्ट्यं घटकैस्तथा ।
अद्वैतवाक्यैस्सार्वात्म्यं ब्रह्मणि प्रत्यपादि हि ॥

* * * *

**Colophon:**

इति श्रीमन्मैत्रेयगोत्रसुबोदधिसुधाकरश्रीकृष्णमाचार्यसूनोस्सुदर्शनप्रसादावगतसर्वशास्त्रस्य रामानुजदासस्य कृतिषु श्रीमन्नाथमुनिविजये प्रथमोल्लासः ॥

**End:**

नानाविधशुकशारिकानिकरपरिवृते कस्मिंश्चिद्देशे सन्निविष्टः तत्रत्यजनैस्स्वकीयैश्चान्तेवासिभिः परितस्सेव्यमानः फणिराट्स्वरूपं बिभर्राबभूवे । एवंविधप्रभावभासुरास्मदार्यमाहात्म्यमस्मत्पितृचरणास्सप्रपञ्चं वर्णयांचक्रुः ।

**Colophon:**

इति श्रीमन्नाथमुनिविजये चतुर्थोल्लासः ॥

---

## No. 12307. नाथमुनिविजयचम्पूः.
## NĀTHAMUNIVIJAYACAMPŪḤ.

Pages, 30. Lines, 32 on a page.

Restored from the manuscript described under the previous number, in 1896-97.

Begins on fol. 1a of the MS. described under No. 1891.

Breaks off in the fourth Ullāsa.

Same work as the above.

---

## No. 12308. नीलकण्ठविजयचम्पूः.
## NĪLAKAṆṬHAVIJAYACAMPŪḤ.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 148. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1a. The other work herein is Śṛṅgārasarvasva 75a.

Complete.

For description and extract *see* M. Seshagiri Sastri's Report No. 2, pages 65 and 205, and also R. No. 900 of the Triennial Catalogue, Vol. II, Part I-A.

Name of the scribe—son of the astrologer Veṅkaṭācala. Date of transcription—Wednesday, the 3rd day of the dark fortnight of the Āṣāḍha month in the year Piṅgaḷa.

**Colophon :**

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिक-शतप्रबन्धनिर्वाहकमहाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाच्चादीक्षितपौत्रेण नारायणदीक्षितात्मजेन भूमिदेवीगर्भसंभवेन नीलकण्ठदीक्षितेन विरचिते चम्पुकाव्ये पञ्चमाश्वासः । समाप्तोऽयं ग्रन्थः ॥

---

## No. 12309. नीलकण्ठविजयचम्पूः.
## NĪLAKAṆṬHAVIJAYACAMPŪḤ.

Substance, palm-leaf. Size, 12¾ × 1¼ inches. Pages, 90. Lines, 9 on a page. Character, Grantha. Condition, fair. Appearance, old.

Contains Āśvāsas one, two, four complete, and five incomplete; some leaves are lost in the codex.

Same work as the above.

---

## No. 12310. नीलकण्ठविजयचम्पूः.
## NĪLAKAṆṬHAVIJAYACAMPŪḤ.

Substance, palm-leaf. Size, 14⅜ × 1¼ inches. Pages, 144. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vṛttisiddharūpasaṅgraha 77*a*.

Complete.

Same work as the above.

Copied by Śaṅkaranārāyaṇa of Yajuśśākhā.

The former owner of the MS. is said to be Muttambi Śāstri, grandson of Nārāyaṇa.

---

## No. 12311. नीलकण्ठविजयचम्पूः.
## NĪLAKAṆṬHAVIJAYACAMPŪḤ.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 96. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, old.

Contains the Āśvāsas one to four only.

Same work as the above.

No. 12312. नीलकण्ठविजयचम्पूः.
NĪLAKAṆṬHAVIJAYACAMPŪḤ.

Substance, paper. Size, 12¾ × 4⅞ inches. Pages, 89. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains the Āśvāsas one and two complete, three incomplete, and five without the begining.

Same work as the above.

आश्विने कार्तिककृष्णतिथौ २ सं १६०५.

No. 12313. नीलकण्ठविजयचम्पूः.
NĪLAKAṆṬHAVIJAYACAMPŪḤ.

Pages, 153. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 12180

Complete.

Same work as the above.

No. 12314. नीलकण्ठविजयचम्पूः.
NĪLAKAṆṬHAVIJAYACAMPŪḤ.

Substance, palm-leaf. Size, 18⅝ × 1⅞ inches. Pages, 73. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Siddharūpasaṅgraha 37*a*.

Complete.

Same work as the above.

Written in the Śōbhakṛt year.

No. 12315. नीलकण्ठविजयचम्पूः.
NĪLAKAṆṬHAVIJAYACAMPŪḤ.

Pages, 88. Lines, 9 on a page.

Begins on fol. 39*a* of the MS. described under No. 12219.

Complete.

Same work as the above.

Copied by Aṇṇāsvāmi.

No. 12316. नृगमोक्षः.
NṚGAMOKṢAḤ.

Substance, paper. Size, 11¼ × 8¾ inches. Pages, 16. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 245. The other work herein is Rājasūyaprabandha 1a.

Complete.

A Campukāvya giving the story of a king named Nṛga, who having under some curse become a lizard in a well, was restored to his former kingly state by the grace of Lord Kṛṣṇa.

**Beginning:**

तत्रैकदा मनुजवृत्तिमुपाचरिष्णुः विष्णुः स्वयं पुरवरे मणिमन्दिरान्ते ।
सेवासमामिलदनेकयदुप्रवीरस्वैरानुलापसरसो निषसाद मोदात् ॥

तदानीं च किमिदमिति सकलयदुलोकैर्मृदुहसितलसितेन च भगवता दूरादेव विलोक्यमानागमनाः संभ्रमविस्मयसूचकचटुलचरणन्यासाः किमपि समुन्मिषितघर्मकणाङ्कितवदनपङ्कजा रौक्मिणेयसात्यभामेयजाम्बवतेयप्रमुखाः सकलयदुकुमाराः

* * * *

प्रतिकलकलितविहरणरसपरिश्रमवशाद्भुतां पिपासामुपासीदन्तः प्रतिदिशप्रहितलोचनाः प्रहितमिव कञ्चिद्दूरादालोकिष्महि । ततश्च त्वरमाणा वयं परिहीणसञ्चारस्य तस्य कूपस्य प्रमुषितप्रायोपनाहं पीनाहदेशमासाद्य विलोक्यमानाः ।

तोयं नास्मिन्निरैक्षिष्महि हहह पुनः कूपगर्भे कथंचि-
न्मान्तध्वान्ते महान्तं गिरिवदिह कमप्यन्तरद्राक्ष्म जन्तुम् ।
सूक्ष्मेक्षायां च जानीमहि कुटिलवलत्पुच्छमन्धान्धुदेशे
गूढव्याढौकितं तं जरठसरटकप्रौढमूढानुकम्पाः ॥
एवंविधव्यसनभागपि पीतरक्तपालाशपेशलवपुर्ज्वलितोऽयमास्ते ।
प्राग्जन्मकर्मपटलीगणनाङ्कशङ्कचरेखासहस्रपरिभूषिततुङ्गगात्रः ॥

* * * *

श्रुत्वैतत्करुणाकरस्स भगवानुत्थाय सद्योमिल-
द्भूत्यालीयदुवीरपौरपटलीपर्यावृतो निर्ययौ ।
चित्रालोकनसक्तचनुदुतजनो गत्वा च कूपान्तिकं
प्रत्यैक्षिष्ट तमश्रुविस्रुतिजुषा पश्यन्तमुच्चैर्दृशा ॥
वामेनैव च दक्षिणेन च हरिर्हस्तेन चित्तेन च
प्रोद्वहन् गुणजालमस्य सदसि प्रो(प्रा)दीधरल्लीलया ।
पूर्वस्मात्पृथुरेष भाति विभुना गोवर्धनाविष्कृता
सर्वाशक्तिरिहाश्रिता ध्रुवमिति व्यालोकि लोकैरयम् ॥

तावदेव देवदेवकरसरसीरुहाञ्चलकथञ्चनसम्मर्शमात्रपात्रीभूतः स खलु सुकृ-
ताम्बुराशिः कृकलासरूपमखिलासु जातिषु विहीनतमं विहाय महीगतमहाजन-
परिषत्सु विहायसि दिविषत्सु च निमिषत्सु सद्य एव प्रद्योतमानप्रद्योतनद्युति-
खद्योतीकरणचणकिरणपरिणतिभिररुणीक्रियमाणहरिदन्तरम् ।

* * * *

पश्यस्येव हि विश्वमीश्वर पुनर्मच्छ्राविता मत्कथा-
मिच्छस्येव हि पृच्छसीति विदितं तद्वर्ण्यते कर्ण्यताम् ।
इक्ष्वाकुप्रमुखास्सुता दश मनोर्वैवस्वतस्याभवन्
सोऽहं विश्वनृगामिविक्रमयशास्तेषां तृतीयो नृगः ॥

**End:**

नम्या देवगणा नृणां विधिहरौ तेषां तयोरप्यहं
सोऽहं विप्रकुलं नमामि सततं सर्वैस्तथा नम्यताम् ।
नो चेत् कोऽपि नमेत् कचित् स तु मया दण्ड्येत खण्ड्येत वा
विप्रेष्वप्रियकारि दोरपि निजं सद्यो मया छिद्यते ॥
विश्रावयन्निति जनान् मृदुहासमिश्रैः विश्राणयन्नखिलमोदमपाङ्गपातैः ।
ब्राह्मण्यमौलिरगमन्नृगधर्ममेव सम्मानयद्भिरखिलैः सह राजधानीम् ॥

**Colophon:**

नृगमोक्षः ॥

---

## No. 12317. पाञ्चालीस्वयंवरः.
## PĀÑCĀLĪSVAYAMVARAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 28a of the MS. described under No. 11832.

Incomplete. Wants the beginning also.

This Campukāvya gives an account of the Svayaṁvara of Pāñcālī or Draupadī and of the marriage between her and the Pāṇḍavas.

**Beginning:**

उल्कामुत्कलयन् करेण पुरतो वृत्रारिपुत्रो ययौ
पश्चादुच्चतनुः प्रभञ्जनसुतः स्कन्धेन कुन्तीं वहन् ।
पश्चाचस्य यमौ ततश्च नृपतिर्धर्मात्मजन्मा स्वयं
पान्थैः सार्धममी निशीथसमये गङ्गातटं सङ्गताः ॥

तदनु ददृशिरे ते किञ्चिदभ्द्विलासं कुचकलशनितम्बाघातघूर्णत्तरङ्गम् ।
पयसि वरवधूनां मण्डलं तस्य मध्ये तरुणमपि च कञ्चित् पञ्चबाणोपमानम् ॥
क इह कुमतयोऽस्मत्स्वैरसञ्चारयोग्यं समयमगणयित्वा मर्तुमभ्यापतन्ति ।
इति स युवतिमध्यादुत्पतन् क्रोधशाली हरिणमिव हरीणां मार्गमेषा रुरोध ॥

**End:**

केयूरहारमकरकुण्डलादिभिरशेषनेपथ्यविशेषैर्विराजमानममिनवबलाहकरुचि-पश्यतोहरकायकान्तिकुवलयितदशोऽवकाशमतिरुचिरलोचनाभिरामया रमया च परी(त)म्.

---

## No. 12318. पुरदेवचम्पुः.
## PURADĒVACAMPUḤ.

Substance, paper. Size, 11 × 8¼ inches. Pages, 282. Lines, 18 on a page. Character, Kanarese. Condition, good. Appearance, new.

Complete in ten Stabakas.

A work in verse and prose narrating the chief incidents in the life of a Jaina saint named Puradēva: by Arhaddāsa. This story is said to have been narrated formerly by Gautama to a certain Śrēṇika.

Date of transcription—Friday, the 5th day of the bright fortnight of the Puṣya month in the year Siddharthi, Śaka 1781 [?].

Name of the copyist of the MS. now described—G. Śrinivāsa Rao, 172, Dēvar's Road, Mysore.

**Beginning:**

क्रियाद्वः कल्याणं भ्रमरहितसामोदसुमनः
समासेव्यः श्रीमान् वृषम इति विद्वत्सुविदितः ।
ददानः कल्पद्रुः श्रितजनततेरागमफलं
समासीनो दिव्यध्वनिमृदुलताल‌ङ्कृतमुखः ॥

जीयादादिजिनेन्द्रवासरमणिः सच्छात्रसंशोभो
राजच्छोभनसाश्रयप्रविलसत्पादस्तमोनाशनः ।
श्रीमान् वासवशोभितामरसमाहर्षप्रकर्षप्रदो
भ्राजत्केवलबोधभासुररुचिर्निस्सीमसौख्योदयः ॥

जीवंजीवं प्रतिकलयितुं नित्यसौख्यप्रवृत्तः
श्रीमानाद्यो जिनततिशशी सङ्गतानन्दसौख्यः ।

भव्योल्लासं वितरतु सभोल्लासक्लृप्तमतिष्ठः
प्रौढध्वान्तस्फुरणहरणस्सत्पथे सन्निविष्टः ॥
विशासितकुशासनं विविधबन्धविच्छेदनं
जिनाधिपतिशासनं जयतु भव्यसन्नायकम् ।
कुतीर्थकरवासनाकुलितचित्तसन्त्रासकं
सतां सुगुणशालिनां सकलमङ्गलाशासनम् ॥
रत्नत्रयं राजति चै(जै)नमन्त्रमचिन्त्यविद्याद्भुतशक्तियुक्तम् ।
मोहक्षमावल्लभगुप्तसेनां जिगाय तां येन जिनाधिराजः ॥

* * * *

कल्याणं कलयन्तु पूर्वकवयः पीयूषकल्लोलिनी-
संलापे प्रथमानकोमलवचोधारास्फुरत्कीर्तयः ।
यैराषीधरसत्कथामृतझरी नीता प्रकाशं परं
संसारोद्भवतापमप्रतिहतं लोके नयत्यन्ततः ॥

* * * *

श्रीमद्गौतमनामधेयगणभृत् प्रोवाच यां निर्मलां
ख्यातः श्रेणिकभूभृतो जिनपतेराद्यस्य रम्यां कथाम् ।
तां भक्त्यैव चिकीर्षतो मम कृतिश्चम्पूप्रबन्धात्मिका
वेलातीतकुतूहलाय विदुषामाकल्पमाकल्पताम् ॥
जातेयं कवितालता भगवतो भक्त्याख्यबीजेन मे
नव्यत्कोमलचारुशब्दनिचयैः पत्रैः प्रकामोज्ज्वला ।
वृत्तैः पल्लविता ततः कुसुमितालङ्कारविच्छित्तिभिः
सम्प्राप्ता वृषभेशकल्पकतरुं व्यङ्ग्यश्रिया वर्धते ॥

अथ विशालवाजिमालाविक्षिप्तविविधमौक्तिकपुञ्जसञ्जातमरालिकाभ्रमसमागत-हंसालिङ्गनमङ्गलतरङ्गित

* * * *

रजताचलस्योत्तरश्रेण्यामलकाभिधाना पुरी वरीवर्ति ।

* * * *

शास्ता तस्याः सकलखचरक्ष्मापकोटीरकोटी-
खेलन्मालासदृशविलसच्छासनः संबभूव ।
धीरः श्रीमानतिबल इति ख्यातनामा खगेन्द्रः
प्रख्यातश्रीर्निजकुलमहामेरुमन्दारशाली॥

* * * *

रामा मनोहरो(रा) नाम बभूव वसुधापतेः ।
सौन्दर्यसिन्धुलहरी मदनद्रुममञ्जरी ॥

* * * *

महाबलख्यातसुतस्तयोरभून्महोदयस्सर्वकलासु कोविदः ।
सुतेषु भिन्नेष्वपि सत्सु यन्मया प्रमोदवल्ली ववृधे महीपतेः ॥

**End:**

वृषभसेनमुखा गणिनस्तथा सकलजन्तुषु सख्यमुपागताः ।
विमलशीलविशोभितमानसाः परमनिर्वृतिमापुरिमे क्रमात् ॥
जयतां मृदुगम्भीरैर्वचनैः परनिर्वृतेर्हेतुः ।
सुरसार्थसेवितपदः पुरदेवस्तत्र(त्र)बन्धश्च ॥

**Colophon:**

इत्यर्हद्दासकृतौ पुरदेवचम्पूप्रबन्धे दशमस्तबकः ॥

मिथ्यात्वपङ्क(क)लुषे मम मानसेऽस्मिन्नाशाधरोक्तिकनकप्रसरैः प्रसन्ने ।
उल्लासितेन शरदा पुरदेवभक्त्या तच्चम्पुबन्धजलदेन समुज्जजृम्भे ॥
पुरदेवचम्पुग्रन्थः शब्दार्थरसभासुरः ।
मया सुलिखितस्त्वद्य सूरिणा ब्रह्मसूरिणा ॥

---

## No. 12319. बाणासुरविजयचम्पुः.

## BĀṆĀSURAVIJAYACAMPUḤ.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 78. Lines, 8 on a page. Character, Telugu. Condition, good but injured at one end. Appearance, old.

Complete.

For subject-matter and extracts see pages 5 and 77 to 81 respectively of M. Seshagiri Sastri's Report No. 1.

---

## No. 12320. बालभागवतम्.

## BĀLABHĀGAVATAM.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{3}{4}$ inches. Pages, 78. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 60*a*, 106*a*, 142*a*, 181*a* and 228*a*. The other work herein is Bālabhāgavatavyākhyā-Sudhācandrikā 1*a*, 68*a*, 114*a*, 149*a* and 189*a*.

Complete in five Sargas.

A work in verse and prose narrating the story of Kṛṣṇa as described in the Bhāgavata Purāṇa: by Padmarāja of Bhāradvājagōtra. According to the commentary described under No. 12323 he was the minister of Nīlādri Rao of Piṭhāpuram and was the progenitor of the Avasarāla family.

**Beginning:**

श्रियः कटाक्षः स तनोतु नश्शिवं विधिस्तुना यत्सदृशं नवोत्पलम् ।
वितन्यतेऽस्मिन् विधिना दिवानिशं वि(नि)मीलनोन्मीलनसन्ततोद्यमः ॥

श्रीमद्भ्रूयुगलोपशोभिनि मुखे स्वश्रीमुषीदं किल
कोपादात्तधनुः सुधाकर इति द्राग्वेपमानो भिया ।
तारापत्यभयागतामिव चलां श्वासेन मुक्तामणि
नासाग्रे दधदात्तशैशववयाः कृष्णः स पुष्णातु नः ॥

सुदृशां तनुतां मुदं ममयं कृतिराचार्यकृपाकटाक्षभाजः ।
मुखमारुतपूरितस्य शौरेर्मधुरा गीतिरिवाचिरेण वेणोः ॥

पद्यैरनवद्यैरपि गद्यैर्ललितास्तु कृतिरियं हृद्या ।
तुलसीभवालविर्चाकिलकलिता मालेव भगवतः शौरेः ॥

जन्मान्महाकविवचोललिता मुकुन्दलीला चमत्कृतिगता न च मत्कृतिं स्वाम् ।
मालार्पिता सुमनसां तपनीयपात्रे प्राप्तापि पल्लवपुटीमजहत्स्वभावा ॥

अस्ति श्रिया स्वस्तुलनां दधाना जनौघपूर्णा मधुराभिधाना ।
अरातिसेनोग्रवनीदवानां पुरी प्रसिद्धा भुवि यादवानाम् ॥

**End:**

याः सलीलमपुरस्कृतजीमूता सौदामिन्य इव कामिन्यः कमनीयतरकबरीभराः परिवव्रुरन्तःपुरगतमनवरतमखिलभुवनाधारनिजोदरं क्षीरोदधिप्रणयिनं घनमेनम् । याः सहेलमुपवनविहारिणीर्हरिणा सह हरिणीदृशो लताङ्गनानूनसूनोपकल्पिताकल्पाः क्रन्दन्तो द्रुतमनुययुरपह्रियमाणसर्वस्वा इव रोलम्बाः सकुटुम्बाः ॥

चिरमधिवसतामृद्धिं लुम्पन् पलाशपतेर्भृशं
सपदि रचयन्नामोदाधच्छ्रियं सुमनश्चयम् ।
प्रसवमहितां लक्ष्मीं चैत्रो लतास्विव तास्वलं
युवतिषु हरिस्तन्वन् प्रीत्या शशास जगच्चिरम् ॥

**Colophon:**

इति श्रीबालभागवते महाकाव्ये पञ्चमः सर्गः ॥

महत्यमुष्मिन्सरसीव पद्मराजद्विजोदधितसूक्तिहृद्ये ।
काव्ये नवे भागवतेऽयमग्र्यः सर्गस्तरङ्गस्तबकोपमोऽयात् ॥

## No. 12321. बालभागवतम्.
## BĀLABHĀGAVATAM.

Pages, 35. Lines, 33 on a page.

Begins on fol. 242*a* of the MS. described under No. 118.

Contains the first two Sargas complete and two stanzas of the third Sarga.

Same work as the above.

---

## No. 12322. बालभागवतम्.
## BĀLABHĀGAVATAM.

Substance, palm-leaf. Size, 16½ × 1 inches. Pages, 2?. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Bālabhāgavatavyākhyā, (Kavirañjanī) 13*a*.

Contains the first Sarga complete.

Same work as the above.

---

## No. 12323. बालभागवतव्याख्या—सुधीचन्द्रिका.
## BĀLABHĀGAVATAVYĀKHYĀ : SUDHĪCANDRIKĀ.

Pages, 391. Lines, 8 on a page.

Begins on fol. 1*a*, 68*a*, 114*a*, 149*a* and 189*a* of the MS. described under No. 12320.

Complete.

A commentary on the Bālabhāgavata. It was composed by Rāmasūri, son of Vēṅkaṭakṛṣṇasūri and grandson of Rāmāntarvāṇi of Dēvulapalli family and of Kauṇḍinyagōtra. It is entitled Sudhīcandrikā.

**Beginning :**

(व्याख्या) —

वितरतु गोपशिशुः श्रेयसीयसं नो यदुरसि विलसति माला ।
नवशिखिपिञ्छाकलिताभीरसुनयनादृगञ्चलोत्पलपङ्क्तिवत् ॥
तनोतु नः क्षेमसुरुश्रियः श्रियः पदं पदं सर्वचराचरावनम् ।
यदीयलाक्षाकृतलक्ष्मणालिकेऽलिकेक्षणोऽजायत सारसेक्षणः ॥
चरणाब्जनम्रभरणायत्तोल्लसत्करुणालवालमरुणासितं महः ।
तरुणेन्दुचूडमरुणेन्दुवह्निदृक्करणेऽन्तरार्तिहरणेश्वरं भजे ॥
रमणीयदेवरमणीशिरस्स्फुरन्मसृणानिदीप्तघुसृणारुणद्युति ।
करवाणि वाणि करवाणि ते पदं शरणं त्रिलोकशरणं मुदे सदा ॥

श्रुत्यन्तप्रतिपादितार्थसुविदं नित्यं सुमत्याङ्गिरोऽ-
पत्यं सत्यवतीकुमारमपरं श्रुत्युत्करे सुत्करम् ।
सत्यज्ञानमयं हृदन्तरवसद्विड्ध्वान्तविच्छेदना-
दित्यं वंशमणिं पितामहमहं श्रीरामसूरिं भजे ॥
अनूचानादनूचानो गुरोर्वेङ्कटनामकात् ।
यतोऽभूवमतोऽस्म्यद्य सतस्तस्य गतस्मयः ॥
पुरा रघूणामिव लोकमित्रगोत्रे महीयस्यधिभूमि रामः ।
अस्मिन् कलौ देवुलपल्लिवंशे जातो विराजत्यधिकं बुधेन्द्रः
सतो वरिष्ठेष्टभुजोऽत्ययष्ट वेदान् यथेष्टं चतुरोऽध्यगीष्ट ।
शास्त्राणि शस्त्राणि च योऽतनिष्ट दुष्टप्रतिद्वन्द्विभिदाविधायाम् ॥
निर्दोषरम्यगुणरत्नगणोज्ज्वलाभिर्वृत्तानुवृत्तमधुरध्वनिमञ्जुलाभिः ।
नक्तन्दिवं भृशमलङ्कृतिभिर्विभान्ती षड्दर्शिनी ह्यवृत यं सरसोपकण्ठम् ॥
षड्भाषाकविताल्ता तिलकिता प्राग्जन्मपुण्यावली-
संलब्धप्रतिभाविशेषविलसद्बीजोद्भवाचिक्षिति ।
सञ्जज्ञे यदुपज्ञमेव सरसा सत्काव्यशास्त्रादिका-
धीत्यध्यापकतादिसद्गुणनिकाफुसे(कोन्से)कादिसंवर्धिता ॥
सन्तुष्टात्पदमूलदत्तकृतिभी रामायणस्यासकृ-
त्पाठैरप्यतिमर्त्यवैभवलसत्पट्टाभिषेकोत्सवैः ।
योऽखण्डाखिलशास्त्रबोधजननी तत्पादभक्तिं स्थिरां
यावद्भूमितलं निजान्वयभुवां रामादवापद्वरम् ॥
वेङ्कटकृष्णाभिख्यस्सङ्ख्यावानथ निखिलबुधाभिष्टुत्यः ।
तस्माद्दनप्रकाशविभावसुदेवात्समजनि विश्वजनीनः ॥
स्फुरदविरतभावभङ्गरम्यं रसरसधिः प्रतिभागुणेन येन ।
निशितसरससाहितीसुधां सन्मननमथा बहुधा बुधा ममन्थे ॥
वाणी पाणितले मणीमिव गुणी योऽदर्शयत्पाणिनी
काणादीमगदीददीदिवदलं यश्चाक्षपादीमपि ।
भाट्टे निष्ठुरवट्टकेषु विहृती प्राभाकरे चाकरे
चास व्यासगवीगवीयुदटवीवाटीष्ववाटीचिरम् ॥
पुत्रस्तस्य पितामहार्यकलितश्रीरामनामाङ्कित-
स्तद्भूयिष्ठकृपाहिताखिलसद्विद्योऽनवद्यस्सुधीः ।

भारद्वाजकुलामृताम्बुधिविधुश्रीपद्मराजोदित-
श्रीमद्भागवताख्यकाव्यविवृतिं कुर्वे सुधीचन्द्रिकाम् ॥

श्रीपीठं पीठपुरं पुरन्दरपुरं विहसदधिश्रीभिः ।
लालस्ति स्वस्तलवास्तव्यस्तुल्यपुरुहूतिकापीठम् ॥

भूयसीः प्रवितरस्फुरनेतुः श्रेयसीर्यदधितिष्ठति नित्यम् ।
प्रेयसीमजहदर्धशरीरप्रेयसीकलितकुक्कुटरूपः ॥

राजा राजति तत्र सुधर्मान्वीतोऽमरावतीवदलम् ।
श्रीरावुकुलपयोनिधिचन्द्रो नीलाद्रिरायाख्यः ॥

राज्ञस्तस्य प्राज्ञस्सचिवो लसति बहुदर्शनः कोऽपि ।
वागीशोऽपि कलाढ्यो द्विजराट् चित्रं स पद्मराजोऽपि ॥

तस्यावसरालाख्यस्सार्थाभिख्योऽन्वयोऽजनि हि यत्रत्याः ।
सर्वे श्रीपतिपरिभुक्तमुक्तमालापरिमलवर्मितदेहाः ॥

स कदात्मनि विज्ञाय हरेर्दुर्ज्ञेयतां विभोः ।
सुकृतार्थं भव कस्माज्जगतीहेति चिन्तयन् ॥

लीलासादितगोपालबालवेषस्फुरो हरेः ।
निस्तुलास्तोकसंस्तुत्यगुणरत्नगणाकरम् ॥

अशेषोपनिषज्जातसरित्कुलसमाकुलम् ।
श्रीभागवतनिष्पारपारावारं दुरासदम् ॥

मानसेन मथा सम्यगचलेन प्रमथ्य च ।
सङ्गृह्य तत्समस्तार्थसारभूतं रमाम(प)तेः ॥

कथासुधारसं सर्वान्बुधान्पाययितुं मुदा ।
विचार्य च त्रयीवाचमृषिवाचां दुरूहताम् ॥

काव्यात्मनश्चोत्तमत्वादुपदेशस्य तत्र(पूर्त)ये ।
पीयूषपेशलं काव्यं चक्रे मन्दानुकम्पया ॥

हरिपदपङ्कजमूले कृतिं समर्प्य (. . .) कविरास कृती ।
तत्कृतिविवृतिप्रसिता बहुकृतिनो वयमपि हरिकरुणातः ॥

प्रभुनिदेशनिभश्रुतिवाक्यतस्सखिवचस्सदृशस्मृतिवाक्यतः ।
प्रियतमालपितोपमकाव्यतस्त्रिविधमप्यु(स्यु)पदेशकमादृतम् ॥

विलसति स्फुटमत्र यथोत्तरं सरसता बहुभावुकतोषिणी ।
इति कृतं वचसा बहुधा यथा सहृदयाः कलयन्तु हृदि स्वयम् ॥

अथ खलु पद्मराजनामा महाकविः—

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥
परिवड्ढइ विण्णाणं सम्भाविज्जइ जसो विसप्पदि गुणा ।
सुव्वइ सुपुरिसचरिअं किं तज्जेण ण हरन्ति कव्वालावा ॥
विश्वोल्लङ्घनजाङ्घिकीं वितनुते कीर्तिं विधत्ते श्रियं
हेलाधिकृतयक्षराजविभवां चिन्ताकरं हन्त्यघम् ।

* * * *

भगवतः, श्रीकृष्णस्य शैशवयशस्सारघनसारसुरभितं नवरसभरितमङ्गीकृतशृङ्गाररसशृङ्गं सकलरसिकजनाकलनीयसख्यं बालभागवताख्यं किमपि काव्यमुपचिक्रमिषुः, "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते" इत्यादिमहाभाष्यकारभाषितमनुस्मरन्, "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इति निखिलसकल्याबज्जनसमाख्यासरणिमनुसरन् परिप्सितपारिसमाप्तिपरिपन्थिप्रत्यूहप्रशमनफलविशिष्टं शिष्टाचारानुमितश्रुतिनिबद्धप्रमाणं ग्रन्थारम्भाङ्गलक्षणं मङ्गलाचरणमादितः श्लोकद्वये निबध्नन् सर्वाशास्यप्रापणदक्षं लक्ष्मीकटाक्षं तावत् प्रस्तौति— श्रिय इति । श्रियः लक्ष्म्याः सम्बन्धी । सः कटाक्षः, सानुग्रहवीक्षणम् । नः अस्माकं अस्मभ्यमिति वा । चतुर्थी चाशिषीत्यादिना द्विधा विकल्पनात् । शिवं मङ्गलं स्वेप्सितम् । तनोतु विस्तारयतु । तनुविस्तार इत्यस्मादाशीरर्थे लोट् ।

**End:**

शशास परिपालयामास । उपमानुप्राणितः श्लेषोऽलङ्कारः । अन्ते लक्ष्मीशब्दप्रयोगात्सर्वं रमणीयम् ।

महतीति । अयमत्र्यः अन्त्यः चरमस्सर्गः । गतः सम्पूर्णोऽभवत् । इतरद्व्याख्यातम् । हरिणीवृत्तम्—"रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा" इति लक्षणात् ॥

**Colophon:**

इति श्रीमद्रघुकुलतिलकरमारमणचरणकरुणाविगतानवद्यनिखिलविद्यावैशद्यस्य सकलसभाजनकृतसभाजनैकभाजनस्य अशेषभाषाविशेषकवितावित्तस्य त्रि-

नपवित्रकौण्डिन्यमुनिगोत्रवतंसदवुलपल्लिवंशमुक्तामणेः श्रीरामानन्दवर्णेः पात्रेण सर्वपर्थीनधीनवनवोन्मेषविशङ्कटवङ्कटकृष्णसूरिसूनुना रामसूरिणा विरचिते बालभागवतव्याख्याने सुधीचन्द्रिकाख्याने पञ्चमस्सर्गः ॥

सम्पूर्णश्च प्रबन्धः ॥

---

## No. 12324. बालभागवतव्याख्या—सुधीचन्द्रिका.
## BĀLABHĀGAVATAVYĀKHYĀ : SUDHĪCANDRIKĀ.

Substance, palm-leaf. Size, 17¾ × 1⅛ inches. Pages, 20. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new

Contains 20 stanzas in the first Sarga.

Same work as the above.

---

## No. 12325. बालभागवतव्याख्या—कविरञ्जनी.
## BĀLABHĀGAVATAVYĀKHYĀ : KAVIRAÑJANĪ.

Pages, 120. Lines, 6 on a page.

Begins on fol. 13a of the MS. described under No. 12322.

Contains the first Sarga complete.

This is another commentary on the Bālabhāgavata of Padmarāja; by Rāghavācārya who mentions with respect a preceptor called Prativādibhayaṅkara who is spoken of as having been a disciple of Vēdāntācārya and Kantōpayantṛ. The commentary is called Kaviraañjanī.

**Beginning :**

अर्वाननः सुपर्वा वर्वर्तु मदीयमानसाम्भोजे ।
येनाभावि नितान्तं ह्रीश्रीदेवीयुगङ्केन ॥
जिह्वासिंहासनस्थप्रथितहयमुखोच्छ्लेषहेषात्मभाषा-
धाटीव्याटीकनोत्का जगति विजयतां काचिदाचार्यपङ्क्तिः ।
संरम्भोजम्भमाणप्रतिकथककथारम्भसंभाव्यदम्भ-
स्तम्भप्रोत्खातशुम्भद्भुवनजयस्तम्भसंभारगुम्भा ॥
वेदान्ताचार्यकान्तोपयन्तृपादाब्जवम्भरः ।
जीयात्सदा सदाचार्यः प्रतिवादिभयंकरः ॥
लक्ष्मीराड्भुषभाषायुगलमगणयत्प्राह तत्तल्पजल्पं
कणादीन् प्रत्यगादीप्रतिकथककथामाक्षपादी व्यवादीत् ।

भट्टारद्वाविंहेषागुरुवरकारिराड्बृंहिते ते वितेने
सारं सारस्वतं प्राक् सकलमकलयत्सर्वविद्याप्रविद्यः ॥
सोऽयं श्रीराघवाचार्यः सूरिबृन्दाभिनन्दितः ।
चम्पुभागवतव्याख्यां करोति कविरञ्जनीम् ॥

* * * *

अथ तत्रभवान् श्रीपद्मराजनामा महाकविः चम्पुभागवताख्यं प्रबन्धं प्रारिप्सुः आशिषं निबध्नाति—श्रिय इति ।

* * * *

श्रीयते श्रयतीति वा श्रीः हरिप्रिया तस्याः । सः वक्ष्यमाणसादृश्यप्रतियोगी, (प्र)सिद्धो वा । कटाक्षः अपाङ्गदर्शनम् ।

**End:**

क्रीडन्तमिति । नन्दः आरात् वृक्षसमीपे; आराद्दूरसमीपयोरित्यमरः । क्रीडन्तं, तथापि अक्षतमव्रणम् । उलूखलबद्धं पुत्रं प्रमदेन मुदा दोर्भ्यां भुजाभ्यामचिरात् शीघ्रमादाय गृहीत्वा प्रकाममत्यन्तमुपकल्पितः बन्धुलोकस्य बन्धुजनस्यानन्दः येन स तथोक्तः सन् प्रहृष्टयुवति संतुष्टयोषितं वसतिं स्वस्थानं प्रपेदे प्राप ॥

**Colophon:**

इति श्रीराघवाचार्यविरचितायां चम्पुभागवतव्याख्यायां कविरञ्जन्यभिख्यायां प्रथमः सर्गः ॥

---

## No. 12326. भागवतचम्पुः.
## BHĀGAVATACAMPUH.

Pages, 112. Lines, 10 on a page.

Begins on fol. 176b of the MS. described under No. 11613.

Complete.

A Campukāvya describing the story of Kṛṣṇa as described in the Bhāgavata: by Rājanāthakavi, son of Aruṇagirinātha. He is probably the same as the author of Acyutarāyābhyudaya. The work is said to have been composed at the instance of a king of Vijayanagar, viz., Acyutarāya, son of Narasa who was the son of Īśvara and Cikkamā and grandson of Timmabhūpa.

**Beginning:**

अस्तु श्रियै श्रीसुहृदच्युतेन्दोरैश्वर्यसिद्ध्यै पतिरञ्जनाद्रेः ।
बलाय जेता बलिदानवस्य पुमर्थहेतोः पुरुषः पुराणः ॥

* * * *

सुवर्णरूपैः शुभनायकाङ्कैरौज्ज्वल्यवद्भिर्ध्वनिमश्नुवानैः ।
परिष्कृतादिक्षितिपान् प्रबन्धैः प्राचेतसाद्यान् प्रणुमः कवीन्द्रान् ॥
कथं नु वर्ण्या भुवि कालिदासमयूरमाघादिमहाकवीन्द्राः ।
पुरातनीं पूरुषभूमिकां यद्वेषेण धृत्वा विननर्त वाणी ॥
कर्णौ नयन्तां कवितां कवीन्द्राः चमत्क्रियां कामपि याति सेयम् ।
पयोधिशुक्तौ पतितं च पाथः प्रयाति मुक्ताफलतां न किं वा ॥
व्यासोक्तिपूराद्वसुदेवसूनोः कथां गृहीत्वा कथयामि किञ्चित् ।
सन्ति स्रवन्त्यो भुवि तत्पयोभिः कुल्योपभोगाय कुतो न भूयात् ॥
वंशावलीमच्युतभूवलारेर्वक्ष्यामि वर्धिष्णुवदान्यलोकाम् ।
ममोक्तिरेषा महतस्तवेन पवित्रिता स्यादिति पार्थिवेन्द्रोः ॥

अस्ति खलु कुवलयामोदहेतुरम्बरचरपरिषदायुष्यावलम्बनमवतंसमणिरम्बिकापतेः

* * * *

अजायन्त कतिचिदनूचाना राजानः ।

रत्नानि सन्ति रचिताभ्युदयानि सिन्धोः
ख्यातिं परामयति कौस्तुभरत्नमेकम् ।
तेजोविजृम्भणतृणीकृततिग्मधामा
तेषु प्रतीतमहिमाजनि तिम्मभूपः ॥

पतिदैवतदेवकीतपस्यापरिपाको मनुनीतिपारदृश्वा ।
उदधेः परिणीरिवौषधीनामुदभूदीश्वरभूवलारिरस्मात् ॥
दुर्गेशताविभवधूर्वहयोरहार्यधाम्नोरियान्नियतमीश्वरयोर्विशेषः ।
आपीडितद्विजपतिः प्रथमो द्विजानामव्याजपालनकलाभिरतो द्वितीयः ॥
अपास्तखेदानवनीधुरीणान् फणाधरेन्द्रप्रमुखान् विधातुम् ।
अजायतामुष्य स चिक्कमायां नयोपदेष्टा नरसक्षितीशः ॥

* * * *

अस्मादच्युतभूवलारिरुदभूदव्याजबन्धुः सता-
मन्तेवासिपदे तरून् दिविषदामौदार्यतः स्थापयन् ।
इन्धे पूर्वनृपानपत्रपयितुं यस्य प्रशस्यं यशो
यस्मिन्नेति दया वृषाचलपतेरेकातपत्रश्रियम् ॥

* * * *

कदाचन कविबुधगायकवैहासिकवन्दिवृन्दारकानवद्यपरीक्षणविनोदकल्पितकालक्षेपः

* * * *

रजनिकरकुलप्रदीपः स राजराजपरमेश्वरः राजनाथकविमिदमवादीत् ।

स्वादुशौरिकथालापसुधापूरप्रणालिका ।

कृतिः कृतिजनग्राह्या भवता क्रियतामिति ॥

सोऽयं कविस्तदनु शोणगिरीन्द्रसूनुराज्ञागिरं नरपतेरवतंसयित्वा ।

चम्पुप्रबन्धमजहत्सरसोक्तिबन्धं वक्तुं समारभत वाग्विभवानुकूलम् ॥

विस्तारिणो व्यासमुखोक्तिपूरात् कथां गृहीत्वा कथयामि पुण्याम् ।

अम्भो नयन्ती पृथगापगानां कुल्योपभोगाय कुतो न भूयात् ॥

अस्ति खलु समस्तजगदद्भुतवस्तुसामग्रीसमुद्रीवितविपणिरामणीयका

* * * *

शार्ङ्गधरमहिमसातिशयसौभाग्यसाधिमधुरा मधुरा नाम नगरी ॥

* * * *

स्वाधीनयन् जयरमां युधि शूरसेनो निर्माय तां निरुपमां निजराजधानीम् ।

विख्यातिमेत्य विषयान् विविधैश्च सर्वैः मान्यानपालयत माथुरशूरसेनान् ॥

**End:**

अमरैर्यदकीर्यत प्रसूनं दिवि यद्दुन्दुभयो दृढं प्रणेदुः ।

अनुकूलमभूत् त्रिलोकरङ्गे तदिदं माधवकीर्तिताण्डवानाम् ॥

इन्धानः समम्रजेन जननीं हृष्यन् मुखं देवकीं

वन्दित्वा वसुदेवमप्यविरमद्वात्सल्यमाभ्यां पुनः ।

आश्लिष्टः कृतनन्दनं दधुरसौ राज्ये तदा माथुरे

विन्यस्य स्वयमुग्रसेनमतनोद्विश्वत्रयीपालनम् ॥

**Colophon:**

इति श्रीराजनाथकविकृतभागवतचम्पुप्रबन्धः समाप्तः ॥

---

## No. 12327. भागवतचम्पुः.

## BHAGAVATACAMPUH.

Substance, paper. Size, 8¼ × 6¼ inches. Pages, 316. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in three Stabakas.

Similar to the above.

By Cidambarakavi, son of Anantanārāyaṇa and grandson of Sūryanārāyaṇa of Kauśikagōtra. He is the same as the author of the Rāghavapāṇḍavayādavīya (vide 11703 ante).

**Beginning:**

कल्याणमेधयतु कश्चिदनादिवाचां मौलावजस्रमुलरप्रचुरप्रभावः ।
आभाति नागमुखतामपि यत्र याते वैचित्र्यशालिनि विनायकताविलासः ॥

रु(भ)द्रं करोतु बलरु(भ)द्रसहोदरो वो रुद्रस्य चापजडतस्सुनिरूढशक्तिः ।
वारां निधौ प्रकटितप्रवरोरुधामा श्रीराम एव सुरसंश्रितपारिजातः ॥

आराधितामरगणस्य सुखेन सूर्यनारायणस्य वरकौशिकवंशवार्धेः ।
तारावरस्य तनयस्समभूदनन्तनारायणस्सुतमसूत चिदम्बरं सः ॥

अम्बुद्विडम्बरकरं बहुवारमम्बामम्बुध्यधीशतनयामपि संप्रणम्य ।
कम्बुप्रभाव(व)परमम्बुजयोनिकान्तां चम्पुं चिदम्बरकविस्स चरीकरीति ॥

स्वेनैव तेन समपद्यत देवसेनावाहायमानविलसत्करवाह ।
स्कन्दामरेन्द्रसदृशो मिदुरामशक्त्या सोऽभूत्परिक्षतपरक्षितभृत् परीक्षित् ॥

* * * *

एष किल निशापतिकुलविशेषको मुनिशापतिरस्कृतान्तःपुरादिव पुरन्दरः पुरा कदाचन पुराणपुरुषस्य पादारविन्दगलितायाः

* * * *

सुपरीक्षितमोक्षोपायं परीक्षितं निरीक्ष्य सविस्मतमःवविधमुनिगणे परिलसितपरिसरभागं भागवतवतंसं भगवन्तं शुकमेवमन्वयुङ्क्त—

वंशे यदूनां वरदो नृपाणामंशेन भूमाववतीर्य देवः ।
किं शेषशायी कृतवान् स कृत्यं किं शेमुषीमन्वद तन्ममेति ॥

पराशरस्य स्म तमाह पौत्रः पराशरः क्षेत्रभरार्तिमूचे ।
पुरा शरण्याय धराभिरोधपराशरात्पक्षमुखाब्जजाये ॥

* * * *

**Colophon:**

इति चिदम्बरस्य कृतौ चम्पुभागवते प्रथमस्तवकः ॥

**End:**

हंसाधिराजरथपूर्वसुपर्ववाचा ध्वंसाय दुष्टमनसामवतारभाजा ।
संसारिणामनुस्तुतिः परमेण पुंसा कंसारिणापि सरसं कलयांबभूवे ॥

नवनवकृतिचित्रैः पद्मनाभश्चरित्रैः भुवनमतिपवित्रैः द्वारकाभूनिवासी ।
अवनविरचनायामङ्गिना जागरूको नवनविषयभूमानन्दयामास देवः ॥

**Colophon:**

इति चिदम्बरस्य कृतौ चम्पुभागवते तृतीयस्तवकस्संपूर्णः ॥

No. **12328.** भागवतचम्पुः.

BHĀGAVATACAMPUḤ.

Substance, palm-leaf. Size, 15¼ × 1¼ inches. Pages, 153. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old. Complete in six Ullāsas.

A work narrating in verse and prose the story contained in the Bhāgavata Purāṇa: by Abhinava Kālidāsa.

**Beginning:**

कल्याणं नः प्रभूतं कलयतु ललितालापशैलेशबाला-
लीलाजालानुकूला शिशिरकरकलाभानुमालाजटाला ।
एषा शेषाहिभूषा परिकलितसुधापूरधारानुकारा
भद्रा मुद्रा विनिद्रा पुरहरणविधौ कापि कारुण्यपूर्णा ॥
प्रालेयाचलभागधेयभवनं कल्याणजालास्पदं
जाटाटीरतपःफलं किलकिलल्लीलाशुकाह्लादितम् ।
बिभ्राणं परिमौलि कञ्चन सुधाधाराधरं सादरं
वन्मे भद्रमसुद्रमाकलयतामानन्दकन्दं महः ॥

* * * *

अभिनवपदपूर्वः कालिदासप्रगल्भ-
स्त्रिनयनदयितायाः प्रेमडिम्भस्तृतीयः ।
विरचयति तयैव प्रेरितः प्रेमपूर्वं
हरिगुणपरिणद्धं चारु चम्पूप्रबन्धम् ॥

केयं मतिर्मम कि(शि)शोरगभीरवाचः केयं यदूद्वहकथा वचसामभूमिः ।
तद्वर्णनेऽपि यतमानहृदः कदापि निर्वर्णितं निशमितं च न साहसं मे ॥

* * * *

आसीदसीममहिमा महनीयरूपरूपानुरूपचरितस्सुकृत[:] प्रदा(धा)नः ।
राजा परिक्षिदभिधो यदजस्रदाननीरैरुपैति मरुभूमिरनूपभावम् ॥

* * * *

स एष परिक्षिदभिधानो राजर्षिराकर्णितविविधमधुसूदनकथाप्रपञ्चः ततोऽपि सौहित्यमविगच्छन् अधिगतनिखिलनिगमतत्त्वं तत्त्वविदामग्रेसरमुपशमशकलितविषयाभिनिवेशमपरिमितमहिममहितं भगवन्तं बादरायणिमप्राक्षीत् ।

* * * *

**Colophon:**

यस्मिन् शङ्करदारसौरभजरीजृम्भत्कटाक्षच्छटा-
पाताः कल्पलतावितानसुमनोगुम्भप्रियम्भावुकाः ।

तस्यासौ नवकालिदासविदुषः चम्पुप्रबन्धामृते
पूर्वः काव्यविदां प्रकल्पितसमुल्लासो विलासोऽगमत् ॥

End:

ममेदं मेदिन्या मुदितममृतासारसरसः
सगाम्भीरं(गभीरं) जानीयात् क इव रसिकाग्रेसर इति ॥
कृतानन्ता चिन्ता कथमिव मया हन्त जनके
दयालौ सर्वज्ञे सति भवति निर्मत्सरतरे ॥

Colophon:

यस्मिन् शङ्करदारसौरभजरीजृम्भत्कटाक्षच्छटा-
पाताः कल्पलतावितानसुमनोगुम्भप्रियम्भावुकाः ।
तस्यासौ नवकालिदासविदुषष्षष्ठोऽपि काव्यामृते
चम्पूनामनि धीमतां कृतसमुल्लासो विलासोऽगमत् ॥

The scribe adds—

शोभकृचैत्रशुक्लदशम्यामिन्दुवारशुभदिने श्रीचन्द्रशेखरगुरुकृपाकटाक्षवीक्षणेन श्रीवेङ्कटपतिना भागवतचम्पुरियं कृतिस्सम्पूर्णं लिखिता ॥

भागवतचम्पुकाव्यं सम्पूर्णम् ॥

---

No. **12329.** भागवतचम्पुः.

BHĀGAVATACAMPUḤ.

Substance, palm-leaf. Size, 14¾ × 1½ inches. Pages, 98. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

---

No. **12330.** भागवतचम्पुः.

BHĀGAVATACAMPUḤ.

Substance, palm-leaf. Size, 16¾ × 1⅝ inches. Pages, 142. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, old.

Breaks off in the fourth Ullāsa.

Same work as the above.

No. 12331. भागवतचम्पुव्याख्या—रत्नावली.

BHAGAVATACAMPUVYĀKHYĀ: RATNĀVALI.

Substance, palm-leaf. Size, 15¾ × 1½ inches. Pages, 199. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

A commentary on the Bhagavatacampu of Abhinava Kalidāsa, who is here said to belong to Vallāla family; by Akkayasūri, son of Vēṅkatārya of Mōkṣagunda family and nephew of Pakṣadhara Yallayārya.

**Beginning:**

महेशानं महीशानमहीशानफणाशयम् ।
रमाशयशयं नित्यमाश्रयं जगदाश्रयम् ॥

श्रीचम्पुभागवतवृत्तिसुदीपिकान्तां लिख्ये ऽहमादरभरेण रसौघसान्द्राम् ।
श्रीमोक्षगुण्डकुलमण्डनवेङ्कटार्यश्रीसूनुरच्युतपदाब्जमरन्दभृङ्गः ॥

श्वशुरगृहनिवासस्स्वर्गतुल्यो जनानामिति मधुमधुरां यस्सार्थयन् पूर्वगाथाम् ।
निमिषमपि न [वि]हातुं तस्थिवानब्धिसद्म श्रियमयमिति कम्रः श्रीपतिर्नस्तनोतु ॥

सद्वृन्दवन्द्यस्सदनुग्रहासः हृद्यानुविद्याविलविद्य एषः ।
अक्कय्यविद्वान् नवकालिदासश्च(च)म्पूप्रबन्धस्य तनोति टीकाम् ॥

वेल्लालकुलवाराशिजातशीतांशुनामुना ।
कालिदासेन नव्येन गीतं श्रोत्ररसा(नमः)कृतम् ॥
कालिदासस्य नव्यस्य निसर्गमधुरा गिरः ।
टीका रत्नावली भूषा तथाप्यासां भवत्वसु(सौ) ॥

इह खलु वेल्लालकुलशिरोमणिस्तत्रभवानभिनवकालिदासो नाम महाकविस्सकलकल्याणगुणशरण्यस्य भगवतो वासुदेवस्य गुणक्रियास्वरूपप्रतिपादनाविनाभूततया निरतिशयपुरुषार्थसाधनं "काव्यं यशसे ऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे" इत्याद्यालङ्कारिकवचनप्रामाण्याल्लौकिकपुरुषार्थोपि(पयि)कं भागवतचम्पुनामकं महाकाव्यं चिकीर्षुश्चिकीर्षिताविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनम् "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुख"मित्याचार्यदण्डिवचसा प्रबन्धमुखलक्षणत्वेनावगतमाशीरूपं मङ्गलं ग्रन्थादौ श्लोकषट्केन निबध्नाति—कल्याणमिति । लक्ष्मीक(र): कवर्गस्स्यादिति वचनात् कवर्गप्रयोगः शुभकरः । आदौ भूदेवताकस्य सर्वगुरोः मङ्ल(गण)स्य च प्रयोगः क्षेमङ्करः । तदुक्तं वृत्तरत्नाकरे मो भूमिस्त्रिगुरुः श्रियं वितनुत इति । एवं वर्णगणादिशुद्धिरस्ति ।

**End:**

कथं च्युतस्त्वां तव प्रसादाभावे मम दुःखनिवृत्तिः कुतः स्यादित्यर्थः । प्रमादात् परदारानुरक्तस्य द्विजोत्तमानुग्रहमन्तरेण पापनिवृत्तिः कथं स्यादिति । एवं लोकोत्तरप्रबन्धं निर्माय

"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥

इति (कृत)भगवद्वचनानुसन्धानः स्वग्रन्थं व्यङ्ग्यमर्यादया परमेश्वराय समर्पयति—

नवकालिदासकवितांम्बुधेरसावुपरिष्ठवाय विहिता मया तरिः ।
अवलम्ब्य चेदयमिमां विगाह्यते किमलभ्यमत्र गुणरत्नमस्तु म(न): ॥
कालिदासस्य नव्यस्य व्याख्यां . . . यदा(था)मति ।
कात्स्न्र्येन विवरीतुं चेत्प्रभवेदिन्दुशेखरः ॥

**Colophon:**

इति श्रीपदवाक्यप्रमाणपारीणश्रीमन्महोपाध्यायपक्षधरयज्वार्यभ्रातृतनयेन अक्कय्यसूरिणा विरचितायां भागवतचम्पुव्याख्यायां रत्नावलीसमाख्यायां षष्ठो विलासः ॥

---

## No. 12332. भारतचम्पुतिलकम्.

## BHĀRATACAMPUTILAKAM.

Pages, 122. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 11550.

The first eight leaves are lost. Begins in the course of the first Āśvāsa and ends in the fourth Āśvāsa.

A Campukāvya narrating the stories contained in the Bhāratacampu. The author is Lakṣmaṇasūri, who composed the Yuddhakāṇḍa of the Campurāmāyaṇa. He is here spoken of as a resident of Śanagara and as a son of Gaṅgādhara and Gaṅgāmbikā.

Copying was finished on Friday, the 2nd day of the dark fortnight of the Māgha month in the year Manmatha, by Raṅgācārya.

**Beginning:**

. . . रेण बिभर्ति शतपुत्रनिर्भरं गर्भमकृतपुण्यस्य मे कुतस्तथाविधं भागधेयं किमनेन तपोवनवते न सत्यपत्ये नफलमखिलमेतदहन्तु तपस्विशापोपहतस्तदधुना- स्वधाभुजामन्त(ः)सन्तापहरणाय महीयसो द्विजन्मन(ः) सुजन्मानं तनयं लभस्वेति वदति पृथ्वीपतौ पृथा प्रत्युवाच ।

परानपेक्षा च भवानुवर्तनं प्र(प)तिव्रताचार इति प्रतीयते ।
विरुद्धमेवात्र भवान् ब्रवीति मां कथं त्वदन्यं कलये पृथा पतिम् ॥
यदि त्वमेवं मनुषे प्रजाप्तये शृणु प्रियं किंचिदगर्हितं सताम् ।
सपर्यया न्य(म)क्षमतिप्रसन्नधीरपत्यदं मन्त्रमदात्तपोनिधिः ॥
समन्त्रकं मैत्रिमथास्मरत्सती प्रशंसतः पत्युरथाज्ञया पृथा ।
तथा मुदाविर्भवता च तेन सा सरोजिनीवांशुमतान्वगृह्यत ॥
अथ पृथा प्रथिते दिने युधिष्ठिरं नाम तनयं विनयमिव विद्या प्रासूत। तदुदयदिने न केवलं दिश एव प्रसन्नतां दधुरपि तु पितृणां शुचोऽपि ॥

* * * *

**Colophon:**

इत्थं लक्ष्मणसूरिणा शनगरग्रामावतंसायित-
श्रीगङ्गाधरधीरसिन्धुविधुना गङ्गाम्बिकासूनुना ।
श्राव्ये भारतचम्पुकाव्यतिलके भव्ये प्रणीते महत्-
याश्वासः प्रथमोऽगमत्सुमनसामानन्दसन्दोहनः ॥

**End:**

नीतिशालिनममुं सिषेविरे नित्यमञ्जलिभृतो नृपात्मजाः ।
प्रातरुन्नमितकुड्मलान्तरा भानुमन्तमिव पङ्कजाकराः ॥
विख्यातैश्चतुरन्तराजविजयोद्यमस्वरो विक्रमै-
रन्वीतस्स(द्द)जैरवाप्ततनुभिस्सामाद्युपायैरिव ।
पाञ्चालीमुपलालयन्नभिमतैर्भोगैः प्रजाः प्रीणयन्
राज्यं पालयति स्म धर्मतनयो राजन्यचूडामणिः ॥

**Colophon:**

इत्थं लक्ष्मणसूरिणा शनगरग्रामावतंसायित-
श्रीगङ्गाधरधीरसिन्धुविधुना गङ्गाम्बिकासूरि(नु)ना ।
श्राव्ये भारतचम्पुकाव्यतिलके भव्ये प्रणीते महत्-
याश्वासोऽभिनवार्थशब्दघटनासार्थश्चतुर्थोऽगमत् ।

---

No. **12333.** भैष्मीपरिणयचम्पुः.

BHAIṢMĪPARIṆAYACAMPUḤ.

Pages, 28. Lines, 9 on a page.

Begins on fol. 14*a* of the MS. described under **No. 11864.** Incomplete.

This work deals with the marriage of Rukmiṇī with Lord Kṛṣṇa. By Ratnakhēṭa Śrīnivāsamakhin, son of Lakṣmīdhara of Viśvāmitra-gōtra, who bore the title of Dantidyōtidivapradipa, Ṣaḍbhāṣācatura and Advaitavidyāguru. The author may be the same as the father of Rājacūḍāmaṇidīkṣita, the famous commentator of the Śāstradīpikā (vide R. No. 1469(*b*) of the Triennial Catalogue of MSS., Vol. II, Part I-C).

**Beginning:**

आलम्बे जगदालम्बं लम्बोदरपदाम्बुजम् ।
शुष्यन्ति यद्रजस्स्पर्शात्सद्यः प्रत्यूहवार्धयः ॥
यस्योपवीतिगुण एव फणाभृदेकः वक्षोरुहः कुचपटीयति वामभागे ।
तस्मै ममास्तु नमसामवसानसीम्ने चन्द्रार्धमौलिशिरसे महसे नमस्या ॥

* * * *

ध्वन्यध्वन्यधिकं चमत्कृतियुता यस्याद्भुताः सूक्तयः
सारस्येन सुधां सुधां विदधिरे तां शर्करां शर्कराम् ।
सा विद्या प्रथमं यमद्भुतगुणं वव्रे स्वयं भारती
षड्भाषाचतुरश्चकास्ति भुवने विख्यातकीर्तिः कृती ॥
दन्तिद्योतिदिवाप्रदीपबिरुदो योऽद्वैतविद्यागुरुः
विश्वामित्रकुलाम्बुधेर्हिमकरो लक्ष्मीधरस्यात्मजः ।
स्वायत्तीकृतवेदतन्त्रनिचयो यः साग्निचिद्विश्वजि-
द्याजी तेन हि रत्नखेटमखिना सेयं कृतिस्तन्यते ॥

अस्ति खलु प्रशस्तशोभानन्दितजननयनतारका द्वारका नाम पुरी

* * * *

नीलाद्रिभिः परिवृतः पद्माढ्यः शङ्खभासुरः ।
सुखदः सर्वभूतानां मुकुन्दो यत्र राजते ॥

**End:**

किं च मन्मथाज्ञां लोके को वा व्यावर्तयितुं शक्तः । तथाहि—मृगा अपि सदारामानुषक्ताः पक्षिणोऽपि सुन्दरीसक्ता गजा अपि कान्तारागानुसारिणो भृङ्गा अपि लताङ्गीकृतप्रणयाः ।

---

## No. 12334. मद्रकन्यापरिणयचम्पुः, विषमपदटिप्पणीसहितः. MADRAKANYĀPARIṆAYACAMPUḤ WITH VIṢAMA-PADAṬIPPAṆĪ.

Substance, paper. Size, 11 × 8¾ inches. Pages, 129. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 61*a*. The other works herein are Śivacaritracampu 1*a*, Mahānāṭakasudhānidhi 126*a*.

Complete in four Ullāsas. The meaning of some of the difficult words in the work is given.

A Campukāvya describing the marriage between Lord Kṛṣṇa and Lakṣmaṇā, daughter of Bṛhatsēna, King of Madra: by Gaṅgādharakavi, son of Dattātrēya of Udaya (?) family.

**Beginning:**

कल्याणमव्याहतमातनोतु सव्यानलीलारुदमुद्रजास्यः ।
कर्णानिलेनापस्रुतेऽशुकान्ते यो वल्लभायाः स्मितपल्लवेन ॥
गण्डोड्डीनमदालिनादलहरीशालीनहृद्वल्लभा-
गाढाश्लेषनिरूढसंमदझरीपोक्ष्यमानान्तरः ।
वाणीमैक्षवमाधुरीमदहरामुद्दामशब्दोल्वणा-
माकण्ठंद्विरदो निरन्तरयतु श्रीकण्ठपाणिन्धयः ॥

* * * *

शस्ता निस्तुलगोस्तनीस्तबकसन्माधुर्यलुण्टाकिनी
यत्सारस्वतवैखरी जितसुरस्रोतस्विनीचातुरी ।
मत्वा सात्पदीनमामक(र)गुरोर्धीरीहते यस्य तं
दत्तात्रेयगुरुं नमामि करुणाकल्लोलिनीवल्लभम् ॥

* * * *

आसीदशेषविनुता द्वारवती नाम भूषणं क्षोण्याः ।
नैलिम्पलोकरीढा चतुरिमसौभाग्यपेशला नगरी ॥
पुंसो विलाससदनं परमस्यासीज्जगन्निवासस्य ।
तद्वर्णनाप्रसक्तौ कस्य कवेर्वा प्रगल्भते वाणी ॥

* * * *

**Colophon:**

इति श्रीमदुदयकुलकलशजलनिधिचन्द्रमसः पण्डितमण्डलीमान्यस्य दत्तात्रेयविपश्चितः सुगृहीतनाम्नः तनयेन गङ्गाधरकविना विरचिते मद्रकन्यापरिणये प्रथमरसोल्लासे पूर्णः प्रथमोल्लासः ।

* * * *

अशेषजनतानन्दसन्दोहस्यन्दिकामिमाम् ।
वाचमङ्कुरयामास नारदो वाग्विशारदः ॥
श्रीमान् बृहत्सेन इति प्रतीतः मद्राधिपूर्मद्रगुणैकतानः ।
आस्ते किलाखिलदिग्वधूटीशाटीभवत्कीर्तिरुदारचेताः ॥

* * * *

हैमवतीवाचलसार्वभौमस्य वैदेहीव विदेहवसुमतीजनपतेः शकुन्तलेव गाधिनन्दनस्य कादम्बरीव गान्धर्वचराकमितुः चित्रसेनस्य शमनस्वसेव कलिन्दभूधरस्य समजनिष्ट कन्यका ।

* * * *

सा लक्ष्मणा हि पुरुषोत्तमनित्यसक्ता सह्नाहिनीशतनया शतपत्रपाणिः ।
शुद्धान्तमर्हति तवेति निगद्य कृष्णमापृच्छ्य मौनिरथ धाम जगाम नैजम् ॥

**End:**

इत्थं निगद्य कृशपाण्डरगात्रयष्टिरानम्रखिन्नवदना तरुणी तवेयम् ।
नोवाच किंचिदथ गद्गदिकागृहीतकण्ठी रमेश रमयाद्युतरं वराकीम् ॥
एवं गोपनितम्बिनीशतसमादिष्टं निलिम्पाशनो-
त्कर्षस्वादिमनास्तिकं जनमनोमोदावहं बर्हिणा ।
भावप्रौढिविभावितं निगदितं नात्मानमस्मार्षिषं
शृण्वन् सम्प्रति बुद्धतावकदशः प्रत्यागमं द्रागथ ॥
शुकनिगदितवाचं राजकन्या निशम्य स्वपुटितहृदया सा मोदखेदादिभावैः ।
करनिहितकपोला प्रांशुनिश्वासधारोद्गमनचलदुरोजा नैव किंचिज्जगाद ॥
मद्रेशानः स्वकन्यां तरुणवरकरामृश्यतारुण्यधन्या-
मुद्वाहोत्सिद्रभद्रां रचयितुमधिकं संभ्रमं संश्रयानः ।
नानादेशाधिनाथानयनपटुमतीन् प्रेषयन् मन्त्रिवर्यान्
तत्संभारैकसम्पादनकृतमहितासक्तिरासीन्महौजाः ॥

**Colophon:**

इति श्रीमदुदयकुलकलशजलनिधिचन्द्रमसः पण्डितमण्डलीमान्यस्य दत्तात्रेयविपश्चितः सुगृहीतनाम्नस्तनयेन गङ्गाधरकविना विरचिते मद्रकन्यापरिणये प्रथमरसोल्लासे पूर्णस्तुरीयोल्लासः ॥

---

No. **12335.** मानवेदचम्पुभारतम्.

MĀNAVĒDACAMPUBHĀRATAM.

Substance, paper. Size, 11 × 8¼ inches. Pages, 213. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains Stabakas 6 to 12 complete.

Same work as that described under R. No. 1851 of the Triennial Catalogue, Vol. II, Part I-C, wherein the last two stanzas in the extracts are wrongly attributed to the scribe. By Mānavēdarāja.

No. 12336. मार्गसहायचम्पूः.
MĀRGASAHĀYACAMPUḤ.

Substance, paper. Size, 11 × 8½ inches. Pages, 239. Lines, 20 in a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Complete in six Āśvāsas.

A Campukāvya describing the holiness of the Śaiva shrine dedicated to the worship of Mārgasahāyadēva at Viriñcipuram, a village near Vellore in the North Arcot district. The author is the son of Vēdapuriśvaradhvarin of Vādhulagōtra.

**Beginning:**

कटस्थलोन्मीलितदानवारये कटाक्षसंरक्षितदानवारये ।
करोमि कंसाहितमातुलाय ते नमस्कृतिं येन रमातुलायते ॥
अङ्के शङ्करवल्लभस्य पृथुको निःशङ्कमासेदिवा-
नूर्ध्वीभावितपुष्करो विजयते विघ्नेश्वरो लीलया ।
मौलौ तिष्ठति जाह्नवी कथमियं मन्मातुरुच्छ्रायिणी
तामुर्व्यामधुनेति रोषपरुषस्सम्पातविघ्यन्निव ॥
शुभाय भूयादिति वाचमादावुदीर्य कुर्वाश्चरितं ममेति ।
योऽन्वग्रहीत्स्वमगतः स साक्षात् शुभाय भूयात्सरणीसहायः ॥
अस्तु नः सम्पदे वस्तु निस्तुलाये निरञ्जनम् ।
यस्य मायाविलासेन प्रपञ्चोऽयं प्रपञ्चितः ॥
बालोऽप्यहं सूक्तिनिबन्धने स्यामालोकनात्सत्कविरम्भिकायाः ।
शिलापि मुञ्चेन्न किमम्बुधारां कलानिधेः कान्तिलवावमर्शात् ॥
वाणीवेणीसुरभिसुमनस्स्यन्दिमाध्वीकधारा-
कुल्यातुल्यां मधुरभणितिं मामकीनां नवीनाम् ।
श्रुत्वा श्रुत्वा मुदितहृदयो मौलिकम्पं न धत्ते
को वा भावान् सरसकविताबारिधेश्चेदची(चेती)त् ॥

तथाहि—

महाकवीनां महिमा न मूढैर्विज्ञायते किन्तु महद्भिरेव ।
अगाधतामम्बुनिधेर्न नौका मूलं गतो मन्दर एव वेत्ति ॥
श्राव्यं रसज्ञैः सरसार्थकाव्यं पठेदुपश्लोकयतां पुरस्तात् ।
करेण वीणामवलम्ब्य गानं कुर्वीत कः कासरकर्णजाहे ॥

प्राचां कवीनां सति च प्रबन्धे वाचामु मे प्रीतिमयन्ति सन्तः ।
दृष्टासु पूर्वं विहितश्रमाणां मुग्धासु किन्नैव भवेत्प्रमोदः ॥
सूक्तिः कदर्यैर्मम दूषितापि कीर्तिं भजन्ते(जेत) स्वयमेव लोके ।
इन्दिन्दिरैः केवलदूषितापि किं निन्द्यते चम्पकपुष्पमाला ॥
सद्भः सतां मद्गिरमातनोतु सङ्घर्षणात्केवलमेव लक्ष्मीम् ।
तथापि सा सौरभशालिनी स्यात् तथाविधा गन्धशलाकिकेव ॥
व्याधूतपाप्मा पुरि पद्मयोनेः वाधूलवंशार्णवपूर्णचन्द्रः ।
अप्राकृतो वेदपुरीशयज्वा विप्रावतंसः स्वयमाविरासीत् ॥
उद्दण्डो दण्डनीत्यामपि फणिभणितौ चण्डकण्डूतिजिह्वः
प्रह्वः प्रौढः प्रकाण्डप्रबलमतितमस्स्तोमनिस्तोमसोमः (?) ।
स्वातन्त्र्यं सर्वतन्त्रेऽप्यधिकमधिगतो वेदवेदान्तनिष्ठः
किञ्च प्रागल्भ्यलभ्यं भवति भुवि यशो यत्कृपोपज्ञमेव ॥
तन्तन्यमानेन तपश्चिराय निष्ठा वसिष्ठस्य कृता बहिष्ठा ।
पुण्यैरगण्यैस्सुलभेतरोऽपि साक्षात्कृतो येन शशाङ्कमौलिः ॥
पाथोरुहप्रबलसौरभभारधुर्यैः साधोरमुष्य विदुषः कविताविशेषैः ।
आधोरणात्तसृणिभिः कविकुञ्जराणां वेधोवधूरकृत मौलिविधूननानि ॥
तनयस्तस्य सम्पन्नविनयः शङ्कराज्ञया ।
विरिञ्चिपुरनाथस्य चरितं कुरुते कृतिम् ॥
यल्लाभविशदा वाणी मूकानामपि जृम्भते ।
वीटीं तामदिशद्गौरी चेटीकृतसरस्वती ॥

अथ कदाचिदखिलजननयनानन्दसन्दोहसुलभनैपुण्ये पुण्येतरपुरुषागण्ये नैमिशारण्ये निखिलमुनिजनवरिष्ठमात्मनिष्ठं भगवन्तं वसिष्ठमन्तेवसन्तः तपस्यन्तः सर्वेऽपि मुनयो विनयोज्ज्वला एवमप्राक्षुः ।

**End:**

एवं प्रभावपरिपाटिकया प्रपन्ने प्राथन्विरिञ्चिपुरमार्गसहायदेवः ।
अत्यद्भुतानि चरितान्यवनौ वितन्वन् नित्यं तरङ्गयति मङ्गलमङ्गभाजाम् ॥

**Colophon:**

इति विरिञ्चिपुरनाथचरिते षष्ठाश्वासः ॥

वेदान्तार्थविनिर्णयैकनिपुणो वाधूलवंशोद्भवः
श्रीमद्वेदपुरीश्वराध्वरिवरो यं पुत्रमाप्तः शिवात् ।

. . . . . . . सोऽयं प्रसादाद्विभोः
श्रीमन्मार्गसहायचम्पुमकरोदाश्वासषट्कान्वितम् ॥

---

## No. 12337. मीनाक्षीकल्याणचम्पुः.
## MĪNĀKṢĪKALYĀṆACAMPUḤ.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 72. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Breaks off in the second Āśvāsa.

This work treats of the marriage of Mīnākṣi, the daughter of Kulaśēkhara or Malayadhvaja, the first known king of the Pāṇḍya country, with God Śiva. Kulaśēkhara at first reigned in Kalyāṇapuri which was the ancient capital of the country. God Śiva appeared to him in his dream and told him that the God was staying in a temple which was situated in a wilderness to the west of the city and that he should make that place as his capital and worship the God. The king carried out the command of the God; and the new place became his capital and was named Madura. The whole story of the poem was taken from the Hālāsyamāhātmya. The author was called Kandukūri Nāganātha and appears to have been a Telugu Brahman.

**Beginning:**

यत्कटाक्षोपविक्षिप्तनिरूढनिजसम्पदः ।
प्रत्यूहा विनिवर्तन्ते कलये तं विनायकम् ॥
यत्पादाम्भोजसेवाद्यैरयत्नागतसम्पदः ।
ब्रह्मादयः सुमीनाक्ष्याः तद्वन्दे पादपङ्कजम् ॥

स्वस्ति । अस्ति हि खलु सकलसद्गुणगणभूषणभूषितः चतुःषष्टिकलानिष्णातः पितृवत्प्रजापालनतत्परः सोमवंशजलधिसोमः सकलपरिपन्थिमकुटकोटिप्रभालङ्कृतचरणयुगलः चन्द्र इव प्रतिक्षणसंवर्धितकुवलयः कुलशेखरो नाम स्वकुलकुलशेखरः कल्याणपुरवासी पाण्ड्याधीशः । कदाचित्तस्य सोमसुन्देशः भोः कुलशेखरमहाराज कल्याणनाम्नः पुरादस्मात्पश्चिमभागे सिंहव्याघ्रमृगादिप्रचुरं विविधवृक्षषण्डोपेतं नानातीर्थसहितं कदम्बवननामकं महद्वनं दृश्यते खलु । तत्र चामरावतीनायकविरचितप्रासादे महाद्वारावती सहस्रसङ्ख्याककनकस्तम्भातिशयितमण्डपादिमहिते देवालयविमाने प्रतिष्ठितोऽहं वर्ते । तत्रैव चमम नदी-

यता महती वर्तते । ततस्तद्गत्वोत्पाट्य च वनं निर्माय च तत्र पुरमैन्द्रं प्रासादमभितो गोपुरमाकारमण्टपादीनि कारयेति स्वप्ने तस्य प्रसादमकरोत् ।

* * * *

अनन्तरमुदयद्यौवना सती सुमीननयना राजराजेश्वरी हे अम्ब स्वानुरूपः पतिः को वाद्य वर्तत इति साकं काञ्चनमालया जनन्या समालोच्यात्र स्थिताया मम स्वानुरूपः पतिः को वा प्रियतमो भविष्यतीति मनसि निधाय दिग्विजयमिषेण सर्वतस्संचरन्त्या मया स्वानुरूपसुन्दरतमो वरो लभ्यत इति निश्चित्य भूदिग्विजयाय प्रववृते मीनाक्षी ॥

**Colophon:**

इति श्रीकन्दुकूरिनागनाथसूरिविरचितमीनाक्षीकल्याणे प्रथमाश्वासः ॥

**End:**

भ्रातः पतिर्मे शिव एव नान्यः स्वसुस्तवावेक्ष्य मुदा समेत्य ।
निर्वर्तनीयः खलु मे विवाहः त्वयैव मां बन्धुमतीं विधेहि ॥

एवं मदुक्तिं सविनयं विज्ञाप्य नमस्कृत्य सपरिवारं सलोकपालं श्रीमन्नारायणमानयतेति प्रेषयामास । तेऽपि तदाज्ञां(शिर)सि वहन्तः समुद्रतटमासेदुः ।

* * * *

देवीमहिम्ना समागतवैहायसगत्या समुल्लङ्घ्य तदन्तर्वर्तिनं स्वकं परिभूतराकाशशाङ्ककिरणजालं स्वतो विशदरूपक्षीरोद्भवताद्विगुणकान्तिफेनराजिविराजमानं क्षीरपानपरिणतश्वेतकायकान्तिकान्तकच्छपशिशुमारग्राहगजतुरगनारीनरगणं क्षीरपानसेचनजनितक्षीरकान्तिमनोहरच्छविनरवरतरुवरनिकरालङ्कृतद्वीपं सावका.

---

## No. 12338. यतिराजविजयचम्पुः.

## YATIRĀJAVIJAYACAMPUḤ.

Substance, Śrītāla. Size, 9¼ × 2 inches. Pages, 122. Lines, 16 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains the Ullāsas 1 to 16 complete and the 17th incomplete.

A Campukāvya dealing with the leading incidents in the life of Yatirāja or Rāmānuja. A brief account of the Āḻvārs (saints) and Ācāryas (religious teachers) who lived before Rāmānuja is also given. By Ahōbalasūri, son of Vēṅkaṭācārya and Lakṣmāmbā and disciple of Rājagōpālamuni. The author is said to have belonged to the Tirumalai Ghanagiri (Muhilkoṇḍa) family and invokes the blessings of Vēdāntadēśika.

**Beginning :**

वन्दे जगत्कन्दलकन्दामिन्दुकुन्दाभमन्दस्मितमिन्दिरेशम् ।
वन्दारुमन्दारम . . . . . दैवतसार्वभौमम् ॥
प्रत्यग्रं सततानुभूतमपि यत्प्राचीनवाचां शिरः-
पालीष्वद्भुतधाम सर्वसुदृशां प्राणप्रियंभावुकम् ।
प्रत्युप्तं क्षितिभूसुवर्णलतिकामाल्योरसि श्रीपदं
प्रत्नं किञ्चन राजरत्नमतुलं प्रायस्तनोतु श्रियम् ॥
अकारि कस्मैचिदधर्मयोगाद्धिरण्यदानं हि पुरा मयेति ।
धर्मेण यः कर्बुरगोत्रदानं चक्रे बुधेभ्यश्शरणं स नोऽस्तु ॥
भिन्द्यादवन्ध्यमान्ध्यं मे मन्दमेधान्धकारजम् ।
गन्धर्वकन्धरं धाम शरत्कन्धरबान्धवम् ॥
व्यासोऽपि सर्वत्र नतावलीषु सद्यो यदालोकबलादुदारम् ।
दयारसं मुञ्चति नीलमेघः तामाश्रयेऽहं चपलाभिरामाम् ॥
चिरन्तवाचाचिकुरान्तरालं सिन्दूरितं यत्पदपद्मभासा ।
कल्लोलिनीवल्लभगर्भशुक्तिमुक्तामतल्ली मुदमातनोतु ॥
मामा जनैर्दुरितदूषितनीचभावं रामानुजो मुनिरसावुररीकरोतु ।
नामावधूतनतलोकसमस्तशोकस्थेमा रमापतिवितीर्णविभूतियुग्मः ॥
दद्याद्वेदशिखागुरोर्मम मतिं हृद्यानवद्या गल-
न्मृद्वीकारसधोरणी मधुलिहाहङ्काहुङ्कारकृत् ।
सन्ध्याकालनटीभवद्भवजटाजूटीकुटीरोदर-
स्वर्गङ्गाझरीपरीभवकरी गुर्वी गिरां वैखरी ॥
पूर्वाचार्यकथासुधाक्षरपदास्वा(द)प्रदानप्रथां
विज्ञप्तिं मम तत्पुषद्विषयिणीमङ्गीकुरुध्वं बुधाः ।
क्षीराम्भोनिधिशायितोऽपि भगवान् भक्त्या जनेनार्पितं
क्षीरं पत्रपुटीमितं न किमुपादत्ते दयालुर्हरिः ॥
आदौ सरश्शठरिपुप्रमुखावतारान् नाथार्ययामुनमुनिप्रवरप्रभावान् ।
रामानुजस्य चरितं निपुणं भणामि हृद्यैरवद्यविमुखैरथ गद्यपद्यैः ॥

अस्ति खलु चतुर्दशभुवनात्मकादण्डादुपरि परस्तात्तमसः कार्यजातमतीत्य शुद्धसत्त्वे सुखाकरे दिवाकरादिविरहेऽप्ययुतादित्यविद्योतिते

* * * *

ब्रह्मादिभिरपि दुरासदैः सदैकरूपैर्यानवरैरसह सर्वतः क्रीडता भगवदनुकूलैकभोगेन महात्मबृन्देन वन्दितं दिव्यावरणशतसहस्रालङ्कृतं वैकुण्ठनगरम् ।

* * * *

अयि प्राणवल्लभे, पुरा खलु निखिलनिर्जरदुर्जयदैत्यदानवसंमोहाय लीलाविभूतिविवृद्धये निबद्धमिदम् ।

* * * *

सकलबद्धसमुद्धरणाय कमप्युपायं निःश्रेयसदायकं निरपायमारचय्य परित्रातुमर्हसीति भुवनजननी परमपुरुषं प्रार्थयामास । प्रिये जगत्पालनलालसे ममापि परिखिद्यते चेतः । तदन्तरा भवत्यापि साधु समालोचितम् । तत्तदुचिताधिकारोपायमेव करिष्यामीति विहङ्गसैन्यपुङ्गवप्रमुखान् परिजनानाहूय भगवानिदमवादीत् । भो भोः सेनाधिनाथादयः पाषण्डकुदृष्टिजनसङ्कुलकलङ्कितान् देहात्मभ्रममोमुह्यमानानुज्जीवयितुं वसुन्धरायां सत्यव्रतक्षेत्रमल्लमैलापुरपुष्पप्रभृतिषु ताम्रपर्णीप्रमुखपुण्यतीर्थतटेषु तत्तद्वनेषु समुदीर्णा यूयं

* * * *

अथ कदाचित् द्वापरान्ते ह्याश्वयुजमासि श्रोणादिषु त्रिषु भेषु शुभेषु काञ्चीपुरसमुदञ्चितहेमाम्बुजाख्याविख्यातसरसीसरसीरुहात् पाञ्चजन्यांशेन सरो नाम ।

* * * *

**Colophon:**

इति श्रीशैलघनगिरिवंश्येन लक्ष्माम्बागर्भशुक्तिमुक्तामणिना वेङ्कटसुधीमणिसूनुना श्रीमद्राजगोपालमुनिवरप्रसादसमासादितवेदान्तविद्येनाहोबलसूरिणा विरचिते यतिराजचरित्रे चम्पुप्रबन्धे प्रथमोल्लासः ॥

**End:**

विष्णोर्दिव्यनिकेतनेषु भगवद्भक्तिस्फुरशामालये-
ष्वश्रान्तं निगमान्तमी(मो)दनवतां वाचां मुखेषु स्थितः ।
नित्यं मङ्गलमस्तु ते जय जयेत्याराधितो भक्तितः
श्रीमानस्तु समस्तचिन्तितमनःकामाय रामानुजः ॥

**Colophon:**

इति अहोबलसूरिणा विरचिते यतिराजचरित्रे चम्पुप्रबन्धे षोडशोल्लासः ॥

अथ कदाचित् निशायां व्यतीतायां रङ्गनाथप्रबोधनविषयविरचितपद्यपठनरवमुखरहरिन्मुखेषु वैतालिकेषु गोपुरकवाटविघटनघलघलात्कृतबधिरेषु सकलजनमन्दिरेषु पात्रावशेषितफलपायसभक्षणदक्षेषु पञ्जरपक्षिषु

* * * *

पश्यन्नताशीततया तरङ्गैस्तुङ्गै . . . . . . . ।
. . . श्रीरकञ्जोपलकान्तिपुञ्जैरारञ्जिताङ्गिस्स हरिर्विरेजे ॥
तत्र सन्निकर्षे गिरिजाधिराजे.

---

No. 12339. राजसूयप्रबन्धः.

RĀJASŪYAPRABANDHAH.

Pages, 47. Lines, 18 on a page.

Begins on fol. 1a of the MS. described under No. 12316.

Complete.

A work describing in verse and prose the sacrifice called Rājasūya said to have been performed by Dharmaputra in the Mahābhārata: by Nārāyaṇa.

**Beginning:**

गोविन्दमानन्दरसैकसान्द्रमावन्द्य नारायणभूसुरेन्द्रः ।
निर्माति धर्मात्मजराजसूयसम्पन्मयं सम्प्रति चम्पुकाव्यम् ॥
कामं भीमार्जुनाद्यैरजितपृथुमहोवर्षितैरुद्धतानां
पृथ्वीशानां जयेन प्रसभमुपहृते निस्तुले वित्तराशौ ।
तद्वृत्तं धर्मसूनुस्सपदि परममित्राय भर्त्रे यदूना-
मावेद्य व्यासमुख्यैस्सममभृत परद्रव्यवद् द्रव्यभारम् ॥

भगवानपि भुवनानुग्रहैकदीक्षितस्सततं वीक्षितनिखिलवृत्तान्तोऽपि तदुदन्तनिशमनानन्तरमेव निखिलात्मकस्य स्वस्यैव वरिवस्याहेतोः . . . . . . . . . कुशस्थलीपुरस्थलादभिप्रस्थाय इन्द्रप्रस्थनगरीमभूतपूर्वपरमाडम्बरोचितवादित्रादिघोषसम्पदाकम्पितभुवनावकाशस्समाससाद ।

**End:**

एवं निस्सीमहृष्यन्मुनिसुरमनुजाशीभिरुद्घोषिताशं
(स्व)स्थानप्रत्तपुष्यद्धनगृहनगरक्षेत्रपात्रादिभारम् ।
स्वर्णापूर्णावकीर्णव्रजदुरुजनताकाञ्चनीभूतविश्वं
चित्रं निर्वर्त्य तत्र क्रतुवरमतुलं धर्मराजो विरेजे ॥
एतावन्मत्कृपायाः खलु विलसितमित्युच्चकैर्दर्शयित्वा
विश्वानन्दाभिवर्षी पुनरपि वसतिं प्रार्थ्यमानोऽपि पार्थैः ।

देवाद् भाविन्यवस्था मयि सविधगते मास्त्वितीवात्तचेताः
चैद्यारिस्सौधरुद्धां सपदि निजपुरीमध्यगीद्विश्वसाक्षी ॥

**Colophon:**

समाप्तमिदम् ॥

---

## No. 12340. रामानुजचम्पुः.
## RĀMĀNUJACAMPUḤ.

Substance, paper. Size, 11 × 8¾ inches. Pages, 291. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains Stabakas one to ten only.

A Campukāvya dealing with the life of Rāmānuja: by Rāmānujadāsa, son of Bhāvanācārya and disciple of his uncle Rāmānujadēśika. The author studied the Divyaprabandha under Vēṅkaṭārya and grammar under his sister's husband Yajñanārāyaṇa. The genealogy of the author is given thus in the work:

Raṅgarāja
(a descendant of Dāśarathi or Mudaliyāṇḍān and said to have been respected by Kṛṣṇarāya of Vijayanagar)
|
Ghanavaradaguru
|
Rāmānujārya
(lived in Vīkṣāraṇya or Tiruvellore)
|
Varadaguru — Śaraṇāgamācārya
|
Rāmānujadēśika (one of the author's teachers) — Vīrarāghava — Śrīrāmārya — Bhāvanārya
|
Rāmānujadāsa (author of the work)

Rāmānujadēśika, the author's uncle and teacher, is said to have composed the Kalyāṇavallikalyāṇa and the Vēdapādarāmāyaṇa and many other works. Vēṅkaṭarāya, another teacher of the author, is said to have presented a golden horse to God Varadarāja at Conjeeveram and a palanquin to the God at Indupuri (Hindupur?).

**Beginning:**

श्रीरङ्गक्ष्मामृगाक्षीमृगमदमकरी सद्मजेन्दीवरालिः
शेषश्वेताद्रिभृङ्गावलिरखिलजगन्मौलिनीलाश्मपालिः ।

लक्ष्मीवीक्षाप्रणालीनिरवधिकरुणाम्भोधिकल्लोलकेली-
मुद्रा मुद्राशिमाद्या घटयतु सततं कैटभद्वेषिणी नः ॥
आम्नायोत्तंसभूषायितहरिमणिभूत्लेटिकाहाटकाङ्गं
श्रीरङ्गाख्यं विमानं फणिरमणवपुस्तूलजालाभिरामम् ।
तुङ्गैश्शृङ्गैश्चतुर्भिर्मणिमयमकुटैः कीलितं वेदरूपैः
कावेरीतीरभाजां सुकृतपरिणते सैकते चाकशीति ॥

* * * *

जीयाद्वाधूलवंशो दिशि दिशि विलसत्पत्रजातो घनश्रीः
युक्तश्शुद्धस्वभावैर्गुरुमणिनिकरैस्साधुवृत्तैर्महार्घैः ।
सन्मार्गोच्छ्रायशाली द्विजवरपटलैस्सादरं सेव्यमानो
धार्यस्सम्यक्क्षमाभृत्परिवृढशिरसा बिभ्रदुत्तुङ्गभावम् ॥
आद्यस्तद्वंश्यमुक्तामणिरनघगुणस्सार्वभौमो गुरूणां
मीमांसातर्कशब्दश्रुतिशिखरलतोपघ्नसन्तानशाखी ।
आज्ञां मालामिवाग्र्यां शिरसि यतिपतेर्धारयन् भागिनेयः
श्रीरङ्गैश्वर्यधुर्यो जयति कुलपतिर्दाशरथ्यार्यनामा ॥
जयत्येष श्रीमान्दशरथतनूजाह्वयधरो
गुरूणां सर्वेषां गुरुतरशिरोभूषणमणिः ।
यदाख्यां बिभ्राणा यदुपतिपदत्राणयुगली-
शिरोभूषाभावं भवति सकलानां तनुभृताम् ॥
प्रौढश्रीरङ्गभूमीपरिवृढकनकव्रह्मसूत्रावतारः
ख्यातः श्रीकृष्णरायप्रमुखधृतशिबिकारोहणोद्वेलकीर्तिः ।
व्यालक्ष्वेलोग्ररक्षक्षपणनिपुणपद्पद्मतीर्थप्रभावः
श्रीरङ्गार्यस्समिन्द्धां मदकराटिमहाव्याघ्रसंसेविताङ्घ्रिः ॥
अस्मत्कूटस्थमीडीमहि महितकृपं विश्रुताश्चर्यचर्यं
गाम्भीर्यौदार्यधैर्यप्रमुखशुभगुणश्रेणिमाणिक्यवार्धिम् ।
गर्भश्रीमन्तमन्तेवसदधिपकिरीटांशुकिम्मीरिताङ्घ्रिं
किंधामस्थेमभाजं घनवरदगुरुं रङ्गसूरेस्तनूजम् ॥
आन्वीक्षिक्यां प्रचण्डः फणिरमणवचोव्याक्रियाचक्रवर्ती
मीमांसासार्वभौमः श्रुतिशिखरपरिष्कारहीरायितोक्तिः ।

साक्षाद्रामानुजार्योऽपर इव विमताटोपधिक्कारधीरः
श्रीमान् रामानुजार्यो घनवरदगुरोरात्मजस्सन्निधत्ताम् ॥
वीक्षारण्यक्षमायां विरचितवसतिर्वीररामोत्सवाय
प्राप्तानां देशिकानां निगमयुगलवागर्थसन्देहभेत्ता ।
श्रीरङ्गाचार्यसूनोर्घनवरदगुरोरात्मजाल्लक्ष्मणार्या-
ज्जातः पार्थः प्रसन्नो मम वरदगुरुर्वर्धतामृद्धकीर्तिः ॥
अमुष्य सहजो जगत्प्रथितकल्पनापण्डितः
समस्तविबुधेडितश्शरणमातृनामा गुरुः ।
पितामह इवापरो मम पितामहो मे मुखे
हृदम्बुरुहमाश्रयन् प्रथयतु प्रियां भारतीम् ॥
चतुर्णां वेदानां परिणतिविशेषाश्चतसृणां
कलानामाकारा इव च लसमानाश्शुभगुणाः ।
तनूजाश्चत्वारो रघुकुलकुमारक्रमभृतो
बभूवुर्वाधूलप्रवरशरणाम्बाह्वयगुरोः ॥
श्रीवत्साङ्कार्यकल्पः श्रुतिशिखरयुगाकल्पशिल्पोज्ज्वलोक्तिः
कल्पान्तस्थायिकीर्तिर्निरुपमकविताकल्पनाकल्पशाखी ।
आचार्यो ज्येष्ठतातो मम सकलविधो बान्धवो लोकबन्धुः
कारुण्यक्षीरसिन्धुः शुभगुणमणिभिर्बन्धुरो भासतां मे ॥
तस्योदर्यः प्रसिद्धः प्रतिकथकघटाटोपगाढान्धकार-
प्राग्भारन्यक्क्रियोद्यत्तरणिसरणिभृद्वेदभाष्यार्थवेदी ।
श्रीभाष्यव्याक्रियायां वरदगुरुसमो राघवो वीरपूर्वो
वाग्धाटीपाटवं मे घटयतु कृपया हेमवल्लीशभक्तः ॥
तस्यागर्भ्याभिरामश्रुतिधवलगरुत्पुण्डरीकायितास्यः
श्रीमद्रामायणार्थप्रवचनचतुरः तन्मुखाद्देशिको मे ।
रङ्गेन्दोर्वेदपारायणकरणचणो भाष्यपाठी पटीयान्
श्रीरामार्यः प्रहृष्टः प्रणयजलनिधिः पालयेन्मां कृपालुः ॥
शब्दब्रह्मामृताम्भोनिधिलहरिपरीवाहपर्यायसूक्तिः
वेदान्तद्वन्द्वचिन्तापटुतरधिषणस्सर्वशास्त्रप्रवीणः ।

ब्रह्मर्षिर्भावनार्यो निरुपमचरितस्तत्सगर्भो गरीयान्
पायान्मचातपादः कमलभवनिभो वत्सलो मामपायात् ॥
श्रीमद्वेतण्डभूभृत्परिवृढकनकोत्तुङ्गघोटप्रदाता
वेघोजेतेन्दुपुर्यालयविभुशिबिकादानलब्धेन्दुकीर्तिः ।
लोकाचार्यप्रतिष्ठाकरणविभवभृत्तत्समो वेङ्कटार्यो
वाधूलाग्र्यः प्रसन्नो जयतु मम गुरुर्द्राविडाम्नायदाता ॥
यः पातञ्जलसूक्तिजालजलधेर्नेता महानाविको
यः ख्यातो हरिवासरव्रतपरो ब्रह्मर्षिचर्यानिधिः ।
यो मे कल्पयति स्म वत्सलतया शब्दागमे पाण्डिती
जीयान्मामकसोदरीपतिरयं श्रीयज्ञनारायणः ॥
श्रीभाष्यादि विधाय तर्कगहनं तद्भावमुद्भावयन्
भूयो भूमितले कृतावतरणः श्रीशुद्धसत्त्वाद्गुरोः ।
श्रीमान् लक्ष्मणदेशिको विजयतां यद्दीक्षया रंहसा
जिह्वारङ्गतटीमटीकत चतुश्शास्त्रीनटी मामिकाम् ॥
अवष्टभ्य प्रज्ञानिकषदृषदं सोपनिषदं
दृढामेनां नावं गुरुपरिषदं सद्गुणवतीम् ।
प्रवृत्तोऽहं लब्धुं परमपुरुषानुग्रहमयं
महार्घं माणिक्यं यतिपतिचरित्राब्धिजठरे ॥
श्रीरामानुजदेशिकाद्विशरणस्तन्नामभूपोज्वल-
स्तत्सागर्भ्यविभूषणेद्धविततश्रीभावनार्यात्मजः ।
श्रीरामानुजयोगिपुङ्गवमतोद्धारप्रियंभावुक-
स्तच्चारित्रपवित्रचम्पुरचनाकौतूहली सम्प्रति ॥

* * * *

अस्ति किल . . . . . . . . . अनवरतपठ्यमानब्रह्मघोषारभटीविदीर्य-
माणदिग्वप्राणां वसिष्ठादिब्रह्मर्षिनिष्ठाधरीकरणगरिष्ठश्रेष्ठाचारानुमानविदीभाणां

* * * *

भक्तानुरागवता भगवता शिरोभूषणवती धरणीरमणीशिरोमणिरीतिमती श्रीमती
महाभूतपुरी नाम नगरी ।

* * * *

श्रीकेशवाङ्घ्रिसरसीरुहचञ्चरीकस्तन्नामधेयवररत्नकिरीटधारी ।
धन्याग्रणीर्धरणिभृन्मणिमौलिसेव्यस्तां यायजूकतिलकः पुरमध्यवात्सीत् ॥

* * * *

श्रीमद्भूतपुरीशिरोमणिरिलागीर्वाणचूडामणिः
श्रीहारीतकुलाब्धिकौस्तुभमणिः श्रीकेशवार्याग्रणीः ।
श्रीमत्कैरविणीधुरीणचरणाम्भोज(त)पूतात्मना
निर्मायाखिलकर्म काञ्चिदकरोदिष्टिं च पुत्रेच्छया ॥

* * * *

**Colophon:**

इति श्रीवाधूलकुलकलशजलनिधिकौस्तुभोभयवेदान्ताचार्यसाम्राज्यपट्टाभिषिक्तकल्याणवल्लीकल्याणवेदपादरामायणाद्यनेकप्रबन्धनिर्माणधुरीणश्रीमद्रामानुजदेशिकसार्वभौमचरणारविन्दचञ्चरीकेण तत्कृपालब्धसकलविद्यावैशद्येन तत्सागर्भ्यविभूषणब्रह्मर्षिवर्यभावनाचार्यविबुधवर्यतनूभवेन रामानुजदासेन विरचिते श्रीरामानुजचम्पुप्रबन्धे अवतारोपोद्घातो नाम प्रथमस्तबकः ॥

आरूढोऽथ कृपामयीं दृढतरां नावं स नारायणः
संसारार्णवमग्नचेतनवपुश्शुक्तिस्थमुक्तामणीन् ।
आदातुं कुतुकेन नाविक इव श्रीकेशवार्याध्वरी
प्रेयस्या जठरं निनाय पिठरं भोगीन्द्रमुख्यद्गुणम् ॥

* * * *

दिक् प्राचीव पयोजिनीपरिवृढं तेजोनिधिं राघवं
कौसल्येव गुणाकरं भवभिदं कृष्णं यथा देवकी ।
भूदेवी जनयाम्बभूव तनयं भेत्तुं तमोमण्डलं
धर्मं धारयितुं नराहितमपाकर्तुं च पृथ्वीतले ॥

**End:**

कदाचित् किमिकण्ठजनिष्यमाणव्यथाव्याजेन प्रतीचीं ककुभमभिप्रतिष्ठासमानो यादवाचलशिखरालङ्कारमणिं श्रीनारायणं डिल्लीवासप्रियरामप्रियसमानयनतन्तन्यमानोत्सवपरम्परया पूजयन् द्विपञ्चाशन्नामधेयान् स्वान्तेवासिनस्तदन्तेवासिनो वितन्वानस्तदनुज्ञया श्रीरङ्गराजधानीमभ्येत्य, श्रीरङ्गनाथं प्रणम्य, श्रीमहापूर्णतनयं समधिगतविनयं पुण्डरीकाक्षनामधेयं समाश्वास्य, कूरनाथमालिङ्ग्य, श्रीवरदराजस्तवमहिम्ना तमेनमपाङ्गवीक्षणसनाथमारचय्य, श्रीशैलपूर्णश्रीमहापूर्णा-

दिस्वाचार्यतनूभवान् शङ्खचक्राङ्कनपूर्वकमधिगतदर्शनरहस्यान् वितन्वन् साधुजनमान्यः श्रीरङ्गराजधान्यामेव सुखमुवास ॥

श्रीमान् रामानुजार्यः श्रितनिवहपरित्राणचातुर्यधुर्यः
प्रालेयाहार्यधैर्यः प्रतिकथकगणस्थैर्यविध्वंसिचर्यः ।
मर्यादोपेतचर्यामुदितहृदयसद्दर्यसूक्तसपर्य-
श्शेषस्साक्षादुदीतो जगति विजयतां केशवाचार्यसूनुः ॥

**Colophon:**

इति श्रीवाधूलकुलकलशजलनिधिकौस्तुभोभयवेदान्ताचार्यसाम्राज्यपट्टाभिषिक्तकल्याणवल्लीकल्याणवेदपादरामायणाद्यनेकप्रबन्धनिर्माणधुरीण श्रीमद्रामानुजदेशिकसार्वभौमचरणारविन्दचञ्चरीकेण तत्कृपालब्धसकलविद्यावैशद्येन तत्सागर्भ्यविभूषणब्रह्मर्षिभावनाचार्यविबुधवर्यतनूभवेन रामानुजदासेन विरचिते श्रीरामानुजचम्पूप्रबन्धे दशमस्तबकः ॥

---

## No. 12341. रामानुजचम्पुः.
## RĀMĀNUJACAMPUḤ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 130. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains two to seven Stabakas complete.

Same work as the above.

The name of the former owner of the MS. is given in the first leaf as Bālaśayana (Iḷampalli) Dīvapradīpa Vēṅkaṭadāsa, who adds—

शाण्डिल्यवंशजातेन वेङ्कटेशेन कृच्छ्रतः ।
श्रीरामानुजचम्प्वाख्यग्रन्थोऽयं लिखितोऽधुना ॥

---

## No. 12342. रामानुजचम्पुः.
## RĀMĀNUJACAMPUḤ.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 72. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains one to four Stabakas complete and the fifth incomplete.

Same work as the above.

The former owner of the MS. is stated to be one Vēṅkaṭācāryar.

### No. 12343. रामाभिषेकचम्पुः.
### RĀMĀBHIṢĒKACAMPUḤ.

Substance, palm-leaf. Size, 17⅜ × 1½ inches. Pages, 80. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1a. The other work herein is Arthapañcakanāṭaka 41a.

Contains from the Ayōdhyākāṇḍa (without beginning) to the Yuddhakāṇḍa (without end).

Same work as that described under R. No. 1516(a) of the Triennial Catalogue of MSS., Vol. II, Part I-C.

By Dēvarājabhaṭṭa, son of Padmanābhabhaṭṭa.

---

### No. 12344. रामाभिषेकचम्पुः.
### RĀMĀBHIṢĒKACAMPUḤ.

Substance, paper. Size, 8⅝ × 5⅜ inches. Pages, 360. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Restored from the MS. described under the previous number in 1902–1903.

Same work as the above.

---

### No. 12345. वरदाभ्युदयचम्पुः.
### VARADĀBHYUDAYACAMPUḤ.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 78. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, new.

Begins on fol. 1a. The other work herein is Nārāyaṇaviṁśatistōtra 40a.

Complete in five Vilāsas.

A Campukāvya describing the greatness and religious importance of the sacred shrine at Hastigiri and of the origin of God Varadarāja. It is also called Hastigiricampu. By Vēṅkaṭādhvarin, son of Sītāmbā and Raghunātha and grandson of Śrīnivāsārya who was the nephew of Tātācārya. The author is the same as that of the Viśvaguṇādarśa. He mentions two predecessors in his family, viz., Praṇatārtihṛdguru, a disciple of Rāmānuja, and Vādihaṁsāmbuda, a preceptor of Vēdāntadēśika.

The former owner of the MS. is mentioned in the first leaf as Bangalore Vēṅkaṭanarasiṁhācār.

**Beginning**:

कल्याणैकनिकेतनं तदनघं कालाम्बुदश्यामलं
चित्ते नृत्यतु शेषभूधरशिरोरत्नं चिरन्नं महः ।
यस्योरस्यनिशं सुता जलनिधेर्यस्यास्ति तन्मेखला
पार्श्वे यस्य पदे च तत्प्रियतमा यत्तत्र शेते स्वयम् ॥
वेतण्डाचलमण्डनस्य कमलानाथस्य वेधस्सव-
स्निग्धस्वादुवपाविपाकरसिकं बिम्बाधरं भावये ।
संभोगेष्वनुभूय यन्मधु वधूरम्भोनिधेर्जृम्भिता
सोदर्येऽप्यमृते कदापि तनुते नैवादरं मेदुरम् ॥
आचक्रायुधमा च मामकगुरोराचार्यवर्गं भजे
यस्यान्तर्निगमान्तदेशिकयतिश्रेष्ठौ मुनिर्यामुनः ।
रामस्तामरसेक्षणस्स च मुनिर्नाथश्शठारातिरि-
त्यन्तस्सन्तमसच्छिदः श्रुतिदृशामग्रेसरा जाग्रति ॥
प्रख्यातः प्रणतार्तिहृद्गुरुरिति श्रीभाष्यकर्तुर्मुनेः
यो माहानसिकस्तदुक्तिरसिकः श्रीयान् स तत्राभवत् ।
वंशे तत्र हि वादिहंसजलदाचार्यादिभिर्भूषिते
यज्वाभूद्रघुनाथदेशिकमणिः श्रीश्रीनिवासेष्टिनः ॥
तनयोऽस्य नयोदधेस्सुधांशोर्विनयोन्मेषविशेषहृद्यविद्यः ।
वरदाभ्युदयाभिधां यथार्थां कृतिमेतां वितनोति वेङ्कटार्यः ॥
व्यायामं गमिता त्वलङ्कृतिपथे व्यापारिता व्याकृतौ
तर्कारण्यगतागतैः श्रमवती तन्त्राङ्गणे नर्तिता ।
त्र्यय्यद्रेरधिरोपिता च शिखरं तर्षादियं भारती
गम्भीरं गजभूधरेश्वरकथागङ्गाझरं गाहते ॥

* * * *

सत्यव्रतस्य विभवं प्रभवं च तस्मिन् शौरेरिभाद्रिशिखरेऽतिशयं च काञ्च्याः ।
पृष्टो नतेन भृगुणा सुगुणाम्बुराशिः प्रोवाच नारदमुनिर्भुवनैकबन्धुः ॥

कदाचिदहमुदारविभवनिदानगदाधरसाक्षात्काराय स्पृहयालुः

* * * *

पुण्यक्षेत्रविशेषेषु निर्मलकर्मलक्षणपद्मेक्षणसमाराधनमन्तरेण नान्तःकरणशुद्धि-रित्यभिधाय वेधास्स्वयमागत्य सत्यव्रतक्षेत्रं हयमेधेन माधवमाराधयन् यथा तमपरोक्षमीक्षामास तथा स कथामशेषामभ्यधान्मह्यम् ।

या कथा लोकधात्रैव वर्णिताकर्णिता मया ।
कथये तामहं तुभ्यं निधये तपसां मुदा ॥

तथाहि—

पुरा मुरारिं चतुराननस्तं साक्षाच्चिकीर्षुस्स तपांसि तेपे ।
तथापि चेतो न दधावनन्ते मुधासुखेष्वेवमु(म)धावदेषु ॥

**Colophon:**

इति काञ्चीनगरनायकताताचार्यभागिनेयसर्वतन्त्रस्वतन्त्रप्रतिवादिभयङ्करश्रीश्रीनिवासतनुभवस्य श्लेषयमकचक्रवर्तिनो रघुनाथार्ययज्वनस्तनयेन श्रीनिवासकृपातिशयसुविदितनयेन सीताम्बागर्भसंभवेन श्रीमदात्रेयवेङ्कटयज्वना विरचिते वरदाभ्युदयाभिख्ये चम्पूप्रबन्धे प्रथमो विलासः ।

**End:**

इति महिमनि हार्दादीरिते वारणाद्रेः समधिकमतिसम्पत्सारदे नारदेन ।
भृगुरपगतहर्षः कोऽत्र नः श्रोत्रसौख्यं सपदि भजति साधोस्सङ्गमेनेति मेने ॥
पृष्टेन तेन पुनरानमनस्तवाद्यैस्तुष्टेन विश्वगृहिणा द्रुहिणात्मजेन ।
अष्टाङ्गयोगमुपदिष्टमिहाधिगच्छन्नच्छाशयो भृगुरनन्तरमाननन्द ॥

* * * *

वरदः शरदः शतं प्रबन्धं स्वगुणाख्यायिनमेव कारयन्माम् ।
वहतां स्वपदाम्बुजैकदास्यं महतामेधयतां मयि प्रसादम् ।

**Colophon:**

इति श्रीकाञ्चीनगरनायकताताचार्यभागिनेयसर्वतन्त्रस्वतन्त्रप्रतिवादिभयङ्करश्रीनिवासाचार्यतनुभवस्य श्लेषयमकचक्रवर्तिनो रघुनाथार्ययज्वनस्तनयेन श्रीनिवासकृपातिशयसुविदितनयेन सीताम्बागर्भसंभवेन श्रीमदात्रेयवेङ्कटार्ययज्वना विरचिते वरदाभ्युदये पञ्चमो विलासः ॥

The scribe adds—

श्रीशैलवंशरत्नश्रीवासगुरोस्तनूजातः ।
वेङ्कटनरहरिरलिखद्वरदाभ्युदयं तदीयकारुण्यात् ॥
कालयुक्तचब्दकार्तिकमासशुक्लचतुर्दशीम् ।
वरदाभ्युदयस्तेन मोदात्संपूर्णतां गतः ॥

### No. 12346. वरदाभ्युदयचम्पुः.
### VARADĀBHYUDAYACAMPUḤ.

Substance, palm-leaf. Size, 14¼ × 1⅝ inches. Pages, 60. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

---

### No. 12347. वरदाभ्युदयचम्पुः.
### VARADĀBHYUDAYACAMPUḤ.

Substance, palm-leaf. Size, 16¼ × 1⅜ inches. Pages, 83. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants the beginning in the first Vilāsa; otherwise complete.

Same work as the above.

---

### No. 12348. वरदाभ्युदयचम्पुः.
### VARADĀBHYUDAYACAMPUḤ.

Substance, palm-leaf. Size, 13⅞ × 1⅝ inches. Pages, 54. Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

Same work as the above.

---

### No. 12349. वरदाभ्युदयचम्पुः.
### VARADĀBHYUDAYACAMPUḤ.

Pages, 17. Lines, 18 on a page.

Begins on fol. 26a of the MS. described under No. 2397, wherein it is given as the Hastigiricampu.

Complete.

Same work as the above.

---

### No. 12350. वरदाभ्युदयचम्पुः.
### VARADĀBHYUDAYACAMPUḤ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 81. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete.

Same work as the above.

Name of the scribe—Śrīnivāsarāghavācāriyar, son of Rāmānujācāriyar of Ilaṅgāḍu.

## No. 12351. विबुधानन्दप्रबन्धः.
## VIBUDHĀNANDAPRABANDHAḤ.

Substance, palm-leaf. Size, 17¾ × 1⅜ inches. Pages, 100. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

A Campukāvya giving a description of the various sacred places, such as Srirangam, Śrimuṣṇam, Tirukkōyilūr, Kāñcī, etc., visited by two persons, viz., Bālapriya and Priyamvada in the course of their journey to Badarikāśrama to attend there the marriage of Śīlavatī and Makaranda, son of Kandarpa, King of a place named Kamalinī, the whole story being fictitious and introduced as the subject of a conversation between two parrots: by Vaṅkaṭakavi, disciple of Vidyāhanumat and son of Vēṅkaṭa-Vīrarāghava of Bālaśayana or Iḷampaḷḷi family. The author's father was a resident of Gingee town and the son of Kṛṣṇa, who was the disciple of Rāghavārya. The author salutes Vēdāntadēśika.

The scribe adds—

शाण्डिल्यान्वयसंभूतराघवार्यस्य सूनुना ।
लिख्यते विबुधानन्दमस्मद्वंशकृतं ह्रिमम् ॥

**Beginning:**

वन्देऽहं देवसन्दोहानन्दनं नन्दनन्दनम् ।
वन्दारुलोकमन्दारं कन्दर्पादपि सुन्दरम् ॥

वाणी विनतगीर्वाणीं शोणीभूतरदच्छदाम् ।
एणीदृशं पृथुश्रोणीं वेणीविलसितां भजे ॥

योषा पद्मनिकेतनस्य मणिमञ्जूषावितानोल्लस-
द्वेषा मत्तवनप्रियप्रियतमा भाषानुकम्पाकरा ।
एषा मे वदने वसत्वविरतं दोषान्धकारापहा
पूषा यामदिशद्दृगम्बुरुहयोः शेषाद्रिभूषामणिः ॥

कवितार्किककेसरिणं वेदान्ताचार्यनामधेयवृषभम् ।
आम्नायरक्षितारं कमपि प्रणमामि देशिकं शिरसा ॥

प्रणमामि देशिकेन्द्रान् पूर्वानप्युत्तरानेव ।
अपि दक्षिणानवरतः पश्चिमानतिविपश्चितां भक्त्या ॥

सर्वो यस्य वरः करामलकतामाप प्रसादाद्गुरो-
र्वेदान्तार्थचयो मनोमधुकरप्राभातिकाम्भोरुहम् ।
चेल्लीनाम्नि पुरे चकास्ति मधुभित्पादाम्बुजाल्यायित-
स्वान्तो वेङ्कटवीरराघव इति ख्यातस्स विद्वन्मणिः ॥
गुरवस्तु राघवार्याः श्रुतिशिक्षातश्शास्त्रशिक्षयानघया ।
यस्य स तस्मात्समजनि कृष्णेशादुभयथा बुधप्रवरात् ॥
स च विद्याहनुमतो लब्धसाहित्यपद्धतिः ।
प्रबन्धं विबुधानन्दं विधत्ते वेङ्कटाह्वयः ॥
सूक्तिप्रपञ्चे मम कर्कशेऽपि किञ्चित्प्रयासेन हि निर्विलम्बम् ।
बुधै रसस्स्यान्मधुरोऽवगम्यः पुण्ड्रेक्षुदण्डेषु महान् यथैव ॥

शुकनिगद्यमानं भागवतविविधविभवप्रपञ्चं नितरामपि संभावयन्ति किल भगवच्चरणारविन्दलग्नमनसो विबुधाः । त एते रसज्ञास्तादृशीं कृतिं कथं नाम मनसा वा परित्यक्तुमुत्सहेरन् ।

विबुधास्तु समाकर्ण्य विबुधानन्दमाख्यया ।
प्रबन्धं मम साद्यन्तं नन्दन्तु कृपया चिरम् ।

अत्र तावदादौ प्रबन्धे वैरोचनिसनाथीकृतायाः ककुभो वैश्रवणपालितामाशामायान्तावन्तरिक्षचरौ प्रचुरवाङ्माधुर्यभाजौ कीरवर्यौ परस्परानुलापेन यामेव प्रकाशयामासतुः कथामहं तां प्रबन्धरूपेण रचयितुमारब्धवाननुग्राह्यो वश्यवाग्भिर्विचक्षणैः ।

* * * *

लीलाविलोलानेकबालामालासन्तोषितजनजाला समन्तादभ्युल्लसद्राजवधूकेलिशैला निरर्घगुणशालिनी कमलिनी नाम राजधानी । तत्र च निखिलमहापुरुषलक्षणसमन्वितः समानन्दितसमस्तसामन्तसेवितः ।

* * * *

सीरध्वज इव मिथिलायाः अभिमतो नितरामचलाया अस्ति राजा कन्दर्पो नाम ।

**End :**

तस्मादेहि तावत् ।
अस्मत्समागमसेमधितहर्षभाजोः पद्मावतीजनविकत्थितदैवयोश्च ।
अत्रैव साधुरचिते दिवसे मुहूर्ते मित्रैतयोस्त्व उदयादतिमोदमानौ ॥
इति निष्क्रान्तौ ।

यत्कीर्तिर्वसनायतेऽपि(पर)रमा माद्यत्तुलस्त्यात्मज-
क्षोभापास्तवरांशुकास्वखिलदिग्ग्रामासु चन्द्रादिभिः ।
आर्तश्रीषु सुपद्मपत्रसुषुमारीढावहश्रीमुख:
श्रीरामोऽखिलवल्लभो विजयते सौमित्रिणा च श्रिया ॥

**Colophon:**

इति बालशयनवंशोद्भववीरराघवतनयवेङ्कटाचार्यविरचितं विबुधानन्दं संपूर्णम् ॥

---

## No. 12352. विश्वगुणादर्शः.

## VIŚVAGUṆĀDARŚAḤ.

Substance, palm-leaf. Size, 18¾ × 1½ inches. Pages, 92. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Same work as that described under R. No. 1067 of the Triennial Catalogue, Vol. II, Part I-A. By Vēṅkaṭācārya.

Copying was finished by Rēpalli Raṅga on Friday, the 11th of the Āśvayuja Śuddha of Vibhava year, in the village of Citravāḍa.

---

## No. 12353. विश्वगुणादर्शः.

## VIŚVAGUṆĀDARŚAḤ.

Pages, 145. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 11921.

Complete.

Same work as the above.

---

## No. 12354. विश्वगुणादर्शः.

## VIŚVAGUṆĀDARŚAḤ.

Substance, paper. Size, 9¾ × 6¼ inches. Pages, 56. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains 324 stanzas.

Same work as the above.

---

## No. 12355. विश्वगुणादर्शः.

## VIŚVAGUṆĀDARŚAḤ.

Substance, palm-leaf. Size, 18¼ × 1½ inches. Pages, 68. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains 500 stanzas.

Same work as the above.

The former owner of the MS. is stated to be Mukāmi Tiruvēṅkaṭacārlu.

---

No. 12356. विश्वगुणादर्शः.

VIŚVAGUṆĀDARŚAḤ.

Substance, palm-leaf. Size, 16¾ × 1¼ inches. Pages, 132. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete. The first leaf is in Telugu characters.

Same work as the above.

---

No. 12357. विश्वगुणादर्शः.

VIŚVAGUṆĀDARŚAḤ.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 139. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

Same work as the above.

The copyist's nameiis Vēṅkaṭēśvara.

---

No. 12358. विश्वगुणादर्शः.

VIŚVAGUṆĀDARŚAḤ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 132. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 33*a*. The other work herein is Vasantatilakabhāṇa 1*a*.

Incomplete.

Same work as the above.

---

No. 12359. विश्वगुणादर्शः.

VIŚVAGUṆĀDARŚAḤ.

Substance, palm-leaf. Size, 16¾ × 1¼ inches. Pages, 44. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains 259 stanzas.

Same work as the above.

This book is said to have originally belonged to Naḍādūr Vēṅkaṭacāryulu.

### No. 12360. विश्वगुणादर्शः.
### VIŚVAGUṆĀDARŚAḤ.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 150. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Complete.

Same work as the above.

---

### No. 12361. विश्वगुणादर्शः.
### VIŚVAGUṆĀDARŚAḤ.

Substance, paper. Size, 10¾ × 4⅝ inches. Pages, 94. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

Same work as the above.

---

### No. 12362. विश्वगुणादर्शः.
### VIŚVAGUṆĀDARŚAḤ.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 82. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Same work as the above.

---

### No. 12363. विश्वगुणादर्शः.
### VIŚVAGUṆĀDARŚAḤ.

Substance, palm-leaf. Size, 18 × 1¾ inches. Pages, 44. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete.

Same work as the above.

---

### No. 12364. विश्वगुणादर्शः.
### VIŚVAGUṆĀDARŚAḤ.

Substance, paper. Size, 9¾ × 7⅜ inches. Pages, 116. Lines, 16 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Contains the text, index and errata complete.

Same work as the above.

## No. 12365. वेदान्ताचार्यविजयचम्पुः.
## VĒDĀNTĀCĀRYAVIJAYACAMPUḤ.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 74. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 18*a*. The other works herein are Navagrahaśānti 1*a*, Vināyakapūjāvidhāna 6*a*, Ṛgvēdiśrāddhaprayōga 8*a*.

Breaks off in the sixth Stabaka.

A work in verse and prose describing the birth and other incidents in the life of Vēdāntadēśika, and the disputations held by him with Advaitins, like Kṛṣṇamiśra, and the polemical successes gained by him over his adversaries. It is commonly known as the Ācāryavijayacampu. The author of the work is Kavitārkikasiṁha Vēdāntācārya, son of Vēṅkaṭācārya of Kauśikagōtra and the daughter's son and disciple of Paravastu Vēṅkaṭācārya. He is said to have studied under his uncle, Paravastu Nigamāntasūri, who is stated to have had six brothers. A member of this Paravastu family, named Śrīnivāsārya, is said to have founded four villages for Brahmins and to have written a commentary called Jayamaṅgaḷā. The name of the text on which this is a commentary is not known.

**Beginning:**

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

नमामि कवितार्किकद्विरदपुञ्जपञ्चाननं
कुदृष्टिकदलीवनोन्मथनगन्धदन्तावलम् ।
अमेयमहिमानमप्रतिमबुद्धिमश्वानन-
प्रसादविदिताखिलं निगमचूलिकादेशिकम् ॥

यद्भक्ति परिचिन्वतामनुकलं लक्ष्मीजरीजृम्भते
यल्लाक्षारसलक्ष्मचारु मुरजिद्वक्षो दरीदृश्यते ।
यत्प्रह्वत्रिदशावरोधललनामौलौ वरीवर्तते
तत् पद्माचरणाम्बुजं मम गिरां लाभाय वोभूयताम् ॥

*    *    *    *

शठद्विषे शान्तिधनाय तस्मै प्रणामवाचं परिशीलयामः ।
यत्सूक्तिरूपेण सनातनी सा सरस्वती सर्वजनान् पुनीते ॥
नाथस्य सूरेर्न कथं चरित्रं विचित्रतां विन्दति यः स्थिरात्मा ।
गुणैरुदारे गुरुपङ्क्तिहारे विशुद्धवृत्तस्तरलत्वमेति ॥

* * * *

महीयांसं हर्षं मनसि वितरीतुं तनुभृता-
मुदीतौ द्वौ ताराप्रियतमयतिक्ष्मापरिवृढौ ॥
कलादानादाद्यो भजति लघुतां पश्यत जनाः
परो दोषापेतः प्रथयति ततो हन्त गुरुताम् ॥
वाराशिपूरापतदूर्मिधारादोराहवारम्भधुरीणसूक्तिः ।
पारावरी नः प्रथयन्निरुन्धे कुराधिनाथः कुदृशां यशांसि ॥
आम्नायचूडार्यनुतिं चिकीर्षुरादौ तदीयान् प्रणुमः कृतीन्द्रान् ।
निरर्गलोचन्निजसूक्तिवाक्यानिर्धूततत्तन्मततूलजालान् ॥
परस्सहस्रं परवस्तुनाम्ने कुर्वे प्रणामान् कुलदैवताय ।
वेदान्तविद्यागुरुसूक्तिगङ्गा विष्वङ्मुखी भाति यदुक्तिवर्षैः ॥
(इ)दं मुदे स्यात् परवस्तुसूरेर्यदन्वये जन्मजुषां शिशूनाम् ।
आम्नायचूडागुरुशेखरस्य नाम्नां कलापा नव भूषणानि ॥
विद्याविशेषान् विदितानवन्ध्यान् वृत्तेन शीलेन च यो वितेने ।
वि(वी)तावलेपो विजयी स भूयान्मातामहो मे परवस्तुनाथः ॥
व्यासश्चेद्व्यसनावहः श्रुतिगिरां वातन्धयग्रामणीः
धत्ते(भोगरुचिं धराश्रुतिभवो) रामान्वयैकोत्सुकः ।
मौढ्यं याति गुरुर्जडो हिमकरस्सूर्यो विरोधी सतां
साधर्म्यं परवस्तुवेङ्कटगुरोर्वात्स्यस्य(क)स्साधयेत् ॥

* * * *

दयाधनस्तस्य गुरोस्तनूजो जयाय भूयान्निगमान्तसूरिः ।
यस्मादसीमप्रतिभाविलासादस्माभिरग्राहि कलाकलापः ॥ विजयी भवतु ।
आकल्पमस्मज्जनको जयी स्यादाकल्प एको निरपायवाचाम् ।
वृषाचलासक्तिजुषं विनीतं यं वेङ्कटेशं कलयन्ति सन्तः ॥
विद्याविलासे यदि ते दिदृक्षा विचित्रयुक्तौ यदि वा सिसृक्षा ।
अपास्य शङ्कां मयि चित्तहर्षादाम्नायचूडागुरुमाद्रियेथाः ॥ विजयी भवतु ।
चिरन्तनभणितिशिखरपरिषदमृतनिचयपरिचियमृदुलहृदयोदारकेदारसमधि-
रूढसमुल्लसद्रूहणधारणादिमृदुलपरिप्लवन्नतराङ्गितोपचयमतिविततिपुण्ड्लतिकोदधि-
तसर्वतन्त्रस्वतन्त्रतागुणमिलनललितयशोघोरर्णारमणीयमणिमालिकापरिष्कृतधराणि-

रमणीमणिः निर्ममजनहृदनभिमतनर्मभरितचरमयुगपरिकर्मीभूतदुर्मतकथकहतधर्मशर्मनिर्माणाखर्वीभवदादरदर्वीकरोर्वीभृदधीशनिदेशावतीर्णसुधाशनविरोधिवरूथिनीनिरङ्कुशसमङ्कुरदहङ्कृतिलुण्टाकदिव्यघण्टाकृतिः

* * * *

बलराम इव यामुनोत्कर्षकारी शौरिरिव शतदूषणीभाषितोत्तरपराकृतकृतकर्मागमदमघाघजातः, कल्किरिव प्रियविष्णुयशस्सन्ततिः हयग्रीव इव मधुनिरासोल्लसितसच्चरित्ररहस्यनिक्षेपरक्षाधिकरणसारनिरपायसूक्तिपरिहृतब्रह्मखेदः, सूर्य इव सुकृतसारसामोदः, पूर्णचन्द्र इव पोषितभावजाततात्पर्यचन्द्रिकाह्लादितकुवलयः, निखिलधननिरभिलाषोऽपि सर्वार्थसिद्धिसाभिलाषः, निराकाङ्क्षितबहुमानोऽपि बहुमानैकशरणः, प्रख्यापितयोगाचारोऽपि प्रत्याख्यातयोगाचारः, सन्ततसमुदयदनन्तचिन्तनरससन्तोषसन्ततिमिलदन्तःकरणः मुहुर्मुहुरनाहतमोदान्तरो वेदान्तगुरुः ।

कथासुधामस्य गुरोरपूर्वामशेषलभ्यामजलोपनीताम् ।
गिरां भरैर्गुम्भितगद्यपद्यैस्सतां मुदे संप्रति दर्शयामः ॥

* * * *

पुत्रः कौशिकवंशवारिधिविधोः श्रीवेङ्कटेशस्य यो
दौहित्रः परवस्तुवेङ्कटगुरोर्वात्स्यस्य यो वाग्मिनः ।
धन्यो यः कविवादिकेसरिगुरोर्विख्यातयाभिख्यया
धत्ते यश्च सरोजसौरभमुचा वाचा सुधाचारुताम् ॥

* * * *

यद्वंशपाथोनिधिपारिजातः श्रीश्रीनिवासो गुरुसार्वभौमः ।
चक्रे यशस्वी चतुरोऽष्टहारान् व्याख्यां च वाग्मी जयमङ्गलाख्याम् ॥
(विनीतसर्वस्वविदन्सरस्वतीधुनीतलस्पार्शिधि)यः स्वचर्यया ।
अरुन्धतीजानियशोऽतिशायिनस्समिन्धते यस्य च सप्त मातुलाः ॥

* * * *

अस्ति खलु विस्तारितविलोचनकुतूहला प्रतिकलविनमदमरपरिवृढमकुटमहामहानीललोलम्बनिकुरुम्बपरिरम्भचारुचरणारविन्देन

* * * *

परिसरविसृमरवेगवतीसरिदम्भःपम्फुल्यमानपयोजिनीपरिष्वङ्गाङ्गीकृतमधुरसविकिरणबद्धसन्धानसन्ध्यासमिन्ध[म]ानगन्धवहस्तनन्धयसञ्चाराञ्चिता काञ्ची नाम नगरी ।

See under the next number for the end.

## No. 12366. वेदान्ताचार्यविजयचम्पुः.
## VEDĀNTĀCĀRYAVIJAYACAMPUḤ.

Pages, 116. Lines, 8 on a page.

Begins on fol. 1a of the MS. described under No. 9826, wherein it is given as Ācāryacampu in the list of other works.

Complete in six Stabakas.

Same work as the above.

See under the previous number for the beginning.

**End:**

काले काले फणिपतिसरोगाहनं निर्मिमाणः
पश्यन् भक्त्या परमपुरुषं हस्तिशैलान्तरङ्गम् ।
विद्यास्तास्ता विबुधहृदयामोदवर्षी स काञ्च्यां
व्याकुर्वाणो विजयमभजद्वेदचूडार्यवर्यः ॥

जयति निगमचूडाजीविका देशिकानां
जयति गुरुरमुष्या जन्मसीमा दयायाः ।
जयति भुवनरक्षाजागरूका तदुक्तिः
जयति जगति तस्यां जातहर्षस्समाजः ॥

**Colophon:**

इति कौशिककुलतिलकश्रीवेङ्कटेशदयिततनयस्य परवस्तुवेङ्कटगुरुचरणजल(ज)षट्चरणस्य कवितार्किकसिंहस्य वेदान्ताचार्यापरनामधेयस्य कृतौ वेदान्ताचार्यविजयाह्वये चम्पुप्रबन्धे षष्ठः स्तबकः ॥

कल्पद्रुः कविवादिहंसविदुषः प्रज्ञासुधावारिधेः
जातः कश्चन कल्पितार्थविततिश्चम्पुप्रबन्धात्मना ।
प्राचीनोक्तिवतंसदेशिककथामाध्वीं भजन् षष्ठम(क):
तस्यासौ स्तबकः करोतु सुमनःकर्णावतंसश्रियम् ।

## No. 12367. वेदान्ताचार्यविजयचम्पुः.
## VEDĀNTĀCĀRYAVIJAYACAMPUḤ.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 8. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 1a. The other works herein are Mālavikāgnimitra 5a, Mālavikāgnimitravyākhyā (Kumāragirirājīyā) 33a.

Contains the first Stabaka incomplete.

Same work as the above.

No. **12368.** वेदान्ताचार्यविजयचम्पुः.

VĒDĀNTĀCĀRYAVIJAYACAMPUḤ.

Substance, palm-leaf. Size, 14 × 1⅛ inches. Pages, 100. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

---

No. **12369.** वेदान्ताचार्यविजयचम्पुः.

VĒDĀNTĀCĀRYAVIJAYACAMPUḤ.

Substance, palm-leaf. Size, 17⅛ × 1 inches. Pages, 130. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above.

---

No. **12370.** वेदान्ताचार्यविजयचम्पुः.

VĒDĀNTĀCĀRYAVIJAYACAMPUḤ.

Substance, palm-leaf. Size, 18¾ × 1½ inches. Pages, 52. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, new.

Contains one to three Stabakas complete, and four incomplete.

Same work as the above.

---

No. **12371.** वेदान्ताचार्यविजयचम्पुः.

VĒDĀNTĀCĀRYAVIJAYACAMPUḤ.

Substance, palm-leaf. Size, 13⅝ × 1½ inches. Pages, 119. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above, but with additional stanzas in the beginning.

**Beginning:**

श्रीमान् वेङ्कटनाथार्यः ( . . . ) सदा हृदि ॥

परवस्तुवेङ्कटाचार्यपदपङ्कजषट्पदम् ।

देशिकेन्द्रदयापात्रं कविवादिहरिं भजे ॥

The scribe adds:—

धनुर्मासे शुक्लपक्षे शुक्रवारे त्रयोदशे ।

श्रीमुखे नाम वर्षे च समाप्तिं चम्पुरन्वभूत् ॥

## No. 12372. वेदान्ताचार्यविजयचम्पूव्याख्या.
## VĒDĀNTĀCĀRYAVIJAYACAMPŪVYĀKHYĀ.

Substance, palm-leaf. Size, 19½ × 1⅝ inches. Pages, 120. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the first two Stabakas complete and the third incomplete.

A commentary on the Vēdāntācāryavijayacampū described above: by Anantācārya, who is apparently a disciple of Nṛsiṁhācārya.

The MS. is said to have belonged to Kōmāṇḍūr Iḷayavilli Pañcamahāyajvan Nāṭṭu Vīrācār, of Mannargudi, and a resident of Piḷḷaipākkam village.

**Beginning:**

श्रीनरसिंहमुपास्य श्रीमच्छ्रुत्यन्तविपुलविख्यातिम् ।
व्याख्यात्यनन्तदासो वेदान्ताचार्यविजयसच्चम्पूम् ॥

नृसिंहार्यपदाम्भोजे सन्ततं समुपास्महे ।
प्राप्यत्वं प्रापकत्वं च यत्रास्माकं विराजते ॥

पाराशर्योक्तिदुग्धाब्धिमन्दरो भाष्यनामकः ।
उद्पादितरां येन तस्मै भाष्यकृते नमः ॥

नालीकनाभमनिशं नालीकवनीनिकेतनालोलम् ।
नालीकवैरिनयनं नालीकानेकसद्गुणं वन्दे ॥

अपि सकलङ्कां व्याख्यां सारग्राही जनस्तु गृह्णीयात् ।
दोषोपेतं चन्द्रं न वहति शिरसा निटालनयनः किम् ॥

इह खलु "जायमानं हि पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकस्स तु विज्ञेयस्स वै मोक्षार्थचिन्तकः ॥" इत्युक्तरीत्या निर्हेतुकभगवत्कटाक्षलब्धतच्चरणारविन्दद्वन्द्वप्राप्तिसाधनीभूतसत्त्वभरभरितः "ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इत्यादिश्रुतिविहितगुरूपसदनसदनमृतः, "आचार्यवान् पुरुषो वेद" इति श्रुत्युक्तरीत्या तत्कृपालब्धपरदेवतापरमार्थज्ञानः, श्रीकौशिककुलतिलकः श्रीवेङ्कटेशदेशिकदयिततनयः, परवस्तुवेङ्कटगुरुचरणजलजषट्चरणान्तःकरणः, वेदान्ताचार्यापरनामकः कवितार्किकसिंहगुरुः "देवमिवाचार्यमुपासीत" "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" "साक्षान्नारायणो देवः कृत्वा मर्त्यमयीं तनुम् । मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना" इति श्रुतिस्मृत्यादिप्रमाणशतेनाचार्यस्य परदेवतासाम्यादिप्रतिपादनेन मधुरकविर्वकुलभूषणमिव सकलकल्याण-

गुणशालिनं कवितार्किकसिंहत्वादिना निखिलभुवनेष्वनितरसाधारणप्रसिद्धिजुषं निगममौलिगुरुं तदवतारकल्याणगुणादिवर्णनेन स्वजन्मसाफल्याय तुष्टपुस्सकलकाव्येषु गद्यपद्यात्मकस्य काव्यस्य "गद्यानुबद्धरसमिश्रित –" इत्यादिश्लोकोक्तरीत्या हृद्यतासम्पादकतया केवलपद्यप्रबन्धापेक्षया चम्पुप्रबन्धस्य प्राशस्त्यं मन्वानः पूर्वोक्तगुणशालिस्वाचार्यविषयकस्य चम्पुरूपप्रबन्धस्य चिकीर्षितस्य विघ्नध्वंसपूर्वकपरिसमाप्तिमभिलषन् "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इत्यालङ्कारिकीं मुद्रामनुसरन् पुरुषकारभूतपद्मापदपङ्कजं प्रार्थयते यद्भक्तिमिति। यद्भक्ति यस्मिन् पद्माचरणाम्बुजे। भक्तिं स्नेहपूर्वकानुध्यानम्। परिचिन्वताम् असकृदावर्तमानानाम्। जनानामिति शेषः। "स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते" इति स्मृतिः। आवृत्तिरसकृदुपदेशादिति सूत्रं चात्र प्रमाणतयानुसन्धेयम्। लक्ष्मीः सम्पत्। अनुकलम् प्रतिक्षणम्। वरीजृम्भते अतिशयेन वर्धते यद्वा। अनुकलं परिचिन्वतामिति योजना। निरतिशयपुरुषार्थरूपा। यद्वा। भक्तिः सेवा, भज सेवायामिति धातोः। तां परिचिन्वतामित्यर्थः। लक्ष्मीः सम्पत्। यद्वा। अनुकलं वेदादिसकलविद्यास्वित्यर्थः। "अव्ययं विभक्ति—" इत्यादिना वीप्सायामव्ययीभावसमासः। गोस्त्रियोरित्युपसर्जनह्रस्वः। नाव्ययीभावादित्यादिना तृतीयासप्तम्योरित्यादिना वा विभक्तेरादेशः। लक्ष्मीः विजातीयसम्पत्। यावद्कल्पशोभेति यावत्। "शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिति गद्यते" इति निखण्टु(घण्टु)ः। "ऋचस्सामानि यजूंषि। सा हि श्रीरमृता सताम्" इति श्रुतिः॥

* * * *

वेदान्तविद्यागुरुसूक्तिगङ्गा निगमान्तगुरुसूक्तिरेव गङ्गा यदुक्तिवर्यैः परवस्तुवेङ्कटगुरुवाग्वृष्टिभिर्विपुलास्ती सर्वदिग्व्यापिनी प्रकाशते प्रसिद्धगङ्गापेक्षया वेदान्ताचार्यसूक्तिगङ्गाया विपुलदिग्व्यापनेन प्राशस्त्यं प्रतिपादितम्। कुलदैवमयं ममेति शेषः।

**End:**

अनन्तसूरेरबला तरणी। बुधानां विदुषाम्। सन्तोषाय गर्भं बिभराम्बभूव। भृञ्भरण इत्यस्माद्धातोर्लिट्। भीह्रीत्यादिना आम् श्लुवद्भावश्च; लिटो लुक् श्लुवद्भावात् धातोर्द्वित्वम्। भृञामिदिति अभ्यासस्य इत्। कथमित्याशङ्क्याह कवेरित्यादिना। कवित्वशीलस्य सूक्तिरिव रसालङ्कारादिभिस्सहृदयहृदयङ्गमम् अर्धचन्द्रमण्डलीकलासमूहं यथा बुधानां हर्षायेत्युभयत्रापि सम्बध्यते तथैवेति पूर्वेणान्वयः।

उपमाश्लेषयोस्संसृष्टिः । कौशिकेत्यादिपूर्वमेव विवृतम् । चम्पुप्रबन्धे द्वितीयस्तबकः कृत इति शेषः ॥

**Colophon:**

इत्यनन्तार्यकृतौ वेदान्ताचार्यविजयाह्वयचम्पुप्रबन्धव्याख्याने द्वितीयस्तबको व्याख्यातः ॥

लिखितश्च गोपालदासेन कौशिकान्वयदीपेन ॥

इदानीं कविः स्तबकान्तरमारभमाणः पूर्वस्तबकोक्तं गर्भधारणमेव विवृणोति अथेत्यादिना ।

* * * *

पङ्क्त्या समासीनः सरस्वत्याख्यलतावष्टम्भभूतोपन्नतरुसंश्रयविचक्षणैः सुधीजनहृदयमदगजालानतां प्राप्तैः करकमलधृतैः कोशैः विस्ता(रितशो)भः विलोचनविषयः विनय इव श्रीमन्निलय व्यलासीत् विल्लास । विपूर्वाल्लसतेर्लुङ् अतो हलादेरिस्युपधावृद्धिः । रूपकोल्लेखानां संसृष्टिः ।

---

## No. 12373. वेदान्ताचार्यविजयचम्पूव्याख्या.

## VEDĀNTĀCĀRYAVIJAYACAMPŪVYĀKHYĀ.

Substance, palm-leaf. Size, 13¾ × 1¼ inches. Pages, 110. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Contains the Stabakas three and four (three without beginning and four without end).

Same work as the above.

**Beginning:**

तं पङ्केरुहाक्षम् । पङ्के रोहत इति पङ्केरुहे इगुपधेत्यादिना रोहतेः कर्तरि कप्रत्ययः । क्वित्वान्न गुणः । हलदन्तात्सप्तम्या इत्यादिना सप्तम्या अलुक् । ते इव अक्षिणी यस्येति बहुव्रीहिः । बहुव्रीहौ सक्थ्यक्ष्णोरित्यादिना समासान्तः षच् । यस्येत्यक्षिशब्देकारलोपः । अनघ इति । निरुक्तपुण्डरीकाक्षे साक्षात्कारप्रतिबन्धकदुरितरहित इत्यर्थः । गुरुः अनन्तगुरुः आलुलोके साक्षादकृत । आङ्पूर्वाल्लोकृ दर्शन इति धातोर्लिट् । एच इग्घ्रस्वादेश इति नियमादभ्यासौकारस्य ह्रस्व इत्यनेनोकारः । लक्ष्मीत्यादिषु चतुर्षु श्लोकेषु यथायथमुत्प्रेक्षारूप . . . . तोत्प्रेक्षारूपकरूपकानुप्राणितोल्लेखोपमास्वभावोक्तीनां सङ्करः । चरमपद्ये वसन्ततिलकावृत्तम् ।

**End:**

अथेत्यादि । मलयगिरिपरिसरचन्दनसमूह इव अनन्तगुरोस्समीपे पङ्क्त्या समासीनः सरस्वत्याख्यलतावष्टम्भभूतोपन्नतरुसंश्रयवितरणविचक्षणैः सुधीजन-

हृदयमदगजालानतां प्राप्तैः करकमलवृतैः कोशैः विस्तारितशोभः विख्यापनविषयः विनय इव श्रितनिचयः व्यलासीत् । विपूर्वाल्लसतेः लुङ् अतो हलादेरित्युपधावृद्धिः । उपमारूपकोल्लेखानां संसृष्टिः । वरदगुरुं वर्णयति । वरदगुरुरपीति । अपिराशिषा समुच्चीयते । अंशीकृतेक्षुकाण्डरीतिभिः इक्षुरससदृशीभिः ॥

---

## No. 12374. वैकुण्ठविजयचम्पुः.
## VAIKUṆṬHAVIJAYACAMPUḤ.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 83. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Incomplete

This work, like the Viśvaguṇādarśa, describes the various sacred places and shrines visited in the course of the pilgrimage of two persons named Jaya and Vijaya.

By Rāghavācārya, son of Śrīnivāsācārya and grandson of Veṅkaṭācārya who was himself the son of Śrīnivāsācārya of Śrīvatsagōtra. The author was the disciple of Raṅganāthasvāmin and studied religious works under Śrīnivāsasvāmin. He salutes Śaṭhakōpa, Rāmānuja, Vēdāntadēśika, Ādivan-Śaṭhakōpasvāmin, Nārāyaṇamuni, Śrīnivāsayōgin and Raṅganātha. The author states that he was a great scholar in Sāhitya and Darśana.

**Beginning:**

श्रियः पत्यौ पत्यौ निखिलजगतां निर्ममजनैः
निषेव्ये निस्तुल्ये निरवधिमहानन्दजलधौ ।
निराबाधैश्वर्ये निजपदत(न)तव्रातसुलभे
भवादीनां भाव्ये भवतु मम भक्तिर्भगवति ॥

श्रीमानहोबिलगुहास्थितिमाननन्तत्रय्यन्तवेद्यनिजरूपगुणप्रभावः ।
प्रह्लादरक्षणकृते प्रथितावतारः प्राग्भिः स्तुतो नरहरिः प्रथयेद्धियं नः ॥

कृष्णोऽप्यर्जुनभावभृद्विधुरपि प्रध्वस्तदोषान्वयः
सर्वज्ञत्वमुपेयिवानपि भवभत्यर्थिभावं श्रितः ।

* * * *

भवजलधिनिमज्जत्सज्जनोज्जीवनीभिः भणितिभिरमलाभिः सर्वलोकोचिताभिः ।
परमपुरुषमस्तौन्निस्तुलं यस्तु सोऽयं शठमथनमुनिर्मे भूयसे श्रेयसे स्यात् ॥

श्रीमान्रामानुजार्यो जयति यतिपतिस्सर्वसिद्धान्तवेत्ता
दौरात्म्यध्वान्तकुक्षिम्भरिहरिचरणप्रेमभूमोदिताभिः ।

फुल्लन्मल्लीमतल्लीमधुरमधुझरीमाधुरीसोदरीभिः
त्रय्या वैयाकुलीं यः फणितिभिरनघो ऽशीशमत् श्रीशसेवी ॥
नानादुर्वादिगर्वानलनवजलद् श्रीशघण्टावतारः
श्रीनाथोद्दामभक्तिप्रचयविलसितो ऽत्यन्तदान्तस्वभावः ।
ऌनान्तध्वान्तविद्रत्परिवृढमहितानेकसद्ग्रन्थकर्ता
मानातीतस्वभूमा जगति विजयते वेदचूडार्यवर्यः ॥
साक्षाल्लक्ष्मीनृसिंहो मुनिजनमहिताहोबिलक्ष्माधरेन्द्र-
स्थेमासौ नित्यमुक्तव्रतिकलकलितारावनादप्यतुष्टः ।
यस्मै दत्वा यतित्वं स्वयमिह मुदितो नैजसंराधनार्थं
सोऽयं श्रीवण्शठारिर्वितरतु गुरुराडीप्सयामीप्सितानि ॥
किं व्यासः किं शुको वा किमु शठमथनः किं कयाघोसुतो वा
किं वा प्राचेतसः किं श्रुतिमकुटपरिष्कारधीर्लक्ष्मणार्यः ।
इत्युत्प्रेक्ष्यो विधूतप्रतिकथकघटाटोपघोराट्टहासः
श्रीमान्नारायणाख्यो यतिपतिरनघाश्चर्यचर्यो विभाति ॥
कल्हाणीशवाणिः कणभुगभिमताध्वान्तसंभ्रान्तचेतः-
सिद्धान्तध्वान्तसौरद्युतिनिचयझरीविभ्रमोऽदभ्रमोदः ।
त्रय्यन्तान्तर्निगूढत्रियुगगुणगणोद्धर्णनैकान्तरङ्गः
पातु श्रीवासयोगी यतिपतिमतनिर्धारणायावतीर्णः ॥
निर्बाधज्ञानसीमा निगममकुटनिष्णाततोद्दामभूमा
निर्धूतक्रूरकामादिमरिपुगरिमा निर्ममैर्गेयनामा ।
दुर्वादिव्रातभीमातिशयितसुयशाः स्फीतपद्माक्षदामा
श्रीरङ्गाधीशनामा जयति यतिपतिर्भास्वता तुल्यधामा ॥
यस्यासीत्प्रपितामहो बुधमणिः श्रीश्रीनिवासाख्यया
विख्यातो भुवि सर्वतन्त्रनिपुणः साहित्यपारीणधीः ।
वैराग्येण गरीयसा प्रमुदितः श्रीमन्नृसिंहाख्यया
प्राप्तः संयमितामकृष्टसुधियामध्यात्मविद्यागुरुः ॥
श्रीमान्यस्य पितामहः कविवरः श्रीवेङ्कटेशाभिधो
निस्सीमप्रतिभानिरर्गलमतिः सर्वेषु तन्त्रेष्वपि ।
भूत्वा योगिवरो नृहर्यनुमते प्राप्तोऽखिलाचार्यतां
विख्यातो नरसिंहमूर्तिरपरोऽत्या(स्त्या)बालवृद्धं भुवि ।

तातो यस्य बुधाग्रणीः कविवरः श्रीश्रीनिवासाह्वयः
नानातन्त्रपरिश्रमः शमधनस्त्वय्यन्तविद्यानिधिः ।
वैराग्यातिशयेन सर्वविरतः श्रीमन्नृसिंहाज्ञया
संप्राप्तो यतिराजतां स जगदाचार्यो गुणैरेधते ॥
मातामहो यस्य महर्षितुल्यो महानुभावो महनीयशीलः ।
आत्रेयवंशाम्बुधिपार्वणेन्दुरासीज्जगत्यां(ज)पतां वरिष्ठः ॥
श्रीमच्छ्रीवासयोगीश्वरगुरुकरुणालम्भितज्ञानभूमा
श्रीरङ्गशाख्ययोगीश्वरगुरुचरणाम्भोजलोलम्बवृत्तिः ।
सोऽयं वत्सान्ववायाम्बुधिहिमकिरणः संहितेषु प्रवीणः
वैकुण्ठस्याभिधातुं विजयमनघमुज्जृम्भते राघवार्यः ॥
तर्कालङ्कारभूतः फणिभणितमहाभाष्यपारीणबुद्धिः
तन्त्रे चापि स्वतन्त्रः श्रुतिमकुटपरिश्रान्तकान्तान्तरङ्गः ।
काव्यालङ्कारवृत्तेष्वपि च परिचयाच्छिक्षितेश्वार्थजाते
पौराणेऽप्यैतिहासे भृशमिह विबुधैः ख्यायतेऽसौ कवीन्द्रः ॥
मलयमरुदुदञ्चन्मल्लिकामञ्जरीणां मधुरमधुझरीणां सर्वदा सोदरीणाम् ।
अमृतसहचरीणामब्जदाकिङ्करीणां जयति कविवरस्यामुष्य वाचां विलासः ॥
काव्यं मामकमद्भुतं सुललितं नव्यं रसैरुज्ज्वलं
भव्यं ह्लादमयं सदा हृदि लसत्काव्यान्तराणामपि ।
दिव्यं श्रीशकथामृतं मुनिजनैस्तव्याक्षरं निर्मलं
श्राव्यं श्रीरमणाङ्घ्रिपङ्कजजुषां भाव्यं सुधीभिर्मुहुः ॥
काव्यानि पूर्वरचितान्युपजीव्य जाताप्येषा मदीयकविता स्वदते गुणाढ्या ।
अम्भोनिधावुदितमप्यवलोक्य चन्द्रं सर्वे जना भुवि परं मुदिता भवन्ति ॥
प्रायः स्युः कवयोऽप्रमत्तमतयो मत्तः प्रकृष्टाः परं
काव्यं कर्तुमपास्तदोषनिचयं ते चापि नालं स्वयम् ।
वक्तारोऽपि वयं च दोषजटिलं काव्यं न लज्जामहे
को भेदोऽस्ति हरेर्गुणौघगणने वाचां श्रुतीनामपि ॥
शक्त्यादित्रितयं मिथः समुदितं काव्योद्भवे कारणं
निर्णीतं खलु काव्यविद्भिरखिलैर्व्यर्थेन ते तथ्यतः ।

भक्तिः श्रीनिधिसंयमीन्द्रयतिराट्पादाब्जयुग्मेऽनघा

त्वेका हेतुरभूदुदग्रमहिमा मत्काव्यनिष्पादने ॥

सन्तो निशम्य निपुणं मम वाग्विलासं सन्तोषमत्र कलयन्तु गताभ्यसूयाः ।

निन्दन्तु मन्दमतयो मम वृन्दशस्तद्दोषाय वा किमु भवेदथवा मुदे स्यात् ॥

विजयजयसमाख्यौ पूरुषौ हि त्रिलोकीचरितसमवगत्यै लोकसञ्चारकामौ ।

गुणतदितरजालग्राहिणौ तत्र चावः स्वसुकृतपरिपाकाच्छ्रीशभक्तो बभूव ॥

तत्र खलु निखिलजगदुदयविभवविलयनटनपटिमजटिलपरमपुरुषमहित-गरिमकथनविवशनिगममकुटसततमननसमधिगतसकलदिग्विजयो विजयः निष्प्र-त्यूहं निखिललोकसञ्चरणसम्पत्तये भगवन्तमापादचूडमभिध्यायति ।

ध्यायाम्यहं भगवतश्चरणारविन्दं संसारसागरसुमज्जनसज्जनानाम् ।

सन्तारणोचितदृढप्लवमुद्यदिन्दुसन्दोहसन्निभनखद्युतिभिर्विभान्तम् ॥

सञ्चिन्तयामि सततं पुरुषोत्तमस्य पादारविन्दमरविन्दभवादिवन्द्यम् ।

त्रय्यन्तयुग्मनिवहैः परिमृग्यमाणं दुर्दान्तमन्धतमसं नमतां धुनानम् ॥

**End:**

जयः—गङ्गा सभङ्गा जडधीष्टसङ्गा कपालिनोऽङ्गे कलितानुषङ्गा ।

सुरापगेति प्रथिता कथं तु तोष्टूयतेऽसौ भवता निकामम् ॥

विजयः—गुणत्वेनावस्थितानां दोषत्वेनाभिधानं भवतो मतिमान्द्यं व्यक्तमात्रं वा भवति ॥

---

## No. 12375. वैकुण्ठविजयचम्पुः.
## VAIKUNṬHAVIJAYACAMPUḤ.

Pages, 53. Lines, 22 on a page.

Begins on fol. 81*a* of the MS. described under No. 11618.
Incomplete.
Same work as the above.

---

## No. 12376. व्याघ्रालयेशाष्टमीमहोत्सवचम्पुः.
## VYĀGHRĀLAYEŚĀṢṬAMĪMAHOTSAVACAMPUḤ.

Substance, paper. Size, 8⅝ × 6⅞ inches. Pages, 57. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

A Campukāvya describing the festival celebrated on the 8th day of the dark fortnight of the Kārttika month in the Śaiva shrine at Vaikkam, a celebrated place in Travancore. On that occasion the image

of Subrahmaṇya is brought from a temple situated in a neighbouring village called Udayanapuram and placed in the shrine at Vaikkam, where the festival is celebrated in honour of both the Gods Śiva and Subrahmaṇya. The name of the author is not given.

**Beginning:**

शैलेन्द्रकन्याकुचकुम्भशुम्भत्कस्तूरिकाकर्दमपिच्छिलानि ।
व्याघ्रालयस्थानि भवन्तु भूत्यै तत्त्वावबोधद्रुमपल्लवानि ॥

वैदेहीपीनतुङ्गस्तनभरयुगलीगाढगाढाङ्कपाली-
केलीसम्मर्दमिश्रीकृतघुसृणलसच्चारुदोरन्तरालः ।
कौसल्याभाग्यसीमा वलमथनमणिश्यामलः कोमलाङ्गः
कश्चित्सच्चिन्मधूलीरसनवलहरीस्यन्दगन्धस्समिन्धे ॥

कामी वयं सरससूक्तिरसानभिज्ञाः कासौ पुनः पुरहरस्य महोत्सवोऽपि ।
नूनन्तदत्र परिहास्यजनेषु लब्धुं मूर्धाभिषेकमधुना परमुद्यतास्स्मः ॥

* * * *

अस्ति प्रशस्ततरनिस्तुलकीर्तिजालज्योत्स्नाकरम्बितसमस्तदिगन्तरालः ।
विद्याधरः सरसकाव्यरसप्रवीणसङ्गीतदेशिक इति प्रथितस्त्रिलोक्याम् ॥

स कदाचित् शृङ्गाररसतरङ्गिण्या सङ्गीतसुधारसपारावारपारीणया सकलकलाप्रवीणया वीणया विलसितकरपल्लवया सह वल्लभया पुरन्दरपुरं प्रति जगाम ।

* * * *

भगवन् इतस्ततः स्वच्छन्दमेव सञ्चरता मया विविधानि सुबहूनि च दृष्टानि श्रुतानि चाद्भुतानि । किन्तु सनकसनन्दनादिमहर्षिभिः सह संवदतो नारदस्य मुखात् यं व्याघ्रग्रामनाथस्य भवानीवल्लभस्य भगवतः अष्टमीमहोत्सवमश्रौषम् । तस्मादन्यन्न किञ्चिदद्भुततमं पश्यामि ।

स मूर्धा किमु नो येन व्याघ्रग्रामेश्वरो नतः ।
स पुमान् किन्नु यस्तस्य दृष्टवानष्टमीमहम् ॥

* * * *

अस्त्युत्तमः केरलभूमिभागे क्षेत्रं महाव्याघ्रपुराभिधानम् ।
जुष्टं विशिष्टैरनिशं प्रशान्तैस्सद्भिरसङ्ख्यैरवनीबुधानाम् ॥

* * * *

कदाचिदस्मिन् क्षेत्रे तुलामतिक्रम्य वर्तमाने भगवति भानुमालिनि शुक्लद्वादश्यां तिथावतिक्रान्ते मध्याह्ने दिवसे क्रमेण प्रतीचीं दिशमवतरति ।

* * * *

प्रातः प्रभूतपटमूलमहोत्सवानि मध्याह्नबद्धधरणीविबुधाशनानि ।
रात्रावपि प्रथितदीपमहोत्सवानि यातान्यहो दश दिनानि मनोहराणि ॥
ततश्च प्राप्तायामष्टम्यां तिथौ ।

* * * *

निजायतनाभ्यन्तरान्निर्जगाम भगवान्निखिललोकशङ्करः शिवशङ्करः ।

**End:**

इत्थं रसालकलिकान्तरमन्दमन्दनिःष्यन्दमानमकरन्दझरीधुरीणाम् ।
शृङ्गारकेतुतनयस्य गिरं निशम्य प्रीतिं जगाम परमां स पतिस्सुराणाम् ॥

**Colophon:**

इत्यष्टमीमहोत्सवकाव्यं सम्पूर्णम् ॥

---

No. **12377.** शङ्करानन्दचम्पुः.

ŚAṄKARĀNANDACAMPUḤ.

Substance, paper. Size, 8⅞ × 6⅞ inches. Pages, 214. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new. Breaks off in the fifth Ucchvāsa.

The subject-matter of this work is the combat, as in the plot of the Kirātārjunīya, between Śiva disguised as a mountaineer and Arjuna brought about by a dispute as to who hit a boar first, and the gift of the Pāśupatāstra by the former to the latter on account of his bravery and valour: by Guru-Svayambhunātharāma.

**Beginning:**

श्रीकण्ठस्नेहसर्वस्वनिधिं लम्बोदरं भजे ।
शिखावतंसशीतांशुलेखाभिज्ञानचीटिकम् ॥

* * * *

सुमेरुतृणतारोपे विद्यते यस्य वैभवम् ।
लघीयसीव मे वा(चं)गुरूकर्तुं स शक्नुते ॥

अस्ति समस्तवस्तुभुवनमहिमा हिमालयभुवा सविशेषभूषिता भोगः

* * * *

कैलासो नाम सानुमाली ।

आरब्ध यत्र हरवाहमहोक्षमोहाद्दण्डोपलं गगनवीथिषु नेतुकामः ।
आस्फालनोत्तरलहस्ततलस्सहासमालोक्यते च सममम्बिकया कुमारः ॥
परिहासरसाद्रूढः स्फाटिके यद्गृहाग्रहे ।
नाथो न ज्ञायते गौर्या कण्ठेकालो नचेदसौ ॥

* * * *

देवः कदाचिदनुरुध्य दिनादिकृत्यं तत्र स्वयं वितरितापि तपःफलानाम् ।
आस्थानमण्टपमिवापरमर्कबिम्बं शैलादिपाणिमवलम्ब्य शनैरयासीत् ॥

* * * *

तदा विनोदाय भवो भवान्यास्समाजनानां च सभाजनाय ।
सस्मार मायां निजरूपदीपच्छायां त्रिलोकीपुरशिल्पकारी ॥

तत्क्षणमेव देवदेवस्य भाववेदिनी सिद्धयोगिनीभूमिकामादाय पुरोबभूव

* * * * *

Colophon:

इति गुरुस्वयम्भुना(थरामकृतौ) शङ्करानन्दनाम्नि चम्पुकाव्ये प्रथमोच्छ्वासः ।

End:

पुरन्दरो मनोरथसंसिद्धिसाधनं महेश्वराराधनमादिश्यान्तरधात् ।

Colophon:

इति गुरुस्वयम्भुनाथरामकृतौ शङ्करानन्दनाम्नि चम्पुकाव्ये चतुर्थोच्छ्वासः ॥

जटाटव्या हंसो विधिरवधिमप्राप्य विधुरो
जिहीते पादाब्जंतपनसमयूखावलिनिभात् ।
पन(वत)स्तस्मै मौलिं स्फुटयितुमिव प्रागमिमतं
समानायोत्क्षिप्तं जयति तदिदं नाख्यलटहः (?) ॥
विधिवदथ बिडौजसो निदेशात् . . . . . . . .
पाण्डुसूनुर्महेश्वरपरिगृहीतसूकरो

* * * *

ततः प्रमोदाश्रुधारापूर्वमेव चन्द्रशेखरचरणारविन्दकृत(दत्त)चक्षुरिन्द्रियो महेन्द्रियः परमानन्दपरवशेन चेतसा मूर्च्छित इव मुहूर्तमात्मानमपि . . . . . . कृत्यान्तरं प्रतिबुध्य च किमप्यनुशशास पश्येन्द्रियं द्रष्टुं पुनरिन्द्रियाणि भवतां धापन . . . . . . . . . . . तपःफलवशात साक्षादिदं कल्पते ।

---

## No. 12378. शिवचरित्रचम्पुः.
## ŚIVACARITRACAMPUḤ.

Pages, 117. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 12384.

Breaks off in the third Āśvāsa.

A Campukāvya giving an account of Śiva and of his great and miraculous exploits and achievements. The first Āśvāsa describes the

vanquishment of Yama, the god of death, by Śiva to protect his devotee Markaṇḍēya on whom he ultimately conferred immortality. The second Āśvāsa gives an account of Śiva's swallowing the Kālakūṭa poison produced at the time of the churning of the ocean by the Dēvas and Asuras. In the third Āśvāsa, the destruction by Śiva of Dakṣa (the father-in-law of Śiva) and of the sacrifice performed by him is described. The author of the work is Kavivādiśēkhara. He salutes Kālidāsa, Kṣēmēndra and Haradatta and says that he came to write this work at the command of Śiva who appeared before him in a dream as an ascetic and bade him do so.

**Beginning:**

वन्दे वेतण्डवदनं यच्छुण्डा लीलयोद्धृता ।
ब्रह्माण्डमण्टपारम्भस्तम्भतां लभते क्षणम् ॥
वाणी ताण्डवमाचर्चा मल्लिह्वारङ्गमण्टपे ।
हृद्या यद्भ्रमिकालीला विद्या वेदपुरस्सरा(री) ॥

*　　*　　*　　*

श्रीकण्ठदर्शननिरूपणभाग्यलक्ष्मीसिंहासनप्रथमदेशिकनानिबद्धः ।
पट्टाभिषेचनविधिः प्रथितः पृथिव्यामेकाम्रनाथसविधेऽजनि यस्य काव्यम् ॥
तमादिशत्तापसवेषधारी स्वप्ने कदाचित्स्वयमेत्य शम्भुः ।
निजापदानैर्निखिलैरुपेतं प्रबन्धमेकं परिकल्पयेति ॥
तत इदमभिजातगद्यपद्यप्रतिपदपल्लवितप्रसादरम्यम् ।
अकृत स कविवादिशेखरोऽयं शिवचरितं रसभासुरं प्रबन्धम् ॥
प्रथमापत्यसौभाग्यं पार्वतीपरमेशयोः ।
भजे गजेन्द्रवदनं प्रत्यूहव्यूहशान्तये ॥

*　　*　　*　　*

कृतिने कालिदासाय क्रियते विनयाञ्जलिः ।
कवितामौक्तिकं यस्य त्रिलोकीतिलकायते ॥
क्षेमेन्द्राय कवीन्द्राय क्षेममाशास्महे वयम् ।
स्वादुना यत्कवित्वेन सुधास्तुतिविधा मुधा ॥
काव्येषु सुकुमारेषु काठिन्यं कुत्रचित् प्रियम् ।

*　　*　　*　　*

स जयति हरदत्तस्सर्वविद्याधिपत्ये पशुपतिवरदत्तो यस्य पट्टाभिषेकः ।
दिशि दिशि विततानां यद्यशोमञ्जरीणां परिमलपरिवाहे मज्जतीव प्रपञ्चः ॥

* * * *

प्रथममिह कालमथनकथा प्रस्तूयते—

आसीदाजन्मशुद्धानां नासीरो ब्रह्मवादिनाम् ।
मृगकण्डूयनपरो मृकण्डुरिति तापसः ॥

* * * *

तस्य शीलवती नाम समजायत गेहिनी ।
अरुन्धतीगुणश्लाघां न्यरुन्धच्चरितेन या ॥
स तया धर्मकान्तारलतया मुनिपुङ्गवः ।

* * * *

स मृकण्डोरपत्यत्वान्मार्कण्डेय इतीरितः ।
सद्वृत्तसलिलैस्समीपस्थैर्विद्वद्भिर्मुनिमण्डलैः ॥

**Colophon:**

इति कविवादिशेखरकृतौ शिवचरिते मार्कण्डेयपरित्राणकालमथनकथा समाप्ता ॥

अथेदानीमीश्वरस्य कालकूटकबलनकथा प्रस्तूयते—

पुरा पुराणपुरुषं पुरोधाय सुरासुराः ।
ममन्थुर्वाहिनीबन्धुं दुग्धसिन्धुं सुध(धा)शया ॥

* * * *

**Colophon:**

इति कविवादिशेखरकृतौ शिवचरिते कालकूटहरणं नाम द्वितीयाश्वासः ॥

**End:**

अथेदानीं दक्षाध्वरध्वंसकथा प्रस्तूयते—

पुरा खलु पुरातनस्त्रिभुवनभवनशिल्पकारः कल्पादौ कतिपयभूतकलासृष्टिः परमेष्ठी.

* * * *

वदन्ति(न्तु)देवा यदि वा तथा परे मखेषु रुद्रं न वयं यजामहे ।
इयं प्रतिज्ञा मम येऽभ्यसूयिनो (दहामि तानाशु) तपोमयाग्निना ॥
इति गदितवति गर्वरूक्षे दक्षे त्र्यक्षगणाध्यक्षोऽपि पुनरेवमवोचत् ।
रे रे दक्षमहेश्वर . . यजसे यज्ञेश्वरं दूषय
वेदोक्तानवमत्य . . . . . . . राहताम् ।
तां यज्ञं च सहार्त्विजा वधमीहावहे
ब्रह्मा विष्णुरथापरे सर्वे च . . . . . . . ॥

## No. 12379. सन्तानगोपालप्रबन्धः.
## SANTĀNAGŌPĀLAPRABANDHAḤ.

Pages, 9. Lines, 8 on a page.

Begins on fol. 23a of the MS. described under No. 11832.

Incomplete

When Kṛṣṇa performed the Aśvamēdha sacrifice, a certain Brahmin who had already lost eight children came to Kṛṣṇa with the dead body of his ninth son and lamented before him Thereupon Lord Kṛṣṇa is said to have taken pity on the poor man and restored back to him his dead children. This is the substance of this Campu work.

**Beginning:**

श्रीमानामोददायी निजचरणजुषां नृत्यदम्भोधिकन्या-
भास्वत्पादाम्बुजालङ्कृततरलतुलाकोटिवाचालितायाम् ।
ख्यातायां द्वारकायामथ तनयसुहृज्ज्ञातिसङ्घैरसङ्ख्यैः
संयुक्तो वासुदेवश्चिरतरमवनीं पालयन् स न्यवात्सीत् ॥

अथ कदाचि . . . . जितमोदमानसैश्चातुर्वर्ण्यजनैस्समावृते तस्मिन् पुरवरे अश्वमेधोद्यमभानसे च जनार्दने कश्चन महीसुरः निजगृहिण्या अनुवत्सरं प्रसूतेष्वष्टसु कुमारेषु दिष्टवशान्मृतेषु च नवसम्भूतडिम्भशवशरीरमादायानेकयादवप्रकरसम्पूरितायां यादवसभायामास्थितस्य भगवतो मधुसूदनस्य पुरतो विधाय सोरस्ताडनं साधिक्षेपमिदमभ्यभाषत ।

**End:**

परमपुरुषमवलोक्य सुन्दरतरमन्दहासमयूखशिशिरितसकलावयवौ वासुदेवकुरुनन्दनौ मुहुर्मुहुः प्रणम्य प्रमदभरतरङ्गितमानसौ बभूवतुः ।

---

## No. 12380. आचार्यदिग्विजयम्.
## ĀCĀRYADIGVIJAYAM.

Pages, 132. Lines, 8 on a page.

Begins on fol. 4a of the MS. described under No. 9010, wherein it is given as Śaṅkarācāryavijaya in the list of other works.

Breaks off in the seventh Kallōla.

This work gives in prose and verse the biography of Śaṅkarācārya. By Vallisahāyakavi of Vādhūlagōtra. He mentions Ānandagiri and Vidyāśaṅkara. A leaf at the end contains eulogistic stanzas on the successive pontiffs of the Śṛṅgēri Mutt.

**Beginning:**

जटाबन्धोदञ्चच्छशिकरहृताज्ञानतमसे जगत्सृष्टिस्थेमक्षपणकलनस्फारयशसे ।
वटक्ष्मारुण्मूलप्रवणमुनिविस्मेरमनसे नमस्तस्मै कस्मैचन भुवनमान्याय महसे ॥

किञ्च—

वैयाघ्रीं त्वचमाकलय्य चकिते वैनीतके त्वङ्गति
व्यत्यस्तान् परितस्तनुं परिकरानीशे समीकुर्वति ।
मन्दोदञ्चितहासभाधवलिमप्रध्वस्ततत्साध्वसं
सव्याङ्गं सवहर्तुरस्तु महते नव्याय भव्याय नः ॥
प्रत्यूहप्रतिषिद्धोक्तिकविप्रत्ययदायिने ।
पुञ्जाय महसां तस्मै कुञ्जराय मुखे नमः ॥
आकर्षन्वनदुर्गया जिगमिषुं यस्त्वां विजित्यादरात्
श्रीमच्छृङ्गगिरिं तवाम्ब विदधे लीलाविहारस्थलीम् ।
श्रुत्वा भारति तस्य दिग्जयकथासन्दर्भगर्भं यशः
प्रस्तोतुं मितबुद्धयोऽद्य भवतीसाहाय्यमीहामहे ॥
श्रीमच्छङ्करसद्गुरोर्भगवतोऽगाधामसाधारणीं
वाणी नः प्रतनीयसी मुहुरिमां गाढुं समुत्कण्ठते ।
तन्मूर्तिः प्रभुरेव भक्तजनतावात्सल्यवैपुल्यभू-
रस्यै साधु ददातु शस्तदयया हस्तावलम्बं हरः ॥
तनवानि चिरन्तनोक्तिकोटिस्फुटतत्त्वानुभवाप्तसंश्रयाय ।
गुरुदिग्जयमार्गदर्शिनेऽस्मै नतिमानन्दगिरीन्द्रदेशिकाय ॥
विद्याशङ्करहृद्यसद्गुणभरैराप्यायितेयं भवे-
न्मद्वागप्यनवद्यविद्वदतुलानन्दौघसन्दायिनी ।
पाथः प्राकृतकूपनद्युदितमप्यध्वन्यपङ्क्तेः पुनः
किं वा नैषदुग्धीरचन्द्रसुमनस्सङ्गेन तुङ्गायते ॥
करवाणि देवि चरणाभिवादनं करुणाबलेन तव वाणि साधु मे ।
यतिसिंहदिग्जयविलासगर्जितेष्वतिसिंहविभ्रममुशन्तु सूरयः ॥
शुण्डाकुम्भयुगी परं नखचरप्रौढी ममाप्राकृता
वर्वर्त्यत्र कियान्करीति मशकव्याहारमल्पयन् ।
प्राचीनाः कविकुञ्जरा इव नटन् जिह्रेमि नैवाधुना
तूष्णीके मयि तस्य हस्तिमशकन्यायस्य का वा गतिः ॥
जम्बूद्वीपमहोक्षमण्डनककुत्तुङ्गं धराकामधुक्
शृङ्गं मङ्गलमङ्गलं किमपि तच्छ्रेयःपदं योगिनाम् ।

मृतेशस्य विहारभूमिरतुला काप्यस्ति वाचामभूः
प्राचामप्यतिवेलंनैजगरिमा कैलासनामा गिरिः ॥

यः किल जगति सौवर्गविषयपरवशनिर्जरवर्गनिरर्गलसुखभरनिशमनक्षणातिसंहितबुद्धिभिरभिसन्धिमत्कर्मततिनिर्माणसुदूरोर्मिलप्रशस्तिभिरप्राकृतचर्मदेहैः कर्मदेवैः

वाधूलगोत्रमहनीयगुहान्तरोद्यद्वल्लीसहायकविसिंहमुखोदितेऽस्मिन् ।
आचार्यदिग्विजयसंज्ञमहाप्रबन्धे कोलाहलोऽयमुदभूत्प्रथमः प्रथीयान् ॥

* * * *

**End:**

**Colophon:**

इति षष्ठः ॥

काञ्चीविश्लथबुद्धेः प्राञ्च्यपि नश्यन्ति तस्य सुकृतानि ।
काञ्चीविश्लथनाल्लागुर्व्यामुदितो न किन्नरकः ॥

अधिकाञ्चि काञ्चिदुपजग्मुषरिमामाधिकाञ्चिताकृतिरकिञ्चनाश्रया ।
श्रितकामकोटिरुचन्मथुद्विषो हृतकामकोटिसुषुमस्य सोदरी ॥

* * * *

गुरुशिष्यौ समुपासे श्रीमन्नरसिंहभारतीसंज्ञौ ।
अनयोः सधर्मणोरप्यभिनवविख्यातिरस्य शिष्योऽभूत् ॥
जीयाद्विशुद्धिभूम्नामाचार्याणां परम्परायां नः ।
श्यामलतारुचिरगले समर्पिता मालिकेव मुक्तानाम् ॥

The following is a brief summary of the contents of the work :—

God Śiva on being requested by the gods to lessen the wicked practices of the world, promised to them that he would incarnate as a man and was born as the son of Vidyādhirāja in the village of Kālaḍi in Malabar. After the death of his father which occurred in his seventh year, his mother performed to the orphan the ceremony of Upanayana. The boy showed signs of his future greatness and mastered in his eighth year all departments of knowledge. One day, when he was bathing in a river a crocodile caught hold of him and on the boy making up his mind to enter the ascetic order of life he got out of its grip. At the village of Puṇḍarika, he was formally initiated into the holy order by the ascetic Gōvinda.

From that place, after commenting on the Śārīrakasūtras of Vyāsa he started on a mission of propogandism round the world with the following pupils :—

1. Ānandagiri.
2. Padmapāda.
3. Hastāmalaka.
4. Cidvilāsaśuddhānanda.
5. Jñānakanda.
6. Visnudarśanabuddhi.
7. Viṣṇugupta.
8. Samitpāṇiśuddhākṛti.
9. Vṛddhaviriñcin.

He visited the following places and defeated the undermentioned religionists headed by their chief and performed similar great exploits :—

I. Madhyārjunakṣētra—God Śiva proclaimed in person the truth of the Advaita philosophy at the request of the Guru.

II. Rāmēśvarakṣētra—Śaṅkarācārya defeated the Śaiva chief named Vidvēṣivira and his pupils and followers.

III. Anantaśayanakṣētra—He converted six persons—

1. Viṣṇuśarman,
2. Brahmagupta,
3. Vipradēva,
4. Śārṅgapāṇi,
5. Mādhava,
6. Vyāsadāsa,

who, respectively, belonged to the following sects—

1. Bhakta.
2. Bhagavata.
3. Vaiṣṇava.
4. Pāñcarātra.
5. Vaikhānasa
6. Karmahīna.

IV. Subrahmaṇyakṣētra, near the sacred river Kumāradhārā—Here he defeated—

1. Jagadvidhi,
2. Hōmavidhi,
3. Saura,
4. Divākara,
5. Suhōtra,
6. Vītihōtra,

and made them the followers of the Advaita School of the Vēdānta.

V. Guṇapuram—Gāṇapatas were defeated.

VI. Bhavānīpura.

VII. Kuvalayapura—Sārasvatas and Sāvitras and worshippers of Lakṣmī were vanquished.

VIII. Ujjain—Vaṭukanātha, the chief of the Kāpālikas, was convinced and became a convert to Śaṅkarācārya's religion.

IX. Anumalla—Followers of Mallāri were converted into Advaitins.

X. Varuthapuri—The followers of Manmatha were met.

XI. Arthapura—The followers of Kubēra were defeated.

XII. Indraprastha—The followers of Indra headed by Bhadrahari were defeated.

XIII. Dharmaprastha—Sun-worshippers were vanquished

XIV. Prayāgakṣētra—The Nirālambas, Lakṣmana, the worshipper of Varāha and the followers of the Sāṅkhya and the Yōga were all defeated and converted.

XV. Kāsī (Vārāṇasī)—Śivābharana, the worshipper of the Moon, and Pūrṇasamaya of Ujjain were vanquished. Vyāsa was seen in the form of an old man and was made to attest the truth of the philosophy of the Jagadguru. He composed Sarvamaṅgalastavarāja and Liṅgapañcaka.

XVI. Kēdārakṣētra—Established the Muktiliṅga.

XVII. Badarī—Created a hot water river.

XVIII. Dvārakā—Another Liṅga was instituted.

XIX. Ayōdhyā.

XX. Gayā.

XXI. Buddha—Kumārilabhaṭṭa, an incarnation of Subrahmaṇya, was met.

XXII. Magadha—Maṇḍanamiśra, the supporter of the Karma doctrine, and his wife Sarasā were defeated by Śaṅkarācārya who learnt the science of love by entering the body of a dead prince of Amṛtanagara.

XXIII. The Tuṅgabhadrā, near the mountain Ṛṣyaśṛṅga—Here he built a Mutt where he established a third Liṅga and placed Bhāratī on a Yantrapītha; and Surēśvarācārya was appointed to worship them there.

XXIV. Vṛṣācala, Vēṅkaṭācala—Established the Dhanākarṣaṇacakra.

XXV. Kāñcī—Built the shrines of Ēkāmra and Kāmākṣī and placed the Śrīcakra in the shrine of Kāmakōṭi; also worshipped the Varadarājakṣētra.

Here the manuscript ends

---

## No. 12381. आनन्दरङ्गविजयचम्पुः.
## ĀNANDARAṄGAVIJAYACAMPUḤ.

Pages, 102. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 2580.

Complete in eight Stabakas.

A Campukāvya describing the leading incidents in the life of Ānandaraṅgam Piḷḷai of Pondicherry, chief dubash to Dupleix. The author of the work is Śrīnivāsakavi, son of Pārvatī and Gaṅgādhara of Śrīvatsagōtra. The diaries of Ānandaraṅgam Piḷḷai have been translated and issued in four volumes. The names of a number of kings and the predecessors of Ānandaraṅgam Piḷḷai are mentioned.

**Beginning :**

विघ्नेशो विश्वमव्यात्कलमकुवलये पाशपद्मे विषाणे
वामे दण्डेक्षुचापौ त्रिशिखमर(वि) वह्नबीजपूरं च दक्षे ।
संक्षिप्यन् सिद्धलक्ष्मीं मणिनिधिकलशप्रोल्लसत्तैजशुण्डः
प्रोद्यद्भास्वत्सहस्रप्रतिभटतनुरुक् तुन्दिलश्चन्द्रचूडः ॥

* * * *

नालं विलोकितुमभूत्पतिरिन्दिराया यत्पादपङ्कजमजोऽपि यदुत्तमाङ्गम् ।
शोणाचलाख्यममलं करुणालयं मे ज्योतिः पुरः स्फुरतु निस्तुलमप्रमेयम् ॥
वाग्देवता लसतु मे रसनाग्रभागे सूक्तिश्रियै विमलसूनृतदिव्यरूपा ।
यद्वैखरीविलसितैर्भुवनेषु सर्वे जीवन्ति सन्ततमुदारगुणा मनुष्याः ॥
श्रीकान्तदिव्यपदपद्ममिलिन्दचित्तः श्रीश्रीनिवासविबुधस्तु मुदे बुधानाम् ।
सानन्दमुल्लसितसर्वरसानुबन्धमानन्दरङ्गविजयं तनुते प्रबन्धम् ॥
गङ्गाधराध्वरिसुधाब्धिसुधाकरेण श्रीश्रीनिवासकविना विनयान्वितेन ।
उत्सार्य मानसिकमत्सरतां महान्तः प्रीताः कृतां कृतिमिमामवलोक्य सन्तु ॥

अत्र खलु जगति दुर्वारनिरवधिकभुजबलनिर्वापितसुपर्वगर्वैः सर्वेतरपराक्रमाक्रान्तनिश्शेषवसुन्धराधीश्वरमत्तदन्तावलघटोन्नत(त)दीयमकुटतटकुम्भस्थलीसलिलविदारणपटुतरदारुणदम्भोलिक(टु)तरतीक्ष्णहर्यक्षकुटिलनखरायमाणशितशिखशिलीमुखैः कृतमुखैः

* * * *

नन्द किं तव मनोऽभिवाञ्छितं तद्ददामि वद तात मा चिरम् ।
वाहितत्रिदशबालशालिका मत्कृपा हि महतां महीयसी ॥
श्रीजाने मामकीने त्वमवतर कुलेऽथैव भूयस्त्वकीयै-
रंशैर्मुख्यैरभीक्ष्णं प्रबलरिपुमहावंशदावैरुदारैः ।
भक्तिर्मे नित्यदा स्ताच्चरणकमलयोर्यां तरीकृत्य जन्तुः
दुष्पारं दुःखसारं तरति गतभयः क्रूरसंसारवार्धिम् ॥
इतीरितं तेन वचोऽवकर्ण्य तन्मुरारिरूचे तव तात सन्ततौ ।
तदा तदा दुर्यवनान् प्रशासितुं कृतावतारो भविताविदुं सतः ॥
नन्दगोपनृपतिर्बहुभिस्स्वैर्नन्दनैरथ धृतागमसत्त्वैः ।
दानवारिपरिपूर्णकरः स्वं स्वःपतिं स्फुटममन्यत क्षुभ्यन् ॥

किञ्च—

अत्रौकसः केचन तत्कुलीना महौजसोऽदभ्रमहीप्रसाराः ।
मञ्जीरवार्ध्या च मणीतटाके निजोत्तमाङ्गे व्य(न्य)वसन्नुदाराः ॥

अयनपुरमयातीतेषु कश्चिद्यशस्वी नयविनयदयाधीसूनृतौदार्यधन्यः ।
सुरनरभुजगानां विष्टपान्तर्निविष्टा जयति महितकीर्तिर्यस्य गोविन्दनाम्नः ॥

* * * *

बभूव तनयस्ततो विजयनन्दनो नामतः सुभूषिततनू रतेः प्रिय इवाभिरूपाकृतिः ।
स्वभूरिव विभूतिमान् विबुधपद्मपद्मप्रियः प्रभूतगुणभूर्भुवः प्रभुरुदारशक्तिस्सुधीः ॥

स च कदाचिदुन्मुक्तशैशवः सवयोभिः गोपकुमारैस्सङ्क्रीडमानो विजयनन्दनो नन्दनन्दन इव गोविन्दनन्दनः प्रभूतयवसोदकं सकौतुकं कश्चिदपि वनोद्देशमवगाह्य गाश्चालयन् अद्भुतशीलः परमखिलभूमण्डलविश्रुतैरधिगतसर्वश्रुतैः व्याकृतसर्वश्रुतिभिः श्रुत्यन्तदेशिककवितार्किककेसरिसतीर्थ्यैः

* * * *

विद्यारण्यनामभिराचार्यवर्यैस्तूर्णमभ्यर्णमुपागतां

* * * *

परिगतभद्रातरङ्गिणीझरीं सुभगङ्करीं विजयनगरीं प्रमुदितैस्साम्राज्यपदाभिषिक्तं पदानतनिश्शेषविश्वम्भरेश्वरश्चिरमुर्वीं धर्मतः पालयामास ।

* * * *

भो भो गोविन्दसूनो निरुपमयशसः पञ्चपञ्चाभिरूपाः
भूपाः पञ्चेषुभूया(ता)स्सकलनृपनुतास्संभविष्यन्ति वंशे ।
कश्चिच्चेटीतनूजस्तदनु पदमिदं कृष्णरायाभिधान-
श्रेष्ठान् पञ्चाग्रजातान् प्रसभमुरुबलो निर्णुदन् प्राप्स्यतीड्यम् ॥
ते तु रामादयः पञ्च शूरा वीरनृसिंहजाः ।
सामन्तराजतां प्राप्य निवत्स्यन्ति चिरं भुवि ॥
रामरायाभिधो यस्तु त्वत्त एकादशो नृपः ।
स एव वंशकर्ता ते भविष्यति महायशाः ॥
इदमाकर्ण्य वचनं विद्यारण्यगुरोर्मुखात् ।
हृष्टः शुश्रूषमाणस्तमासीद्विजयनन्दनः ॥

* * * *

**Colophon:**

इति श्रीवत्सकुलतिलकायमानश्रीगङ्गाधराध्वरिसुधाब्धिसुधाकरेण श्रीपार्वतीगर्भसम्भवेन श्रीनिवासकविना विरचिते श्रीमदानन्दरङ्गविजये चम्पुकाव्ये प्रथमस्तबकः ॥

तत्र च सन्ततौ सन्ततगोत्राभरणनिपुणतरमल्वाहामण्डल

* * * *

श्रीरामचन्द्राम्बदेवराजशेखरचोले(न्द्र)नृसिंहरामचन्द्रलाङ्गूलगजपतिगरुडदेवाच्युतदेववीरनृसिंहरामदेवतिरुमलश्रीरङ्गवेङ्कटपतिहेमन्तकृष्णरायप्रभृतिभिः महात्मभिरलङ्कृतायां श्रीरामदेवरायतनूजस्य निजजनकाधिष्ठितं चन्द्रगिरिनामनगरमपहाय कारणान्तरवशात् स्वकुलकूटस्थेन नन्दगोपवंशस्थूलमुक्ताफलेन विजयनन्दनजनकेन गोविन्दगोपाभिधानेनाध्यासितपूर्वमयनाभिधानं पुटभेदनं प्रासवतः

* * * *

गर्भधारक इति कृताभिधानो मनीषिभिः धिषण इव कुशलशेमुषीनिधिः सुधीराविरासीत् ।

* * * *

पञ्चशर इव रतिं कुसुमाकरनन्दिनीं लक्ष्मीं परिणीय

* * * *

बभूवुस्तनयास्तस्माल्लक्ष्म्यां त्रेतासमौकसः ।
चोलयः प्रथमस्त्वन्यावुत्तरश्रीधराह्वयौ ॥
अलमेलुमङ्गनाम्नीमुपयेमे चोलयाख्यनृपवर्यः ।
अजनि तयोस्सुकुमारो बोम्मयनामा कुमार इव शिवयोः ॥
जनयति पाणिगृहीती बोम्मयनृपतेस्स्म दारकद्वितयम् ।
निर्जितदस्रं पत्या नयनाभिख्याक्रमेण समनामा ॥

* * * *

षडजायन्त तनयास्तस्य बोम्मयभूभुजः ।
वसन्ताद्यास्सुमनसामामोदाय यथर्तवः ॥
बोम्मयो नयनः कृष्णो वर्धमानश्च नामभिः ।
मण्डिताः पुण्डरीकाक्षो रामो लक्ष्मण इत्यपि ॥

* * * *

ततः शुभे सा समये सुगाक्षी धृतव्रतोर्वीकुशलोदयाय ।
श्रीवेङ्कटक्षोणिपतेरुदारा सुलक्षणा गर्भमधत्त लक्ष्मीः ॥

* * * *

विजयेन परं विरोधिनां ध्रुवमानन्दमसावुपेष्यति ।
अचिरङ्गमिति स्म शोभनं तनुते नाम तदेव तत्पिता ॥

**End:**

वरकविकुलमौलिस्फारमाणिक्यकान्तिवुमणिकिरणपुञ्जप्रोल्लसत्पादपद्मम् ।
निखिलनिगममूर्तिः स्फूर्तिरीशस्य साक्षाज्जयति जगति तातो यस्य गङ्गाधरार्यः ॥
आनन्दरङ्गविजयस्सा . . . . . . . दैवगणितेषु ।
तिष्याब्देषु गतेषु ग्रथितः श्रीश्रीनिवासविबुधेन ॥

**Colophon:**

इति श्रीवत्सकुलतिलकायमानश्रीगङ्गाधराध्वरीन्द्रसुधाब्धिसुधाकरेण श्रीपार्वतीगर्भसम्भवेन श्रीनिवाससूरिणा विरचिते श्रीमदानन्दरङ्गविजये चम्पुकाव्ये अष्टमस्तबकः ॥

मङ्गलायतनसर्वमङ्गलानायकस्त्रिदिवनायकार्चितः ।
भक्तचित्तकृतनित्यसन्निधिर्मङ्गलं दिशतु मङ्गलेश्वरः ॥

* * * *

इदं चम्पुकाव्यं ग्रन्थसङ्ख्या सप्तशताधिकसहस्रम् ॥

---

## 8. GADYAKĀVYAS.

---

### No. 12382. कादम्बरी.
### KĀDAMBARĪ.

Substance, (Śrītāla) palm-leaf. Size, $19\frac{1}{2} \times 1\frac{7}{8}$ inches. Pages, 242. Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete with the Pūrva and the Uttara Bhāgas.

A well-known romance describing in prose the union of two lovers Kādambarī, the heroine, and Candrāpīḍa, after a series of repeated births. The story is put by the author in the mouth of a parrot Vaiśampāyana by name which relates it to Śūdraka, King of Vidiśa; and it is an involved one interwoven with many episodes. It is divided into two parts, the Pūrvabhāga and the Uttarabhāga, the latter part being a continuation by Bāṇa's son of the story left unfinished by the father. The colophon at the end attributing the Uttarabhāga also to Bhāṇa is apparently wrong. This MS. does not give the introductory stanzas in the beginning which gives his genealogy. A critical edition of the work has been published in the Bombay Sanskrit Series.

**Beginning :**

(या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैस्सदा पूजिता
सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा ॥)

आसीदशेषनरपतिशिरस्समभ्यर्चितशासनः पाकशासन इवापरः चतुरुदधिवेलामेखलाया भुवो भर्ता प्रतापानुरागावनतसमस्तसामन्तचक्रश्चक्रवर्तिलक्षणोपेतः चक्रधर इव करकमलोपलक्ष्यमाणशङ्खचक्रलाञ्छनः हर इव जितमन्मथः गुह इवाप्रतिहतशक्तिः

* * * *

धैरेयस्साहसिकानामग्रणीर्विदग्धानां वैनतेय इव विनतानन्दजननो वैन्य इव चापकोटिसमुत्सारितारातिकुलाचलो राजा शूद्रको नाम बभूव ।

* * * *

यस्य च राज्ञः परलोकाद्भयमन्तःपुरिकालकेषु भङ्गो नूपुरे

* * * *

पवित्रयन्त्या वेत्रवत्या सरिता परिगता विदिशा नाम नगरी राजधान्यासीत् ।

**End :**

स्वयमागच्छामीति स्त्रीचापलमनु(तन्य)रक्तोऽयं (परि)जन इति स्वयं भक्तिनिवेदनालापलाघवं प्रत्याख्यानशङ्कया न सन्दिशामीति अप्रबुद्धबोधनमनपेक्षितानुजीविदुःखदारुणा स्वामिति अतिप्रणयिता ज्ञास्यसि मरणेन प्रीतिमित्यसंभाव्यमेव ॥

**Beginning** of the Uttarabhaga :

(सारस्वताब्धिः किं चित्रमत्र बाणमुखं गतः ।
रामबाणमुखं पूर्वं गत एव पयोनिधिः ॥)
देहद्वयार्धघटनारचितं शरीरमेकं ययोरनुप(ल)क्षितसन्धिबन्धम् ।
वन्दे सुदुर्घटकथापरिशेषसिद्ध्यै सृष्टेर्गुरू गिरिसुतापरमेश्वरौ तौ ॥

* * * *

गङ्गां प्रविश्य भुवि तन्मयतामुपेताः स्फीतास्समुद्रमितरा अपि वीक्ष्य यान्ति ।
आसिन्धुगामिनि पितुर्वचसां प्रवाहे क्षिप्ता कथानुघटनाय मयापि वाणी ॥

* * * *

कादम्बरीरसभरेण समस्त एव मत्तो न किंचिदपि चेतयते जनोऽयम् ।
भीतोऽस्मि यन्न रसवर्णविवर्जितेन तच्छेषमात्मवचसाप्यनुसन्दधानः ॥

* * * *

अपिचेदानीमानीतस्यापि कुमारस्य न ददाति तर(ल)तालजिता लज्जैव दर्शनम् । मनोभवविकारवेदनाविलक्षं वैलक्ष्यमेव न पुन(र)स्तिष्ठति । अप्रतिपत्तिसाध्वसजडा मि(ज)डतैव नोपसर्पति । स्वयमङ्गीकरणलघुलाघवेमेव तद्प्रतिपत्तिस्थैर्यं नावलम्बते ।

**End:**

कदाचिदमृतपरिमलादि(धि)वाससुरभिशिशिरसर्वत्र(प्र)देशहारिणि रोहिणीबहुमानेन चन्द्रालोके कदाचिदहर्निशोत्फुल्लसहस्रपत्रामोदवाहिनि पुण्डरीकप्रीत्या लक्ष्मीनिवाससरसि कादम्बरीरुच्या च सर्वत्रैवापरेष्वपि रम्यतरेषु तेषु तेषु स्थानेषु तया सह जन्मद्वयाकाङ्क्षयैवापरिसमाप्तान्यपुनरुक्तानि च तानि तानि न केवलं चन्द्रमाः कादम्बर्या सह कादम्बरी महाश्वेतया(महाश्वेता तु पुण्डरीकेण सह)पुण्डरीकोऽपि चन्द्रमसा सह परस्पराभियोगेन सर्व एव सर्वकालं सर्व(र्वे)सुखान्यनुभवन्तः परां कोटिमानन्दस्याध्यगच्छन् ॥

**Colophon:**

बाणकविविरचिता उत्तरकादम्बरी समाप्ता ॥

---

## No. 12383. कादम्बरी.

### KĀDAMBARĪ.

Substance, palm-leaf. Size, 19¾ × 1½ inches. Pages, 240. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

---

## No. 12384. कादम्बरी.

### KĀDAMBARĪ.

Substance, paper. Size, 11⅝ × 7¾ inches. Pages, 292. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

Written on one side of paper.

Contains the Uttarabhāga complete; but the colophon is omitted.

Same work as the above.

---

## No. 12385. कादम्बरी.

### KĀDAMBARĪ.

Substance, paper. Size, 12¾ × 8 inches. Pages, 126. Lines, 21 on a page. Character, Dēvanāgarī. (Neatly written.) Condition, good. Appearance, new.

Contains the latter part composed by Bāṇabhaṭṭa's son.

Same work as the above.

---

## No. 12386. कादम्बरी.

### KĀDAMBARĪ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 172. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the latter part complete.

Same work as the above.

Copying was finished on Sunday, the second day of Phalguna-Śukla, in the year Vikṛti, by Pōrōṭi Kāśirāju from the original of Rāja Cintapaṭla Veṅkaṭrāyan.

---

No. 12387. कादम्बरी.

KĀDAMBARĪ.

Substance, paper. Size, $11\frac{3}{8} \times 5\frac{1}{4}$ inches. Pages, 284. Lines, 13 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Contains the Uttarabhāga complete.

Foll. 2 to 15 are lost.

Same work as the above.

---

No. 12388. कादम्बरी.

KĀDAMBARĪ.

Substance, paper. Size, $12\frac{3}{4} \times 7\frac{1}{8}$ inches. Pages, 24. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Pūrvabhāga only.

Same work as the above.

---

No. 12389. कादम्बरी.

KĀDAMBARĪ.

Substance, palm-leaf. Size, $18\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 428. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the Pūrvabhāga only.

Same work as the above.

Copying was finished on Wednesday, the 11th day of Māgha-Śukla of Hēvilambin.

**Colophon:**

इति श्रीकविचक्रवर्तिनो भट्टबाणस्य कृतिरियं पूर्वकादम्बरी समाप्ता ॥

---

No. 12390. कादम्बरी.

KĀDAMBARĪ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 186. Lines, 9 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Contains the Pūrvabhāga only.

Same work as the above.

## No. 12391. कादम्बरी.
## KĀDAMBARĪ.

Substance, palm-leaf. Size, 12½ × 1¾ inches. Pages, 154. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, new.

Contains the Pūrvabhāga incomplete.

Same work as the above.

---

## No. 12392. कादम्बरी.
## KĀDAMBARĪ.

Substance, palm-leaf. Size, 15½ × 1¾ inches. Pages, 197. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the Uttarabhāga complete.

Same work as the above.

---

## No. 12393. कादम्बरी.
## KĀDAMBARĪ.

Pages, 214. Lines, 19 on a page.

Begins on fol. 69a of the MS. described under No. 11886.

Contains the latter portion complete.

Fol. 69a contains a note in C. P. Brown's handwriting: "This copy of the Uttarakādambarī was made from a manuscript discovered at Masulipatam. I am informed that there is also a copy of this at Chōlangipuram (in Chittoor) in the possession of Traye Murti Candalla Singara Chari; likewise at Maddagiri (near Seringapatam in the house of Maddagiri Rāma Śāstri: and likewise of "Nelavangalam Tippa Śāstri in the same village. But I do not altogether credit this information which was only given me after I had gained the book by a Brahmin who for a year before had known my anxiety to get the book".

Same work as the above.

---

## No. 12394. कादम्बरी.
## KĀDAMBARĪ.

Substance, palm-leaf. Size, 16 × 1¾ inches. Pages, 344. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the first part complete; but in the beginning 39 leaves are lost.

Same work as the above.

The scribe adds:—

प्लवङ्गमाब्दे लिखितोऽयमासीत्पूर्णः प्रवीणेन तु साम्बनाम्ना ।
कोशो महाबाणकवेरुदारः कादम्बरीत्येव कृताभिधानः ॥

## No. 12395. कादम्बरी.

## KĀDAMBARĪ.

Substance, palm-leaf. Size, 16⅞ × 1¼ inches. Pages, 98. Lines, 8 on a page. Character, Nandināgari. Condition, injured. Appearance, old.

Contains the first part incomplete.

Same work as the above.

---

## No. 12396. कादम्बरी.

## KĀDAMBARĪ.

Substance, palm-leaf. Size, 17⅜ × 1¼ inches. Pages, 120. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the first part incomplete.

Same work as the above.

---

## No. 12397. दशकुमारचरितम्.

## DAŚAKUMĀRACARITAM.

Substance, paper. Size, 11¼ × 5½ inches. Pages, 234. Lines, 10 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, new.

Contains the first Ucchvāsa complete and the second incomplete in the Pūrvapīṭhikā, and one to eight Ucchvāsas in the text.

A well-known prose romance narrating the adventures of Rājavāhana, son of Rājahaṁsa, King of Magadha, and of his nine companions: by Daṇḍin, who is considered to be the same as the author of the Kāvyādarśa.

The following subjects are dealt with in the Pūrvapīṭhikās and th text:—

| | |
|---|---|
| १. कुमारोत्पत्तिः. | १. राजवाहनचरितम्. |
| २. द्विजोपकृतिः. | २. अपहारवर्मचरितम्. |
| ३. सोमदत्तचरितम्. | ३. उपहारवर्मचरितम्. |
| ४. पुष्पोद्भवचरितम्. | ४. अर्थपालचरितम्. |
| ५. अवन्तीसुन्दरीपरिणयः. | ५. प्रमतिचरितम्. |
| | ६. मित्रगुप्तचरितम्. |
| | ७. मन्त्रगुप्तचरितम्. |
| | ८. विश्रुतचरितम्. |

**Beginning:**

ब्रह्माण्डच्छत्रदण्डश्शतधृतिभवनाम्भोरुहो नालदण्डः
क्षोणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः ।
ज्योतिश्चक्राक्षदण्डस्त्रिभुवनविजयस्तम्भदण्डोऽङ्घ्रिदण्डः
श्रेयस्त्रैविक्रमस्ते वि(त)रतु विबुधद्वेषिणां कालदण्डः ॥

अस्ति समस्तनगरीनिकषायमाणा शश्वदगण्यपण्यविस्तारितमणिगणादिवस्तुव्याख्यातरत्नाकरमाहात्म्या मगधदेशशेखरीभूता पुष्पपुरी नाम नगरी । तत्र

* * * *

सतततुलितवियन्मध्यहंसो राजहंसो नाम घनदर्पकन्दर्पसौन्दर्यसोदर्यनिरवद्यरूपो भूपो बभूव । तस्य वसुमती नाम सुमती लीलावती कुलशेखरमणी बभूव ।

* * * *

**Colophon:**

इति दण्डिनः कृतौ दशकुमारचरिते कुमारोत्पत्तिर्नाम प्रथमोच्छ्वासः ॥

**End:**

धार्मिकतामुद्भावयन् नास्तिकान् कदर्थयन् कण्टकान् विशोधयन् मित्रोपधीनुपघ्नन् चातुर्वर्ण्यं स्वधर्मेषु स्थापयन् अहिंसन् हरेयमर्थान् । अर्थमूला हि दण्डविशिष्टकर्मारम्भाः न चान्यदस्ति पापिष्ठं तद्दोर्बल्यादित्याक(लय्य)योगानुपयुञ्जन् तटस्थ इवावेक्षमाणोऽप्रमत्तो यथोचितं त्रिवर्गमन्वतिष्ठम् इत्युपधाभिः संशोध्य परीक्षितं कुमारं मातुलवंशान्वितं मन्त्रिणमन्यांश्च स्वामिभक्तौ परीक्षितानधिकारिणः सहायान् संगृह्य तटस्थ इवावेक्षमाणोऽप्रमत्तः यथोचितं त्रिवर्गमन्वतिष्ठं ॥

**Colophon:**

इति दण्डिनः कृतौ दशकुमारचरिते विक्रमचरितं नामाष्टमोच्छ्वासः ॥

The date of the MS. is given:

मितिश्रावणवदि त्रयोदशी शनिवासरे संवत् १८८६.

---

No. 12398. दशकुमारचरितव्याख्या—पदचन्द्रिका.

DAŚAKUMĀRACARITAVYĀKHYĀ : PADACANDRIKĀ.

Substance, paper. Size, 10⅝ × 4⅞ inches. Pages, 106. Lines, 12 on a page. Character, Dēvanāgari. Condition, slightly injured. Appearance, old.

Complete. Without Pūrvapīṭhikā and the Uttarapīṭhikā.

A commentary named Padacandrikā on Daṇḍin's Daśakumāracarita described above: by Kavīndrācāryasarasvatī.

**Beginning:**

श्रुत्वेति । भुवनवृत्तान्तं पातालवृत्तान्तमित्यर्थः । विषयं भुवनं जगदित्यमरः, वार्ता प्रवृत्तिर्वृत्तान्त इत्यपि । उत्तमाङ्गना (ना)यिका, स्त्री योषिदबलेत्युपक्रम्य विशेषास्त्वङ्गना भीरुरित्यमरः । विस्मयेन विकसिते अक्षिणी लोचने यस्याः सेति; विस्मयोऽद्भुतमाश्चर्यमित्यमरः । लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणीत्यमरः । सस्मितमिति क्रियाविशेषणम्; सहासमित्यर्थः । स्यादाच्छुरितकं हासस्सोत्प्रासस्तु मनाक्स्मितमित्यमरः । इदं वक्ष्यमाणमभाषत भाष व्यक्तायां वाचि लडात्मनेपदम् ।

* * * *

**Colophon:**

इति श्रीसर्वविद्यानिधानकविवर्यसरस्वतीकृतायां दशकुमारव्याख्यायां प्रथमोला(च्छ्वा)सः ॥

**End:**

अर्थमूला अर्थाधीनाः । दौर्बल्यात् दुर्बलस्य भावः तथा आकलय्य मनसि कृत्वेत्यर्थः । योगात्

* * * *

"उपाये भेषजे विद्धिर्दृष्टिसंहनने धने ।
विस्रब्धे पतिनिध्यानं युक्तिन्याये वयोजने (?) ॥"

इति महीश(श्वर)ः ॥

**Colophon:**

इति श्रीसकलशास्त्रार्थेकीकृतशेमुषीविलाससमान्द्रप्रवर्तितासंख्ययशस्समुद्रविद्वत्परिषच्चन्द्रपतीन्द्रसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीकृतायां दशकुमारव्याख्यायां पदचन्द्रिकाभिधायां विश्रुतचरितं नामाष्टम उच्छ्वासः ॥

समाप्तश्चायं दण्डिकृतो ग्रन्थः ॥

The date of the MS. is given:—

संवत् १८९६ पौषशुक्ल ७ शनिवासरे ॥

---

## No. 12399. द्रौपदीचरित्रम्.
## DRAUPADĪCARITRAM.

Pages, 3. Lines, 9 on a page.

Begins on fol. 115*a* of the MS. described under No. 9731.

Complete.

A prose work describing the incidents of the Mahābhārata that took place from the time when Dharmaputra played at dice with

Śakuni, after the Rājasūya sacrifice, to the unsuccessful attempt made by Duryōdhana and his brother to disgrace Draupadi, the wife of the Pāṇḍavas, in the open assembly by unloosing her garments which by Lord Kṛṣṇa's grace began to lengthen and increase unendingly to the amazement of the assembly. The work is written in Khaḍga metre.

**Beginning :**

त्रिभुवनमहितेऽथ राजसूये मुरारिणा धर्मराजमपदिश्य राक्षसचरित्रराजकुलमदनिराकृतिकृते पुरा विरचिते पराभवात्कुरुधराधिभृद्द्रुपदराजपुत्र्या चिराय जाताध्वराद् द्यूततः पराजित्य तं दुरासदं सोदराखिलधनैस्वराज्यः सदस्यरालधीः शाकुनिरायासुतादराद्धतो दुर्मरावलेपाद्गिरा परुषया सुरानुवाच तुदन् ।

**End :**

इति परमकृपाम्बुराशिना तां मुरारिणार्पितकरां शोकसागरादुद्धृतां निराकृतार्त्यङ्कुरां वीक्ष्य भूधराः परेऽखिलनराः सदसि सासुराः ससिद्धाः सुराः सविद्याधराः सकलकिंनराः किमेतत्पुराश्रुतेक्षितमिरास्वद्भुतं दुरापा रमाधरानुपमसादरानुग्रहत्वरासाविति स्थिरात्तनिश्चयपराः समापुश्चराचरेशं परापरं शरणं मुमुदुश्च विचिन्त्य तद्विपत्तरणम् ॥

**Colophon :**

द्रौपदीचरित्रं समाप्तम् ॥

---

## No. 12400. रामकथा.

## RĀMAKATHĀ.

Substance, paper. Size, 8¾ × 5¼ inches. Pages, 144. Lines, 8 on a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Complete.

A work dealing with the story of the Rāmāyaṇa from Rāma's birth to his coronation. This work was composed by Vāsudēva, son of Nārāyaṇa at the instance of the King Ādityavarman.

**Beginning :**

गजवदनमस्तु . महते . . वदनविहारि दैवतम् ।
. . . . . . . . . . . . प्राचेनसादयश्च सदा ॥
सतां परित्राणपरस्सुमेधा जितारिषड्वर्गतया महीयान् ।
विभ्राजते विश्रुतविक्रमश्रीरादित्यवर्मा नरलोकवीरः ॥
चिराय रक्षोऽपगमेन कुर्वन्नुर्वीं मुदा यस्सुमनोजनानाम् ।
महीजयोदञ्चितपुण्यकीर्तिरामोदते राम इव प्रकामम् ॥
तस्याज्ञया सर्वजनीनवृत्तेरविस्तरा रामकथा पवित्रा ।
निबध्यते गद्यमयी मयेयं सन्तोऽनुगृह्णन्तु नितान्तमस्याम् ॥

अस्ति किल जगत्त्रयपरित्राणलीलाविचक्षणानामक्ष(य)भुजद्रविणभूषणानामुज्ज्वलयशःप्रसरचन्द्रिकानिष्यन्दनित्यविकस्वरसुजनमनस्कारकैरवाणां

तटिन्या सरय्वा परिशोभमानपरिसरमवनिवनितातिलकायमानं पुरीरत्नमयोध्यानाम । तत्र च त्रिदशराजनगरसुन्दरीवृन्दबन्दीकरणचणवृन्दारकवैरिवृन्दारकगलविगलदविरलरुधिरच्छटाजटालकौक्षेयकक्षपितविपक्षराजमनोरथो दशरथो नाम नरपतिरराजत ।

**End:**

अपनीतमुनिविषस्सहानुजस्सप्रकृतिपौरजानपदो मनुवंशप्रस्तुतमहीपुरन्दरकुलराजधानीमयोध्यां स . . . वान् । भक्तिभरप्रणम्यमानगुरुजनाशीर्वादाभिनन्दितं रामचन्द्रं गरिष्ठतपसो वसिष्ठ . . . . . . . . साम्राज्यपदव्यामभ्यषिञ्चन् ॥

* * * *

**Colophon:**

गद्यं समाप्तम् ॥

निशा . . . . . . . . . . . . . . . . . ।

. . . . . . . . . . . . . तेजसां निचये ॥

यं वासुदेवमनुरूपमवाप पुत्रं नारायणो विमल . . . . . ।

प्राणायि तेन मनुवंशपतेः कथेयमादित्यवर्मनृपतेः कृतिनो निदेशात् ॥

---

## No. 12401. रामकथा.

### RĀMAKATHĀ.

Substance, palm-leaf (Śritāla). Size, 9 × 1¾ inches. Pages, 38. Lines, 12 on a page. Character, Malayāḷam. Condition, injured. Appearance, old.

Begins on fol. 1a. The other works herein are Rāmakathāvyākhyā 20a, Vāsavadattāvyākhyā 40a.

Almost complete.

Same work as the above.

---

## No. 12402. रामकथाव्याख्या.

### RĀMAKATHĀVYĀKHYĀ.

Pages, 40. Lines, 12 on a page.

Begins on fol. 20a of the MS. described under the previous number.

Complete.

A commentary on the work described above. The name of the commentator is not given. The admixture of Malayāḷam is noticeable in this manuscript.

**Beginning :**

गजवदनमिति । . . . . . . . . . . . . . . . . . . . . . . . महिममहत्त्वं निर्व्यूढं कृतं भास्वरं [illegible] स्थेशभासपिसकसो वरजिति सूत्राद्धरत्र । महारजतकाचने इत्यमरः । सङ्कटं ना तु संबाध इत्यमरः । [illegible] स्खलनं [illegible] रिङ्खणं स्खलनं समे इत्यमरः । जर्जरितं [illegible] घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमा इत्यमरः । विलंभस्त्वतिसर्जनमित्यमरा । चन्द्रमा मनसो जातः कुर्भूमिः

**End :**

विकस्वरं विसृमरं परिपालनलक्षणं स्वधर्ममनुष्ठितमात्मनो विशुद्धिरेव प्रधानं प्रयोजनं यस्य अकरणे प्रत्यवायविधादि च प्रत्यवायं विनिपातं सौहार्दं सौहृदय्यमित्यादि पूर्ववत् [illegible] इतीति अनुजिघृक्षा अनुग्रहीतुमिच्छा। अथ मित्रं सखा सुहृदित्यमरः । स्वरूपञ्च स्वमावश्चेत्यमरः । निस्तुषं निर्मलं चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः इत्यमरः। राजृ दीप्ताविति धातुः यं वासुदेवमिति प्राणायि प्रणीता कृता । धीमान् सूरिः कृती कृष्टिरित्यमरः । शिवमस्तु ॥

---

## No. 12403. वासवदत्ता.

## VĀSAVADATTĀ.

Substance, paper. Size, 11¾ × 7⅞ inches. Pages, 70. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 103*a*. The other works herein are Rasagaṅgādhara 1*a*, Vāsvadattāvivarana 138*a*.

Complete.

A prose romance by Subandhukavi. Same work as that described under R. No. 734(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I-C.

---

## No. 12404. वासवदत्ता.

## VĀSAVADATTĀ.

Substance, palm-leaf. Size, 15⅞ × 1⅞ inches. Pages, 50. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

The following additional stanzas are given :—

प्रत्यक्षरश्लेषमयप्रपञ्चविन्यासवैदग्ध्यनिधिं निबन्धम् ।
सरस्वतीदत्तवरप्रसादश्चक्रे सुबन्धुस्सुजनैकबन्धुः ॥
कवीनामगलद्दर्पः नूनं वासवदत्तया ।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम् ॥

---

No. **12405**. वासवदत्ता.

VĀSAVADATTĀ.

Substance, palm-leaf. Size, 15¼ × 1½ inches. Pages, 62. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same work as the above.

---

No. **12406**. वासवदत्ता.

VĀSAVADATTĀ.

Substance, palm-leaf. Size, 19¼ × 1½ inches. Pages, 33. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Citrakavitvadarpaṇa (in Telugu language) 18*a*, Alaṅkārasarvasva 41*a*.

Incomplete.

Same work as the above.

---

No. **12407**. वासवदत्ता.

VĀSAVADATTĀ.

Pages, 10. Lines, 11 on a page.

Begins on fol. 10*a* of the MS. described under No. 1781.

Incomplete.

Same work as the above.

---

No. **12408**. वासवदत्ता.

VĀSAVADATTĀ.

Substance, palm-leaf. Size, 18¾ × 1½ inches. Pages, 37. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

No. **12409.** **वासवदत्ता.**

VĀSAVADATTĀ.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 56. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

The scribe says—

कुलाचलगलज्जलप्रबलवाग्विलासः कला-
कलापविलसत्कुलः कुशलशीलनारायणः ।
सुबन्धुकृतमन्वितस्वरमतन्द्रितोऽलीलिखत्
प्रबन्धममृतोर्मिभिस्तुलितहृद्यगद्यान्वितम् ॥
कविसत्रकलत्रं तत्सेवे देवेशसेवितम् ।
भासमानांशुकं ब्रूत भासमानांशुकं महः ॥

---

No. **12410.** **वासवदत्ता.**

VĀSAVADATTĀ.

Substance, palm-leaf. Size, 17¾ × 1⅝ inches. Pages, 68. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

---

No. **12411.** **वासवदत्ता.**

VĀSAVADATTĀ.

Substance, palm-leaf. Size, 15¼ × 1⅜ inches. Pages, 69. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vāsavadattāvyākhyā 36*a*.

Complete.

Same work as the above.

---

No. **12412.** **वासवदत्ता.**

VĀSAVADATTĀ.

Substance, palm-leaf (Śrītāla). Size, 13¾ × 1½ inches. Pages, 52. Lines, 9 on a page. Character, Grantha and Malayāḷam. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Dvirūpakōśa 27*a*.

Incomplete.

Same work as the above.

### No. 12413. वासवदत्ता.

### VĀSAVADATTĀ.

Pages, 72. Lines, 24 on a page.

Begins on fol. 53a of the MS. described under No. 11529, wherein it has been omitted to be included in the list of other works.

Complete.

Same work as the above.

Date of copying: 12th day of the Kārttikai month in the year Pramāti.

---

### No. 12414. वासवदत्ताविवरणम्.

### VĀSAVADATTĀVIVARAṆAM.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 57. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, slightly injured.

Complete.

Same work as that described under R. No. 821(b) of the Triennial Catalogue, Vol. II, Part I—Sanskrit A.

---

### No. 12415. वासवदत्ताविवरणम्.

### VĀSAVADATTĀVIVARAṆAM.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 60. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

---

### No. 12416. वासवदत्ताविवरणम्.

### VĀSAVADATTĀVIVARAṆAM.

Pages, 69. Lines, 20 on a page.

Begins on fol. 138a of the MS. described under No. 12403.

Complete.

Same work as the above.

---

### No. 12417. वासवदत्ताव्याख्या.

### VĀSAVADATTĀVYĀKHYĀ.

Pages, 72. Lines, 7 on a page.

Begins on fol. 36a of the MS. described under No. 12411.

Incomplete.

Similar to the work described above. The commentator is a devotee of Tripurā (Pārvatī), but his name is not given.

**Beginning:**

श्रीमत्त्रैपुरपादपङ्कजरजःपाण्डूकृताङ्गः कृती
चक्रे गूढपदार्थमोभ(बोध)नभृतेः(कृते) प्रीत्यै सतामादरात् ।
काव्ये वासवदत्तके विवरणं संक्षेपतः श्रीमतां
लोकख्यातविनोदनैकरसिकः सौहृद्यलीलाश्रयः ॥
पक्षे श्लेषपदस्यार्थो भवेदत्र यथान्वितः ।
वक्ष्यतीह यथारूपः क्रियते न कचिद्भयात् ॥

करबदरेत्यादि । सरस्वती जयति नदी चेति वाक्यार्थः । सरस्वत्यां प्रसिद्धम् । पक्षे कवयः कं जलं विः पक्षी तत्र बहुवचनं कवयः जलपक्षिणः ।

**End:**

स्त्रीद्वेषान्तरितोऽहमेवेयमित्येवंरूप . . . . . . . . . अन्यदा हे कान्त सुखविनाशक आत्मानमव स्त्रीकृतं . . . . . . परमार्थतो नाकलयसि । आच्छादित . . . वेति । अत्र केवलं दैवान्निष्करुणत्वं नायके लक्षणाभा.

---

No. 12418. वासवदत्ताव्याख्या.

VĀSAVADATTĀVYĀKHYĀ.

Pages, 79. Lines, 20 on a page. Character, Grantha.

Begins on fol. 88*b* of the MS. described under No. 11529, wherein it has been apparently wrongly stated as beginning on fol. 53*a* in the list of other works.

Complete.

This commentary on the Vāsavadattā is by Mādhavi Trivikramakavi.

**Beginning:**

करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥
नत्वा महेश्वरं देवमवाङ्मनसगोचरम् ।
ओङ्कारवाच्यं जगतां सर्गस्थित्यन्तकारणम् ॥
इयं वासवदत्ताख्याख्यायिकाव्याक्रिया स्फुटम् ।
त्रिविक्रमेण क्रियते मेधाविकुलजन्मना ॥

करबदरेति । सरस्वती वाग्देवी नदी च जयतीति वाक्यार्थः । सूक्ष्ममतयः कवयः कुशाग्रबुद्धयः विद्वांसः । पक्षे कं जलं, पानीयं सलिलं कमिति हलायुधः । विः पक्षी शकुनिः खगो नगौकाः पक्षी विरिति हलायुधः । तत्र

बहुवचनं कवयः जलचरपक्षिण इत्यर्थः । सूक्ष्ममतयः अल्पबुद्धयः । भुवन-तलं भूप्रदेशमखिलं भुवनतलं सकलभुवनतलमित्यर्थः ।

**End:**

शक्तिमोक्षणं शक्तिः सामर्थ्यमायुधविशेषश्च । अन्तं नाशम् अन्तो नाशः शस्तास्मीति सम्बन्धः । शापितमकरोदिति । कन्दर्पकेतुरिति । समं सह स्व-पुरं पाटलीपुत्रं नाम नगरं प्रविश्य अभिलषितानि ताभ्यां सहानुभवन् कालं निनायेति सम्बन्धः ॥

**Colophon:**

इति(त्रि)विक्रमकविरचिता वासवदत्ताव्याख्या परिसमाप्ता ॥

---

No. **12419.** वासवदत्ताव्याख्या.

VĀSAVADATTĀVYĀKHYĀ.

Substance, palm-leaf. Size, 15¾ × 1¾ inches. Pages, 56. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, new. Complete.

This commentary is by Timmayyasūri and is called Darpaṇa.

**Beginning:**

वन्दे वाग्देवतामिन्दुसुन्दराननभासुराम् ।
मन्देतरामवापुर्यां नत्वा सिद्धिं बुधोत्तमाः ॥
श्रीमता तिम्मयाख्येन क्रियते दर्पणाभिधा ।
व्याख्या वासवदत्ताया(स्सरला) धीविशोधिनी ॥
यां लब्ध्वा विबुधाः सम्यक् पश्यन्ति पदमण्डलम् ।
पश्यन्ति चेतसः सेयं दर्पणाभिख्या कृता ॥

अथ तावत्कविः ग्रन्थारम्भे इष्टदेवतां स्तौति करबदरेति । सा सरस्वती जय- सर्वोत्कर्षेण वर्तत इत्यर्थः । सूक्ष्ममतयः कवयः यस्याः प्रसादतः अखिलं भुवन-तलं करस्थितबदरसदृशं पश्यन्ति सा देवीत्यन्वयः । सरस्वतीशब्देन नदी च कथ्यते । तदा करवत् अरसदृशमिति पदभङ्गः । सूक्ष्ममतयः अल्पबुद्धयः ।

**End:**

गोत्रं वंशः गोत्रा भूः ऊरुभङ्गः दृढदर्पः ऊरुभङ्गश्च ऊरुप्रहतः संयातनो मृत इति कथा । शरतल्पं शरशयनं तल्पं शय्याट्टदारेष्वित्यमरः । चिराय श्वसन्ना-सीत् मृत इत्यर्थः । शक्तिमोक्षणं शक्तिरुभे समे इति वै । शक्तिमोक्षणं शक्ति-दशस्त्रमुभे समे । अन्यचेष्टां रावणवधं क्रन्दनरवणशब्देन वादी नान्दीकरः समावि-त्यमरः । योगदशा ध्यानदशा हृदयाभिलषितानि हृदयस्य निरूपितानि ॥

**Colophon :**

इति श्रीमत्कविकुललोकबन्धुतिम्मयसूरिणा कृता वासवदत्ताव्याख्या संपूर्णा ॥

---

No. 12420. वासवदत्ताव्याख्या.

VÁSAVADATTÁVYÁKHYÁ.

Pages, 102. Lines, 11 on a page.

Begins on fol. 40*a* of the MS. described under No. 12401.

Complete.

A commentary on the Vásavadattá of Subandhu described above. It is called Sūkṣmadarśanā. The name of the commentator is not given.

**Beginning :**

. . . . नदी चेति वाक्यार्थः । भुवनतलं भुवनस्वरूपम् अन्यत्र . . . . . जलचरशकुन्ता इत्यर्थः । सूक्ष्ममतयः कुशाग्रधियः अन्यत्राल्पबुद्धयः । भुवनं जलं तलं भूभागम् अखिलं खिलं स्वप्रहतस्थानं खिलं न भवतीत्यखिलं प्रहतं बहुशोऽभ्यस्तमिति यावत् । एवंभूतं भुवनतलं यत्प्रसादतः यस्याः स्वच्छभावतः करबदरसदृशं कं जलं लवो बिन्दुः रलयोरभेदः बवयोश्चाभेदः । दरसदृशमीषत्तुल्यं पश्यन्ति मानयन्ति ।

**End :**

ततः कन्दर्पकेतुः पाटलीपुत्रं नाम नगरम् । अभिलषितानि वाञ्छितानि ताभ्यां सहानुभवन् कालं निनायेति सम्बन्धः ॥

आरामेषु नदीतटेषु नगरोपान्तेषु सौधेष्वयं
रूपेणाप्रतिमेन शम्बररिपोः सौभाग्यदर्पापहः ।
रेमे वासवदत्तया वलरिपुः शच्या यथा केशवो
लक्ष्म्या(जश्च गिरा)तथा नरपतिः कन्दर्पकेतुश्चिरम् ॥

**Colophon :**

व्याख्या वासवदत्ताया रचिता येन केनचित् ।
कविचित्तप्रमाथिन्याः समाप्ता सूक्ष्मदर्शना ॥
दुर्लभत्वान्न दातव्या सुबन्धोर्यस्य कस्यचित् ।
प्रभोरपि विशेषेण व्याख्येयं सूक्ष्मदर्शना ॥

## No. 12421. वासवदत्तव्याख्या—तत्त्वदीपनी.
## VĀSAVADATTĀVYĀKHYĀ : TATTVADĪPANĪ.

Pages, 100. Lines, 24 on a page.

Begins on fol. 1a of the MS. described under No. 11529.

Complete.

A commentary on the Vāsavadattā of Subandhu: by Mahāmahōpadhyāya Jagaddhara. The genealogy of the commentator given in the extract from the end is shown below :—

Caṇḍēśvara
|
Vēdēśvara
|
Rāmēśvara
|
Gadādhara
|
Vidyādhara
|
Ratnadhara
(wife Damayantī)
|
Jagaddhara
(author)

The author and his predecessors are said to have been well-versed in one or more of the Śāstras. It is stated that he held two umbrellas over his head as a mark of scholarship.

**Beginning :**

हरौ तात वैकुण्ठताकाम्यसिद्धौ हरे तात कामप्रणाशास्तिबुद्धौ ।
अतस्तौ विहाय त्वदीयांह्रिमाते(याह्रिमिडे)त्वया तेन हेरम्ब नोदासितव्यम् ॥

नत्वा गुरून् गुणगुरूनवलोक्य टीका
विश्वादिकोशनिवहान् सुविचार्य बुद्ध्या ।
श्रीमान् जगद्धर इमां वितनोति टीकां
गूढार्थबोधनिपुणां भरतादिविज्ञः ॥

इह खलु निष्प्रत्यूहमीहितफलसिद्ध्यर्थमर्थी कविकुलकुमुदबन्धुः वागधिदेवताकीर्तनरूपं मङ्गलमादौ निबध्नाति—करबदरेत्यादि । सा सरस्वती वागधिदेवता जयति उत्कर्षेण वर्तते । कीदृशी? देवी देवनं देवः; दिवुक्रीडाविजिगीषामोदमदव्यवहारस्वप्नकान्तिगतिषु । भावे घञ् । तद्योगादर्श आद्यच् । ततो गौरादिङीष् । तेन कान्तिमतीत्यर्थः । यत्प्रसादतः यस्या अनुग्रहात् ।

**End:**

स्वपुरं कुसुमपुरं पाटलीपुत्रनगरं गतः । कालं निनाय समयं नीतवान् । यथाहृदयं मनो(ऽनु)रूपमभिलषितुमिच्छा येषु तानि । अन्यथा अव्ययीभावे यथाहृदयाभिलषितमित्येकत्वं स्यादिति सर्वं निरवद्यमिति ।

यदि भवति मदीये टिप्पणेऽत्र प्रमादः
कचिदपि स महिम्ना शोधनीयो महद्भिः ।
अमतिगमनकारी प्रायशो नात्र चित्रं
भवति हि गुरुहस्तालम्बतोऽपि प्रकारः ॥
लब्धो दुर्लभशासनं गुणगणग्रामाभिरामो(रामो) गुणैः
विद्यावंशविभूषिते अपि शुभे छत्रे उभे धारिते ।
येनायं समभूत् द्विजातितिलकश्चण्डेश्वरः पण्डितो
मीमांसैकरहस्यवश्यहृदयो दातावदाताशयः ॥
अस्मादभूज्जलनिधेरिव शुद्धवे(क्रमा)नुः वेदेश्वरो विविधतन्त्ररहस्यवेत्ता ।
तस्मादजायत विशुद्धिनिधानमूर्ती रामेश्वरो गुरुमतैकरहस्यवश्यः ॥
कैरातीशासनं येन लब्धं जगति दुर्लभम् ।
तर्कराद्धान्तशुद्धान्तःकरणोऽयं गुणाधिकः ॥
अस्मादजायत गदाधरनामधेयो धीरो गदाधर इव प्रथितः पृथिव्याम् ।
सोऽयं धु(रा)मनगरे पदमाप शिष्टान्(ष्टां) मीमांसको विमलकीर्तिपवित्रमूर्तिः ॥
विद्याधरं वरमजीजनदेकपुत्रं मीमांसकं गुणिहितं शुचितादिवासम् ।
सत्तर्ककर्कशरहस्यनमस्यवश्यबोधं निजान्वयसरोजविकासभानुम् ॥
वहन(रत्न)धरं वरमेष सुपुत्रं शुद्धयशास्समसूत विशुद्धम् ।
येन जिता गुणिनो नहि ये ते सर्वगुणेन वसेति न भूमौ ! ॥
र(द)मयन्त्यामयं धीरो लेभे सुतमरिन्दमम् ।
यो जगद्धरनामानमनर्घ्यगुणशालिनम् ॥
विद्यागुणालङ्करणे पवित्रे छत्रे विचित्रे अपि धारिते ते ।
नैयायिकंनाम(केनापि) कवीश्वरेण टीका कृता तेन जगद्धरेण ॥
येनापाठि कठोरगौतममतं वैशेषिकं खण्डनं
येनाश्रावि समस्तकाव्यनिवहस्तत्पाणिनीयं मतम् ।

छन्दोऽलङ्करणं च येन भरतं तत्कामशास्त्रं श्रुतं
तेनानेन जगद्धरेण कविना टीका कृतेयं मुदा ॥
नानाकोशवती नितान्तचतुरा रम्यार्थसार्थार्थिनी
नानालङ्कृतिसुन्द(रीरस)वशा शुभा(द्धा)न्वया भाविनी ।
निर्दोषा कुलजाङ्गनेव गुणिनी टीका ममेयं तत-
स्तामेना(मनु)पालयन्तु कृतिनस्तेभ्यो नमः सर्वदा ॥

**Colophon:**

इति श्रीमहामहोपाध्यायधर्माधिकरणिकश्रीजगद्धरेण विरचिता तत्त्वदीपनी वासवदत्ताटीका समाप्ता ॥

---

## No. 12422. वासवदत्ताव्याख्या—तत्त्वदीपनी.
## VĀSAVADATTĀVYĀKHYĀ: TATTVADĪPANĪ.

Substance, paper. Size, 10 × 5¾ inches. Pages, 192. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete, but without the concluding stanzas giving the genealogy of the commentator.

Same work as the above.

---

## No. 12423. वेमभूपालचरितम्.
## VĒMABHŪPĀLACARITAM.

Substance, paper. Size, 11 × 8¾ inches. Pages, 180. Lines, 22 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

A copy of this MS. was utilised in the printing of this work by the Vāṇī Vilās Press of Srirangam.

A historical romance in prose describing in four Ucchvāsas the exploits of the Reḍḍi king Vēma or Pedda Kōmaṭi Vēma alias Vīranārāyaṇa, who ruled at Addaṅki in the Telugu country. The author of the work is Vāmana Bhaṭṭa Bāṇa or Abhinava Bhaṭṭa Bāṇa of Vatsa family. This work is also called Vīranārāyaṇacarita.

**Beginning:**

गदार्थं(सौभाग्यं)जगतां यस्य वामे वपुषि वर्तते ।
तद्धाम शाश्वतं दद्याद्भूयसीं श्रेयसीं मम ॥
(काव्यं हि कविवराणां) कनकमिव श्लाघ्यवर्णसङ्कलितम् ।
दुर्जनजिह्वाज्वलने तप्तं प्र(विभाति निर्मलाकारम्) ॥

(भुजगी)व वमति गरलं खलमुखवल्मीकवर्तिनी जिह्वा ।
कविवर्त्म दूषयन्ती सा(ध्या सा)भवति सत्वरेन्द्रेण ॥

सहृदयदृष्टिः कुरुते काव्यं स्वपदोपकरणको(मलं पूर्णम्) ।
ज्वलदनलज्वालेव क्षीरं व्यतिषङ्गि तोयसंशोषात् ।
आप इव जगति विमला वाचो रमणीयतां दधति ॥

काव्यप्रपञ्चसृष्टेर्या मूलं कविविधातृलोकस्य ।
बाणकवीन्द्रादन्ये काणाः खलु सरसगद्यसरणीषु ॥

इति जगति रूढमयशो वामनबाणोऽपमार्ष्टि वत्सकुलः ।

कविरभिनवबाणः काव्यमत्यद्भुतार्थं भुवनमहितभूमा नायको वेमभूपः ।
(त्रिभुवनमहनीयख्यातिमानेष) योगः प्रकटयति न केषां पण्डितानां प्रहर्षम् ॥
श्रूयते खल्वेतदैतिह्यम्—

(चूडामणिर्नृपाणां दुर्मतिपरिपन्थिशिखरिदम्भोलिः ।
सर्वज्ञचक्रवर्ती पेद्दकोमटिवेमभूपतिर्जयति ॥)

पुरा किल सकलजगदात्मम्भरेः सनकसनन्दनादिभिः सूरिभिः

* * * *

श्रुतियुवतिचूडामणेः श्रीमतश्चरणकमलादवतीर्णो वर्णश्चतुर्थः । स खलु सहोदरोऽपि गङ्गाया जनकः कीर्तिगङ्गायास्सहमिथुनभावेन

* * * *

तत्र खलु समजनि पुरुहूतपुरूरवःपृथुभरतभगीरथदुष्यन्तदुन्धुमारप्रतिम

* * * *

जनार्दन इव जगदवनगाढधानः कामाभिधानो नराधिपः ।

* * * *

यूथपतिरिव असङ्कुचधेनुकानुगतः समुपचितसकलधर्मलिङ्गस्त्रिलिङ्गो नाम जनपदः ।

* * * *

तत्र खलु तस्य राज्ञो राजधानी बभूव समस्तभुवनप्रशस्तरामणीयका

* * * *

बलिराजनिलयभूतापि गन्धर्वभूमिः अद्दङ्किनामधेया नगरी ।

* * * *

तत्र च बभूव क्रमेण मान्धातृभरतपृथुभगीरथदुष्यन्तदुन्धुमारदशरथदिलीपप्रतिमः गान्धारगन्धसिन्धुरस्मृणिः

* * * *

लाटकर्णाटरणरणकः भोजकाम्भोजप्रजागरो राजा प्रोलभूपतिर्नाम ।

* * * *

**Colophon:**

इति गद्यकविसार्वभौमस्य वत्सकुलतिलकस्य महाकवेरभिनवभट्टबाणस्य कृतौ श्रीवीरनारायणचरिते प्रथम उच्छ्वासः ॥

**End:**

सरसकविकाव्यश्रवणभूषणेन कर्णौ प्रतिदिनमलंकुर्वन् आनन्दस्य परां कोटिमवाप्य सर्वोत्कर्षेण वर्तमानः साक्षाल्लक्ष्मीसमुच्चार्यमाणजयशब्दो विश्वविश्वम्भरापालमौलिमालामकरन्दसुरभितचरणारविन्दो जयति विश्वाधिकविभवो वेमभूपालः ॥

**Colophon:**

इति गद्यकविसार्वभौमस्य वत्सकुलतिलकस्य महाकवेरभिनवभट्टबाणस्य कृतौ वीरनायणचरिते चतुर्थ उच्छ्वासः ॥

प्रतिकविभेदनबाणः कवितातरुगहनविहरणमयूरः ।
सहृदयलोकसुबन्धुर्जयति श्रीभट्टबाणकविराजः ॥
जयति कविभट्टबाणे दधति कविंमन्यभावमन्येऽपि ।
प्रद्योतयति रवौ द्यां खद्योताख्या न किंनु कीटमणेः ॥
सुगुणालंकृतिसुभगा भणितिरियं भट्टबाण भवदीया ।
अधरयति विधुतनखमुखमुखरितवीणानिनादमाधुर्यम् ॥
गाथास्ताश्चागता वो दधति वितथतां तार्किकास्तत्त्वविद्भिः
सत्रा सत्रासमाध्वं फणिभाणितिजुषो वः कृतं प्रक्रियाभिः ।
भूम्नां साहित्यसीम्नामधिभुवि भुवने वामने भट्टबाणे
दीव्यत्यस्मिन् कवीन्द्रे जहित जहित भोः कद्वदा विद्वदास्थाम् ॥

---

## No. 12424. शङ्करविजयः.
## ŚAṄKARAVIJAYAḤ.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 216. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

A biography in prose giving an account of the life of Śaṅkarācārya and of the polemical victories gained by him over the opponents of Advaitism: by Ānandagiri or Anantānandagiri.

Complete in 74 Prakaraṇas, the subjects of which are—

| | |
|---|---|
| १. शास्त्रप्रकरण. | ४. शैवमतनिबर्हण. |
| २. गुर्ववतारकथा. | ५. do. |
| ३. अद्वैतस्वरूपकथन. | ६. भक्तभागवतमतनिबर्हण. |

७. वैष्णवमतनिबर्हण.
८. पाञ्चरात्रनिबर्हण.
९. वैखानसमतनिबर्हण.
१०. विष्णुमतनिबर्हण.
११. हिरण्यगर्भमतनिबर्हण.
१२. अग्निवादिमतनिबर्हण.
१३. सौरमतनिबर्हणम्.
१४. गुरुस्तुति.
१५ महागणपतिमतनिबर्हण.
१६. गाणपत्यैकदेशमतनिबर्हण.
१७. उच्छिष्टगणपतिमतनिबर्हण.
१८. गणपतिमतत्रयनिबर्हण.
१९. शक्तिमतनिबर्हण.
२०. शक्तिमतैकदेशनिबर्हण.
२१. do.
२२. शक्तिमतैकदेशित्रितयनिबर्हण.
२३. कापालिकमतनिबर्हण.
२४. कापालिकैकदेशिमतनिबर्हण.
२५. चार्वाकमतनिबर्हण.
२६. सौगतमततिबर्हण.
२७. जैनमतनिबर्हण.
२८. बौद्धमतनिबर्हण.
२९. मल्लारिमतनिबर्हण.
३०. विष्वक्सेनमतनिबर्हण.
३१. मन्मथमतनिबर्हण.
३२. कुबेरमतनिबर्हण.
३३. इन्द्रमतनिबर्हण.
३४. यममतनिबर्हण.
३५. वरुणवायुभूम्युदकमतनिबर्हण.
३६. शून्यमतनिबर्हण.
३७. वराहमतनिबर्हण.
३८. लोकमतनिबर्हण.
३९. गुणमतनिबर्हण.
४०. साङ्ख्यमतनिबर्हण.
४१. योगमतनिबर्हण.
४२. पीलुमतनिबर्हण.
४३. कर्ममतनिबर्हण.
४४. चन्द्रमतनिबर्हण.
४५. भौमादिग्रहपञ्चकमतनिबर्हण.
४६. क्षपणकमतनिबर्हण.
४७. पितृमतनिबर्हण.
४८. शेषगरुडमतनिबर्हण.
४९. सिद्धमतनिबर्हण.
५०. गान्धर्वमतनिबर्हण.
५१. भूतवेतालमतनिबर्हण.
५२. व्यासदर्शन.
५३. ब्रह्मदेववचन.
५४. व्यासदत्तायुःप्रपञ्च.
५५. भाट्टदर्शन.
५६. मण्डनमिश्रविजय.
५७. सरसवाणीप्रपञ्च.
५८. देहान्तरसंचारादि.
५९. शिष्यागमन.
६०. नृसिंहसाक्षात्कार.
६१. सरस्वतीविजय.
६२. गुरुसरसवाण्योः शृङ्गगिरिवास.
६३. काञ्चीनगरनिर्माण.
६४. कामाक्षीप्रपञ्च.
६५. श्रीचक्रनिर्माण.
६६. मोक्षमार्गप्रकाश.

६७. तत्तद्देशस्थमतस्थापन.
६८. वैष्णवमतस्थापन.
६९. सौरमतस्थापन.
७०. शक्तिमतस्थापन.
७१. गाणपत्यमतस्थापन.
७२. भैरवमतस्थापन.
७३. स्तुति.
७४. सच्चिदानन्दैक्य.

**Beginning:**

नमामि शङ्कराचार्यगुरुपादसरोरुहम् ।
यस्य प्रसादान्मूकोऽपि सर्वज्ञोऽहं सदास्म्यहम् ॥

अनन्तानन्दगिरिरहमप्रतिहतः शिष्यः मम परमगुरोरवतारकथां तदुपकृतिपोषितजगत्परंपराविच्छिन्नशुद्धाद्वैतविद्याप्रतिष्ठां तदाशाविजयकौतूहलं तद्व्यासदर्शनविचित्रं तच्छरीरावसानकालागतब्रह्मदेववचनं व्यासदत्तायुःप्रपञ्चं भट्टदर्शनं मण्डनमिश्रजयं तदङ्गनाप्रसङ्गं देहान्तरसंचारविदितकामशास्त्रं शिष्यागमनं नृसिंहसाक्षात्कारं सरस्वतीविजयं शृङ्गगिरिस्थानवासं काञ्चीनगरनिर्माणं कामाक्षिप्रपञ्चं श्रीचक्रनिर्माणं मोक्षमार्गप्रकाशं सच्चिदानन्दैक्यं चैतानि प्रकरणानि तत्तदवान्तरकथाविस्तारविजृम्भितं नानाप्रश्नोत्तरभासुरं दुष्टमतनिर्बर्हणमिदानीं करोमि ॥

**Colophon:**

इत्यनन्तानन्दगिरिकृतौ शास्त्रप्रकरणं प्रथमम् ॥

* * * *

इत्यनन्तानन्दगिरिकृतौ शंकरविजये गुर्ववतारकथाप्रकरणं द्वितीयम् ॥

**End:**

ततः परं सर्वलोकगुरुराचार्यः स्वशिष्यान् परमतकालानलादियतींस्तदन्यांश्च तत्र विषयेषु प्रेरयित्वा स्वयं स्वर्लोकं गन्तुमिच्छुः काञ्चीनगरे मुक्तिस्थले कदाचित् उपविश्य स्थूलशरीरं सूक्ष्मेऽन्तर्धाय (सद्रूपो भूत्वा सूक्ष्म)कारणे विलीनं कृत्वा चिन्मात्रो भूत्वाङ्गुष्ठपुरुषस्तदुपरि पूर्णमखण्डमण्डलाकारानन्दं प्राप्य सर्वजगद्व्यापकचैतन्यमभवत् ॥

सर्वव्यापकचैतन्यरू(पेणाद्यापि तिष्ठति ।
स एव शङ्कराचार्य)गुरुर्मुक्तिप्रदः सताम् ॥

आकल्पमेतत्परमार्थबोधं श्रीशंकराचार्यगुरोः कथार्थम् ।
सच्छिष्यमुक्तिप्रदमस्ति लोके संसेवितं चा(र्यजनैरभेद्यैः) ॥

(अनन्तानन्दगिरिणा) गुरोर्विजयमुत्तमम् ।
रचितं येऽनं(नु)गृह्णन्ति ते मुक्ताः स्युर्न संशयः ॥

अद्वैतार्थप्रदं लोकैरद्वैतार्थानुचिन्तकैः ।
गुरुकीर्तिप्रदं (शास्त्रमुपास्यं) भवति ध्रुवम् ॥

जयतु सकललोकैः सेव्यमानो गुरुर्मे विदितसकलवेदः शंकराचार्यनामा ॥
मम तु निखिलकर्माण्यन्तरायानि हत्वा दिशतु परमतत्त्वाधारमोक्षं स एव ॥

चतुस्सप्ततितमैः प्रकरै(णै)ः परिशोभितम् ।
गुरुदिग्विजयं नाम शास्त्रं जयति भूतले ॥

**Colophon**:

इत्यनन्तानन्दगिरिकृतौ सच्चिदानन्दैक्यं नाम प्रकरणं चतुस्सप्ततिकम् ॥

The scribe adds—

गरुडाद्रिविरूपाक्षभट्टारकसुतेन हि ।
दीक्षितेन नृसिंहेन गुरोर्विजयमुत्तमम् ।
लिखितं पुस्तकं चैतदाचन्द्रार्कस्थिरं भवेत् ॥

---

No. 12425. शङ्करविजयः.

SAṄKARAVIJAYAḤ.

Substance, palm-leaf. Size, 10½ × 1¼ and 15½ × 1¼ inches. Pages, 234. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

In the beginning 15 leaves are lost; otherwise complete.

Same work as the above.

The scribe adds—

श्रीकृष्णार्यतनूद्भवाचनसुधीर्नारीमणिर्वीरमा
यस्यास्तां पितरावुभौ जनकजारामोपमौ दंपती ।
तत्पादाम्बुरुहद्वयभ्रमरितस्वान्तः स सम्यग्व्रतः
सीतारामविपश्चिदद्य विजयं वैलेखदार्या(व्यालीलिखत्सद्)गुरोः ।
सिद्धार्थिसंवत्सरफाल्गुनाख्ये विचित्रमासे च चतुर्दशीदिने ।
लिलेख पूर्णं विजयं महात्मनः श्रीशंकराचार्यगुरोः कृतात्मनः ॥
सीतारामेण विदुषा श्रीवल्लङ्कयन्वयेन्दुना ।
विजयं शंकराचार्यगुरोर्लिखितमादरात् ॥

---

No. 12426. शङ्करविजयः.

SAṄKARAVIJAYAḤ.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 87. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, new.

Breaks off in the 13th Prakaraṇa.

Same work as the above.

## No. 12427. शङ्करविजयः.
## SAṄKARAVIJAYAḤ.

Pages, 8. Lines, 14 on a page.

Begins on fol. 89*a* of the MS. described under No. 255.

Breaks off in the third Prakaraṇa.

Same work as the above.

---

## No. 12428. हर्षचरित्रम्.
## HARṢACARITRAM.

Substance, paper. Size, 13¾ × 8⅜ inches. Pages, 195. Lines, 28 on a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Contains one to eight Ucchvāsas complete.

The well-known historical romance in prose of Bāṇa, the author of Kādambari. In the first two chapters an account of the genealogy of the author is given and in the remaining six chapters the exploits of the King Harṣa are described. A detailed description of the contents is given in Peterson's introduction to his edition of the Kādambari in the Bombay Sanskrit Series.

**Beginning:**

अविरतशब्दमहौघप्रक्षालितसकलभूतलकलङ्का ।
मुनिभिरुपासिततीर्था सरस्वती हरतु दुरितं वः ॥
नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥
हरकण्ठग्रहानन्दमीलिताक्षीं नमाम्युमाम् ।
कालकूटविषस्पर्शजातमूर्च्छागमामिव ॥
नमः सर्वविदे तस्मै व्यासाय कविवेधसे ।
चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतम् ॥
प्रायः कुकवयो लोके रागाधिष्ठितदृष्टयः ।
कोकिला इव जायन्ते वाचालाः कामकारिणः ॥
सन्ति श्वान इवासङ्ख्या जातिभाजो गृहे गृहे ।
उत्पादका न बहवः कवयः शरभा इव ॥
अन्यवर्ण्य*पदावृत्त्या बद्धचिह्ननिगूहनैः ।
अनाख्यातः सतां मध्ये कविश्चोरो विभाव्यते ॥
श्लेषः प्राय उदीच्येषु प्रतीच्येष्वर्थमात्रकम् ।
उत्प्रेक्षा दाक्षिणात्येषु गौडेष्वक्षरडम्बरः ॥

---

* परावृत्त्या.

नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः ।
विकटोऽक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम् ॥
किं कवेस्तस्य काव्येन सर्वं*वृत्तान्तगामिनी ।
कथेव भारती यस्य न व्याप्नोति जगत्त्रयम् ॥
उच्छ्वासान्तेऽप्यखिन्ना ये येषां वक्त्रे सरस्वती ।
कथमाख्यायिकाकारा न ते वन्द्याः कवीश्वराः ॥
कवीनामगलद्दर्पो नूनं वासवदत्तया ।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम् ॥
पदबन्धोज्ज्वलो हारी कृतवर्णक्रमस्थितिः ।
भट्टारहरिचन्द्रस्य गद्यबन्धो नृपायते ॥
अविनाशिनमग्राम्यमकरोच्छातवाहनः ।
विशुद्धजातिभिः कोशं रत्नैरिव सुभाषितैः ॥
कीर्तिः प्रवरसेनस्य प्रयाता कुमुदोज्ज्वला ।
सागरस्य परं पारं कपिसेनेव सेतुना ॥
सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ॥
निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसार्द्रासु मञ्जरीष्विव जायते ॥
समुद्दीपितकन्दर्पा कृतगौरीप्रसाधना ।
हरलीलेव नो कस्य विस्मयाय बृहत्कथा ॥
आढ्यराजकृतोच्छ्वासैर्हृदयस्थैः स्मृतैरपि ।
जिह्वान्तः कृष्यमाणेव न कवित्वे प्रवर्तते ॥
तथापि नृपतेर्भक्त्या भीतो निर्वहणाकुलः ।
करोम्याख्यायिकाम्भोधौ जिह्वाप्लवनचापलम् ॥
सुखप्रबोधललितां सुवर्णघटनोज्ज्वलैः ।
शब्दैराख्यायिका भाति शय्येव प्रतिपादकैः ॥
दर्शयन्ती मुखे खेदं प्रस्खलन्ती पदे पदे ।
कथंचिन्नीयते शय्यां कथा नववधूरिव ॥

* वृत्तानुगामिनी.

जयति ज्वलत्प्रतापज्वलनप्राकारकृतजगद्रक्षः ।
सकलप्रणयिमनोरथसिद्धिश्रीपर्वतो हर्षः ॥

एवमनुश्रूयते—पुरा किल भगवान् स्वर्लोकमधितिष्ठन् परमेष्ठी विकासिनि पद्मविष्टरे समुपविष्टः शुनासीरप्रमुखैर्गीर्वाणैः परिवृतो ब्रह्मोद्याः कथाः कुर्वन्नन्याश्च निरवद्या विद्यागोष्ठीर्विभावयन् कदाचिदासांचक्रे। तथासीनं च तं त्रिभुवनप्रतीक्ष्यं सर्वे मनुदक्षचाक्षुषप्रभृतयः प्रजापतयः सर्वे च सप्तर्षिपुरःसरा महामुनयः सिषेविरे ।

**End:**

विकसिते च सन्ध्यासमये समनन्तरमपरिमितयशःपानतृषिताय श्रीहर्षाय मुक्ताशैलचषक इव निजकुलकीर्त्या कृतयुगकरणोद्यतायादिराजराजतशासन-मुद्रानिवेश इव राज्यश्रिया सकलद्वीपविजिगीषया चलिताय श्वेतद्वीपदूत इव चायत्या श्वेतभानुरनीयत निशया नरेन्द्राय ॥

**Colophon:**

इति श्रीहर्षचरिते राज्यश्रीदर्शनं नामाष्टम उच्छ्वासः ॥

---

## 9. DRAMA.

---

### No. 12429. अनङ्गजीवनम्.
### ANAṄGAJĪVANAM.

Substance, palm-leaf. Size, 9¼ × 1½ inches. Pages, 152. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

A kind of drama known as Bhāṇa describing the love and union of Vāsantikā and Vasantaśēkhara. It was composed by Varadaguru of Ātrēyagōtra, son of Śrīnivāsārya, well-known as Appayācār, the nephew of Tātayārya. The author was the paternal uncle of Vēṅkaṭācārya who wrote the Viśvaguṇādarśa. The other works of the author are the Kārikādarpaṇa and the Kṛṣṇābhyudaya, and his grandfather's name is given as Varadaguru. This drama is said to have been enacted on the occasion of the festival of God Varadarāja of Conjeeveram celebrated in the Vasanta (spring) season.

**Beginning:**

कृष्णस्य व्रजयोषिदम्बरमुषः कुन्दद्रुमालङ्कृतेः
पायाद्वः प्रतिबिम्बमम्बुनि धृतं भानोर्दुहित्रा चिरम् ।
व्यातेनुः प्लवनच्छलाद्विवसना यस्योपरि प्रस्फुर-
द्वेगोत्क्षिप्तनितम्बबिम्बसुभगं वीरायितं गोपिकाः ॥

किंच—

बिम्बोष्ठे तव नाञ्जनं पुनरयं भृङ्गस्त्वदास्याम्बुजा-
स्वादाय स्तिमितोऽथवा जतुमयी मुद्रा कृता नीलया ।
इत्थं राधिकयोदिते सुमुखि ते दृक्कान्तिसंक्रान्तिजं
नैल्यं नान्यदिहेति तां सरभसं चुम्बन् हरिः पातु नः ॥

(नान्द्यन्ते) सूत्रधारः—(सहर्षम्)

आदिष्टोऽस्मि भूमण्डलमण्डनायमानतुण्डीरमण्डलवास्तव्यसमस्तजनाश्चर्यतपश्चर्याफलस्य, फलभरावनम्रमाकन्दक्रमुकपनसनालिकेरपालिकेरितमन्दपवनकन्दलवलनतरलितबहलवकुलकुन्दकुटजमन्दारकोविदारकदम्बमुखतरुकदम्बानिबिडतटयुगलवेगापगामृदुलतरतरङ्गतालवृन्तप्रशमितरतिरभसपरिश्रमपरिसरनिकुञ्जमञ्जुलभवनविहरणरसिकतरुणमिथुनसमाराधितमन्मथदेवतायाः, भूतलावतीर्णदेवाधिराजसेवाभिलाषसमागतसुरपुरसुन्दरीसुन्दरीतिहरनिपुणरमणीजनशरणीकृतरमणीयकरणीयविमानसमानलसमानरत्नसौधायाः, बहलमृगमदपरिमलकृतनिगलपुण्यधयनीरन्ध्रगन्धापणकृतविहा(ह)रणतरुणवृन्दविशङ्कटशृङ्गाटकायाः, विटविदूषकपीठमर्दसंचारसंमर्दमनोहरायाः, काञ्चीनगर्याः निरुपमालङ्कारनायकमणेः, चतुर्भुजस्तम्भीगम्भीरवक्षःस्थलवलभीपरिष्कारपञ्चशरविद्यासिद्धान्तस्य, शतधृतिहयमेधहव्यसुरभिलाधरपल्लवस्य, निस्तुलहस्तिगिरिमस्तवास्तव्यस्य, भगवतो देवराजस्य वसन्तयात्रोत्सवसेवासमवेतैः निखिलविद्याविशारदैः पारिषदैः । यदुत—

शृङ्गाररसजीवातुः श्रुतिजिह्वारसायनम् ।
कालानुरूपं भवता रूपकं रूप्यतामिति ॥

किं तादृशं रूपकम् !

(स्मृतिमभिनीय) अस्ति हि—

शिथिलितविमतार्थिः श्रीनिवासार्यनामा सकलगुणसरस्वानत्रिगोत्रावतंसः ।
समुदितनिजकीर्तिस्वर्नदीहंसहेलं वहति किल यदीयं वाजपेयातपत्रम् ॥

किंच—

तर्कातर्किप्रचुरकुहनानल्पजल्पप्रसङ्ग-
क्रीडोदश्चत्प्रतिभटशिरोघट्टकुट्टाकपादः ।
प्रौढः श्रीमान्सरसकविताराज्यपट्टाभिष(षि)क्तो
मान्यो यस्य प्रथितविभवो मातुलस्तातयार्यः ॥

तस्य किल तनयो विनयोदयविलसितशारदो वरदो नाम कविः । स किल सकलजनहृदयहृदयंगममनङ्गजीवनं नाम भाणमभाणीत् । स एवायमधुना सामाजिकहृदयसंवननसामग्री ।

वाक् चेदस्य कवेर्मनोभवकरव्याकर्षनम्रीभव-
त्कोदण्डान्तरपर्वसन्ततिपरिच्च्योतद्रसस्रेयसी ।
सम्याश्चेद्रसिकाः प्रगल्भमनसो वस्तुप्रयोगे वयं
सामग्री सकलापि नाट्यविषये दैवेन संपूर्यते ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

भूयादियं विततभूरिफला धरित्री राजा चिरं जयतु रञ्जितसर्वलोकः ।
दारिद्र्यमुज्झितकवीन्द्रकुड(टु)म्बवासं लब्धास्पदं भवतु लोभगुणे नृपाणाम् ॥
(इति निष्क्रान्ताः सर्वे.)

**Colophon:**

पौत्रो यज्वोत्तमश्रीवरदगुरुकवेर्वाजपेयाग्निचित्या-
सर्वस्तोमातिरात्रप्र(मुख)मखशुचिश्रीनिवासार्यसूनुः ।
तारुण्ये चाग्निहोत्री दिशि विततयशाः (सर्वतन्त्र)स्वतन्त्रः
स्वाधीनो वाचि धीमान् वरदकविवरो भाणमेतं व्यतानीत् ॥

इत्यात्रेयवरदकविकृतिरनङ्गजीवनं नाम भाणः संपूर्णः ॥

कतिपयपदबन्धैः कन्दलत्प्रौढिमानः
कति कति कविपाशा जाग्रति ज्यामराय ।
श्रुतिपुटसुखदोग्ध्री सूक्तिरण्णाव(ड्ड)येन्दोः
सुरभयति दिगन्तान् सूचितानेकभावा ॥

---

## No. 12430. अनङ्गब्रह्मविद्याविलासः.
## ANAṄGABRAHMAVIDYĀVILĀSAḤ.

Substance, paper. Size, $7\frac{3}{4} \times 6\frac{1}{4}$ inches. Pages, 93. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*b*. The other works herein are Śṛṅgārarasōdayabhāṇa 95*a*, Vasantatilakabhāṇa 143*a*, Rasārṇavasudhākara 190*b*, Vēṅkaṭēśaprahasana 214*b*.

Complete.

A Bhāṇa like the previous one dealing with love. It is said to have been staged on the occasion of the festival of God Pārthasārathi in Triplicane celebrated in the month of Cittirai. The author was Varadārya of Vādhūlagōtra and his genealogy is given below :—

Varadārya
(a descendant of Śrīnivāsaguru, brother of Varadarāja, a descendant of Mudaliyāṇḍān or Dāśarathi and a disciple of Varavaramuni).

- Kumāra Vēṅkaṭācarya
  - Varadārya (author)
- Śrīnivāsācārya

Name of the copyist—Vāraṇāsi Rāmasvāmi. Names of the comparers—Rāmasvāmi and Basavayya. Date of copying—2nd August 1831.

**Beginning:**

स्वस्ति नस्तनु[ल]तां लक्ष्मीचरणाब्जयुगं सदा ।
परं तत्त्वं हरिरिति श्रुतिर्वेद यदङ्कनैः ॥
अगणितगुणाधारा श्रीराजिताम्बुदमेचका
दिनमणिघृणिश्रेणीश्लेषोन्मिषज्जलजेक्षणा ।
फणिमणिफणारत्नच्छायापिशङ्गकिरीटिनी
वितरतु वचोवेणीं नाणीयसीं मम देवता ॥
मुरहरसुन्दरीचरणपङ्कजरेणुकणाः
सुरमुनिदुर्लभाः प्रणतमर्त्यततेः सुलभाः ।
विनततनूभृतामखिलकाङ्क्षितकल्पलताः
मम कलयन्तु सन्ततमतीव मुदां निकरम् ॥

(नान्द्यन्ते) सूत्रधारः—

आचामन्ति यदीयमार्गणगणा धैर्यश्रियं कामिनां
येनाकारि जगत्रयं चलदृशामेकाधिपत्यास्पदम् ।
स्वानन्यं जगदेकवीरपदवी यस्मिन् विजेजीयते
तेनैवेक्षुधनुष्मता वसुमती भूयात्सुराजन्वती ॥

* * * *

श्रीपार्थसारथेश्चैत्रयात्रासिसेविषाभ्यागतविविधजानपदैः सकलकलाविद्भिः सहृदयमुदुदयाभ्युदयनेदीयःपदमङ्गरीमेदुरं रूपकमभिनेतव्यमित्यादिष्टो भूयासम् ।

पा—कस्य पुनः कवितामालम्ब्य विबुधगोष्ठीसमानन्दनगरिष्ठां बहिष्ठीकृताशेषशेमुषीदोषां जनतामानन्दयितुमीहते भावः ।

सू—(सानुस्मरणं) जाने किल

पुरा धरणिमण्डले सरणिमागमानां कुदृक्-
कुतर्कशतदूषितामनणिमात्मदिव्योक्तिभिः ।
समुल्लसनकर्मणे स्वनमदात्मनां शर्मणे
यतिक्षितिवरात्म(ना) य उदगात्कणामृन्मणिः ॥
ततस्तदतुलस्वसुर्जठरदेशदत्तादरः
विशृङ्खलदयारसो जनकनन्दिनीनायकः ।
वधूलकुलमात्मना सकरुणात्मना रञ्जयन्
समभ्युदयहेतवे समजनिष्ट सत्संपदा(म्) ॥

तदन्वयसमन्वयस्फुरणरत्नदीपाङ्कुरश्चिरन्तनसरस्वतीमकुटयुग्मरक्षापटुः ।
रमानिधिगुरुः पुरा वरदराजनाम्नो गुरोर्व्यभादवरजो मुनेर्वरवरस्य पद्मेजुषः ॥

तद्वंश्यौ समभूतां सुमनःसंदोहनन्दनात्मानौ ।
वरदार्यमणेस्तनयौ श्रीविङ्कटमानिवासार्यौ ॥
तयोस्तनयवर्येण वरदार्येण धीमता ।
अनङ्गब्रह्मविद्याया विलासं नाम निर्मितम् ॥

तदेवाधुना समासदपरितोषणाय प्रयोगपदवीमारोपयितुमध्यास्ते रङ्गस्थली-
मयं जनस्तावकः ।

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

आकल्पं वसुधेयमुज्ज्वलतरा नित्यं जरीजृम्भतां
सारङ्गाश्चिरमुल्लसन्तु कलिकामामोदमुद्भासताम् ।
सार्कं कैरविणीतटे महकुलैर्वृन्दावनीवल्लभो
जीयात्पल्लवसंपदामतिशयो भूयान्निरातङ्कतः ।

(इति निष्क्रान्ताः सर्वे) ॥

**Colophon:**

इति श्रीवाधूलो वरदगुरुनामा क्षितिसुतापदाम्भोजद्वन्द्वमधुररसधामा निरुपमैः ।
कटाक्षैरस्तोकैः कुवलयसदृक्षैः क्षितिभुवो व्यभाणेमं भाणं रसभरितमीक्षन्तु विबुधाः ॥

इति श्रीवाधूलवंशपयःपारावारराकाचन्द्रस्य श्रीनिवासगुरुवंशमुक्तामणेः श्रीनिवासगुरुवरचरणारविन्दमिलिन्दस्य श्रीकुमारवेङ्कटसूरितनयस्य वरदाख्यदासस्य कृतिषु अनङ्गब्रह्मविद्याविलासं नाम भाणः समाप्तः ॥

## No. 12431. अनङ्गविजयः.
## ANAṄGAVIJAYAḤ.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 136. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1a. The other work herein is Vasantatilakabhāṇa 69a.

Complete.

A Bhāṇa describing the love between Śṛṅgārabhūṣaṇa and Kalakaṇṭhī and also between Vasantasēnika and Mandāramañjarī. It is said to have been staged on the occasion of the festival of God Vīrarāghava of Vāmalūr in the spring (Vasanta) season, which festival after having been stopped for some time was revived by Cennakṛṣṇapaṇḍita at the command of Cikadēvarāya's son, Narasamahīpāla, King of Vāmalūr, and his son Kṛṣṇayuvarāja. The author of this Bhāṇa was Śivarāmakṛṣṇa, son of Raṅgāmbikā and Nārāyaṇa of Gautamagōtra. He had an elder brother, whose name is not given.

Transcribed by Gaṇēśa

**Beginning:**

आनन्दायास्तु नः शम्भोरपाङ्गानां परम्परा ।
गौरीकुचपरीरम्भसंक्रान्तघुसृणो रसः ॥

अपि च—

नैकस्थावरजङ्गमस्थितिलयो . . . . हेतूनपि
ब्रह्माद्याः परदेवता मृगदृशां भ्रूचापसंदानितैः ।
भिन्दानो विशिखैरपिङ्गलवनैर्लोकैकसंमोहन-
. . . . स्वमहोत्सवं निपुणतां यूनामनङ्गो विभुः ॥

(नान्द्यन्ते) सूत्रधारः—(ससंभ्रमोल्लासम्)
अहो पुनरियं खलु

* * * *

अगण्यपुण्यवैभवेन सीतालक्ष्मणसनाथेन सकलजगन्नाथेन श्रीमता रघुनाथेन विजयिना सनाथीकृता वामलू . . . . . . . दिगन्तरप्रथितनामधेया राजश्रीवरकण्ठीरवनरसमहीपालभूचक्रभूषामणिः कापि नगरी ।

(परितो विभाव्य) अहो सकलनगरातिशायिता वामलूरित्यभिधानस्यास्य पत्तनस्य

* * * *

अथ खलु निरन्तरदुरन्तभुजकुन्तवलाक्रान्तसामन्तसीमन्तनिषा(स्था)तनिज-मुद्राङ्कितजयस्तम्भश्रीचिक्कदेवरायपृथ्वीरमणगर्भाब्धिसंभवस्य राजश्रीवरकण्ठीरवनरसमहीपालस्य तदीयगर्भशुक्तिकाजनितश्रीकृष्णयुवराजमाणिक्यस्य च निदेशेन मूर्तीकृतेनेव तत्प्रणयरम्येण स्वामिकार्यपरतन्त्रचित्तवृत्तिना समस्ताविकारचमत्कारिणा राजश्रीचेन्नकृष्णपण्डितशिखामणिना

* * * *

श्रीमतो विजयराघवस्वामिनः प्रबोध्यते पुनरभिनवः समन्ततो वसन्तोत्सवः ।

* * * *

पुरा खलु समस्तविद्याविचारणप्रवीणो गौतमान्ववायमहोदन्वत्सम्पूर्णनीहारकिरणो निरन्तरसन्तन्यमानबहुविबसपर्यासन्तोषितपरमेश्वरप्रसादभूमिः, प्रत्यग्रचन्द्रमा इव समस्तजनसंसेव्यमानः, कौस्तुभमणिरिव विश्वम्भरालङ्का(र)भूतः, चतुरानन इव तत्ताहशसारस्वतरसानुभावजनितानन्दः, सुधांशुशेखर इव सुकुमारवैभवः, सर्वश्रुतिगोचरमहिमातिरेकतया नारायणपदवाच्यतामपि आत्मनः सफलीकुर्वन्, वसिष्ठ इव सत्कर्मानुष्ठानवरिष्ठः, श्रीमान्, वैदिकसार्वभौमः कश्चन विपश्चिदाविरासीत् । अपिच,

प्रथमानगुणग्रथिना विद्वन्मणयश्च सर्वतः सन्ति ।
तत्र हि नायकभावः प्राप्तो मध्यस्थताजुषा येन ॥

यमेव खल्वेवमद्यापि लोकास्तर्कयन्ति—

"वेदः किं नु शरीरवान् किमथवा धर्मः कलौ कायभृ-
च्छान्तिः किं नु शरीरिणी-किमु दया कुलङ्कषा देहिनी ।
मन्त्राणां निचयो नु किं समुदयः किं वा गुणानां परा
शक्तिस्तस्य महेश्वरस्य जगदानन्दाय मूर्ता नु किम् ॥" इति ॥

तस्य नारायणार्यस्य तनयो विनयोज्ज्वलः ।
अग्रजानुमहाबाप्तविद्याद्यतमोऽभवत् ॥
अरुन्धती सुयज्ञेन यथा मुदमविन्दत ।
सापि रङ्गाम्बिका येन साध्वीनामुत्तमा तथा ॥

"गिरां देवी देवीकरकलितवालव्यजनिका-
शिखोदञ्चच्चञ्चत्पवनपृथुकाकीर्णचिकुरा ।

पुरस्तादास्तां मे पटुकवनवेणीकुतुकिनः
पदानां सन्दर्भे परममुपदेष्ट्री भगवती ॥"

एवमादिसमभ्यर्थनानन्दितसरस्वतीनिरवग्रहानु(ग्र)हसमुदयसमासादितनिरवद्यगद्यपद्यमयसाहित्यविद्या(वैशद्यः) । एवंच,

प्राचां वाचः परिमलमुचः प्रायशस्ताः समस्ताः
पायम्पायं प्रणयमधुरं प्राप्तसारस्वतो यः ।
यद्वैदुष्यं सहृदयशिरश्श्लाघनीयं परेषां
मर्मोद्भिदस्फुटपटुतरं माननीयैर्गुणौघैः ॥

किं बहुना?—

यश्चास्ति घटिकाशतप्रथितगद्यपद्योभय-
प्रबन्धविनिबन्धनः स शिवरामकृष्णः कविः ।
प्रचण्डतरताण्डवत्रिपुरहन्तृमौलिस्फुर-
त्सरिल्लहरिसोदरी विजयते हि तत्साहिती ॥

(सविनयादरम्)—

गिरां गुम्भः प्राचां गलदमृतनिष्यन्दलहरी-
विलासानां जेता जयति बहुधा यद्यपि परम् ।
तथाप्येतत्सूक्तिः कविकुलशिरश्श्लाघनपदं
भवत्युद्यद्वर्णक्रमपदरसालङ्कृतिगुणैः ॥

सम्प्रति हि,

निरवधिगुरुकटाक्षपरम्पराविगतमधुरकवितामृतसारसन्ततास्वादनिर्वर्तितकालक्षेपेण विनयमहाधननिक्षेपेण तेन कविना प्रणीतः कश्चिदाधुनिको ग्रन्थः परमस्मानुपसेवते ॥

(कर्णं दत्वा) किं ब्रूथ? ।

"स हि किंनामानं कीदृशरसानुबन्धबन्धुरं प्रबन्धमनुसन्धाय दत्तवान्?" इति?

स कविः किल—

सुकुमारार्थसन्दर्भं सूचितव्यङ्ग्यवैभवम् ।
अनङ्गविजयं भाणमातनिष्ट मनोहरम् ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

मान्या जगति कवीन्द्र(ा) मधु(र)गिरः सन्तु सन्ततश्रीकाः ।
भूपाः सन्तु वदान्या धूर्ताः सम्भोगशालि(न)ः सन्तु ॥
आनन्दयन् दिव्यऋषीश्चकोरानामोदयन्नेव बुधानशेषान् ।
आकल्पमेनां वसुधामपायात् पायादयं राघवपूर्णचन्द्रः ॥

**Colophon:**

श्रीमद्गौतमकुलतिलकश्रीनारायणसूनुना शिवरामकृष्णकविना विरचितोऽयमनङ्गविजयो नाम भाणः समाप्तः ॥

---

## No. 12432. अनर्घराघवम्.

## ANARGHARAGHAVAM.

Substance, paper. Size, 12 × 8 inches Pages, 199. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new

Begins on fol. *1a*. The other work herein is Anargharāghava-vyākhya 109*a*.

Complete.

Same work as that described under R. No. 132(*b*) of the Triennial Catalogue of MSS., Vol. I, Part I-A. By Murārikavi.

---

## No. 12433. अनर्घराघवम्.

## ANARGHARĀGHAVAM.

Substance, palm-leaf. Size, 16 × 1⅝ inches. Pages, 217. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

---

## No. 12434. अनर्घराघवम्.

## ANARGHARĀGHAVAM.

Substance, palm-leaf. Size, 14⅞ × 1½ inches. Pages, 146. Lines, 9 on a page. Character, Telugu and Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above.

## No. 12435. अनर्घराघवम्.

### ANARGHARĀGHAVAM.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 149. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Breaks off in the seventh act.

Same work as the above.

---

## No. 12436. अनर्घराघवम्.

### ANARGHARĀGHAVAM.

Substance, palm-leaf (Śrītāla). Size, 7⅞ × 1⅜ inches. Pages, 119. Lines, 10 on a page. Character, Malayāḷam. Condition, slightly injured. Appearance, old.

Breaks off in the fifth act.

Same work as the above.

---

## No. 12437. अनर्घराघवम्.

### ANARGHARĀGHAVAM.

Substance, palm-leaf. Size, 17¾ × 1⅝ inches. Pages, 108. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the seventh act.

Same work as the above.

---

## No. 12438. अनर्घराघवम्.

### ANARGHARĀGHAVAM.

Substance, palm-leaf. Size, 17⅞ × 1½ inches. Pages, 52. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the third act.

Same work as the above.

---

## No. 12439. अनर्घराघवम्.

### ANARGHARĀGHAVAM.

Substance, palm-leaf (Śrītāla). Size, 19¼ × 2½ inches. Pages, 92. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a* which is numbered as 27. The other works herein are Anargharāghavavyākhyā 47*a*, Vasumaṅgalanāṭaka with commentary 105*a*.

Complete

Same work as the above.

## No. 12440. अनर्घराघवम्.

### ANARGHARĀGHAVAM.

Substance, palm-leaf. Size, 17½ × 1¾ inches. Pages, 108. Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants the beginning in the first act and breaks off in the seventh act.

Same work as the above

---

## No. 12441. अनर्घराघवम्.

### ANARGHARĀGHAVAM.

Substance, paper. Size, 10⅞ × 4½ inches. Pages, 266. Lines, 7 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 341*b*. The other works herein are Citramīmāmsā-vyākhyā 1*a*, Vikramōrvaśīya 233*b*, Caṇḍakauśika 277*b*, Daśarūpaka 325*b*, Navamālikā 475*b*, Mṛcchakaṭika 503*b*.

Complete.

Same work as the above.

---

## No. 12442. अनर्घराघवव्याख्या.

### ANARGHARĀGHAVAVYĀKHYĀ.

Substance, paper. Size, 13¾ × 8¼ inches. Pages, 101. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Anargharāghava-vyākhyā 51*a*.

Breaks off in the Viṣkambhaka of the second act.

A commentary on the work described above by Rucipatidatta of the Khaukūla family. The commentary was written at the instance of King Bhairava, son of Narasiṁhadēva.

**Beginning:**

दोर्दण्डद्वितयेन खण्डपरशोः कोदण्डमारोपयन्
कुर्वाणः सहसा विदेहनृपतिं पूर्णप्रतिज्ञाभरम् ।
सानन्दं कुशिकात्मजेन सुदृशां वृन्देन कौतूहलात्
सव्रीडं प्रिययावलोकितमुखो रामोऽस्तु निश्श्रेयसे ॥

अभूदभूतमतिपक्षभीतिः सदा समाति(सादि)तभूरिनीतिः ।
वीरः कृतार्थीकृतभूमिदेवः स्फुरत्प्रतापो नरसिंहदेवः ॥

सूनुस्तस्य वसुन्धरापरिवृढस्यानन्दकन्दः क्षिते-
राधारो जगतामशेषविदुषां विश्रामकल्पद्रुमः ।

दाने कर्णकथावलेपनिपुणः संसाररत्नाङ्कुरो
भूमीपालशिरोमणिर्विजयते श्रीभैरवेन्द्रो नृपः ॥
अर्थिप्रार्थितपूरकोऽपि रमतां स्वीये बलिर्मन्दिरे
नाकेऽनेकफलान्वितोऽपि स सुखेनास्तां त्र कल्पद्रुमः ।
श्रीमान् सम्प्रति भैरवेन्द्रनृमणिः सर्वार्थिचिन्तामणि-
र्जातो लोचनगोचरो यदि तदा किं तेन तेनापि वा ॥
यस्मिन्राजनि राजनीतिचतुरे पाथोधितीरावधि-
प्रख्यातप्रथितप्रतापनिचये पृथ्वीमिमां शासति ।
कोकं राजकरो न लोकनिकरं संतापयत्युन्नतो
विख्यातः सुदृशां महोत्सवविधौ कान्तेन पाणिग्रहः ॥
खौकूलवंशजातस्तत्सान्दे(दे)शान्मणी(ही)शस्य ।
श्रीरुचिपतिरतिगूढाः स्पन्दी(ष्टी)कुरुते मुरारिकविवाचः ॥
असद्भिरधिरोप्यते यदपि दूषणं मत्कृतौ
तथापि सुमनीषिणां भवति कर्णभूषोचिता ।
निपीय खलु निर्दयं प्रसभमुज्झिता राहुणा
न किं दिविषदः पराः परिपिबन्ति चान्द्रीः कलाः ॥

इह खलु सकलपदार्थजातेषु स्वेष्टसाधनताज्ञानादेव प्रेक्ष(ा)वतां प्रवृत्ति-र्दृश्यते । तदुक्तं न्यायकुसुमाञ्जलावाचार्यचरणैः—"तदज्ञानं विषयस्तस्य विधिः" इति । अत्र च प्रयोजनाकाङ्क्षायाम्,

"निर्दोषगुणवत्काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ॥"

इति सरस्वतीकण्ठाभरणे भोजराजेन,

"धर्मार्थकाममोक्षेषु वैलक्षण्यं कलासु च ।
करोति प्रीतिकीर्ती च साधुकाव्यनिषेवणम् ॥"

इति रसप्रकाशकारेण,

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥"

इत्यनेन च विशिष्टकाव्यकरणे प्रयोजनाभिधानात्तत्र प्रेक्षावन्तः प्रवर्तन्ते । तच्चेदं द्विविधम् । श्रव्यमभिनेयं च । तत्र सुकुमारमतयो राजकुमारप्रभृतयो

निसर्गदुर्बोधमतिनीरसं खल्वेतत्, कथमिवात्र निष्फलमात्मानमवसादयामः इति संततमालोचयन्तः शास्त्रे न प्रवर्तन्ते । ते तावदवश्यं चतुर्वर्गोपायेषु व्युत्पाद्याः । तेऽमी द्विविधाः । केचित्पदपदार्थमात्रचतुरास्तत्तद्रसप्रधानाभिः कविनाम(।)- ङ्कितादिभिः चमत्कारिणीभिः गाथाभिः गोष्ठीमनुबध्नन्ति । केचित्ततोऽपि जड- मतयस्तत्राप्यनुत्सक्तमानस(।): नृत्यादिप्रसङ्गेन समयं गमयन्ति ।

* * * *

अत्र च विशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं विघ्नोत्सारणासाधारण कारणं मङ्गलमरचयन्नेव

"देवद्विजनृपादीनामाशीर्वादसमन्विता ।
अष्टभिर्वा द्वादशभिः पदैः सम्यङ्नियोजिता ॥
नान्दी कार्यादि(ति)यत्नेन बुधैर्विघ्नोपशान्तये ।"

इति तत्रभवान् मुरारिमिश्रः पद्यद्वयेनाष्टपदां नान्दीमादौ निर्दिशति— निष्प्रत्यूहमिति । भगवतो लोचने चक्षुषी उपास्महे आराधयाम इति सम्बन्धः ॥

* * * *

**Colophon:**

इति समस्तप्रक्रियाविराजमानरिपुराजकंसनारायणभवभक्तिपरायणश्रीहरि- नारायणपदसमलङ्कृतमहाराजाधिराजश्रीमद्भौ(दै)रवसिंहदेवप्रोत्साहितश्रीरुचिपति- महोपाध्यायविरचितायामनर्घराघवटीकायां प्रथमोऽङ्कः ॥

**End:**

यद्वा पुनरावृत्तिः पुनर्जन्म, पुनरावृत्तिदुर्लभमित्यादौ तथा दर्शनात् । तेन जीवत एव तावदिह तव पुनर्जन्म दृष्टमित्यर्थः । यद्वा पुनरावृत्तिरेव जीवतो जनस्य मया दृष्टा । लोकोक्तिरियम् । पुनरावृत्तिरिति क्वचित्पाठः ॥

---

## No. 12443. अनर्घराघवव्याख्या.

## ANARGHARĀGHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 16¼ × 1⅞ inches. Pages, 98. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1a. The other work herein is Anargharāghava-vyākhyā 50a.

Breaks off in the second act.

Same work as the above.

This MS. is the original from which the MS. described under the previous number was transcribed.

## No. 12444. अनर्घराघवव्याख्या.
## ANARGHARĀGHAVAVYĀKHYĀ.

Substance, paper. Size, 11 × 4¼ inches. Pages, 14. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 51*b*. The other work herein is Mṛcchakaṭikāvyākhyā 1*b*.

Breaks off in the second act.

Similar to the work described above. This commentary was composed by Dharānanda, son of Rāmabala of Bhartapūr, and is called Gūḍhārthadīpikā.

**Beginning:**

विधिकृतनियमविलक्षणनिर्मितिमातन्वते रसाभिज्ञाः ।
यत्कृपया रसरूपा जयति सदा सा सरस्वती सर्वा ॥
स्वमार्गनिष्ठेषु दयार्द्रचित्तः प्रपत्तिमार्गं प्रकटीचकार ।
योऽनेकदेवस्तुतपादपद्मस्तं जानकीशं शरणं प्रपद्ये ॥
स्वगुरुं परमानन्दं नत्वादरतः स्वकीयपितरौ च ।
अनर्घराघवटीकां कुर्वे गूढार्थदीपिकां स्वल्पाम् ॥

नाटकादौ नान्दी आवश्यकीति नियमेन अष्टपदी तां विरचयति— निष्प्रत्यूहमिति । विघ्नोऽन्तरायः प्रत्यूहः इत्यमरः । निर्विघ्नं यथा स्यात्तथा याभ्यां लोचनाभ्याम् । मुग्धः सुन्दरमूढयोरित्यमरः । कम्बोः शङ्खस्य समः कृतः । शार्दूलविक्रीडितं वृत्तम् ।

* * * *

**Colophon:**

इति भरतपुरनिवासिनो रामबलस्य सुतेन धरानन्देन कृतायामनर्घराघवगूढार्थदीपिकायां प्रथमोऽङ्कः समाप्तः ॥

**End:**

एतच्चिह्नम् । सैंहिकेयो विधुन्तुद इत्यमरः । नर्कुटकवृत्तम् । सूक्ष्मकर्णैः हरिणीवृत्तम् । अमूनि वसन्ततिलका । सन्ध्यायां किंचि ।

---

## No. 12445. अनर्घराघवव्याख्या.
## ANARGHARĀGHAVAVYĀKHYĀ.

Pages, 177. Lines, 25 on a page.

Begins on fol. 209*a* of the MS. described under No. 5775.

Complete.

Same work as that described under R. No. 484 of the Triennial Catalogue of MSS., Vol. I, Part I-B, wherein see for the beginning. By Harihara, son of Nṛsiṁhārya of Bhāradvājagōtra.

**End:**

यशोरसायनमित्यनेन तस्य लोकोत्तरत्वं दर्शितम् । मधुस्यन्द इत्यनेन तस्य हृदयानन्दजनकतया निर्दोषत्वं दर्शितम् । तयोरेव कार्यत्वात् । तेन प्रकृतं कार्यम् ॥

भारद्वाजो नृसिंहार्यसुतो हरिहराभिधः ।
ससमं व्याकरोदङ्कं मुरारिकृतनाटके ॥

**Colophon:**

इति मुरारिनाटकव्याख्यानं संपूर्णम् ॥

The scribe says—

वेमूरिवंशसंभूतवासुदेवाख्यधीमतः ।
तनूजो वेङ्कटशिवो देशिकाज्ञापरः सुधीः ॥
अनर्घराघवव्याख्यां विलिलेख समाहितः ।

---

## No. 12446. अनर्घराघवव्याख्या.

### ANARGHARĀGHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 17¼ × 1⅜ inches. Pages, 235. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1a. The other work herein is Anunitipariṇaya 119a.

Contains acts one to four complete.

Same work as the above.

---

## No. 12447. अनर्घराघवव्याख्या.

### ANARGHARĀGHAVAVYĀKHYĀ.

Pages, 116. Lines, 12 on a page.

Begins on fol. 47a of the MS. described under No. 12439.

Breaks off in the course of the commentary on the seventh act.

Same work as the above.

---

## No. 12448. अनर्घराघवव्याख्या.

### ANARGHARĀGHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 14½ × 1 inches. Pages, 364. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants the beginning in the first act and breaks off in the seventh act.

Same work as the above.

---

No. 12449. अनर्घराघवव्याख्या.

ANARGHARĀGHAVAVYĀKHYĀ.

Pages, 232. Lines, 18 on a page.

Begins on fol. 109a of the MS. described under No. 12432.

Breaks off in the seventh act.

Same work as the above.

---

No. 12450. अनर्घराघवव्याख्या.

ANARGHARĀGHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 16⅜ × 1⅛ inches. Pages, 188. Lines, 6 on a page. Character, Telugu and Grantha. Condition, much injured. Appearance, old.

The first leaf of this work is lost. The numbering of the leaves begin with 87.

Breaks off in the sixth act.

Same work as the above.

---

No. 12451. अनर्घराघवव्याख्या.

ANARGHARĀGHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 293. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the seventh act.

Same work as the above.

---

No. 12452. अनर्घराघवव्याख्या.

ANARGHARĀGHAVAVYĀKHYĀ.

Substance, Śritāla. Size, 11¾ × 2¼ inches. Pages, 190. Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, new.

Breaks off in the seventh act.

Same work as the above.

---

No. 12453. अनर्घराघवव्याख्या.

ANARGHARĀGHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 13¾ × 1¼ inches. Pages, 220. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old. Complete.

This commentary on the Anargharāghava was composed by Kṛṣṇa, son of one Varada.

Copied by Subrahmanya. Date of transcription—8th day of the month of Tai in Pramātica year.

**Beginning**:

नमस्तस्मै भगवते लक्ष्मीनारायणात्मने ।
प्रपञ्चपरिणामस्य मूलभूताय हेतवे ॥
सन्तो न गणयन्त्येव सतो दोषान् स्वभावतः ।
असन्तस्त्वसतो दोषानध्यारोप्य वदन्ति च ॥
इत्थं मय्यसहायेऽत्र दोषादोषपरीक्षणे ।
त्वमेव चेतो नितरां सावधानं सदा भव ॥
सूक्तिरत्नावली यस्य यासीत्सत्कर्णभूषणम् ।
वाल्मीकिर्यामाह्वयते वैदर्भी सूक्तिमौक्तिकीम् ॥
पदवाक्यार्थभावानां व्यक्तिर्या क्रियते मया ।

प्रारिप्सितस्य प्रबन्धस्य विघ्नशान्त्यर्थं पूर्वरङ्गेषु (प्रधा)नभूतां नान्दीं शंसति--निष्प्रत्यूहमिति । अयमत्र,

पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते ।
प्रविश्य तद्वदपरः काव्यार्थं स्थापयेन्नटः ॥

**End**:

त्रीणि स्रोतांसि यावत्कालमिमां त्रिलोकीं शोधयन्ति तावद्वीरयशसा म . . . . . . . . . स्यन्दः कवीनामयं गुणः श्रुतिशष्कुलीवलयितव्योमावगाढेव प्रकाश(ता)मिति ॥

**Colophon**.

श्रीवरद . . . . सूनुना कृष्णेन विरचिते मुरारिव्याकरणे नायकानन्दो नाम सप्तमोऽङ्कः ॥

---

No. **12454**. **अनर्घराघवव्याख्या—इष्टार्थकल्पवल्ली.**

ANARGHARĀGHAVAVYĀKHYĀ: IṢṬĀRTHA-KALPAVALLĪ.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 112. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old. Breaks off in the first act.

Same work as that described under No. 25 of M. Seshagiri Sastri's Report No. 2, pages 67 and 209 to 211.

By Lakṣmīdhara, who was called Rāmānandāśrama after he became an ascetic.

---

No. **12455.** अनर्घराघवव्याख्या—इष्टार्थकल्पवल्ली.
ANARGHARĀGHAVAVYĀKHYĀ : IṢṬĀRTHA-KALPAVALLĪ.

Pages, 123. Lines, 22 on a page.

Begins on fol. 51*a* of the MS. described under No. 12442.

Contains the second act.

Same work as the above.

---

No. **12456.** अनर्घराघवव्याख्या—इष्टार्थकल्पवल्ली.
ANARGHARĀGHAVAVYĀKHYĀ : IṢṬĀRTHA-KALPAVALLĪ.

Pages, 128. Lines, 6 on a page.

Begins on fol. 50*a* of the MS. described under No. 12443.

This MS. is the original from which the MS. described under the previous number was copied.

Contains the second act.

Same work as the above.

---

No. **12457.** अनर्घराघवव्याख्या—इष्टार्थकल्पवल्ली.
ANARGHARĀGHAVAVYĀKHYĀ : IṢṬĀRTHA-KALPAVALLĪ.

Substance, palm-leaf. Size, 15¼ × 1½ inches. Pages, 368. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains acts one and four to six.

Same work as the above.

---

No. **12458.** अनर्घराघवव्याख्या—इष्टार्थकल्पवल्ली.
ANARGHARĀGHAVAVYĀKHYĀ : IṢṬĀRTHA-KALPAVALLĪ.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 161. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Uttararāmacaritavyākhyā 82*a*.

Contains acts three to five.

Same work as the above.

## No. 12459. अनर्घराघवव्याख्या—इष्टार्थकल्पवल्ली.
## ANARGHARĀGHAVAVYĀKHYĀ : IṢṬĀRTHA-KALPAVALLĪ.

Substance, palm-leaf. Size, 15⅞ × 1⅜ inches. Pages, 224. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the first two acts.

Same work as the above.

---

## No. 12460. अनर्घराघवव्याख्या—तात्पर्यदीपिका.
## ANARGHARĀGHAVAVYĀKHYĀ : TĀTPARYADĪPIKĀ.

Substance, paper. Size, 11¼ × 4⅜ inches. Pages, 242. Lines, 19 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

This commentary on the Anargharāghava was composed by Viṣṇupaṇḍita, and is called Tātparyadīpikā.

**Beginning:**

अनणीयांसमीशानं नत्वोमां च पुराविदः ।
अनर्घराघवग्रन्थीनुद्ग्रथ्नाति यथामति ॥
आद्यो दुर्घटशब्दार्थः प्रथमाङ्के विचार्यते ।
सरामलक्ष्मणो यत्र कौशिको गतवान् गृहम् ॥

आचारपरम्परापरिप्राप्तमिष्टदेवतानमस्कारवत् उपासनमपि इष्टसाधनमिति शिक्षार्थं दर्शयति—निष्प्रत्यूहेत्यादि । भगवत ऐश्वर्यादिभाजस्ते लोचने उपास्महे सत्यं भावयामः । किमर्थं, निष्प्रत्यूहं, [प्रत्यूहो]विघ्नप्रध्वंसाय अभावार्थे अव्ययमित्यादिना अव्ययीभावः । क्रियाविशेषणपक्षो नातिप्रशस्तः ।

**End:**

टीकाः पुराणकृतिनां यदपीह सन्ति
धीरास्तथापि मम वाचि रसोऽस्ति कोऽपि ।
वासन्तिकान(न्य)लतिकाः कति नाम सन्ति
वासन्तिकापरिमलः पुनरन्य एव ॥

**Colophon:**

इति श्रीविष्णुपण्डितकृतायां मुरारिटीकायां तात्पर्यदीपिकायां सप्तमाङ्कविवृतिः समाप्ता ॥

Date of copying—

संवत् १८९९ फाल्गुनशुद्ध ११ रवि.

## No. 12461. अनर्घराघवव्याख्या—पञ्जिका.
## ANARGHARĀGHAVAVYĀKHYĀ: PAÑJIKĀ.

Substance, paper. Size, 9 × 7½ inches. Pages, 380. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, new.

Bound in four volumes.

Complete.

A commentary on the Anargharāghava: by Viṣṇubhaṭṭa, son of Muktinātha. It is designated Pañjikā.

**Beginning:**

यं ध्यात्वा वरदं धीरा व्यापारे विघ्ननाशनम् ।
दुष्करेऽपि प्रवर्तन्ते तं वन्दे द्विरदाननम् ॥
अनर्घराघवाख्यस्य नाटकस्य यथामति ।
करोमि पञ्जिकां विष्णुर्मुक्तिनाथार्यनन्दनः ॥
मया मन्देन रचिता पञ्जिकेयं मनीषिभिः ।
उक्तानुक्तदुरुक्तज्ञैः प्रयत्नेन विशोध्यताम् ॥

नाटकत्वं चास्य ख्यातेतिवृत्ततया धीरोदात्तमानुषनायकत्वेन वीररसप्राधान्यात् सन्धिपञ्चकतदङ्गसन्ध्यन्तराख्योपाङ्गभूषणपताकास्थानकविष्कम्भादियुक्तत्वात् । तदुक्तम्,

अर्थप्रकृत्यवस्थात्मसन्धिसन्ध्यङ्गवृत्तिमत् ।
अर्थोपक्षेपणैर्युक्तं पताकास्थानकादिभिः ॥
सन्ध्यन्तराङ्गभूषावन्नाटकं तदुदाहृतम् ॥

इति ।

* * * *

द्वादशपदविंशतिपदश्लोकद्वयात्मिकां सकलमङ्गलावहां नान्दीमाह—निष्प्रत्यूहमिति । तदुक्तम्,

अर्थस्य प्रतिपाद्यस्य तीर्थं प्रस्तावनोच्यते ।
प्रस्तावनायास्तु मुखे नान्दी कार्या शुभावहा ॥

**End:**

काव्येनैव हि यशःस्थैर्यं भवतीति काव्यस्य रसायनत्वम् । तदुक्तम्,

आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति ॥

यावत् त्रिस्रोतसोऽवस्थानं तावत् कार्यं विजृम्भतामित्यर्थः । श्लोकद्वयं(यस्य) शुभाशंसकत्वात् प्रशस्तिर्नामाङ्गम् । तदुक्तम्, 'प्रशस्तिः शुभशंसनम्' इति ॥

**Colophon :**

इति मुक्तिनाथसूनुविष्णुविरचितायामनर्घराघवपञ्जिकायां सप्तमोऽङ्कः ॥
पञ्जिका समाप्ता ॥

---

No. **12462.** अनर्घराघवश्लोकाः.

ANARGHARĀGHAVAŚLŌKAḤ.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 119. Lines, 7 on a page. Character, Telugu. Condition, very much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Abhijñānaśākuntala-ślōkas 61*a*.

Wants the beginning; otherwise complete.

This manuscript contains the stanzas found in the Anargharāghava. The scribe is Vēṅkaṭasūri.

**Colophon :**

मुरारिनाटकस्याङ्के सप्तमे लिखिता मया ।
शताधिकैकपञ्चाशच्छ्लोका वेङ्कटसूरिणा ॥

---

No. **12463.** अनुमितिपरिणयम्.

ANUMITIPARIṆAYAM.

Pages, 35. Lines, 7 on a page.

Begins on fol. 119*a* of the MS. described under No. 12446.

Breaks off in the second act.

A drama explaining the Nyāya doctrine of inferential knowledge (Anumiti). Anumiti is represented as the daughter of Parāmarśa and is to marry Nyāyarasika (one who appreciates right reasoning). This drama was intended to be staged on the occasion of the annual festival in the month of Caitra (April-May) of God Pārthasārathi, worshipped at Triplicane, Madras. The author is Nṛsiṁhakavi, son of Vēṅkaṭakṛṣṇa of Bhāradvājagōtra and a resident of Triplicane.

**Beginning :**

वेदान्ता अपि यद्गुणाब्धिविलसद्वीचीकणग्राहिण
स्तत्सर्वं जनकं महत्त्रिजगतामेकं नमस्कुर्महे ।

यः कश्चिन्मननात्मिकां सुमतिमभ्युद्यन्निदिध्यासनां
तत्त्वज्ञानकरीमुदूह्य रमते यस्य श्रुतर्वैभवात् ॥
वामोरुसङ्गनिषण्णसिन्धुतनयावक्षोजकोकद्वयी-
रम्योन्मेषविरोधिनी मुखविधोर्दन्तप्रभाकौमुदी ।
मा भूदित्यभिमानवानिव कुचौ कुर्वन्निचोलाश्रितौ
हस्ताम्भोजदलान्तरैरवतु वः श्रीमान्नृकण्ठीरवः ॥

• • • •

श्रितवत्सलतया लवणोदधिनिषेवितकैरविणीपुरनिवासिनो भगवतः श्रीपार्थसारथेश्चैत्रोत्सवसेवासमागताः समधिगताखिलकलाः सर्वे वैदेशिकाः पारिषदाः परिलसन्ति । अवसरः खल्वयमात्मीयकलाप्रकटनस्य । (आकाशे कर्णं दत्वा) किं ब्रूथ ।

• • • •

सूत्रधारः—कतमस्मिन्नीदृशो गुणग्रामः ।

(मुहूर्तमिव ध्यात्वा स्मृतिमभिनीय)

तदेतत्करतलगतं रत्नमापणेषु मृग्यते ; यदस्मिन्नेव नगरे विद्यमानमनालोच्य देशान्तरेषु गवेषणम् । अस्ति खलु भरद्वाजकुलतिलकस्य तत्रभवतः श्रीविङ्कटकृष्णगुरोस्तनुजन्मा विद्वत्कविशिरोमणिर्नृसिंहकविः । तेन भरतेषु निर्मितमनुमितिपरिणयं नाम रूपकम् । तेनैव किल शक्यं सामाजिकानामोदयितुम् ।

• • • •

वसन्तः संतोषं जनयति दिगन्तेषु विकस-
त्प्रसूनानां गन्धैः स्फुरति विबुधानां च पटली ।
वयं चेन्निष्णाताः किल भरतविद्यासु नितरा-
मसौ(चे)दन्वाद्यञ्जयति नरकण्ठीरवकविः ॥

**End:**

अथ हि—

जाड्यं चेतसि जृम्भते स्मृतिपरिभ्रंशश्च संजायते
चाक्ष्णोरश्रुपरम्परा स्थगयति द्वन्द्वं सवर्मोद्गमा ।
निश्वासाः परिशोषिताधरदला निर्यान्त्ययत्नादहो
निद्रा क्वापि विमानितेव दयिता क्वापि द्रुतं विद्रुता ॥

तर्कसारः—देव, किमद्याप्यातङ्केन । क्वचिदपि गतश्चा.

## No. 12464. अम्बुजवल्लीकल्याणम्. AMBUJAVALLĪKALYĀṆAM.

Pages, 46. Lines, 10 on a page.

Begins on fol. 19*a* of the MS. described under No. 4212, wherein this work has been mentioned as Ambujavalliparinaya in the list of other works given therein.

Complete.

A drama in five acts having for its plot the story of the marriage of the Goddess Ambujavallī with God Bhūvarāha worshipped at Śrīmuṣṇam in the South Arcot district. It is said to have been staged in the vernal festival of God Bhūvarāha at Śrīmuṣṇam. The author is Śrīnivāsakavi, son of Varadadēśika of Kauṇḍinyagōtra.

**Beginning :**

पद्मे त्वं सततं भुजान्तरपदे क्रीडेति तामुद्वहन्
सान्त्वैः स्वान्तविमोहनैरपनयन् सापत्न्यशङ्कामपि ।
भूमे चाहमदूरुसंगमसुखं भुङ्क्ष्वेति चाङ्कं नयन्
धीरोदात्तगुणाकरो विजयते श्रीभूवराहो हरिः ॥

अपि च,

रुक्मिण्याः किमु पादयावकभवो रागस्तवाक्ष्णोः प्रभो
तर्ह्यंटीरमजोऽथ जागरज इत्याशङ्कितः सत्यया ।
त्वद्बिम्बाधरसंगमात्प्रतिफलन् रागो न चान्यः प्रिये
कल्याणीत्यभिनन्दयंस्तदधरं चुम्बन् हरिः पातु नः ॥

(नान्द्यन्ते)

सूत्रधारः—(सहर्षं सर्वतोऽवलोक्य) अहो सपदि संपादित एव रङ्गमङ्गलविधिः धीरमद्दलध्वनिडम्बरदलिताम्बरैः संगीतभङ्गीकुशलैरस्मत्कुशीलवैः । (नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत् ।

(प्रविश्य)नटी—अय्य एसम्हि ।

सूत्रधारः—आर्ये, इह खलु सकलसुरासुरनिकररुचिरनवमणिगणखचितमकुटमालिकामहितचरणकमलयुगलस्य भगवतः श्रीभूवराहस्य वसन्तोत्सवविद्धोकयिषया समागतवन्तो भगवन्तोऽसंख्येया इमे संख्यावन्तः ।

सू— (विचिन्त्य) आर्ये इदानीं दिष्ट्या स्मृतं मया । श्रूयतां तावत्,

अस्ति प्रशस्तविभवः परवादिमत्तमातङ्गमानपरिखण्डनकेसरीन्द्रः ।
त्रय्यन्तविद्वरददेशिक इत्युदारः कौण्डिन्यमण्डनमणिः कविसार्वभौमः ॥
तस्मादभूत्सरसरूपकमार्गदर्शी निर्व्यूढपक्षप . . . यनिगूढभावः ।
स श्रीनिवासकविराजशिखामणिर्यं प्रामाकराहि(दि)परवादिकुठारमाहुः ॥

* * * *

सू—अयि सुव्यक्तमेतदम्बुजवल्लीकल्याणमिति । यत्र चेयं कृता प्रतिज्ञा [च],

सद्रीतिः शुचिरुज्ज्वला मृदुपदन्यासा सुवृत्तान्वया
निर्दोषा सदलंकृतिर्गुणवती दुर्ज्ञानभावा खलैः ।
शय्याभाक् पुरुषोत्तमं रसवती वाञ्छन्त्यतीवादरा-
द्वाणी मे पतिदेवतेव तरुणी नान्यं स्मरत्वङ्गिनम् ॥

* * * *

सूत्रधारः—आर्ये, किं बहुना । भाग्यवशादिदानीमतिविचित्रतरा नाट्य-सामग्री संगता । यतः,

वाणी तस्य कवेश्चतुर्मुखवधूसंगीतभङ्गीसखी
सारज्ञा च सभा कथा च रुचिरा श्रीमुष्णपृथ्वीपतेः ।
शृङ्गारश्च रसो वसन्तसमयः शक्ताः प्रयोगे वयं
दिष्ट्या नाट्यविधौ स्वयं सुघ(टितः स)वो गुणानां गणः ॥

**End:**

सेनापतिः (सहर्षं बद्धाञ्जलीन् सर्वतोऽवलोक्य)—भो भो विधिशिव-प्रमुखा बर्हिर्मुखाः, इतः स्वामिनः संदर्शनकन्दलितानन्दसंदोहतुन्दिलितानाम-लभ्यं किमन्यदस्त्यस्माकम् । तथापीयमस्तु भरतभारती—

उर्वीं दर्वीकरेन्द्रस्फुटफणपदभागेधतां साधु नाथै-
र्नीरोगा नित्ययोगा निखिलमखकृतः सन्ततं सन्तु सन्तः ।
नित्यं नृत्यद्धनश्रीर्निरवधि नगरी वर्धतां मुष्णनाम्नी
नित्यैस्तैस्तैः समस्तैः सपदि विजयतामुत्सवैर्भूवराहः ॥
(इति निष्कान्ताः सर्वे ॥)

**Colophon:**

पञ्चमोऽङ्कः । नाटकं संपूर्णम् ॥

## No. 12465. अभिज्ञानशाकुन्तलम्.
## ABHIJÑĀNAŚAKUNTALAM.

Substance, paper. Size, 11⅝ × 7¼ inches. Pages, 95. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 70*a*. The other works herein are Mālavikāgnimitra 1*a*, Kāvyādarśavyākhyāna 94*a*.

Complete.

The well-known drama of Kālidāsa in seven acts. It has been repeatedly printed.

**Beginning:**

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वभूतप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥

(नान्द्यन्ते)

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य,)

आर्ये, नेपथ्यविधानमवसितं यदि इतस्तावदागम्यताम् ।

(प्रविश्य,) नटी—अय्य इअं ह्मि ।

सू—अभिरूपभूयिष्ठा परिषदेषा । अद्य खलु कालिदासग्रथितवस्तुना नवेन नाटकेनोपस्थातव्यमस्माभिः । तत्प्रतिपात्रमाधीयतां यत्नः ।

* * * *

सू—आर्ये, साधु गीतम् । अहो ! रागानुबद्धचित्तवृत्तिरालिखित इव सर्वतो रङ्गः । तदिदानीं कतम(त्) प्रकरणमाश्रित्यैनामाराधयामः ? ।

नटी—णं अ(अभि)स्सेहिं पुढमं एव्व आणत्तं । अहिण्णाणसाउन्दळं णाम अस्सुदपुव्वं णाडअं पओए अहिकारिअदु त्ति ।

सू—आर्ये, सम्यगवबोधितोऽस्मि । अस्मिन् क्षणे विस्मृतं किल मया तत् । कुतः—

तवास्मि गीतरागेण हारिणा प्रसभं हृ(हृ)तः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥

(निष्क्रान्तौ)

प्रस्तावना ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतमहतां महीयसाम् ।
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः ॥

(इति निष्क्रान्ताः सर्वे)

**Colophon:**

सप्तमोऽङ्कः ॥

---

No. **12466.** अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf (Śrītāla). Size, 8¾ × 1¼ inches. Pages, 160. Lines, 6 on a page. Character, Malayāḷam. Condition, injured. Appearance, old.

Begins in the course of the 1st act and breaks off in the seventh.

Same work as the above.

---

No. **12467.** अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, 15¼ × 1 inches. Pages, 110. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

---

No. **12468.** अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, 13¼ × 1½ inches. Pages, 163. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Vikramōrvaśīya 84*a*, Mālavikāgnimitra 138*a*.

Complete.

Same work as the above.

---

No. **12469.** अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, 18' × 1½ inches. Pages, 56. Lines, 7 on a page. Character, Kanarese. Condition, much injured. Appearance, old.

Breaks off in the seventh act.

Same work as the above.

No. 12470. अभिज्ञानशाकुन्तलम्.
ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, 16¾ × 1¼ inches. Pages, 50. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Vikramōrvaśīya 26*a*, Mālavikāgnimitra 56*a*.

Begins in the course of the fifth act and contains the work complete.

Same work as the above.

---

No. 12471. अभिज्ञानशाकुन्तलम्.
ABHIJÑĀNAŚĀKUNTALAM.

Substance, paper. Size, 11¼ × 4¾ inches. Pages, 94. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Begins on fol. 409*b*. The other works herein are Sāhityadarpaṇavyākhyā 1*b*, Dānakēlikaumudī 149*b*, Vidagdhamādhava 183*b*, Madālasānāṭaka 272*b*, Alaṅkārakaumudīṭikā 338*b*, Rasacandrikā 351*b*.

Complete.

Same work as the above.

Date of transcription—The 2nd day of the bright fortnight of the month of Kārttika in Samvat 1901.

---

No. 12472. अभिज्ञानशाकुन्तलम्.
ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 118. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 21*a*. The other work herein is Naiḍadam (Tamil) 1*a*.

Begins in the course of the third act and contains the work complete.

Same work as the above.

---

No. 12473. अभिज्ञानशाकुन्तलम्.
ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, 21¼ × 1⅝ inches. Pages, 49. Lines, 11 on a page. Character, Telugu. Condition, fair. Appearance, old.

Complete.

Same work as the above.

The scribe writes—

भवाब्दाषाढमासे तु कवेर्वारेऽष्टमीतिथौ ।
रङ्गाख्यसूरिर्व्यलिखादिदं शाकुन्तलं परम् ॥

श्रीमद्वत्सकुलाम्भोधेश्चन्द्रेण प्रथितगुणेन संलिखितम् ।
रङ्गाख्येन च कविना लिखितं शाकुन्तलं विदुषा ॥

---

No. **12474**. अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 127. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

---

No. **12475**. अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 109. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Copying is said to have been finished on Tuesday, the 30th of Puraṭṭāsi of the Dundubhi year, by Śrīnivāsācāri.

Complete.

Same work as the above.

---

No. **12476**. अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, 15⅝ × 1⅝ inches. Pages, 138. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

The order in which the acts are written is the third (wants beginning), the fourth, the fifth, the sixth, the seventh (incomplete) the first, the second (incomplete).

Same work as the above.

---

No. **12477**. अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, 15¾ × 1¾ inches. Pages, 101. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the seventh act.

Same work as the above.

---

No. **12478**. अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, 14¾ × 1¾ inches. Pages, 60. Lines, 6 on a page. Character, Grantha. Condition, fair. Appearance, old.

Breaks off in the fourth act.

Same work as the above.

### No. 12479. अभिज्ञानशाकुन्तलम्.
### ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 38. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins in the course of the fifth act and breaks off in the seventh act

Same work as the above.

---

### No. 12480. अभिज्ञानशाकुन्तलम्.
### ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, $14\frac{3}{8} \times 1\frac{5}{8}$ inches. Pages, 118. Lines, 6 on a page. Character, Kanarese. Condition, good. Appearance, old.

Complete.

Same work as the above.

---

### No. 12481. अभिज्ञानशाकुन्तलम्.
### ABHIJÑĀNAŚĀKUNTALAM.

Substance, palm-leaf. Size, $12\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 194. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete.

Same work as the above.

---

### No. 12482. अभिज्ञानशाकुन्तलव्याख्या—अर्थद्योतनिका.
### ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀ : ARTHA-DYŌTANIKĀ.

Substance, paper. Size, $13\frac{3}{4} \times 6\frac{3}{4}$ inches. Pages, 120. Lines, 13 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, old.

Breaks off in the fifth act.

A commentary on the work described above: by Raghava, son of Pṛthvīdhara. The commentary is called Arthadyōtanikā.

**Beginning:**

यत्रैषाजनि दशधा द्विधागतं यद्यजातं दशविधमेति षोडशत्वम् ।
यद्गीतं सममहदादिकस्य चाद्यं तेजस्तज्जयति हिमोष्णरूपमव्ययम् ॥

* * * *

वाचिकाद्यभिनयोपमनाट्याचार्यमत्र भरतं मुनिमीडे ।
लास्यताण्डवनियोजनलीलाकौशलेन परितोषितभर्गम् ॥

अथ नाटकादौ पूर्वरङ्गाङ्गभूतामाशीरूपां चतुरस्रतालानुसारिणमिष्टपदां सूत्रधारो नान्दीं पठति—या सृष्टिरिति । या तनुः स्रष्टुर्ब्रह्मण आद्या सृष्टिः; जलमित्यर्थः । 'अप एव ससर्जादौ तासु वीर्यमवासृजत्' इति स्मरणात् ।

* * * *

**Colophon:**

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणपृथ्वीधरात्मजराघवविरचितायामभिज्ञानशाकुन्तलटीकायामर्थद्योतनिकायां प्रथमोऽङ्कः समाप्तिमगमत् ॥

**End:**

सा निन्दन्तीति । यतो बाला अत एव बाहुल्क्षेपं यथा.

---

No. **12483.** अभिज्ञानशाकुन्तलव्याख्यानम्—कुमारगिरिराजीयम्.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM: KUMĀRAGIRIRĀJĪYAM.

Pages, 103. Lines, 21 on a page.

Begins on fol. 119*a* of the MS. described under No. 5775.

Complete.

Same work as that described under R. No. 29:(*b*) of the Triennial Catalogue, Vol. I, Part I-A, wherein see for the beginning.

**End:**

सरस्वती महीयतां पूज्यताम् । महीङ् इत्ययं धातुः कण्ड्वादिः

* * * *

स्वरूपमेवावलम्ब्य आशिषं प्रयुक्तवानित्यनुसन्धेयम् ।

अत्र शुभशंसनात्प्रशस्तिर्नाम सन्ध्यङ्गमुक्तं भवति । यथोक्तं प्रशस्तिः शुभशंसनमिति । इति निष्क्रान्ताः सर्वे ॥

**Colophon:**

इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीयाख्याने शाकुन्तलव्याख्याने सप्तमोऽङ्कः ॥

श्रीमत्काटयवेमस्य कृतिर्विज्ञानशालिनी ।
कुमारगिरिराजीयं जीयादाचन्द्रतारकम् ।

The scribe adds:—

गङ्गवंशाब्धिराकाब्जो रक्ताक्ष्यभिधहायने ।
कुमारगिरिराजीयं पेरुमट्टोऽलिखन्मुदा ॥

**No. 12484.** अभिज्ञानशाकुन्तलव्याख्यानम्—कुमारगिरिराजीयम्.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM: KUMĀRA-GIRIRĀJĪYAM.

Substance, palm-leaf. Size, 15⅜ × 1⅝ inches. Pages, 122. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Wants two leaves in the beginning; otherwise complete.

Same work as the above.

The scribe adds:—

नलवर्षे च मकरे सौम्ये चैकादशीतिथौ ।
शाकुन्तलमहाटीकां लिलेखामृतसंनिभाम् ॥

वेलमूरु पत्तञ्जि वेंकटराघवस्य शाकुन्तलव्याख्यानं कुमारगिरिराजीयं नामेदम् ॥

---

**No. 12485.** अभिज्ञानशाकुन्तलव्याख्यानम्—कुमारगिरिराजीयम्.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM: KUMĀRA-GIRIRĀJĪYAM.

Substance, palm-leaf. Size, 13⅜ × 1¼ inches. Pages, 161. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the seventh act

Same work as the above.

---

**No. 12486.** अभिज्ञानशाकुन्तलव्याख्यानम्—कुमारगिरिराजीयम्.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM: KUMĀRA-GIRIRĀJĪYAM.

Substance, palm-leaf. Size, 16⅜ × 1½ inches. Pages, 166. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old

Breaks off in the seventh act.

Same work as the above.

Name of the former owner—Paiḍighanṭam Akkaya.

---

**No. 12487.** अभिज्ञानशाकुन्तलव्याख्यानम—कुमारगिरिराजीयम्.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM: KUMĀRA-GIRIRĀJĪYAM.

Substance, palm-leaf. Size, 14⅜ × 1⅝ inches. Pages, 85. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above.

No. 12488. अभिज्ञानशाकुन्तलव्याख्या—साहित्यटीका.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀ: SĀHITYAṬĪKĀ.

Substance, palm-leaf. Size, 18½ × 1¼ inches. Pages, 114. Lines, 8 on a page. Character, Telugu. Condition, fair. Appearance, old. Complete.

This commentary was written by Śrīnivāsācārya, son of Timmayārya belonging to the Vaikhānasasūtra. The introductory stanzas are not found in this MS.

**Beginning:**

इह खलु सकलकविकुलतिलकप्रसिद्धकालिदासनामा कविः नाटकान्तं कवित्वमिति धिया नाटकरूपप्रबन्धं निर्मित्सुश्चिकीर्षितग्रन्थस्याविघ्नेन परिसमाप्तिमभिलषन् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्यालंकारिकशासनमप्यनुसरन् प्रकृतोचितनान्दीरूपामाशिषं प्रयुङ्क्ते—या सृष्टिरित्यादिना। ताभिः प्रत्यक्षाभिरष्टाभिस्तनुभिः प्रपन्न ईशोऽवत्विति योजना। कीदृश्यस्तनव इत्यत (आह)—स्रष्टुः ब्रह्मणः।

**End:**

आत्मभूः स्वयंभूः ममापि पुनर्भवं पुनर्जन्म क्षपयतु अपाकरोतु। अनेन प्रशस्तिर्नाम सन्ध्यङ्गमुक्तम्। तदुक्तम्—'प्रशस्तिः शुभशंसनम्' इति। अत्र पुनर्जन्मक्षपणस्यात्यन्तनिषिद्धत्वोपलक्षितपरमानन्दस्वरूपत्वे शुभत्वम्। अतस्तदाशंसा भवति। एवं सर्वनाटकेषु वाक्येषु शुभशंसा योजनीया॥ (निष्क्रान्ताः सर्वे)॥

**Colophon:**

इति श्रीसकलसुरासुरसेवितश्रीवेङ्कटेशचरणाम्बुजसमाराधकतिम्मयार्यपुत्रेण सकलकलाप्रवीणेन वैखानसकुलोत्तंसेन श्रीनिवासाचार्येण विरचिते प्रौढवेद्ये साहित्यटीकासमाख्याने शाकुन्तलव्याख्याने सप्तमोऽङ्कः॥

---

No. 12489. अभिज्ञानशाकुन्तलव्याख्यानम्.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM.

Substance, palm-leaf. Size, 18 × 1¾ inches. Pages, 152. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new. Breaks off in the sixth act.

Similar to the above.

The commentator's name is not given.

**Beginning:**

. . . . . . . . . . . . . . . रूपिणीम् ।
मध्यमामक्षराकारां वन्दे तामपि वैखरीम् ॥

इह खलु सकलकलासार्वभौमः श्रीकालिदासः प्रारिप्सितस्य प्रबन्धस्याविघ्नेन परिसमाप्त्यर्थं विशिष्टेष्टदेवतास्मरणद्वारेणाशिषं प्रयुङ्क्ते—या सृष्टिरित्यादि । या सृष्टिः स्रष्टुः ब्रह्मणः आद्या सृज्यत इति सृष्टिः ब्रह्मणः प्राथमिकी सृष्टिरापः; अप एव ससर्जादावित्युक्तत्वात् ।

**End:**

अथ कथमार्यपुत्रेण स्मृतो दुःखभागयं जनः । मोहात् मया । हे सुतनु मोहादज्ञानात् [बद्धबीजः श्लथीकृतकः] अधरं परिबाधमानः उष्णबाष्पपतनात् क्लेशकरः यो बाष्पः पूर्वं मयोपेक्षितः नावलोकितः कुटिलपक्ष्मविलग्नं कोपकुटिलोच्छ्र[ने]त्रपक्ष्माग्रविलग्नं तं बाष्पं नेत्राम्बु अथेदानीं प्रमृज्य मार्जनं कृत्वा विगतानुशयो मुक्तवि(षादः).

---

No. **12490.** अभिज्ञानशाकुन्तलप्राकृतविवृतिः.

ABHIJÑĀNAŚĀKUNTALAPRĀKṚTAVIVṚTIḤ.

Substance, paper. Size, 10⅜ × 4½ inches. Pages, 19. Lines, 9 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, new.

Complete.

A work containing the Sanskrit rendering of the Prākṛta passages occurring in the Abijñānaśākuntala. The author who does not mention his name is a disciple of Rāmēśa and salutes Vināyaka.

Dated Samvat 1900, Jyēṣṭhaśukla, 14th, Sunday.

**Beginning:**

नत्वा रामेशगुरवे द्विपास्याय च भक्तितः ।
शाकुन्तलप्राकृतस्य संस्कृतेनार्थ उच्यते ॥

नटी—

आर्यपुत्रेयमस्मि । आज्ञापयत्वार्यः । कोऽनुयोगोऽनुष्ठीयतामिति ।

नटी—

सुविहितप्रयोगतया आर्यस्य न किमपि परिहास्यते ।

**End:**

अदितिः—

अनया आनन्दमनोरथसम्पत्त्या कण्वोऽपि तावत् श्रुतविस्तार । मेनका रहस्येव संविहिता ।

शकुन्तला—मनोगतं मे मच्चित्तं भवत्या ॥

**Colophon:**

इति शाकुन्तलप्राकृतविवृतौ सप्तमोऽङ्कः ॥

---

## No. 12491. अभिज्ञानशाकुन्तलश्लोकाः.
## ABHIJÑĀNAŚĀKUNTALAŚLŌKAḤ.

Pages, 23. Lines, 6 on a page.

Begins on fol. 61*a* of the MS. described under No. 12462.

Complete.

Gives all the stanzas contained in the Abhijñānaśākuntala without the prose passages.

**Colophon:**

शाकुन्तलाख्यग्रन्थेऽङ्के सप्तमे लिखिता मया ।
श्लोकाः पञ्चाधिकत्रिंशद्रामचन्द्रेण धीमता ॥

---

## No. 12492. अभिषेकनाटकम्.
## ABHIṢĒKANĀṬAKAM.

Substance, (Śritāla) palm-leaf. Size, 14½ × 2 inches. Pages, 38. Lines, 9 on a page. Character, Malayāḷam. Condition, injured. Appearance, old.

Begins on fol. 59*a*. The other works herein are Āścaryacūḍāmaṇi 1*a*, Pratimānāṭaka 33*a*.

Complete in seven acts.

A drama having for its plot the story of the Vālmīki Rāmāyaṇa as contained in the Kiṣkindhā, the Sundara and the Yuddha Kāṇḍas. The work has been printed in the Trivandrum Sanskrit Series, according to which the author is said to be Bhāsa.

Copied by Tōṭṭaccēri Tāmōn.

**Beginning:**

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्र—

यो गाधिपुत्रमखविघ्नकराभिहन्ता युद्धे विराधखरदूषणकर्णधारा(वीर्यहन्ता)।
दर्पोल्बणोद्यतकबन्धकपीन्द्रहन्ता पायात् स वो निशिचरेन्द्रकुलाभिहन्ता ॥

एवमार्यमिश्रान् विज्ञापयामि । अये ! किंनु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते ! अङ्ग पश्यामि ।

[नेपथ्ये.]

सुग्रीव ! इत इतः ।

(प्रविश्य)

पारिपार्श्वकः—भाव

कुतो नु खल्वेष समुत्थितो ध्वनिः प्रवर्तते श्रोत्रविदारणो महान् ।
प्रचण्डवातोद्धतभीमगामिनां बलाहकानामिव खेऽभिगर्जताम् ॥

सूत्र—मारिष किं नावगच्छसि ? एष खलु सीतापहरणजनितसंतापस्य, रघुकुलप्रदीपस्य, सर्वलोकनयनाभिरामस्य (रामस्य) दाराभिमर्शननिर्विषयीकृतस्य, सुविपुलमहाग्रीवस्य (सुग्रीवस्य) च परस्परदारकृतप्रतिज्ञयोः सर्ववानरपति[मे]वालिनं हन्तुं समुद्योगः प्रवर्तते ॥

तथा हि :—

इदानीं राज्यविभ्रष्टं सुग्रीवं रामलक्ष्मणौ ।
पुन(ः)स्थापयितुं प्राप्ताविन्द्रं हरिहराविव ॥

[निष्क्रान्तौ]

स्थापना ।

**End :**

अग्निः—भद्रमुख ! एते(ता) महेन्द्र(नि)योगात् भरतशत्रुघ्नपुरस्सराः प्रकृतयो भवन्तमुपस्थिता(ः) । इमे च महेन्द्रादयोऽमृतभुजो भवन्तमभिवर्धयन्ति ॥

रामः—अनुगृहीतोऽस्मि ।

अग्निः—भद्रमुख ! किं ते भूयः प्रियमुपहरामि ?

रामः—यदि मे भगवान् प्रसन्नः, किमुत्तरमहमिच्छामि ?

(भरतवाक्यम्.)

भवन्तु(न्त्व)रजसो गावः परचक्रं प्रशाम्यतु ।
इमामपि महीं कृत्स्नां राजा(ज)सिंहः प्रशास्तु नः ॥

(निष्क्रान्त(ाः)सर्वे.)

**Colophon :**

सप्तमोऽङ्कः ॥

---

## No. 12493. अभिषेकनाटकम्.

## ABHIṢEKANĀṬAKAM.

Substance, paper. Size, 6¾ × 5¼ inches. Pages, 121. Lines, 8 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1a. The other works herein are Āścaryacūḍāmaṇi 62a, Pratimānāṭaka 120a.

Restored from the MS. described above.

Complete.

Same work as the above.

---

## No. 12494. अर्थपञ्चकनाटकम्.
## ARTHAPAÑCAKANĀṬAKAM.

Pages, 28. Lines, 6 on a page.

Begins on fol. 41*a* of the MS. described under No. 12343.

Complete in five acts.

The following is a brief substance of the story of the drama:— Manmatha, the God of Love, after having been burnt to ashes by God Śiva, is said to have been born as the son of Śaurirājapperumāl, a form of Viṣṇu, worshipped in the shrine at Tirukkaṇṇapuram in the Tanjore district. Within ten days after the birth of the child, the demon Śambarāsura cast it into the sea where it was devoured by a fish which having been caught and cut open by the servants of the demon revealed a charming young child inside; and Rati, who was born as the daughter of the demon, having come to know of this, ordered that the child should be carefully tended and brought up. When the child came of age, he killed the demon and married his daughter.

The drama is called Arthapañcaka because it embodies as stated in the last stanza five things—चिन्तायोग, समारम्भ, व्यापार, हेतुदर्शन, and अभीष्टलाभ in Aṅkas one to five, respectively. The author's name is not given.

**Beginning:**

(श्रीवत्स)कौस्तुभाकल्पध्वान्तप्रद्योतयोर्मिथः ।
विरोधशातनीमाद्यां लक्ष्मीं सन्ध्यामुपास्महे ॥
कस्यापि शाखानिलयस्य मूले नाम्भः पिबन्ती न तृणा(न्यदन्ती) ।
. . . . . . वतीर्णा गौः संनिदध्यादमृतं दुहाना ॥

(नान्द्यन्ते सूत्रधारः)

सू—(समन्तादवलोक्य सहर्षम्) अहो संप्रति प्रत्यासन्न एषोऽस्मदाशिषामुल्लासिकसमयः । येन भगवच्चै(त्रोत्सव)यात्रायामभिवर्तते विद्वत्ता परिषदेषा । तदेनामनुरूपेण रूपकेणारिराधयिषुरस्मि ।

(प्रविश्य नटः वीटिकां ददाति)

सू—(गृहीत्वा) मारिष कुत एषा (वीटिका) ।

नटः—महाब्रणप्पसादादो ।

सू—(सविनयं शिरसि कृत्वा वाचयति) ।

विजानतां किंचिदजानतां वा समानमाराधनमेकमर्थ्यम् ।
वैदर्ध्यविन्यासमहार्थगर्भम . . . न्नाटकमाविरस्तु ॥

इति । (सानन्दम्) अहो अस्मदभिमतमेवानुरूप्ये परिषदाज्ञा । यत् ज्ञान मुद्रामाशास्ते ।

नटः—भाव कस्य उण कइणो एसा ।

सूत्र—(सबहुमानम्) कस्यापि . . स्येदं कर्णामृतम् ।

नाहं किंचिदवेदिषं नयविदो नन्दन्तु निन्दन्तु वा
यद्यत्कल्पितमादरेण रतये देव्या च देवेन च ।
तत्तत्साहसिको ब्रुवे श्रुतिवधूसीमन्तचिन्तामणेः
केलीप . . . . रिति विदुर्विद्वस्तु मद्वत्सलाः ॥ इति ।

नटः—(सप्रत्यभिज्ञम्) भाव सो मए परिण्णादो । ता झत्ति आरहिज्जइ । एद्ध को उण पुढमो पवेसो ।

सूत्र—(सस्मितम् अङ्गुल्या निर्दिशन्)—नन्वेष वृद्धकञ्चुकी ।

(इति नटेन सह निष्क्रान्तः)

प्रस्तावना ॥

* * * *

आर्तपरित्राणधर्मसेतुपालः शौरिभूपालः शरारुमृगकुशरण्यमपीदं कृष्णारण्यं

* * * *

स्वकृतमिदमेव कृष्णपुरं चिरादधिवसंश्चिरप्रार्थितोदयमचिरज्योतिरिव दृष्टनष्टमात्मनः प्रसवमनुस्मृत्य दूयमानमानसां पद्मिनी देवी परिसा(न्त्वयन्नास्ते).

**End:**

राजा—विभीषण किं ते भूयः प्रियमुपहरामि ।

(प्रविश्य सूत्रधारः)

सूत्र—किमितोऽपि प्रियमस्ति ।

चिन्तायोगः समारम्भो व्यापारो हेतुदर्शनम् ।
अभीष्टलाभ इत्यर्थपञ्चकं नाटकीकृतम् ॥

तथापीदमस्तु भरतवाक्यम् ॥

(इति सर्वे निष्क्रान्ताः)

**Coolphon:**

अभीष्टलाभो नाम पञ्चमोऽङ्कः ॥

## No. 12495. आनन्दराघवम्.
## ĀNANDARĀGHAVAM.

Substance, paper. Size, 11 × 8¼ inches. Pages, 174. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

A drama having for its plot the leading incidents in the life of Rāma from the time he was led into the court of Janaka by Viśvāmitra and broke asunder the bow kept there down to his coronation after defeating Rāvaṇa in the battle-field. The author is Rājacūḍāmaṇidīkṣita, whose genealogy is thus given :

Kṛṣṇabhaṭṭa
|
Bhava-Svāmibhaṭṭa
(married Lakṣmī)
|
Satyamaṅgala Ratnakhēṭa-Śrīnivāsadīkṣita
(married Kāmākṣī)
|
Ardhanārīśvaradīkṣita — Rājacūḍāmaṇidīkṣita
(pupil of his brother and author of this work)

The drama is said to have been staged in the court of Raghunāthanāyaka, son of Cinnacevva Acyutarāya Reference is made to Raghunāthabhūpavijaya of Yajñanārāyaṇādhvarin.

**Beginning :**

सोमालङ्कृतमस्तु वस्तु कुशलस्तोमाय वामाङ्क-
च्छायाबालतृणालिचर्वणकलाचञ्चन्मृगाथत्करम् ।
सव्यार्धस्फुरदंशुजालकलमश्रेणीशिखाखण्डना-
कुण्ठोत्कण्ठशुकार्भकप्रविलसद्वामप्रकोष्ठावलम् ॥

(नान्द्यन्ते सूत्रधारः—)

समीरणापूरितवाणरन्ध्रसम्पन्नसप्तस्वरसामरस्या ।
यत्कीर्तिमुद्गायति सप्तसाली वीराय तस्मै विनतिमर्मास्तु ॥

(इति पुष्पाञ्जलिं विकीर्य नेपथ्याभिमुखमवलोक्य) मारिष ! इतस्तावदागम्यताम् ।

(प्रविश्य पारिपार्श्वकः)

* * * *

रघुनाथनायकमहीनायकेन संदृब्धाः पारिजातहरणनलाभ्युदयप्रमुखा बहुविनयाद्विविधप्रबन्धाः सहस्रधा प्रयोगतो नयनगोचरीभवन्ति । अमीभिस्तदा निमिषान्न किमपि रूपकं मनोरञ्जनाय प्रभवतीत्यस्माकं सैद्धान्तिकः पन्थाः ।

सूत्रधारः—मारिष तथा विफलितमस्मदभिलपितेन । यतः किल यज्ञनारायणाध्वरिणा रघुनाथभूपविजयनाम्नि महाकाव्ये तावदेवमभिहितम्—

प्राचां प्रबन्धान् रसयन्तु भव्यानस्मद्वचोऽप्याददतो रसज्ञाः ।
आस्वादयन्तो मधुराणि वस्तून्याम्लं न किं जम्भलमाद्रियन्ते ॥

इति । पा—तर्हि किमभिनिनीषितमभिनवं रूपकम् । सू—मारिष

* * * *

चार्वाकमुखदुर्वादिकुलदुर्वारगर्वसर्वस्वस्य अद्वैतविद्याचार्यस्य दन्तिद्योतिदिवाप्रदीपविरुदस्य विश्वामित्रवंशमुक्तामणेः सर्वतन्त्रस्वतन्त्रस्य श्रीकृष्णप(भ)ट्टपौत्रस्य लक्ष्मीभवस्वामिभट्टसुकृतपरिपाकस्य साग्निचिद्विश्वजिदतिरात्रयाजिनस्सत्यमङ्गलरत्नखेटश्रीनिवासदीक्षितस्य तनयेन कामाक्षीगर्भसम्भवेन श्रीमदर्धनारीश्वरदीक्षितगुरुचरणसहजतालब्धविद्यावैशद्येन श्रीराजचूडामणिदीक्षितेन कृतमानन्दराघवं नाम नानाविधरससंमेलशृङ्गाटकमभिनीय विनोदनीया परिषदेषा ।

**End:**

सिद्धस्तुल्यभुजो जितो दशमुखः सीता समाश्वासिता
सुग्रीवश्च विभीषणश्च गमितौ सौख्यं सखायाः (स्वकीयं) पद:(म्) ।
संप्राप्तो युवराजतां च भरतः सर्वप्रजा रञ्जिताः
शंसाशास्यमतः परं च मम किं सर्वज्ञचूडामणे ॥

(तथापीदमस्तु भरतवाक्यम्)

सारस्यं भजतां मनस्सुमनसां सारस्वते शाश्वते
श्यामा कार्मुकशेखरे भवतु च श्यामारुणे शेमुषी ।
जीयादच्युतरामभद्रजनकः श्रीचिन्नचेला(वृ)च्युतक्ष्माभृद्रघुनाथभूमिपतिरप्याचन्द्रमातारकम् ॥

इति निष्क्रान्तास्सर्वे ॥
इति पञ्चमोऽङ्कः ॥

**Colophon:**

इति श्रीचूडामणिदीक्षितविरचितमानन्दराघवं नाम नाटकम् ॥

---

No. **12496.** आश्चर्यचूडामणिनाटकम्.

ĀŚCARYACŪḌĀMAṆINĀṬAKAM.

Substance, palm-leaf (Śrītāla). Size, $10\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 117. Lines, 9 on a page. Character, Malayāḷam. Condition, good. Appearance, new.

Complete.

This drama deals with the leading incidents in the life of Rāma from the time when Śūrpaṇakhā was disgraced for her sensuous love towards Rāma and Lakṣmaṇa, while they were living in the banks of the Gōdāvari, down to the time of Rāma's coronation after the death of Rāvaṇa.

The author is Śaktibhadra. He composed Unmādavāsavadattā and other poems.

**Beginning :**

(ततः प्रविशति सूत्रधारः)

सू—

वीचीस्थाने सहस्रं मरतकपरिघस्पर्धि बिभ्रद्भुजाना-
मुत्फेनो हारजालैररुणरुचिरनन्ताहिरत्नप्रभाभिः ।
बिभ्राणः शङ्खमन्तश्चरमचरमनिर्वापणीयं च तेजः
पायाद्वः शार्ङ्गधन्वा शयित इव समुद्रैकदेशे समुद्रः ॥

(परिक्रम्यावलोक्य) आर्ये इतस्तावत् ।

(प्रविश्य नटी) अय्य इयं म्हि ।

सू—आर्ये !

अभिरञ्जिनीं जनानां सहायसाध्यां गुरूपदेशेन ।
धुरमुद्वहामि गुर्वीं नृप इव भरतादिभिर्वोढाम् ॥

* * * *

सूत्रधारः—आर्ये, दक्षिणापथागतमाश्चर्यचूडामणिनामकं नाटकमभिनयाम्रेडितसौभाग्यमभिलषाम इत्यार्यमिश्राणां शासनम् ॥

* * * *

सूत्रधारः—आर्ये, श्रूयताम् । उन्मादवासवदत्ताप्रभृतीनां काव्यानां कर्तुः कवेः शक्तिभद्रस्येदं प्रज्ञाविलसितम् । अनस्त्वमपि पात्रावधानं कुरुष्व । अहमप्यार्यमिश्रान् विज्ञापयामि । अये, किं नु खलु मयि विज्ञापनाव्यग्रे शब्द इव श्रूयते । अङ्ग, पश्यामि ।

(नेपथ्ये ज्याघोषः क्रियते)

सूत्रधारः—भवतु ज्ञातम् ।

सपत्नीकस्य रामस्य वर्तयन्वन्यमास्पदम् ।
ज्याघोषेणैव सौमित्रिः पक्वान् सत्त्वान्व्यपोहति ॥

(निष्क्रान्तौ) आमुखम् ॥

(ततः प्रविशति धनुर्बाणपाणिर्लक्ष्मणः)

भारद्वाजग्रामवासी कुमारिलमतानुगः ।
विप्रः कश्चिच्छक्तिभद्रकृतं व्याख्यत नाटकम् ॥
रघुवीरस्य चरितं नित्यं सेव्यं हितार्थिभिः ।
यत्सेवया तरत्याशु नरः संसारसागरम् ॥

* * * *

**Colophon :**

इति चूडामणिनाटकव्याख्या समाप्ता ॥

The scribe adds—

चूडामणेर्नाटकस्य विवृतिर्लिखिता मया ।
शङ्कराख्येन सुतरां गुरुपादावलम्बिना ॥

---

No. **12500.** उत्तररामचरितम्.

UTTARARĀMACARITAM.

Substance, paper. Size, 12×7¾ inches. Pages, 94. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 127a. The other works herein are Prabōdhacandrōdaya 1a, Saṅkalpasūryōdayavyākhyā 60a.

Complete.

A well-known drama by Bhavabhūti.

**Begnining :**

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।
वन्दामहे च तां वाणीममृतामात्मनः कलाम् ॥

नान्द्यन्ते सूत्रधारः—

भगवतः कालप्रियानाथस्य यात्रायामार्यमिश्रान्विज्ञापयामि । एवमत्र भवन्तो विदांकुर्वन्तु । अस्ति खलु काश्यपः श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणज्ञः भवभूतिर्नाम कविः ।

यं ब्राह्मणमियं देवी वाग्वश्येवान्ववर्तत ।
उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते ॥

**End :**

वाल्मीकिः—

रामभद्र तदुच्यताम्, किन्ते भूयः प्रियमुपहरामि ।

रा—इतः परमपि प्रियमस्ति । तथापीदमस्तु—

(भरतवाक्यम्)

पापेभ्यश्च पुनाति वर्धयति च श्रेयांसि येयं कथा
माङ्गल्या च मनोहरा च जगतां मातेव गङ्गेव च ।
तां शश्वत्प्रविभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः
शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम् ॥

इति परिक्रम्य निष्क्रान्तास्सर्वे ॥

**Colophon:**

सप्तमोऽङ्कः ॥ परिपूर्णश्चेदं भवभूतिनाटकम् ॥

---

No. 12501. उत्तररामचरितव्याख्या.

UTTARARĀMACARITAVYĀKHYĀ.

Substance, palm-leaf. Size, 19⅝ × 1⅞ inches. Pages, 211. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old. Complete.

A commentary on the Uttararāmacaritra: by Vīrarāghava, a descendant of Dāśarathi of Vādhūlagōtra and a resident of Bhūsārapura (Tirumaḻiśai, a village near Poonamallee). He is the son of Narasiṁha; and the commentary is called Talasparśinī.

**Beginning:**

पुरि भुवि महितायां भूमिसाराभिधाया-
मधिभृगु मुनितीर्थोपान्तमारब्धखेलम् ।
किमपि नतशरण्यं मङ्गलं मङ्गवल्ली-
जगदधिपतिसंज्ञं द्वन्द्वमानन्दयेऽन्तः ॥
ज्ञानं सर्वपथीनं चेत्तद्धेतुश्चेद्धयाननः ।
स चेद्भक्तपराधीनस्तं विना कं व्रजाम्यहम् ॥
भूसारपुरवास्तव्यो वाधूलो वीरराघवः ।
भवभूतिकृतिं हृद्यां व्याचष्टे करुणामयीम् ॥
भवभूतेः कवीन्द्रस्य क गम्भीरो गिरां भरः ।
क मन्मतिरतिस्वल्पा सहायोऽत्र हयाननः ॥
चापल्यमथ वा बाल्यं कृतावस्यां प्रवर्तकम् ।
तथापि कृपया सन्तस्तन्तन्यन्तां शुभां दृशम् ॥

तत्रभवान् भवभूतिर्नाम कविकण्ठीरव एकः शब्दः सम्यग्ज्ञातः सुष्ठु [ज्ञात] प्रयुक्तः स्वर्गे लोके कामधुक् भवतीत्यादिश्रुत्या परिनिष्ठितशब्दप्रयोगस्य धर्मत्वमवगाच्छन् "काव्यं यशसेऽर्थकृते—" इत्यादिना काव्यरूपस्य तस्य प्रकर्षं विभाव्य "शैवा वयं न खलु तत्र विचारणीयं पञ्चाक्षरीजपपरा नितरां तथापि। चेतो मदीयमतसीकुसुमावभासं स्मेराननं स्मरति गोपवधूकिशोरम् ॥" इत्यादिन्यायेनाङ्कुरितभगवद्भक्तिकतया "स वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि। नामान्यनन्तस्य यशोऽङ्कितानि शृण्वन्ति गायन्ति गृणन्ति सन्तः ॥" इत्यादिन्यायेन, "प्रबन्धानां प्रबन्धॄणामपि कीर्तिप्रतिष्ठयोः। मूलं विषयभूतस्य नेतुर्गुणनिरूपणम् ॥" इत्यादिन्यायेन च भगवद्गुणान्विवक्षुः, तत्रापि "यदि क्षुण्णं पूर्वैरि[त्यमि]ति जहति रामस्य चरितम्" इत्यादिन्यायेन रामकथां प्रतिपिपादयिषुर्दृश्यस्य श्राव्यापेक्षया "देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषम्" इत्युक्तनाट्याश्रयत्वप्रयुक्तप्राधान्यात् प्रकरणादीनां यथायथं रसवस्तुनायकापकर्षात्तत्प्रकर्षवन्नाटकां(कं)चिकीर्षुः पूर्वचरितस्य महावीरचरितेन वर्णितत्वात् उत्तरं वर्णयितुमभिसन्धाय पूर्वरङ्गप्रधानाङ्गभूतां नान्दीमाह—इदं कविभ्य इति। पदद्वयमिदम्। अतो द्वादशपदत्वसिद्ध्या न नान्दीपदनियमभङ्गः। इदमिति चे(चो)द्देश्यसमर्पकं द्वितीयान्तं विशेष्यवाचकम्; नमोवाकमिति च विधेयसमर्पकं विशेषणवाचकं च। तथा च इदं प्रारिप्सितग्रन्थादौ चिकीर्षितत्वेन बुद्धिस्थं मङ्गलं पूर्वेभ्यः कविभ्यो नमोवाकं प्रशास्महे। पूर्वकालप्रसिद्धप्राचेतसादिकविविषयकनमउक्तिं निर्दिशाम इच्छाम इति वा। "प्रशासनं तु निर्देशः" इति कोशः। आङ्श्शासु इच्छायामिति धातोराङ्पूर्वकत्वं प्रायिकमित्युक्तेः प्रपूर्वकत्वेन इच्छार्थकत्वं च। "नमउक्तिर्नमोवाकः" इति कोशः। वचेर्भावे घञ् कुत्वम्। एतन्मङ्गलोद्देश्यकपूर्वकविविषयकनमउक्तित्वविधेयकबोधजनकशब्दप्रयोगवानहम्। एतन्मङ्गलोद्देश्यकपूर्वकविविषयकनमोवाकत्वविधेयकेच्छावानहमिति वा बोधः ॥

**End:**

शब्दब्रह्मविदो बुधा अभिनवैस्सह विन्यस्तरूपां प्राज्ञस्य कवेरिमां वाणीं परिणतां तामेनां परिभावयन्त्विति योजना। एतेन एनामिमामित्यनयोर्न पौनरुक्त्यम्। अभेदसम्ब . . . . . . . . . . . . .
स्वादुभयोर्द्वितीयान्तत्वम्। एवं सा . . . न्ना कं वृत्तम् ॥

यदत्रोक्तं स्खलं किंचित्कविन(?)नेन बध्यते ।
निरङ्कुशतया तत्तु समाधेयं मनीषिभिः ॥
. . . . . नात्र लिखितं ग्रन्थगौरवात् ।
भावस्य तु गभीरत्वात् स कश्चित्कथितो मया ॥
भवभूतेः कवीन्द्रस्य क गम्भीरो गिरां भरः ।
क मन्मतिरतिस्वल्पा सहायोऽत्र हयाननः ॥
अ(नवर)तभावनाभिर्योऽर्थः क्लेशान्मया लब्धः ।
तस्य प्रकाशिनीयं व्याख्या विदधातु कौतुकं सुधियाम् ॥

**Colophon:**

दाशरथिवंशजनुषो भुसारन(नि)वासराघव्याय(वार्य)स्य ।
उत्तररामचरित(त्र)व्याख्यायां सप्तमाङ्कमवसितम् ॥

---

## No. 12502. उत्तररामचरितव्याख्या.
## UTTARARĀMACARITAVYĀKHYĀ.

Substance, palm-leaf. Size, 17¾ × 1¼ inches. Pages, 256. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off towards the close of the seventh act.

Same work as the above.

---

## No. 12503. उत्तररामचरितव्याख्या.
## UTTARARĀMACARITAVYĀKHYĀ.

Pages, 25. Lines, 8 on a page.

Begins on fol. 82*a* of the MS. described under No. 12458.

Contains the first act incomplete.

Same work as the above.

---

## No. 12504. कन्दर्पविजयः.
## KANDARPAVIJAYAH

Pages, 97. Lines, 25 on a page.

Begins on fol. 1*a* of the MS. described under No. 12291.

Complete.

A Bhāṇa by Ghanaguruvarya, son of Varadaguru of Kauśikāgōtra who was the author of Śrībhāṣyasangraha, Sārārthasaṅgraha, etc. It describes the infidelity of the second wife of Mahēśvarabhaṭṭa, son of Mahādēvasōmayājin of Madhura, towards her husband and her attachment towards one Madanaśēkhara. The drama is said to have been staged on the occasion of the swinging festival of God Śrī-Raṅganātha of Srirangam.

**Beginning :**

श्रियं दिशतु कारुण्यसिन्धुः श्रीरङ्गनायकः ।
कमलाकुचकाश्मीरकमद्वक्षस्स्थलोज्ज्वलः ॥

अपि च—

जनिः क्षीराम्भोधौ जयति भुवि यस्याप्रतिकलं
पराधीनो यस्याः पतिरखिलरक्षाकृतिविधौ ।
वहन्ती सौन्दर्यं विधुमणिसुधाकल्पकमुखैः
श्रिये वः श्रीरस्तु श्रितसरसिजाता सकरुणा ॥

(नान्द्यन्ते)

सूत्रधारः—(सविनयं शिरस्यञ्जलिं बद्ध्वा)

* * * *

सू—अद्य खल्वादिष्टोऽस्मि . . . . . . . . . . . . . . . . . .
श्रीरङ्गनायिकावल्लभस्य श्रीरङ्गनायकस्य डोलाविहृतिविलासभजनसकुतूहलहृदयैः
. . . . . . . . . संविदितसकलविधैरमीभिः पारिषद्यैः ॥

* * * *

(स्मरणमभिनीय सानन्दं सविनयं च) अस्ति खलु निस्तुलमहिमा—
रामानुजार्यवरदार्यमहार्यपौत्रश्रीमद्वरप्रदगुरूत्तमपौत्ररत्नम् ।
श्रीकौशिकान्वयसुधाम्बुधिशीतभानुः श्रीमान्वरप्रदगुरुर्वरणीयशीलः ॥

स खलु—

प्रपन्नजनचातकैः परिनिषेवितः सन्ततं
निपीय रसमादरान्निगममौलिवारान्निधौ ।
स्वसेविकलमान् बहूंस्तदभिवर्षणैर्हर्षयन्
विभाति जगति स्वयं वरददेशिकाम्भोधरः ॥

किं च—

टङ्कः किं द्रमिडोऽथ वा किमु कु(गु)हो देवो नु बोधायनो
व्यासो वा शठजिन्मुनिः किमु मुनिर्नाथो नु किं यामुनः ।
आहि(हो)स्विद्यतिशेखरः किमु समांमा(माम्ना)यो गुरूणामिति
प्रज्ञाभक्तिविरक्तिवृत्तिभिरयं प्राज्ञैः परं ज्ञायते ॥

यस्य च पिता—

व्यासोऽसाविति वेदमूर्धनि बहुन्यासां वितन्वन्मति
मीमांसाविषयेऽपि जैमिनिमुनेर्मीमांसया मानितः ।
साक्षादक्षपदक्षपादसरणौ शब्दे सहस्राननः
स श्रीपान्वरदो गुरुश्श्रितनिधिः श्रीकौशिकाग्रेसरः ॥

किं च—

सम्मां(म्यङ्) निर्वचनं सुखादकृत यो नारायणस्याद्भुतं
व्याचख्ये श्रुतिगीतयापि कलिजिह्वाणीं सुधा(वर्षिणीम्) ।
सारार्थस्य च सद्वदं यतिपतेर्भाष्यादित(क)स्यातनो-
ख्यातासी(नी)दसि(सु)शेमुषीपरिणतव्याख्या(ख्यां)स विद्वन्मणिः ॥

तस्य किल तनयः तत्ताहृशविनयः तदीयचरणसरसीरुहचञ्चरीकः प्रतिकथकहरिणदण्डनचण्डपुण्डरीकः कविकुलधुर्यो घनगुरुवर्यः ।

वाणी यस्य वरीवृतीति विमतव्रातव्रतव्याहतौ
भव्या साधु सरीसृती(सरी)ति सततं ब्राह्मी रसज्ञाञ्चले ।
श्लोको भूरि चरीकरीति हरितां क्षौमांशुकीं प्रक्रियां
बुद्धिश्चानुसरीसरीति बहुधा वज्री गुरोः शेमुषीम् ॥

तद्वाक्सुधापयोधि(धे)ः मंथा(मन्था)नेनत(त्त)र्पणेनाय ।
मथितादुदिता ललिता भाणसुधा कापि भाति खलु मधुरा ॥

तेन सद्वृत्तिपाकसनि(द्धी)धिरीतिसम्भावितेन, कन्दर्पविजयनामधेयेन, निखिलविबुधजनभागधेयेन, शृङ्गारमुखरसनिरूपकेण, रूपकेण सामाज(जि)कहृदयसरसिजामोदमारचै(च)य्य कुलक्रमागतामनवद्यां भरतविद्यां सफलीकरिष्यामः ॥

* * * *

तदानीमियं मथुरापुरीवासिनः महादेवसोमयाजिनस्तनयस्य महेश्वरभट्टस्याद्वितीयं द्वितीयकलत्रं स्वानभिमतपतिपारवश्यमपहाय विहाय लज्जां स्वयमेव गणिकाभावं गतवती वीणावती नाम वामामणिः ।

**End :**

तथापीदमस्तु (भरतवाक्यम्)—

सोल्लासं प्रियया सदा स भगवान् चित्तोद्भवो वर्धता-
मामोदं सकला भजन्तु रसिका रामापरीरम्भजम् ।

तारुण्यं तरुणीषु दिव्य(दिविषत्)तन्वीरहःकेलयो
धिक् साम्यं कलयन्तु सर्वजगतां तत्रादर्शं मङ्गलम् ॥

किं च—

कन्दर्पविजयनामा कलयतु भाणस्सतां मुदं जगति ।
कौशिकघनगुरुसुधिया कलितः कविलोककल्पकद्रुधिया ॥

**Colophon:**

इति श्रीकौशिककुलतिलकघनगुरुविरचितः कन्दर्पविजयो नाम भाणस्सम्पूर्णः ॥

* * * *

कमलाविलस . . . . . कारुण्याम्भोधिरमितगुणसिन्धुः ।
शशिकर(शिशिर)यतु नः कटाक्षैः श्रीगर्भव्य(ख्यात)त्तनीघाशः ॥

इति वदन्(न्तो)निष्क्रान्तास्सर्वे सभास्ताराः ॥

---

## No. 12505. कमलिनीकलहंसम्.

## KAMALINĪKALAHAṀSAM.

Pages, 66. Lines, 20 on a page.

Begins on fol. 123*a* of the MS. described under No. 11706.

Complete.

A drama in six acts based on the story of the marriage of Kamalinī daughter of Candravarman, with Kalahaṁsa: by Nīlakaṇṭha, third son of Nīlakaṇṭha of Saṅgamagrāma (Kūḍalūr) family in Nārēri, near Paṭṭambi in the Malabar district. The author belongs to a well-known Nambūdiripāḍ family.

**Beginning:**

नान्द्यन्ते ततः प्रविशति सूत्रधारः—

भूयासुर्भवतां भूत्यै भव्या भगवतो हरेः ।
लक्ष्मीमुखाब्जभ्रमराः कटाक्षाः क्षपितांहसः ॥

अपि च—

मन्दं मन्दममन्दविभ्रमवता मन्दाक्षवीक्षाजुषा
पद्माक्षेण चलाङ्गुली करतले चेलाञ्चलासंश्रिते ।

ह्रीमत्याः पुलकोद्गमाङ्कितनोर्लक्ष्म्या नवे सङ्गमे
चेतस्तोषसमुद्गतं भमि(दि)शतां(तात्) श्रेयांसि वन्धी(वत्सी)कृतम् ॥

* * * *

अर्चोपाधिमधिष्ठितस्यानन्तासनपुरमलङ्कुर्वाणस्य भगवतो लक्ष्मीपतेर्यात्रा-प्रसङ्गेन समास्थापितसर्वशास्त्रपवित्रीकृतान्तःकरणा अनिर्व्यूढदुर्वहगर्वलेशाः सर्व-दिगन्तेभ्यश्श्रोर्वीदेवाः समापतिताः । तथावदहमभिरूपरूपकप्रयोगेणैषामभिरूप-वरिष्ठानां प्रसादमापादयितुमिच्छामि ।

* * * *

सूत्रधारः—अस्ति कमलिनीकलहंसं नाम अपूर्वं नाटकम् । यत्र च
प्रकटभूरिगुणो वचसां चयो विजयि सौहृदमेव च बान्धवम् ।
अनुपमप्रणयप्रमदावहं निखिलमेव च दम्पतिचेष्टितम् ॥

* * * *

सूत्रधारः—अस्ति केरलेषु संगमग्रामं नाम गृहम् । तत्र-
अभूवन् गार्थिकुलजाः कुशलाः सर्वकर्मसु ।
द्विजा हरिपदाम्भोजस्मरणाहतकिल्बिषाः ॥
आसीन्महत्तरस्तेषां नीलकण्ठ इति श्रुतः ।
तृतीयस्तस्य तनयो नीलकण्ठः कविस्त्विह ॥

* * * *

सूत्रधारः—मा मा विदूनचित्ता भव ।
वत्सायाः कान्तसंयोगो महत्सेवां करोति नः ।
यथा वै योगिनसिवा दुहितुश्चन्द्रवर्मणः ॥
(इति निष्क्रान्तौ) प्रस्तावना.

**End :**

तथापीदमस्तु भरतवाक्यम्—
पुत्रान् प्राप्य महागुणान् कुशलया हीना व(त्वि)यं मोदतां
तुष्टाः स्युः पितरः सुराश्च भवतां प्रीतिक्षमैः कर्मभिः ।
ध्यानक्षालितकल्मषे च हृदये भक्तप्रसादोत्सुको
वासं वासवमुख्यदेवविनुतो नित्यं विधत्तां हरः ॥
(इति निष्क्रान्ताः सर्वे)

**Colophon :**

इति षष्ठोऽङ्कः । समाप्तमिदं नाटकम् ॥

## No 12506. कमलिनीकलहंसम्.

## KAMALINĪKALAHAṀSAM.

Substance, paper. Size, 7¾ × 6¼ inches. Pages, 111. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Vēṇīsaṁhāra 59*a*, Vēṇīsaṁhāracchāyā 142*a*, Mālatīmādhava 154*a*.

Complete in four acts.

A drama by Rājacūḍāmaṇidīkṣita, son of Śrīnivāsadīkṣita, the author of Bhaiṣmīpariṇaya, and Kāmākṣī and grandson of Bhavasvāmin and Lakṣmī and great grandson of Kṛṣṇabhaṭṭa of Viśvāmitragōtra, and pupil and brother of Ardhanārīśvaradīkṣita. It deals with the marriage of Kalahaṁsa with Kamalinī, daughter of Kamalākara, who was rescued from a stork. The author's other productions are Ānandarāghava, Nyāyakarpūravartika, Kāvyadarpaṇa and Tantraśikhāmaṇi. The drama is said to have been staged in the presence of Acyutarāya's son, Raghunātha Rāya, when he had been to Cidambaram to worship Naṭarāja, a form of Śiva.

**Beginning:**

यस्योपवीतगुण एव प(फ)णावृतैकवक्षोरुहः कुचपटीयति वामभागे ।
तस्मै ममास्तु मनसामवसानसान्द्रे चन्द्रार्धचारुशिरसे महसे नमस्या ॥

(नान्द्यन्ते)

सूत्रधारः—

तुङ्गोत्तमाङ्गकृतसङ्गतरङ्गिणीकं
दुर्गोचितं कमपि बो द(व)शयन् गिरीशम् ।
राजास(न)मात्मसत्त्वमस्य शिरस्यतौनि(तानी)-
ध(द्ध)न्वी स्व(स) विन्दति जयश्रियमिन्दुधन्वा ॥

* * * *

पुण्डरीकपुरे सन्ततकृतसंनिधानमनन्यसामान्यानुबाधतया स्वात्मानमेव गोविन्दराजवपुषा समिकमभिकल्प्य प्रकाशितेन ताण्डवाडम्बरेणानन्दपरवशतया निद्रामिव समाकलयन्तमुपनिषदे(क)गम्याकारमपि सकललोकानुजिघृक्षया चार्मणलोचनगोचरीभावमुपेयिवांसं महीयांसं पुमांसमभिवन्दितुमागतमच्युतनरपालसुकृतपरिपाकरघुनाथजनाधिनाथभुजपरिपालितचोलमण्डलमण्डनायमानया

* * *

दन्तिज्यो(यो)तिदिवाप्रदीपविरुदच्य(स्य) विश्वामित्रवंशम(मु)क्तामणेरद्वैतविद्याचार्यस्य, सर्वतन्त्रस्वतन्त्रस्य, श्रीकृष्णभट्टपौत्रस्य, लक्ष्मीभवस्वामिभट्टसुकृतपरिपाक-

स्य, साग्निचित्यविश्वजिदतिरात्रयाजिनः सत्यमङ्गलरत्नखेटदीक्षितस्य तनयः, कामाक्षी-गर्भसम्भवः, श्रीमदर्धनारीश्वरदीक्षितगुरुचरणसहजताल्कविद्यावैशद्यः, श्री-राजचूडामणिर्नाम विद्वत्कविराजचूडामणिः ।

सूत्र—ध्वन्यध्वन्यधिकं चमत्कृतिकृतो यस्याद्भुताः सूक्तयः
सारस्येन सुधां सुधां विदधते तां शर्करां शर्कराम् ।
सावित्र्याः प्रथमं समुज्ज्वलगुणे तत्र(वक्त्रे) स्वयं भारती
षड्भाषाचतुरः स एष भुवने न ज्ञायते केन वा ॥

पारि—तेन हि गर्भसप्तम एव हायने विरच्य सबहुमानमस्माकं हस्ते दत्ता किल कमलिनीकलहंसनामधेया शृङ्गाररसमणिपेटिका नाटिका ।

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

साहित्ये तनुतां मनः सुमनसः सन्तो भजन्तां सुखं
सोमालङ्कृतशेखरे भवतु मे वामाङ्कजानौ मतिः ।
धीरश्रीचिनभूपयाच्युतधराधौरेयभाग्योन्नतौ
राज्यं श्रीरघुनाथनायकविभौ रज्येत्सहस्रं समाः ।

(इति निष्क्रान्तास्सर्वे)

**Colophon:**

ग्रन्थश्चायं समाप्तः ॥

---

## No. 12507. कमलिनीकलहंसम्.

## KAMALINĪKALAHAṀSAM.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 75. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

Same work as the above.

Six foll. at the end contain a portion of another copy of this work.

---

## No. 12508. कमलिनीकलहंसम्.

## KAMALINĪKALAHAṀSAM.

Substance, palm-leaf. Size, $17 \times 1\frac{1}{2}$ inches. Pages, 66. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Same work as the above.

Almost complete (without Bharatavākya).

## No. 12509. कमलिनीराजहंसम्.

## KAMALINĪRĀJAHAMSAM.

Pages, 112. Lines, 20 on a page.

Begins on fol. 1a of the MS. described under No. 11837.

Complete.

A drama in five acts describing the love between Kamalini and Rajahamsa and their subsequent union. It is said to have been staged on the occasion of the spring festival of God Śiva celebrated in Vṛṣapura in the Kērala country. The author is Pūrṇasarasvati, disciple of Pūrṇajyōtirmuni. He wrote a commentary named Vidyullatā on the Mēghasandēśa.

**Beginning:**

एकं तत् पितरौ समस्तजगतामेणाङ्करेखाङ्कितं
कारुण्यायतनं वपुर्दिशतु वः काङ्क्षाधिकां संपदम् ।
यस्यार्धेन पितामहोऽपि पितृमानर्धेन च श्रीमता
मेनाजानिरवश्यवाम्विजयते मेरोः सहायो गिरिः ॥

* * * *

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सू—धून्वन्रजःप्रसरणं निजपक्षपाताद्ध्यास्य पुण्यजनमानसपुण्डरीकम् ।
विभ्रोवतां मनसि मे रमयन् विलासैर्विहृत्समां कमलिनीमिव कोऽपि हंसः ॥

* * * *

पारि—भाव, श्रूयताम् – भगवतो वृषपुरविभोर्भवानीपतेर्भुवनमहनीयेन

* * * *

पदवाक्यप्रमाणनेत्रत्रयनिरीक्षणापरपरमेश्वरपूर्णज्योतिर्मुनिवरनिहितनिस्तुलकरुणा - मृतपूर्णचन्द्रेण पूर्णसरस्वतीनामधेयेन कविना निबद्धं कमलिनीराजहंसं नाम नाटकमभिनवमभिनयन्तो गुणदोषनिकषदृषदं परिषदमेनां परितोषयितुमर्हन्तीति ।

* * * *

सूत्र—यद्येवं तर्हि, अद्यैवम्—
पश्यामि सुहृदमनया सोऽहंमुपायेन येन केनापि ।
कलहंस एव धन्यः कमलिन्या राजहंसमिव ॥
(इति निष्क्रान्तौ) प्रस्तावना ॥

**End:**

शरन्मुनिः—वत्स, किं ते भूयः प्रियमुपहरामि ।
राजा—भगवन्, किमतः परमपि प्रियमस्ति । तथाहि,

अरयो विजिता भवत्प्रसादादनघैः संघटितोऽस्मि धर्मदारैः ।
अचलं प्रतिपन्नमाधिराज्यं विषयः किंस्विदतः परं स्पृहायाः ॥

तथापीदमस्तु (भरतवाक्यम्)—

रसवत्तु सुमनोगणः प्रकामं पिशुनशुनां वदनैरदूषितानि ।
कविभिरुपहृतानि दीप्तजिह्वैरतिसरसानि हवींषि वाङ्मयानि ॥

अपि च,

मध्ये हेमसभं मनस्सु महतां मौलौ स्वमातां गिरां
मन्ये केरलभूललाम्नि वृषभग्रामे च नृत्यन्मुदा ।
आलिङ्गन् वदनश्रिया कमलिनीमामोदिनीमुद्रजां
नव्यो भातु मम व्यथाः शिथिलयन् भव्याय हंसो महान् ॥
(इति निष्क्रान्ताः सर्वे)

**Colophon:**

इति पञ्चमोऽङ्कः ॥ इति कमलिनीराजहंसनाटकम् ॥

---

No. 12510. कर्पूरमञ्जरीव्याख्या.
KARPŪRAMAÑJARĪVYĀKHYA.

Pages, 49. Lines, 23 on a page.

Begins on fol. 52a of the MS. described under No. 2580.

Complete in four acts.

A commentary on the Rājaśekhara's Karpūramañjarī which is a kind of minor drama called Saṭṭaka characterised by containing only four Javanikāntaras (acts) and in which the characters speak Prākṛt alone. The author of the commentary is Kṛṣṇasūnu (?).

**Beginning:**

अविनायकजानन्दविनायकगमातुलम् ।
अविनाभूतकल्याणं विनायकमुपास्महे ॥
चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशक्त्या(स्या) सरस्वती ॥
कर्पूरमञ्जरीसंज्ञं सट्टकं कृष्णसूनुना ।
यथामति व्याक्रियते राजशेखरनिष्ठतः(निष्ठितम्) ॥

* * * *

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थमिष्टदेवतास्मरणपूर्वकम्

* * * *

अभिमतमाशास्ते—भद्दं होदु इत्यादि ।

भद्रं भवतु सरस्वत्याः कवयो नन्दन्तु व्यासादयः
अन्येषामपि परं प्रवर्ततां परा वाणी विदग्धप्रिया ।
वैदर्भी तथा मागधी स्फुरतु नः सा किंच पाञ्चालिका
रीतिका विलिहन्तु काव्यकुशला ज्योत्स्नां चकोरा इव ॥

कवयः ऋषयः । परं भृशम् । वच्छोमीत्यत्र वैदर्भ्यादीनां रीतिषु प्रसिद्धत्वात् उत्तरत्र च रीतिरिति वचनात् रीतिरिति गम्यते ।

**End:**

अणुदिअहं इति । अनुदिवसं विस्तरान्मनसिजसकलगुणविनाशकरः । रिक्तत्व . . . ग्निर्विरमतु कमलाकटाक्षस्पर्शेन हर्षेण ॥

**Colophon:**

इति कर्पूरमञ्जरीव्याख्याने चतुर्थं यवनिकान्तरम् । सट्टकव्याख्यानं समाप्तम् ॥

कर्पूरमञ्जरीव्याख्यानग्रन्थसंख्या पञ्चाशदधिकसप्तशतम् ॥

---

## No. 12511. कलावतीकामरूपम्.
## KALĀVATĪKĀMARŪPAM.

Pages, 131. Lines, 14 on a page.

Begins on fol. 106*a* of the MS. described under No. 12225.

Breaks off in the fifth act.

A drama having for its plot the marriage between Kalāvati and Kamarūpa, son of Kāmakētu, King of Kāśi. The hero is said to have rescued his beloved by killing a Rakṣasa who at first took her away. The author is Kṛṣṇadāsa of the Kērala country and the drama is said to have been staged on the occasion of the festival of Viṭṭhala.

**Beginning:**

नत्वा यत्र जनिं प्रयाति सुजनो यत्सेव्यमप्य(व्ययं)
ब्रह्मेति ब्रुवते गुणातिगमृतं विध्वस्तरागा बुधाः ।
विश्वं यस्य विजृम्भितं सदखिलव्यासङ्गि संविन्मयं
तत्कृष्णाख्यमतीन्द्रियं भवतु वस्तेजश्चिरं श्रेयसे ॥

* * * *

(नान्द्यन्ते सूत्रधारः)

सू—(नेपथ्याभिमुखमवलोक्य) आर्ये, इतस्तावत् ।

(प्रविश्य)नटी—अय्य एसं म्हि ।

सू—आर्ये, अहमिदानीमहिरिपुकलापलालितललितमौलिररविन्दलोचनस्ये-न्दिरापयोधरभरपुरन्दरनीलहारयष्टेरभीष्टदायिनस्त्रिदशवृन्दवन्द्यमानपादसरोरुहस्य भगवतस्त्रिभुवनैकतिलकस्य विट्ठलनाम्नोऽरिष्टासुरनिषूदनस्य यात्रावलोकनार्थं

* * * *

कमलकेलिनिकेतनं केरलाह्वयविषयविशेषः । तत्र—

. . . . भिरामचिकुरस्य रथाङ्गपाणेः पादाम्बुजैकशरणः करुणापयोधेः ।
कश्चित्कविः कविकृतिप्रतिगाढदृष्टिर्नाम्ना जनैर्निगदितो नवकृष्णदासः ॥

तेनाकस्मिकस्नेहनिघ्नेन विद्वत्परिषदा निर्दिष्टगुणविशिष्टरसंदर्भं कलावती-कामरूपं नाम नाटकमस्माकं समर्पितमभूत् । तत्प्रयोगमाश्रित्य विद्वत्परिषदं परितोषयिष्यावः ।

**End:**

राजा—(कलावतीं प्रति) प्रिये कलावति, त्वमिहैव न्यग्रोधमूलतले निरा-कुला सती तिष्ठस्व मां प्रतीक्षमाणा । अद्यैव तीव्रतरस्य भीमस्य रक्षसो वधा-नन्तरमावामावयोरालोकार्थिनीं काशीपुरीमुपेत्य रंस्यावहे ।

कला—बाष्पनिरुद्धकण्ठी अवचना तिष्ठति ।

* * * *

**Colophon:**

इति कलावतीकामरूपे चतुर्थोऽङ्कः ॥

(ततः प्रविशति खड्गपाणिर्नगरपालः)

(सकुतूहलं विलोक्य) अहो महानद्य काशीपुर्यां महो विजृम्भते ।

* * * *

निशिचरकरमुक्तं सिक्तमास्रैररीणामतिनिशितमलङ्घ्यं दीप्तिमद्दीर्घदण्डम् ।
अवनिपतिरलावीदर्धचन्द्रेण शत्रुं झटिति समितिमध्ये चापहस्तः कृतास्त्रः ॥

नग—महदुपकृतं जगताम् । ततस्ततः ।

* * * *

नग—ततस्ततः ।

प्रभा—तदो असही.

## No. 12512. कालीकेलियात्राभाणः.
## KĀLĪKELIYĀTRĀBHĀṆAḤ.

Substance, paper. Size, 8¼ × 6¾ inches. Pages, 137. Lines, 14 on a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Begins on fol. 110*a*. The other work herein is Rāghavābhyudaya 1*a*.

Complete.

A Bhāṇa said to have been staged on the occasion of a festival celebrated in honor of Bhadrakāḷi in Kōṭiliṅga (Koḍuṅgalūr or Cranganoor) at the instance of a junior prince of the place. The substance of the Bhāṇa is itself a festival story relating to the Goddess Bhadrakāḷi.

**Beginning:**

ब्रह्मेन्द्रादित्रिदशमकुटीपद्मरागप्रकाश-
प्रातःसन्ध्यासमधिगमनस्मेरपादाम्बुजश्रीः ।
श्रद्धापूर्वप्रणतजनताकामसन्तानवल्ली
नित्यानन्दं दिशतु भवतां नन्दिनी चन्द्रमौलेः ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)—

* * * *

भो भोश्चतुःसमुद्रवलयप्रमुदितमहीमण्डलमहामण्डनायितश्रीकोटिलिङ्गविषय-वास्तव्यायाः

* * * *

श्रीभद्रकालिकायाः केलियात्रायां सकलहरिदन्तरेभ्यः समागताः सभासदः, शृणुतेमां मदीयां विज्ञापनाम्

* * * *

अस्ति श्रुतमत्रत्ययुवराजेनास्या एव जनन्याः केलियात्रामहमधिकृत्य कृतं किमपि भाणम् । तदेवेदानीं प्रयोक्तुमुचितम् ।

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

श्रीकोटिलिङ्गनिलये सततं लसन्ती श्रीकण्ठदेवदुहिता परिपातु लोकान् ।
क्षोणीतले च तुलितामृतसारवेणी वाणी विराजतु चिराय महाकवीनाम् ॥

(इति निष्क्रान्तः.)

**Colophon:**

समाप्तश्चायं भाणः ॥

## No. 12513. गोदापरिणयम्.
## GODAPARIṆAYAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 51. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, new.

Complete in five acts.

Wants two leaves in the beginning.

This drama describes the marriage between Dēvarāja or Varadarāja, a form of Viṣṇu worshipped in Kāñcīpuram (Conjeeveram), and Gōdā or Āṇḍāḷ.

**Beginning:**

ततः प्रविशति मानुषाकृतिः फणिपतिः—

अहो करिगिरिनायकस्य महती खल्वस्मदुपरि कृपाझरी। यदद्य विद्यमानेषु बहुषु गरुडविष्वक्सेनादिषु परिकरेषु मामेवैवंविधकर्मणि न्ययूयुजदसौ कृपाजलधिः। अहो भगवतः करिगिरिशेखरस्य विष्णुचित्तात्मजायां महीयानेव खल्वनुरागबन्धः। तथाहि—

गदा नेतव्येत्यालपनसमये वक्त्रकमलात्
प्रकामं गोदेति प्रसरति हरेः संसदि वचः।
तदीयं निर्माल्यं सुरभिलमिति श्रीपतिरसौ
वहन् धन्यंमन्यो भवति परमानन्दभरितः॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

सारासारविवेकिनो विनयिनः सौम्या वदान्या नृपाः
क्षोणीं शासतु वाञ्छितानि कवयस्तेभ्यो लभन्तांतराम्।
तेषां वक्त्रसरोरुहे विलसितं सारस्वतं जृम्भतां
श्लाघाघूर्णि(त)मस्तकाः सुहृदयास्तिष्ठन्तु कामं जनाः॥
प्रबन्धाः प्राचीना गुणगरिमवन्तो बहुतराः
कवीनां श्लाघार्थे जगति महतां वश्यवचसाम्।
न चेन्मादृक्षाणां परिमितगुणाः क्लिष्टवचसां
प्रबन्धा ईदृक्षाः कथमिह भजे तिकलम् (?)॥

गोदापरिणये पञ्चमोऽङ्कः॥

**Colophon:**

गोदापरिणयः समाप्तः॥

The scribe adds—

दिवादीपकुलोद्भूतशठकोपार्यसूनुना ।
गोदापरिणयं नाम नाटकं लिखितं मया ॥
दिवादीपवेङ्कटदासलिखितं गोदापरिणयं नाम नाटकं सम्पूर्णम् ॥

---

## No. 12514. चण्डकौशिकम्.
## CANDAKAUŚIKAM.

Pages, 96. Lines, 8 on a page.

Begins on fol. 277*b* of the MS. described under No. 12441.

Contains one to five acts complete, but wants the beginning in the first act.

A drama by Ārya Kṣēmēśvara dealing with the story of Hariścandra. The author is the great great grandson of Viśvavijayaprakōṣṭha. The drama is said to have been enacted in the court of Mahīpāla who is stated to have put to death the rulers of the Karnāṭa country.

**Beginning:**

रा—(सहर्षमञ्जलिं बद्ध्वा) महान् प्रसादः ॥

वा—

मन्त्रैः पूतं क्षपितदुरितैः क्षत्रतेजोऽभिवृद्ध्यै
प्रारब्धस्य प्रशमनविधेरापदामुन्मुखीनाम् ।
एतत्पुण्यं किमपि परमं ते क्रियाशेषमम्भो
भूयाद्भूत्यै वितरतु मुदं व्यापदो हन्तु सर्वाः ॥

(इत्यभिषिञ्चति.)

**End:**

येनाद(दि)श्य प्रयोगं घनपुलकभृता नाट(क)स्यास्य हर्षा-
द्वाल्लङ्कारहेम्नां प्रतिदिनमकृशा राशयः सम्प्रदत्ताः ।
तस्य क्षत्रप्रसूतेर्भ्रमतु ज(ग)दियं कातिक(र्त्तिके)यस्य कीर्तिः
पारे क्षीराब्धिसिन्धोरपि कवियशसा (सा)र्धमप्रेसरेण ॥

(इति निष्क्रान्ताः सर्वे.)

**Colophon:**

पञ्चमोऽङ्कः ।

इति श्रीआर्यक्षेमीश्वरकृतं चण्डकौशिकं नाम नाटकं समाप्तम् ॥

## No. 12515. चन्द्रकलाकल्याणम्.

## CANDRAKALĀKALYĀṆAM.

Substance, palm-leaf. Size, 15¾ × 1¼ inches. Pages, 90. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, new.

Complete in five acts. The right ends of the leaves are much worn out and indented.

Same work as that described under No. 16 of M. Seshagiri Sastri's Report, No. 1. By Nṛsiṁhakavi.

---

## No. 12516. चन्द्ररेखाविलासः.

## CANDRAREKHĀVILĀSAḤ.

Substance, paper. Size, 8⅜ × 6¾ inches. Pages, 188. Lines, 12 on a page. Character, Telugu. Condition, good. Appearance, new.

Written on one side of paper.

Incomplete.

A Bhāṇa describing the love between Rasikaśēkhara and Candrarēkha. The name of the author is not given.

**Beginning :**

श्रीमत्पर्वतपुत्रिकाकुचतटीपाटीरपङ्कैः श्रितं
यद्दोर्मध्यमधःप्रसर्पितशरच्चन्द्रांशुलेशैरिव ।
भाति श्लिष्टललाटकुङ्कुममिव स्वप्रेयसीचुम्बने
फाले यस्य विलोललोचनरुचिः पायात् स नः शङ्करः ॥

* * * *

(नान्द्यन्ते सूत्रधारः सविनयकृताञ्जलिबन्धः सभामवलोक्य)

भो भोः सकलतन्त्रस्वतन्त्रप्रचाराः सर्वे सभास्ताराः,

* * * *

विलासिनीविलासानुविधायिनी कोलाहलराजधानी । अत्रभवन्तोऽत्रैव कमपि दृष्टान्तभूतमक्षरसमाजं समाचचक्षे । स च क्षणमाकर्ण्यताम्

* * * *

वनलतावनितापरिरम्भणस्फुरितसर्वमनोहरसौरभः ।
वियति वाति वसन्तसमीरणो रसिकशेखरभावमुदीरयन् ॥
(इति निष्क्रान्तः) प्रस्तावना ।

(ततः प्रविशति) रसिकशेखरः (निर्वर्ण्य चन्द्ररेखाम्)

**End :**

तत्रान्तरे समुत्पाटितकण्टके स्थाने शङ्कुस्थापनं कृतमिव सकलवियोगिविहंगमग्रहणार्थमिव निःशङ्कः शशाङ्कजालिको जा . . . किरणजालमितस्ततो विस्तारयामास । ततश्च

स्वान्तेषु तान्तेषु वियोगभाजां मोहान्धकारं जनयन् जनानाम् ।
तमिस्रकान्तारभिदाकुठारः शशी . . . . . . . . . . ॥

---

No. 12517. चन्द्ररेखाविलासः.

CANDRAREKHĀVILĀSAḤ.

Substance, palm-leaf. Size, 16⅞ × 1⅜ inches. Pages, 61. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1a. The other works herein are Gaurīkathā 33a, Vināyakapūjā 40a.

Incomplete.

Same work as the above.

This is the original MS. from which the MS. described under the previous number was restored.

---

No. 12518. जानकीपरिणयम्.

JĀNAKĪPARIṆAYAM.

Pages, 188. Lines, 10 on a page.

Begins on fol. 82b of the MS. described under No. 11613.

Complete.

A well-known drama in seven acts by Rāmabhadradīkṣita, who was the son of Yajñarāmadīkṣita and disciple of Śokkanāthamakhin and Bālakṛṣṇa and who was regarded with esteem by Nīlakaṇṭhadhvarin and Koṇḍājyautiṣika. It describes the marriage of Rāma with Sītā on the occasion of Viśvāmitra's sacrifice at his Siddhāśrama.

**Beginning :**

संसक्तानिव पातुमौपनिषदव्याहारमाध्वीरसा-
नुन्मार्ष्टु व्रजसुन्दरीकुचतटीपाटीररेणूनिव ।
उन्मीलन्मुरलीनिनादबहुलामोदोपसीदद्गवी-
जिह्वालीढमलीकवल्लवशिशोः पादाम्बुजं पातु नः ॥

* * * *

सू—(विहस्य) किं तद्विस्मृतं भवत्या? यदचिरनिर्मितं जानकीपरिणयं नाम रूपकमध्यापितासि ।

नटी (सहर्षम्)—दिट्ठिआ दाणिं अणुबोहि अंहि अय्येण । जस्स खु कव्वबन्धस्स कई महाणुभावादो जण्णरामदिक्खिआदो उप्पण्णो अण्णवादो विअ चन्दो रामभद्दमखिदो ।

सू—सम्यगनुस्मारितं भवत्या ॥

यस्य स्तौति मतिं मनीषिसदसि श्रीनीलकण्ठाध्वरी
कोण्डाज्यौतिषिकश्च यस्य कुरुते संमानमार्यैः समम् ।
यत्रानुग्रहदृष्टिमर्पयति च श्रीबालकृष्णो गुरुः
सोऽयं दीव्यति चोक्कनाथमखिनामकीतदासः कविः ॥

पश्येदानीम्—

विदितः कवि(ः) प्रबन्धो रघुवीरचरित्रवर्णनपवित्रः ।
परिषद्रसोन्मुखी[यं]मम सर्वोऽयं भाग्यपरिणामः ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

मार्गं दर्शितमाश्रयन्तु मनुजा मन्वादिभिः श्रेयसे
राजानोऽप्यगृहीतपैशुनगिरो रक्षन्तु धन्या महीम् ।
लाल्यन्तां सरसोक्तयश्च कवयः शश्वद्रसज्ञैर्जनैः
स्यादेतस्य कवेश्च भक्तिरचला देवे रघूणां प्रभौ ॥
(इति निष्क्रान्ताः सर्वे) ॥

**Colophon:**

सप्तमोऽङ्कः ॥
इति जानकीपरिणयं नाम नाटकं सम्पूर्णम् ॥

---

## No. 12519. डमरुकम्.
## DAMARUKAM.

Pages, 57. Lines, 10 on a page.

Begins on fol. 1a of the MS. described under No. 11424.

A peculiar dramatic work by Āryaka, also known as Ghanaśyāma-paṇḍita, son of Kāśi and Mahādēva. His elder brother was Īśa and his sister was named Śakambharī. He was 22 years old when he wrote this work. He says he has written Ṣaḍbhaṣākāvya, a Nāṭaka, a Bhāṇa, a Saṭṭaka, an Anyāpadēśaśataka, a Prahasana, and a Campu For further particulars regarding the author see Uttararamacaritavyākhya written by the same author and described under R. No. 1352 of the Triennial Catalogue, Vol. II, Part I-B.

Complete in ten Alaṅkāras as given below :—

| | |
|---|---|
| १ राजानुरञ्जन. | ६. शाब्दिकमञ्जन. |
| २. कलिदूषण. | ७. पण्डितखण्डन. |
| ३. सुकविसंजीवन. | ८. जातिसंतर्जन. |
| ४. कुकविसंतापन | ९. प्रभुवर्णन. |
| ५. अबोधाकर. | १०. अखण्डानन्द. |

**Beginning:**

यस्यानङ्गरणोत्सवो न घटते जाग्रत्यपि प्रेमणि
क्रोधे कन्दलितेऽपि यस्य विमुखीभावो न संभाव्यते ।
तस्याश्चर्यगुणाकरस्य महसो वामस्य वान्यस्य वा
पादाब्जस्य पराः परागकणिकाः पायासुरायासतः ॥
अन्यस्त्री नापि दृष्टेत्यहिघटपणकृत्तद्धरत्वान्निषिद्धे
तत्संगे साक्षिसिद्धे सुतनु कुचगिरेः पातयागःस्पृशं माम् ।
यद्वा वेणीकशाभिः प्रहर दलय वा दृक्शरैर्मज्जयाहो
नाभीकूपे चिरायेत्यभिदधदुमया क्रीडितोऽव्यान्मृडो नः ॥

(नान्द्यन्ते निर्वाहकः परिक्रम्य)—

(पाण्डरपटविहितनेपथ्याभिमुखमवलोक्य)—मारिष, इतस्तावत् ।

* * * *

सू—(स्मृतिमभिनीय) अस्ति डमरुकं नाम ।

पारिपार्श्विकः—(सवैलक्ष्यम्) न श्रुतं न श्रूयते न श्रोष्यते च डमरुकमिति ।

सू—नूनमेवमेव । परं त्विदमद्भुतम् ।

पारि—भाव, किं तदद्भुतम् ।

सू—यत् किल स्वप्ने पञ्चषान्वारान् परमेश्वरेण डमरुकं ग्रन्थयेति नियुक्तः कश्चन कविः ।

पारि—(स्वगतम्) स किल कृतार्थः (प्रकाशम्) आर्य, को नाम स कविः ।

सू—यस्येशोऽभवः पिता किल महादेवः स काशी प्रसूः
साधुः श्रेयसि सुन्दरी प्रियतमा शाकंभरी च स्वसा ।
सप्ताष्टोक्तिलिपिप्रभुर्गुणनिधि(श्री)ण्डाजिबालाजिनः
पौत्रो यो द्व्यवादिपङ्क्तिमिहिरो द्वाविंशवर्षान्वितः ॥
पट्टषड्भाषाकाव्यं नाटकभाणौ च सट्टकं चम्पुः ।
अन्यापदेशशतकं प्रहसनमपि येन लीलया ग्रथितम् ॥

अपि च,

सरस्वती घनश्यामो घनश्यामः सरस्वती ।
इत्येव यं प्रति प्रायः किंवदन्ती प्रवर्तते ॥

* * * *

सूत्रधारः—मारिष, कृतं विलम्बेन । अविलम्बेन कलहंसकलकण्ठयोः वर्णिकामादाय प्राश्निकमानसावर्जनाय राजानुरञ्जनं प्रक्रमावहे ।

पारि—एवमस्तु (इति निष्क्रान्तः) ।

प्रस्तावना ।

(ततः प्रविशतः कलहंसकलकण्ठौ)

कलहंसः—(परिक्रम्य) सखे कलकण्ठ, समारभस्व तावदादिमं राजानुरञ्जनं नाम निबन्धनम् ।

End:

सुमेधाः—(आकाशे) भोः सामाजिकाः, किं नु वो भूयः प्रियमुपहर्तव्यम् । किं ब्रूथ, इतोऽपि किमन्यत् प्रियमस्तीति ।

तथापीदमस्तु (भरतवाक्यम्)—

दुर्भिक्षेण समं लोके प्रमीलन्त्वसुमेधसः ।
सुभिक्षेण सह प्रायः संभवन्तु सुमेधसः ॥

अपि च,

द(क्षः)चेत्कवितां करोतु विततां देवी दयार्द्रा गिरां
सूक्त्युल्लासितसाधवे सुकवये मा दुष्कविर्दुह्यतु ।
हृ नाट्याविदमाहितं डमरुकं शम्भोर्गिरा जृम्भतां
जीयाच्च . . . चामहाकविरसावष्टप्रबन्धीश्वरः ॥

(इति निष्क्रान्ताः सर्वे)

Colophon:

इति डमरुके दशमोऽलङ्कारः समाप्तः ॥

सुरनीरपण्डितघनश्यामनामक आर्यको नाम कविः कर्तास्य प्रबन्धस्य ।

संपूर्णमिदं डमरुकं नाम निबन्धनम् ॥

---

## No. 12520. तपतीसंवरणम्.
## TAPATĪSAMVARAṆAM.

Pages, 164. Lines, 16 on a page.

Begins on fol. 92*a* of the MS. described under No. 11861.

Complete.

A drama in six acts by Kulaśēkharavarman, ruler of Mahōdayapura in the Kērala country. The plot of the play is taken from the story of Saṁvaraṇa, the father of Kuru and husband of Tapatī, described

in chapters 171 to 173 of the Ādiparvan of the Mahabhārata. His other works are Vyaṅgyavyākhyā and Āścaryamañjarīkathā. This work has been printed and published in the Trivandrum Sanskrit Series.

**Beginning**:

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सू—लक्ष्मीर्धर्मजलच्छलेन सुधया दन्तच्छदच्छद्मना
सोदर्येण च कौस्तुभेन शकलेनेन्दोर्ललाटात्मना ।
पाणिस्पर्शविधावभीमिरुचितैर्नीतेव दातुं विभो-
रालम्ब्याङ्कमधोक्षजस्य भवतां कामप्रसूः कल्पताम् ॥

अलं प्रविस्तरेण । अधुनातनमभ्युदयप्रमोदातिभारमात्मकुटुम्बिन्यै संविभजामि । (परिक्रम्य नेपथ्याभिमुखमवलोक्य)

* * * *

आर्ये, मा मैवम् । यस्य परमहंसपादपङ्केरुहपांसुपटलपवित्रीकृतमकुटतटस्य वसुधाविबुधघनायान्धकारमिहिरायमाणकरकमलस्य मुखकमलादगलदाश्चर्यमञ्जरीकथामधुद्रवः ।

अपि च,

उत्तुङ्गघोणमुरुकन्धरमुन्नतांसमंसावलम्बिमणिकर्णिककर्णपाशम् ।
आजानुलम्बिभुजमञ्चितकाञ्चनाभमायामि यस्य वपुरार्तिहरं प्रजानाम् ॥

तस्य राज्ञः केरलचूडामणेर्महोदयपुरपरमेश्वरस्य श्रीकुलशेखरवर्मणः कृतिरियमधुना प्रयोगविषयमवतरति ।

* * * *

तनयसमुद्भवहेतोरसुतो नियमान्निवर्तितासि मया ।
संवरणेन यथेयं साल्वसुता सार्वभौमेन ॥

(निष्क्रान्तौ) स्थापना ।

**End**:

तथाप्येतावदाशंसामहे (भरतवाक्यम्)—

अन्योन्यं जगतामपाकविरसा मूर्च्छन्तु मैत्रीरसाः
संगृह्णन्तु गुणान् कवेः कृतधियां मात्सर्यवन्ध्या धियः ।
विक्षिप्याद्विषयानुषङ्गकलुषीभावा घनश्यामले
भक्तिर्मे परिपच्यतामहरहः श्रेयस्करी श्रीधरे ॥

(इति निष्क्रान्ताः सर्वे) ॥

**Colophon**:

इति षष्ठोऽङ्कः । इति तपतीसंवरणं नाम नाटकं समाप्तम् ॥

## No. 12521. दानकेलिकौमुदी.
## DĀNAKĒLIKAUMUDĪ.

Pages, 66. Lines, 9 on a page.

Begins on fol. 149*b* of the MS. described under No. 12471.

Complete.

A Bhāṇa describing the amorous deeds of Śrī-Kṛṣṇa as a toll-gate keeper with Rādhā and other Gōpikās who had gone for the purpose of selling milk, butter, ghee, etc., on the occasion of the sacrifice performed by Sāndipa, preceptor of Śrīkṛṣṇa. The name of the author is unknown; but he states that the drama was composed in Śaka 1471 (expired) and that he was a resident of Nandīśvara.

**Beginning:**

अन्तः स्मेरतयोज्ज्वला जलकणव्याकीर्णपक्ष्माङ्कुरा
किंचित्पाटलिताञ्चला रसिकतोत्सिक्ता पुरः कुञ्चती।
रुद्धायाः पथि माधवेन मधुरव्याभुग्नतारोत्तरा
राधाया किलिकिञ्चितस्तबकिनी दृष्टिः श्रियं वः क्रियात् ॥

अपि च,

विधुरपि कलयन् सदाभिवृद्धिं गुरुरपि गौरवचर्यया विहीनः।
मुहुरुपचितवक्रिमापि शुद्धो जयति मुरद्विषि राधिकानुरागः॥

(नान्द्यन्ते सूत्रधारः)

• • • •

सू—भोस्ताण्डवचर्यापाण्डित्यपारंगत सम्यगभिज्ञातम्। यदेष नियोगेन सुहृदामुपरूपकमिदं दानकेलिकौमुदी नाम भाणिकामभिनेतुमुद्यतोऽस्मि।

• • • •

सू—

प्रकटितललितालंकृतगान्धर्वेयं महाविद्या।
नान्दीमुखी नहि कथं रसिकेन्द्रानन्दिनी भविता॥

(नेपथ्ये) साधु भोः कुशीलवाचार्य, तथ्यं कथयसि। यदद्य नान्दीमुखी गान्धर्विकामविद्य रसिकवृन्दमौलेर्व्रजेन्द्रनन्दनस्य चिरमानन्दाय भवित्री।

सू—कथं वनदेवीयं वृन्दा सुबलेन सार्धमित एवाभिवर्तते। तदत्र नाट्ये नटान् नियोक्तुमितः प्रयावः॥

(इति निष्क्रान्तौ) प्रस्तावना॥

**End:**

सहचरीकुलसंकुलया गुणैरधिकया सह राधिकयानया ।
त्वमिह नर्मसुहन्मिलितः सदा घटय माधव घट्टविलासितम् ॥

किंच,

राधाकुञ्जतटीकुटीरवसतिः सक्तान्यकर्मा जनः
सेवामेव समक्षमत्र युवयोर्यः कर्तुमुत्कण्ठते ।
वृन्दारण्यसमृद्धिदोहदपदक्रीडाकटाक्षद्युते
तर्षाढ्यस्तरुरस्य माधव फली तूर्णं विधेयस्त्वया ॥

कृष्णः—(सहर्षाभ्युपगमम्) भगवति तथास्तु । तदेहि प्रातिस्विकाभीष्टकृत्याय प्रयामः ॥

(इति निष्क्रान्ताः सर्वे) ॥

**Colophon:**

दानकेलिकौमुदी भाणिका समाप्ता ॥

ग्रथिता सुमनःसुखदा यस्य निदेशेन भाणिकास्रगियम् ।
तस्य मम प्रियसुहृदः कण्ठतटी क्षणमलंकुरुताम् ॥
गते मनुशते शाके चन्द्रस्वरसमन्विते ।
नन्दीश्वरे निवसता भाणिकेयं विनिर्मिता ॥

---

## No. 12522. द्रौपदीपरिणयम्.

## DRAUPADĪPARIṆAYAM.

Substance, paper. Size, 8½ × 6¾ inches. Pages, 107. Lines, 10 on a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Begins on fol. 74*a*. The other work herein is Subhadrādhanañjaya 1*a*.

Complete in five acts.

This drama deals with the incidents that took place from the marriage of Draupadī to the birth of her sons. The author is Kṛṣṇasūri, son of Nṛsiṁhasūri, disciple of Navina Vāṅkaṭārya of Vatsa family. The drama is said to have been enacted during the festival of Varadarāja at Conjeeveram.

**Beginning:**

दीव्यत्पाण्डुमधूककुड्मललसद्गण्डस्थली वार्धिजा-
माद्दौ यः परिणीतवान् हयशिरा वीरासनस्थो विभुः ।

यो दोर्दण्डविघट्टनमदलितप्रत्यर्थिदैतेयकः
पायात्पद्मजशेमुषीकुमुदिनीसंतोषकारी पुमान् ॥
(नान्द्यन्ते सूत्रधारः)

सू—तत्रभवतः कमलाकुचपरिरम्भसंभ्रमाविष्टहृदयस्य मेनकाप्रमुखाभिरप्सरोभिर्गन्धर्वैश्चोद्गीयमानहोमविधिविषयकथाशनस्य भगवतो वरदराजस्य यात्रायां परिमिलिता एव पारिषदाः । तदेतान् विज्ञापयामि (विमृश्य) अस्ति खलु वत्सकुलतिलकचतुस्तन्त्रपारीणनवीनवेङ्कटार्याधिगतविविधशास्त्रार्थस्य श्रीनृसिंहसूरेस्तनयः कृष्णसूरिर्नाम ।

यं हयानन एवायं वाक्स्थितो रक्षति स्वयम् ।
तत्प्रणीतः परिणयो द्रौपद्या अभिनेष्यते ॥

End:

युधि— किमतः परं प्रियतमम् । तथापीदमस्तु (भरतवाक्यम्)—
एताः प्रजाश्च सततं सुखिनो भवन्तु वर्षं प्रवर्षतु वरं वरुणः स देवः ।
उद्दामसस्यनिकरा च भवेत्तु पृथ्वी सा देवता हयमुखी पुरतः प्रभातु ॥
(इति निष्क्रान्ताः सर्वे)

पञ्चमोऽङ्कः ॥

Colophon:

इति वत्सकुलतिलकचतुस्तन्त्रपारीणनवीनवेङ्कटार्याधिगतसकलविद्याविशारदस्य श्रीनृसिंहार्यस्य श्रीकृष्णाभिधात्मजविरचितं द्रौपदीपरिणयं नाम नाटकं संपूर्णम् ॥

---

## No. 12523. द्रौपदीपरिणयम्.

### DRAUPADĪPARIṆAYAM.

Substance, palm-leaf. Size, 18 × 1⅜ inches. Pages, 49. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

---

## No. 12524. द्रौपदीपरिणयम्.

### DRAUPADĪPARIṆAYAM.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 58. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other works herein are Dvitrigrahayōgādhyāya 31*a*, Raghuvīragadya 34*a*, Vēdāntadēśikagadya 38*a*.

Complete.

Same work as the above.

## No. 12525. धनञ्जयविजयव्यायोगः.
## DHANAÑJAYAVIJAYAVYĀYŌGAḤ.

Pages, 22. Lines, 11 on a page.

Begins on fol. 1*b* of the MS. described under No. 1591.

Complete.

Same work as that described under No. 18 of M. Seshagiri Sastri's Report, No. 1.

Copied by Jagannātha. The book belonged to Manōhararāya.

---

## No. 12526. धनञ्जयविजयव्यायोगः.
## DHANAÑJAYAVIJAYAVYĀYŌGAḤ.

Substance, paper. Size, 7¾ × 6¼ inches. Pages, 36. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*b*. The other works herein are Mudrārākṣasavyākhyā 26*a*, Mudrārākṣasa 31*a*, Mahānāṭakasudhānidhi 127*b*.

Complete.

Same work as the above.

---

## No. 12527. नरकासुरविजयः.
## NARAKĀSURAVIJAYAḤ.

Substance, paper. Size, 11¼ × 7 inches. Pages, 30. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 193*b*. The other works herein are Prasannarāghava 1*a*, Mālatīmādhava 72*a*, Mahāviracaritra 158*a*, Prahasana 210*a*.

Complete.

Same work as that described under R. No. 821(*f*) of the Triennial Catalogue of MSS., Vol. II, Part I-A.

---

## No. 12528. नरकासुरविजयः.
## NARAKĀSURAVIJAYAḤ.

Pages, 54. Lines, 16 on a page.

Begins on fol. 47*a* of the MS. described under No. 11861, wherein this work has been mentioned as Narakāsuravadha in the list of other works given therein

Incomplete.

Same work as the above.

## No. 12529. नरकासुरविजयः.
## NARAKĀSURAVIJAYAḤ.

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 24. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same work as the above.

---

## No. 12530. नरकासुरविजयः.
## NARAKĀSURAVIJAYAḤ.

Pages, 35. Lines, 6 on a page.

Begins on fol. 46*a* of the MS. described under No. 11934.

Complete.

Same work as the above.

---

## No. 12531. नवमालिका.
## NAVAMĀLIKĀ.

Pages, 59. Lines, 9 on a page.

Begins on fol. 475*b* of the MS. described under No. 12441.

Complete.

A drama (Nāṭikā) of four acts: by Viśvēśvara, son of Lakṣmīdhara of Bhāradvājagōtra. It describes the amorous sports of Vijayasēna, the Mahārāja of Avanti country, with the young maiden Navamālikā who had gone astray into the flower garlands of the queen Sārasikā and who had been entertained as a maid-servant in her harem.

Date of copying—The 13th day of the black fortnight of the Bhādrapada month in Saṁvat 1977.

**Beginning:**

चित्तान्तर्विशदद्रिराजतनयानीलद्युतिच्छायया
संवीतस्य मृगत्वचा न वचसः संवृण्वतो विक्रियाः ।
भक्त्या पूर्वसमर्पितामिव तया संविभ्रतोऽक्षस्रजं
वाचः पान्तु हरस्य कैतववटोराहार्यधीमूलिकाः ॥

* * * *

(नान्द्यन्ते सूत्रधारः)

सू—अलमतिप्रसङ्गेन ।

* * * *

बभार यो महारत्नभारतीभारतीभृताम् ।
स सुप्रसिद्धरावे(नामे)ह बुधो लक्ष्मीधराभिधः ॥

तथा हि ।

स एवागान्मीमांसकतिलकसीमां स कविता-
सुधायाः प्रत्यग्रं व्यधित वसुधायामवतरम् ।
नवीनां सद्भावस्थितिमहिगवीनां स विदधे
प्रभावं दध्रेऽसौ गिरमधिशतानन्दसवितुः ॥

इदानीं च,

वाग्देवताहृदयभूषणपारिजातसंगुम्भनानुगुणगीतिगुणस्य तस्य ।
संभावनाभिरुपबिभ्रदशून्यमन्तर्विश्वेश्वरेति विदितस्तनयस्तदीयः ॥

तदनुबद्धया नवमालिकाभिधानया नाटिकया चाभिनीयमानया त्वया वयं विनोदनीया इति । तत्तदनुरूपमारभ्यताम् ।

* * * *

नटः—अयि मुग्धे नात्र किंचिद्विचारयितव्यमस्ति ।

वैदुष्ये परिनिष्ठितः प्रतिपदामग्रेसरो यद्गुरुः
तत्तच्छास्त्रकृतश्रमा अपि बुधा यत्पक्षपातस्पृशः ।
विद्याभ्यासरतानुवृत्तिविदिते यस्य प्रसूतिः कुले
भारद्वाजमुनेः कुतूहलकरं किं तस्य न स्याद्वचः ॥

देवादेशात् ककुभमभितो दक्षिणां जेतुकामो
वृक्षाणां न क्षणमपि नलक्षोणिदेशानविक्षम ।
श्रीरामेणोषितमिह चिरायेति मत्वा परं तु
भागेवाहं परिकलयितुं दण्डकारण्यमैच्छम् ॥

**End :**

तथापीदमस्तु (भरतवाक्यम्)—

धर्मं श्रुत्युदितं द्विजप्रभृतयो वर्णा भजन्तां निजं
भूपा उद्विजमानतां विजहतु त्यक्तोपतापाः प्रजाः ।
सौहित्यं हविषा वहन् हरिहयो यच्छत्वभीष्टं पयो
जीयासुः पुरुषायुषं सहृदया विद्यासु लब्धोदयाः ॥

नीतिनिधिः—एवमस्तु ॥

इति निष्क्रान्ताः सर्वे ॥

**Colophon :**

चतुर्थोऽङ्कः ॥

No. 12532. नागानन्दम्.
NĀGĀNANDAM.

Substance, paper. Size, 13¼ × 5 inches. Pages, 74. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 29b. The other works herein are Alaṅkāramuktāvalī 1b, Nāṭakacandrikā 69b, Rasakalpadruma 92b, Rasataraṅgiṇīvyākhyā 149b.

Complete.

A drama describing the story of Jīmūtavāhana: by Śrīharṣa.

It was intended to be staged on the occasion of the festival of Indra.

**Beginning:**

ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरातुरं जनमिमं त्रातापि नो रक्षसि ।
मिथ्याकारुणिकोऽसि निर्घृणतरस्त्वत्तः स कोऽन्यः पुमान्
सेर्ष्यं मारवधूभिरित्यभिहितो बुद्धो जिनः पातु वः ॥

* * * *

(नान्द्यन्ते सूत्रधारः)

सू—अलमतिविस्तरेण । अद्याहमिन्द्रोत्सवे सबहुमानमाहूय नानादिग्देशागतेन राज्ञः श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः—यत्तदस्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालङ्कृतं विद्याधरचक्रवर्तिप्रतिबद्धं नागानन्दं नाम नाटकं कृतमस्माभिः श्रोत्रपरंपरया श्रुतं न च प्रयोगतो दृष्टम् । तत्तस्यैव राज्ञः सकलजनहृदयाह्लादिनो बहुमानादस्मासु चानुग्रहबुद्ध्या यथावत्प्रयोगेणाद्य त्वया नाटयितव्यमिति । तद्यावदिदानीं नेपथ्यरचनां कृत्वा यथाभिलषितं संपादयामि (परिक्रम्यावलोक्य च) आवर्जितानि सकलसामाजिकमनांसीति मे निश्चयः । कुतः,

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च सिद्धराजचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥

* * * *

पित्रोर्विधातुं शुश्रूषां त्यक्त्वैश्वर्यं समागतम् ।
वनं याम्यहमद्यैव यथा जीमूतवाहनः ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

वृष्टिं हृष्टशिखण्डिताण्डवकृते मुञ्चन्तु काले घनाः
कुर्वन्तु प्रतिरूढसन्ततहरित्सस्योत्तरीयां क्षितिम् ।

चिन्वानाः सुकृतानि वीतविपदो निर्मत्सरैर्मानसै-
र्मोदन्तां सततं च बन्धुषु सुहृद्गोष्ठीप्रमोदाः प्रजाः ॥
(इति निष्क्रान्ताः सर्वे)

**Colophon:**

पञ्चमोऽङ्कः ।
समाप्तमिदं नागानन्दं नाम नाटकम् ॥

---

No. 12533. नागानन्दम्.
NĀGĀNANDAM.

Substance, palm-leaf. Size, 16⅞ × 1½ inches. Pages, 63. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old. Complete.

Same work as the above.

---

No. 12534. नागानन्दम्.
NĀGĀNANDAM.

Substance, palm-leaf. Size, 15⅞ × 1⅞ inches. Pages, 43. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Breaks off in the fourth act.

Same work as the above.

---

No. 12535. नागानन्दव्याख्या.
NĀGĀNANDAVYĀKHYĀ.

Substance, palm-leaf (Śrītāla). Size, 11¾ × 1⅞ inches. Pages, 208. Lines, 9 on a page. Character, Malayāḷam. Condition, good. Appearance, old. Complete.

A commentary on the drama described under the previous number: by Rāma.

**Beginning:**

श्रीमदद्रितनयास्तनान्तरे हस्तचूषितपयःसमेधितम् ।
शंभुशक्तिमयमस्तु नः सदा वस्तु हस्तिमुखमिष्टदं परम् ॥
व्यस्ताव्यस्ततयाशेषतत्त्वस्थात्मसुनिर्भरम् ।
शिवं देशिकमाश्रित्य नागानन्दं विमृश्यते ॥

अथ कविकुलतिलकः श्रीहर्षदेवः 'सदर्भेषु दशरूपकं श्रेयः' इति वामनाचार्यप्रदर्शितवाक्यानुसारेण महाकविसमुचितनाटकनिबन्धनानुबद्धपरिकरः प्रबन्धमुखे शिष्टाचारप्रमाणकं मङ्गलाचरणं नाटकोचितं नान्दीरूपेण नटमुखेन प्रतिपादयति ।

* * * *

विषयवीथीमारोप्य कामुकमिव पृच्छति । त्वं ध्यानव्याजमुपेत्य कां चिन्तयसि । योगभूमिषु तसमीमवस्थां (प्राप्य) पर्यङ्कबन्धाक्षिनिमीलनादिच्छलेन बहिर्भावयित्वा कामतिलोक्यसौभाग्यसंपन्नां चिन्तयसि ।

**End:**

अतएव पञ्चमवेदत्वेन परमोपादेयस्यानुकार्याभिन्नभरतमुखेन जगदनुग्रहाय स्वप्रवृत्तेरुचितविषयतां च द्योतयितुं फलप्रतिपादनेनैतत्प्रवृत्तप्ररोचनां च नाटकस्य न्यायानुसारेण श्रेयस्करत्वं महाकविः प्रतिपादितवान् । अतश्चास्माभिरत्र देशिकद्योदितवस्तुतत्त्वैर्विषयसौकर्यप्रेरितैः यथामति विमर्शः कृत इति सर्वं शिवम् ॥

**Colophon:**

श्रीशङ्करोरुकरुणाधननिर्वृतो(तेन) रामेण दाशरथिवृत्तसुजीवनेन ।
साहित्यमार्गपरिचङ्क्रमणप्रयासे शिष्यान्विबोधयितुमेष कृतो विचारः ॥

---

## No. 12536. नारायणीविलासः.

## NĀRĀYAṆĪVILĀSAḤ.

Substance, paper. Size, $8\frac{1}{4} \times 6\frac{3}{8}$ inches. Pages, 19. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 31*a*. The other work herein is Lakṣmīsvayaṁvara 1*a*.

Complete.

Same work as that described under No. 19 of M. Seshagiri Sastri's Report, No. 1.

---

## No. 12537. नारायणीविलासः.

## NĀRĀYAṆĪVILĀSAḤ.

Substance, palm-leaf. Size, $8\frac{3}{4} \times \frac{1}{4}$ inches. Pages, 30. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 80*a*. The other work herein is Lakṣmīsvayaṁvara 1*a*.

Complete.

Same work as the above.

This is the original MS. from which the MS. described under the previous number was trancribed.

---

## No. 12538. पञ्चबाणविजयभाणः.

## PAÑCABĀṆAVIJAYABHĀṆAḤ.

Substance, paper. Size, $8\frac{1}{4} \times 6\frac{3}{8}$ inches. Pages, 124. Lines, 16 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Ahōbalanāthīya 635.

Complete.

Same work as that described under R. No. 1466(*d*) of the Triennial Catalogue of MSS., Vol. II, Part I-C. By Raṅgārya

---

No. **12539.** पार्वतीपरिणयम्.

PĀRVATĪPARIṆAYAM.

Pages, 30. Lines, 22 on a page.

Begins on fol. 135*a* of the MS. described under No. 859.

Complete in five acts.

A drama by Bāṇa Bhaṭṭa describing the marriage of Pārvatī with God Śiva.

**Beginning:**

आदौ प्रेमकषायिता हरमुखव्यापारलोला शनैः
व्रीडाभारविघूर्णिता मुकुलिता धूमोद्गमव्याजतः ।
भर्तुः संमिलिता दृशा सरभसव्यावर्तनव्याकुला
पार्वत्याः परिणीतिमङ्गलविधौ दृष्टिः शिवायास्तु वः ॥

* * * *

सूत्रधारः—आर्ये, अद्य खलु किमप्यभिनवं पार्वतीपरिणयं नाम रूपकं द्रष्टुमभिलषति परिषदेषा ॥

नटी—अय्य तं उण अहिणअं कस्स कइणो किदी भविस्सदि ।

* * * *

सू—

अस्ति कविसार्वभौमो वत्सान्वयजलधिकौस्तुभो बाणः ।
नृत्यति यद्रसनायां वेधोमुखरङ्गलासिका वाणी ॥

तद्विरचितेन विचित्रसंविधानेन वस्तुनानेन सामाजिकानुपस्थास्यामहे ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

पर्जन्यो वृष्टिमिष्टां प्रदिशतु जगतो भद्रसंपादयित्री
शश्वत्सस्यैः प्ररूढैर्भवतु पुलकिता सर्वतो भूतधात्री ।
वर्तन्तां वीतविघ्नाः स्फुरदुपकृतयः संपदः सज्जनानां
नित्यानन्दो महेशो निरतिशयसुखप्राप्तये कल्पतां वः ॥

इति निष्क्रान्ताः सर्वे ॥ पञ्चमोऽङ्कः ॥

**Colophon:**

समाप्तमिदं पार्वतीपरिणयं नाम नाटकम् ॥

## No. 12540. पूर्णपुरुषार्थचन्द्रोदयः.
## PŪRṆAPURUṢĀRTHACANDRŌDAYAḤ.

Substance, paper. Size, 8¾ × 5½ inches. Pages, 181. Lines, 8 on a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Bhagavadajjukā 93*a*. Complete.

Restored from the MS. described under the next number.

An allegorical drama like the Prabōdhacandrōdaya of Kṛṣṇamiśra, representing the union of Ānandapakvavallī with King Daśāśva (one who is the master of ten horses which represent the ten senses of man, i.e., the Ātman). The various good qualities like Suśraddhā and Subhakti are dramatic personages who bring about the marriage of Daśāśva. The various systems of thought of the Cārvākas, the Jainas, the Bauddhas, the Kāpālikas and the followers of Kumārila are introduced as demons who are vanquished by the King Daśāśva.

The author is Jātavēdas of Viśvāmitragōtra.

**Beginning :**

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सू—

आनन्दाश्रुजलप्रसेचनबलाद्गात्रद्रुमप्रोद्गतैः
श्रीशालिप्रतिदर्शनीयमुकुलैः रोमाञ्चमायाधरैः ।
अन्यैर्वा कुसुमैः प्रशोभिततनोर्दिव्याकृतेः शूलिनः
शैलेन्द्रात्मजयास्तु वो (विरचि)ता साध्वङ्कपाली श्रिये ॥

(परिक्रम्य नेपथ्याभिमुखमवलोक्य)

नित्यं मतिप्रसन्ने निर्व्याजातिप्रसादमधुरास्ये ।
रूपे . . . नपरे परमश्चार्ये . . इतस्तावत् ॥

प्रविश्य नटी—अय्य इअं म्हि । विचिन्त्य अधोमुखी तिष्ठति ।

सूत्र—आर्ये अद्य खलु पूर्णपुरुषार्थचन्द्रेण मति प्रसादयति भारती-सौरभ्यमनोहरेण नाटकदिव्यकुसुमेन परिषदाराधने कर्तव्ये केन कारणेन वन-नलिनम्लानिमन्यथाकरीमुत्पादयसि ।

* * * *

राजा—मूर्ख तस्याः प्राप्तिः खलु अतिविहिता । तस्मात् प्रत्यक्षमेव कथनीया सा । श्रूयताम् ।

आनन्दपक्ववल्ली सा नाम्ना प्रियतमा मम ।
तत्प्राप्त्या पुरुषार्थो मे पूर्णः स्यान्नात्र संशयः ॥

**End:**

राजा—भगवत्याः प्रसादात्सर्वः प्रियो मे सम्पन्नः । तथाहि—

त्यक्तं किं न परत्र दुःखजनकं वेश्याङ्गनासेवनं
हेयत्वेन विनिश्चिताश्च गिरिजे बौद्धादिमार्गा न किम् ।
श्रेयोवारकशत्रुमारणमथो जातं न किं भाग्यतः
वेदोद्यानगतेयमम्ब दयिता किं नाद्य साक्षात्कृता ॥

तथाप्येतद्भवतु (भरतवाक्यम्)—

वृष्टिं तुषारा(राषाट्) जनयत्वनूनसस्योचितां पालयतु क्षितीशः ।
धर्मेण भूमिं परमं पुमर्थं वेदोक्तमार्गेण भजन्तु विप्राः ॥
इति निष्क्रान्तास्सर्वे ॥

**Colophon:**

पञ्चमोऽङ्कः ॥
समाप्तमिदं पूर्णपुरुषार्थचन्द्रोदयनाटकम् ॥

---

No. **12541** पूर्णपुरुषार्थचन्द्रोदयः.

PŪRṆAPURAṢĀRTHACANDRODAYAḤ.

Substance, palm-leaf (Śrītāla). Size, 8¼ × 1⅝ inches. Pages, 88. Lines, 9 on a page. Character, Malayāḷam. Condition, injured. Appearance, old.

Complete.

Same work as the above.

The following additional stanzas are found at the end from which the author appears to be Jātavēdas of Viśvāmitragōtra. His wife's name is given as Pārvatī and he is said to have performed the Sōma sacrifice and embraced the ascetic order:—

विद्याचन्द्रिकयाश्लिष्टं पूर्वं त्वस्मादभिन्नया ।
दुष्कलङ्कविनिर्मुक्तं पुमर्थेन्दुमुपास्महे ॥
भाषया केरलानां . . . ङ्कराख्या द्विजातयः ।
भारद्वाजविद्या(द्वि)जावासपश्चिमां भूमिमाश्रिताः ॥
श्रीमद् वकट(?)ग्रामविसिनीसम्भवेषु ते ।
प्रथिताष्टगृहाब्जेषु प्रथिता भुवि . . . ॥

विश्वामित्रगोत्रजानां महाब्राह्मणराज्ञिन(नीं)सद्विरम् ।
अर्थान्वितं प्रभजतां तेषां मध्येऽभवद्विजः ॥
दक्षिणांशगृहः सोऽथ जातवेदा हि नामतः ॥
सोमयागं कृतवतस्तस्य जाया च पार्वती ॥
तदुपादानदेहस्य परमेशकनीय[व]सः ॥
. . . . . लाल . . शवा याजिताश्रमसम्पदः ॥
तुर्याश्रमनिविष्टस्य कृतिरेषा यथाबलम् ।

---

## No. 12542. प्रतिज्ञायौगन्धरायणम्.
## PRATIJÑĀYAUGANDHARĀYAṆAM.

Substance, paper. Size, 8¾ × 5¼ inches. Pages, 94. Lines, 10 on a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Begins on fol. 51*a* The other work herein is Svapnavāsavadatta 1*a*.

Complete in four acts

A small drama describing the marriage of Udayana or Vatsarāja with Vāsavadattā, daughter of Mahāsēna, King of Ujjain. One of the dramatic personage in the drama is Yaugandharāyaṇa, the Prime Minister of Vatsarāja. The work has been printed in the Trivandrum Sanskrit Series. According to it, the author is made out to be the well-known Bhāsa.

**Beginning :**

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्र—

पातु वासवदत्तायो महासेनोऽतिवीर्यवान् ।
वत्सराजस्तु नाम्ना सशक्तिर्यौगन्धरायणः ॥

(परिक्रम्य नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत् ।

(प्रविश्य) नटी—अय्य इअं म्हि ।

सूत्र—आर्ये गीयतां तावत् किञ्चिद्वस्तु । ततस्तव गीतप्रसादिते रङ्गे वयमपि प्रकरणमारभामहे । आर्ये किमिदं चिन्त्यते । न तु गीयते ।

नटी—अज्ज मए सिविणे णादिकुलस्स अस्समा(स्थं) विअ दिट्ठम् । ता इच्छामि अय्येण कुसलविण्णाणणिमित्तं कंचि पुरुसं पेक्खिअस्सिदुम् ।

सूत्र—बाढम्—

पुरुषं प्रेषयिष्यामि व्यक्तमात्महितक्षमम् ।

(नेपथ्ये) सालक सज्जस्त्वम् ?

सूत्र—पुरुषं प्रेषयत्येष यथा यौगन्धरायणः ॥

(निष्क्रान्तौ) आमुखम् ।

**End:**

यौग—यदि मे महासेनः प्रसन्नः किमतः परमहमिच्छामि (भरतवाक्यम्)—

भवन्त्वरजसो गावः परचक्रं प्रशाम्यतु ।

इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः ॥

(निष्क्रान्तास्सर्वे)

चतुर्थोऽङ्कः ।

**Colophon:**

प्रतिज्ञायौगन्धरायणं समाप्तम् ॥

वत्सराजचरितं समाप्तम् ॥

---

## No. 12543. प्रतिमानाटकम्.
## PRATIMĀNĀṬAKAM.

Pages, 160. Lines, 8 on a page.

Begins on fol. 129*a* of the MS. described under No. 12493.

Complete.

This drama is based on the story of the Rāmāyaṇa from the banishment of Rāma to his coronation. The work has been printed in the Trivandrum Sanskrit Series, according to which the author is Bhāsa. The name of the work also is not found given in the work or in this MS. The work derives its name from the importance given in it to Bharata's learning the death of Daśaratha from his statue in the Pratimāgṛha (picture hall).

**Beginning:**

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्र—

सीताभवः पातु सुमन्त्रतुष्टः सुग्रीवरामः सह लक्ष्मणश्च ।

यो रावणार्यप्रतिमश्च देव्या विभीषणात्मा भरतोऽनुसर्गम् ॥

(नेपथ्याभिमुखमवलोक्य) आर्ये, इतस्तावत् ।

(प्रविश्य) नटी—अय्य इयं ह्मि ।

सूत्र—आर्ये, इदानीं शरत्कालमाश्रित्य गीयतां तावत् ।

नटी—अय्य, तह (गायति) ।

सूत्र—अस्मिन् हि काले—

चरति पुलिनेषु हंसी काशांशुकधारिणी सुसंहृष्टा ।

(नेपथ्ये) अय्य

सूत्र—मुदिता नरेन्द्रभवने त्वरिता प्रतिहाररक्षीव ॥

(निष्क्रान्तौ) आमुखम् ॥

**End:**

रामः—

अद्यैव यास्यामि पुरीमयोध्यां संबन्धिमित्रैरनुगम्यमानः ।

लक्ष्मणः—

अद्यैव पश्यन्तु च नागरास्त्वां चन्द्रं सनक्षत्रमिवोद्यन्तम् ॥

(भरतवाक्यम्)—

यथा रामश्च जानक्या बन्धुभिश्च समागतः ।

तथा लक्ष्म्या समायुक्तो राजा भूमिं प्रशास्तु नः ॥

(निष्क्रान्ताः सर्वे)

**Colophon:**

सप्तमोऽङ्कः ॥

समाप्तमिदं नाटकम् ॥

---

### No. 12544. प्रतिमानाटकम्.

### PRATIMĀNĀṬAKAM.

Pages, 52. Lines, 9 on a page.

Begins on fol. 33*a* of the MS. described under No. 12492.

This is the original MS. from which the MS. described under the previous number was transcribed.

Complete.

Same work as the above.

## No. 12545. प्रद्युम्नानन्दीयम्.
## PRADYUMNĀNANDĪYAM.

Substance, palm-leaf. Size, 11⅞ × 1⅞ inches. Pages, 218. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete in six acts.

The plot of this drama is the same as that given in the Arthapañcakanāṭaka which is described under No. 12494 ante.

The author is the same as that of Viśvaguṇādarśa, viz., Vēṅkaṭācārya of Kāñci, son of Sītāmbā and Raghunātha, son of Appayācārya of Ātrēyagōtra. The drama is said to have been staged on the occasion of the festival celebrated in honor of God Śrīnivāsa of Tirupati. The work is said to have been completed by the author on the full moon day of the Prauṣṭhapada month in the year Prajōtpatti.

Date of transcription—Saturday, the full moon day and the 22nd of the Āvaṇi month in the year Parābhava.

**Beginning**:

श्रीमद्धाम समामनन्ति कमलं तद्बान्धवं वा ययो-
रक्षीन्दीवररूपमाहुरथवा तद्बन्धुरूपं बुधाः ।
सावर्ण्यं तटिता वपुः शुभतरं धत्तेऽथवा तद्वता
भूयास्तां भुजगेन्द्रशैलवसती तौ दंपती संपदे ॥

* * * *

(नान्द्यन्ते सूत्रधारः)

(नेपथ्याभिमुखमवलोक्य) इह खलु निखिलभुवनजननस्थितिसंस्थितिभिरभिक्रीडतो भगवतो वक्षस्स्थलविलग्नलक्ष्मीचरणनलिनलाक्षासाक्षात्कारनिर्धारितपरब्रह्मभावस्य वरेण्यलावण्यश्रीकेलिगेहेन देहेन वार्धुकवलाहकच्छायाडम्बरविडम्बिनो वेङ्कटेशकुटुम्बिनो देवस्य सेवावसरसमवेतैः हृद्यानवद्यविद्यानिषद्यायमानमानसैः सादरमहमादिश्ये ।

* * * *

आविर्भावमुपेयिवान् शुभयशस्यत्रेः पवित्रे कुले
श्रीमानप्पयदेशिकाध्वरिमणिर्जागर्ति कीर्त्या भुवि ।
अस्तोकैर्यदनुष्ठितैर्मखवरैर्हस्तिक्षमाभृत्पति-
स्तां वैतानवपाहविःकवलनक्रीडां पुनः स्मारितः ॥

* * * *

परमप्रभयातुलोऽकलङ्कः कृतदानश्च महाच्छविमहस्ते ।
भुवि भाति विधूतदूषणश्रीः रघुनाथार्यमखी यथार्थनामा ॥

तस्यैतस्य तनूभवः कविरयं त्र्यन्तस्वल्याक्रिया-
तर्कप्रौढचमत्क्रियासु निपुणो मीमांसकोत्तंसकः ।
तत्तादृककवितासरोजसविता दत्ताशयः श्रीपतेः
शेषक्ष्माधरवासिनश्चरणयोः श्रीवेङ्कटार्योध्वरी ॥

तेन किल निबद्धं प्रद्युम्नानन्दाभिधानमभिनवं नाटकमभिनयद्भिरस्माभि-रानन्दयितव्या परिषदेषा ।

नटी—हृदयंगमोऽयं परिषदभितोषणोपायः । सारग्राही खल्वसि । तथाहि—

कल्पन्ते विदुषां मुदे स्मरवधूकर्णावतंसोत्पल-
स्वैरोदञ्चितसीधुपूरसुहृदः श्रीवेङ्कटार्योक्तयः ।
श्रोत्रैर्याः सुचिरं निपीय दधते शृङ्गारपारं गताः
श्रीमन्निर्मलरायपण्डितमुखाः श्लाघाविलोलं शिरः ॥

**End:**

अपि च,

तुण्डीरादिषु मण्डलेषु किल मा भूदेव भूदेवता-
द्रोहिभ्यः कलिकृत्तुरुष्कयवनादिभ्यो रिपुभ्यो भयम् ।
विज्ञानं निगमान्तजन्यमिह मा विप्लावि चाल्पश्रुतैः
शेषाद्रेः शिखरे चिरेण रमया चक्री स च क्रीडतु ॥

**Colophon:**

इति श्रीवाजपेयसर्वतोमुखाप्तोर्यामादियाज्यात्रेयवंशमौक्तिकीभवदप्पयाचार्यतनूभवस्य क्षेत्रयमक्रचक्रवर्तिनो रघुनाथाचार्ययज्वनस्तनयेन श्रीनिवासकृपातिशयसुविदितनयेन काञ्चीनगरवास्तव्येन सीताम्बागर्भसंभवेन वेङ्कटाचार्ययज्वना विरचिते प्रद्युम्नानन्दनाम्नि नाटके षष्ठोऽङ्कः ॥

नवसन्दर्भमात्रेयो नाटकं वेङ्कटाध्वरी ।
प्रजोत्पत्तौ प्रौष्ठपद्यां पूर्णिमायामपूरयत् ॥

The scribe adds—

श्रीमल्लक्ष्मणयोगिपुङ्गवमताकूपारराकाविभो-
रुर्वीमण्डलमण्डनस्य करुणाम्भोधेः पदाम्भोरुहम् ।
ध्यात्वा योऽण्णयदेशिकस्य सततं हर्षाम्बुधौ मज्जनं
कुर्वंस्तिष्ठति राघवेण लिखितं तेन प्रियं नाटकम् ॥
श्रीमदण्णयसूरीन्द्रं श्रितवात्सल्यभूषितम् ।
कलये मम सर्वस्वं करुणावरुणालयम् ॥

श्रीमदण्णयसूरीन्द्रपदपङ्कजतल्लजौ ।
भक्तसंसारदावाग्निवारिदौ शरणं भजे ॥
वत्सकुलाम्बुधिपूर्णसुधांशुः श्रीपतिराघवदेशिकपुत्रः ।
राघव एष इहाण्णयसूरेर्दास इमं व्यलिखत् स्वयमेव ॥

---

## No. 12546. प्रद्युम्नानन्दीयम्.
## PRADYUMNĀNANDĪYAM.

Substance, paper. Size, 11¾ × 8¾ inches. Pages, 192. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Restored from the MS. described under the previous number.

Complete.

Same work as the above.

---

## No. 12547. प्रद्युम्नानन्दीयम्.
## PRADYUMNĀNANDIYAM.

Substance, palm-leaf. Size, 19 × 1¼ inches. Pages, 80. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1a. The other works herein are Tarkāmṛta 41a, Tarkāmṛtataraṅgiṇī 42b.

Complete.

Same work as the above.

The scribe adds—

श्रीवत्सिवंशरचितोदयराघवार्यः श्रीशैलवंशतिलकैरपि चाण्णयार्यैः ।
उत्पत्तितः सुततया कलितः कलासु व्युत्पत्तितश्च विलिलेख स देशिकाख्यः ।
प्रथिते नावत्पाके प्रद्युम्नानन्दलेखनानन्दम् ।
देशिकदासमुखेन प्रामोच्छोभकृति कार्तिके रामः ॥

---

## No. 12548. प्रपन्नसपिण्डीकरणनिरासः.
## PRAPANNASAPIṆḌĪKARAṆANIRĀSAḤ.

Pages, 18. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 2865.

Incomplete.

Manaikkaṭṭai Vēdāntācārya at first wrote a work laying down that the proper ceremony to be performed in relation to a dead Prapanna is Nārāyaṇabali and not Sapiṇḍīkaraṇa. Tiruppuṭkuḷi Śrī-Kṛṣṇa Tātācārya of Conjeevaram on the other hand held a contrary view and in

support of the same wrote a treatise called Sanmārgakaṇṭakōddhāra in which he maintained that Sapiṇḍikaraṇa only is the proper ceremony. The author of the drama under notice, viz., Ghaṭṭa Śēṣārya, son of Rāmānujayōgin of Vādhūlagōtra, has in this work supported the view of Mansālkaṭṭai Vēdāntācārya and refuted that of Tirappuṭkuḷi Śrī-Kṛṣṇa Tātācārya.

**Beginning:**

समस्तचिदचिद्वस्तुशेषिणे शेषशायिने ।
प्रपन्नपारिजाताय श्रीरङ्गब्रह्मणे नमः ॥

(नान्द्यन्ते)

सूत्रधारः—

इयं काञ्ची कांचिच्छ्रियमनुभवत्यद्य महती
जनौघैः सङ्कीर्णा ध्वजपटपरिष्कारललिता ।
वितानाद्यैर्वीता विविधमणिदीपावलियुता
दिवेवाभातीयं वितिमिरवती केन नगरी ॥

(विचिन्त्य, स्मरणमभिनीय)

वसन्ते वसन्ते हि वैशाखमासे महानुत्सवो देवदेवस्य क्लृप्तः ।
इदानीं तु वैशाखमासे हि तस्मात् समन्ताच्च काञ्ची परिष्कारयुक्ता ॥

(पुन(:)स्मरणमभिनीय) [सस्मारम्]

हस्तर्क्षे हि समारम्भः श्रवणर्क्षे समापनम् ।
ध्वजारोहस्तु चित्रायां तीर्थान्ते ह्यवरोहणम् ॥
भविष्यति श्वः प्रभाते महान् हि गरुडोत्सवः ।
आगमिष्यन्ति बहवः सेवार्थं वैष्णवोत्तमाः ॥
हय्यद्यादीभकण्ठीरवनिगमशिखादेशिकेन्द्रावतारः
श्रीमद्वाधूलरामानुजगुरुतनयो घट्टशेषार्यनामा ।
दासोऽहं रङ्गवासी निजपितृकलितव्यर्थवाजा(ग्जा)लतूल-
स्तोमाग्निं नाम सन्दर्भकमिति ललितं सम्प्रयोक्तुं प्रवृत्तः ॥

* * * *

तदनन्तरकरणीयाय सज्जीभवामि ।

(इति निष्क्रान्तः) प्रस्तावना ।

* * * *

तत्र श्रीमत्तिरुप्पुकुलिनगरवराधीश्वरः कृष्णसूरिः
ताताचार्यो महात्मा सकलगुणनिधिः सर्वशास्त्रार्थवेत्ता ।
सोऽयं श्रीदेवदेवोत्तमसकलसमाराधनार्थधर्म-
श्रेष्ठश्रीपालकोऽयं जगति विजयते सार्वभौमो गुरूणाम् ॥
सोऽयं श्रीकृष्णसूरिर्निखिलजनसमुत्तारणायैव हेतोः
श्रीन्यस्तात्मरक्षाभरणफलवतां श्रीप्रपन्नोत्तमानाम् ।
सापिण्ड्यं कर्म कार्यं तदितरमनुजानां तु सापिण्ड्यकल्पं
श्रीमन्नारायणाख्यो यतिरपि च तथैवेति निश्चित्य तूक्ते ॥
सन्मार्गकण्टकोद्धारसङ्ग्रहाख्यनिबन्धनम् ।
तस्य निर्णायकं चक्रे लोकानां हितकाम्यया ।

* * * *

मन्सालवङ्ग्रामस्थवास्यवेदान्तसूरिणा ।
पूर्वं तु यदुपन्यस्तं तदेव कथयाम्यहम् ॥

End:

प्रतीचीनः—

सपिण्डीकरणं कुर्यात्पूर्वं दर्शेऽग्निमान् सुतः ।
परतो दशरात्रस्य पूर्णेऽब्दे तु तथापरः ॥
नासपिण्ड्यग्निमान् विप्रः पितृयज्ञं समाचरेत् ।
पापी स्यादसपिण्डी तु पितृहा चोपजायते ॥

इति जाबालिना निमित्तसंयोगमन्तरेण प्रत्यवायस्मरणेन सापिण्ड्यस्य नित्यत्वादपि प्रपन्नानां तथानुष्ठानमावश्यकम् ।

* * * *

अथ वा द्वितीयार्थवादस्य विधिद्वयशेषत्वमेव योग्यतावशात् अतस्सपिण्डीकरणस्य नित्यत्वमावश्यकम् ॥

---

No. **12549.** प्रबोधचन्द्रोदयम्.

PRABODHACANDRODAYAM.

Pages, 96. Lines, 16 on a page.

Begins on fol. 1a of the MS. described under No. 12500.

Complete in six acts.

Same work as that described under R. No. 1108 of the Triennial Catalogue, Vol. II, Part I-A, wherein see for the beginning. By Kṛṣṇamiśra.

**End:**

तथाप्येतदस्तु (भरतवाक्यम्)—

पर्जन्योऽस्मिन् जगति महती वृष्टिमिष्टां विधत्तां
राजानः क्ष्मां विविधगलितोपप्लवं पालयन्ताम् ।
सत्त्वोन्मेषोपहततमसस्त्वत्प्रसादान्महान्तः
संसाराब्धिं विषममतुलातङ्कपङ्कं तरन्ताम् ॥
तथास्त्विति निष्क्रान्तास्सर्वे ॥

षष्ठोऽङ्कः ॥

**Colophon:**

प्रबोधचन्द्रोदयाभिधानं नाटकं सम्पूर्णम् ॥

---

## No. 12550. प्रबोधचन्द्रोदयम्.
## PRABŌDHACANDRŌDAYAM.

Substance, palm-leaf (Śrītāla). Size, 7¾ × 1¼ inches. Pages, 160. Lines, 10 on a page. Character, Malayāḷam. Condition, good. Appearance, old.

Complete.

Same work as the above.

---

## No. 12551. प्रबोधचन्द्रोदयम्.
## PRABŌDHACANDRŌDAYAM.

Substance, palm-leaf. Size, 10½ × 1 inches. Pages, 145. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

---

## No. 12552. प्रबोधचन्द्रोदयम्.
## PRABŌDHACANDRŌDAYAM.

Substance, palm-leaf. Size, 14½ × 1½ inches. Pages, 66. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the sixth act.

Same work as the above.

---

## No. 12553. प्रबोधचन्द्रोदयम्.
## PRABŌDHACANDRŌDAYAM.

Substance, palm-leaf. Size, 15⅜ × 1¾ inches. Pages, 80. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Breaks off in the fifth act.

Same work as the above.

## No 12554. प्रबोधचन्द्रोदयम्.

### PRABŌDHACANDRŌDAYAM.

Substance, Śritāla. Size, 19¾ × 2¼ inches. Pages, 44. Lines, 13 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 33*a*. The other work herein is Prabōdhacandrōdaya-vyākhya : Prandhaprakāśa 1*a*.

Complete.

Same work as the above.

---

## No. 12555. प्रबोधचन्द्रोदयम्.

### PRABŌDHACANDRŌDAYAM.

Pages, 60. Lines, 9 on a page.

Begins on fol. 6*a* of the MS. described under No. 5025.

Complete.

Same work as the above.

---

## No. 12556. प्रबोधचन्द्रोदयम्.

### PRABŌDHACANDRŌDAYAM.

Pages, 52. Lines, 8 on a page. Character, Grantha.

Begins on fol. 98*a* of the MS. described under No. 1709.

Breaks off in the sixth act.

Same work as the above.

---

## No. 12557. प्रबोधचन्द्रोदयम्.

### PRABŌDHACANDRŌDAYAM.

Substance, palm-leaf. Size, 18⅜ × 1¼ inches. Pages, 76. Lines, 4 on a page. Character, Telugu. Condition, fair. Appearance, old.

Breaks off in the fourth act.

Same work as the above.

---

## No. 12558. प्रबोधचन्द्रोदयम्.

### PRABŌDHACANDRŌDAYAM.

Substance, palm-leaf. Size, 16⅝ × 1⅜ inches. Pages, 44. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 85*a*. The other work herein is Saṅkalpasūryōdaya 1*a*.

Complete.

Same work as the above.

Date of copying—12th day of the bright fortnight of the Vaiśākha month in the year Pārthiva.

## No. 12559. प्रबोधचन्द्रोदयम्.
## PRABŌDHACANDRŌDAYAM.

Substance, palm-leaf. Size, 18 × 1⅞ inches. Pages, 42. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Rahasyatrayasāravyākhyā 22*a*.

Complete.

Same work as the above.

---

## No. 12560. प्रबोधचन्द्रोदयव्याख्या—प्रौढप्रकाशः.
## PRABŌDHACANDRŌDAYAVYĀKHYĀ: PRAUḌHAPRAKĀŚAḤ.

Pages, 64. Lines, 13 on a page.

Begins on fol. 1*a* of the MS. described under No. 12554.

Complete.

A commentary on the Prabōdhacandrōdaya, which is described under R. No. 1108 of the Triennial Catalogue, Vol. II, Part I-A, of Kṛṣṇamiśra: by Subrahmaṇyasudhī, son of Vēṅkaṭēśa and Vēṅkaṭāmbā of Pondūri family.

**Beginning**:

सिन्दूरदि(द्र)वश्रृङ्गारिसुन्दराद्विरदाननः ।
सुमनोवृन्दमन्दारः स देवः सुलभोऽस्तु नः ॥

* * * *

सौजन्यं सुमनोऽभिनन्द्यममृतं सत्यं तु वेलातटं
स्वाचारः सहजो महामधुरिमा धर्मः सुराणां द्रुमः ।
यत्राद्यः कुलदेवतापदमितः श्रीवेङ्कटेशो हरिः
सोऽयं सर्वमनोरमो विजयते पोन्दूरिवंशार्णवः ॥
सुधांशुस्तत्र सम्भूतः सुब्रह्मण्यसुधीरिति ।
अजस्रपरिपूर्णाभिः कलाभिरुपशोभते ॥
कुलशीलविवेकादिप्रशस्तगुणजन्मभूः ।
वेङ्कटाम्बा महाभागा जननी यस्य पावनी ॥
वेङ्कटेशाह्वयो यस्य पिता सज्जनपूजितः ।
पवित्रकीर्तिरत्यन्तमहनीयगुणोज्ज्वलः ॥

तर्कादिप्रौढतन्त्रप्रविततगहनप्रक्रियादुर्गमार्ग-
स्फारस्वैरप्रचारप्रबलमृगपतिर्भूरिसद्ग्रन्थकन्था ।
काव्यालङ्कारजालप्रचुरपरिचयो यः सुधासिन्धुपूर-
प्रेङ्खत्कल्लोलजालप्रतिभटकविताामाधुरी साधुरीतिः ॥
सोऽयं तमस्संवृतसत्यवस्तुसाक्षात्त्वसन्दायिनमातनोतु ।
प्रबोधचन्द्रोदयमूलमेतं प्रौढप्रकाशं प्रचुरप्रचारम् ॥
यद्यप्येतन्मूलं प्राचीनैर्वा कृतं तदप्यस्मिन् ।
गूढा बहवो भावा नैवानुभवन्त्यभिव्यक्तिम् ॥

ननु कः पुनः प्रबोधचन्द्रोदयेनार्थः, भाष्यगा(भा)मत्यादिभिर्बहुभिर्ग्रन्थैः गतार्थत्वात् । नच सङ्ग्रहार्थत्वेन सार्थकत्वमिति वाच्यम्; सङ्ग्रहग्रन्थानां च भूयसामुपलम्भात् इति चेदुच्यते—

नाटके तावत् प्रतिपाद्यमानः सर्वोऽप्यर्थः अभिनयप्रधानः । तथा च वेदान्तार्थस्य प्रबोधचन्द्रोदये यावान् प्राकट्यातिशयो न तावान् परोक्षोपदेशपर्यवसायिषु भाष्यादिग्रन्थेषु । ब्रह्मज्ञानसाधनानि वस्तुविचारादीनि निदिध्यासनान्तानि बहूनि प्रत्येकं चिरकालानुष्ठेयानि शास्त्रेणोपलभ्यन्ते ।

* * * *

अथ तत्रभवान् समस्तवेदान्तार्थसङ्ग्राहकं प्रबोधचन्द्रोदयं नाम नाटकं जगदुपकारार्थमारिप्सुस्तदादौ नाट्यस्य निर्विघ्नपरिसमाप्तये कुशीलवैः सूत्रधारेण वा कर्तव्यस्य पूर्वरङ्गस्य मुख्याङ्गभूतां नान्दीमारचयति—मध्याह्नेति ।

* * * *

श्रीकृष्णेनेवेति श्लेषमहिम्ना पूर्वमयमेव कृष्णरूपेण स्थित इति गम्यते । तथा च नरसिंहाद्यवतारकारिनारायणांशसम्भूतो महात्मा गोपालमन्त्रिवर्यः श्रीकृष्णमिश्रकृतौ प्रबोधचन्द्रोदये तत्प्रयोक्तरि भरतविशेषे च कुतूहलमाधत्तेति कविकाव्यनटादीनां प्राशस्त्यप्रतीतेः ।

* * * *

**Colophon:**

इति श्रीवेङ्कटाम्बागर्भसम्भूतश्रीसुब्रह्मण्यसुधीवरविरचिते प्रबोधचन्द्रोदयव्याख्याने प्रौढप्रकाशे प्रस्तावनाविवरणम् ।

**End:**

पूर्णमित्यादिश्लोकद्वये शुभशंसनरूपा प्रशस्तिरिति ॥

**Colophon:**

इति श्रीवेङ्कटाम्बागर्भसम्भूतश्रीसुब्रह्मण्यसुधीवरविरचिते प्रबोधचन्द्रोदयव्याख्याने प्रौढप्रकाशे षष्ठाङ्कविवरणं सम्पूर्णम् ॥

---

No. **12561.** प्रबोधचन्द्रोदयव्याख्या—प्रौढप्रकाशः.
PRABŌDHACANDRŌDAYAVYĀKHYĀ: PRAUḌHA-PRAKĀŚAḤ.

Substance, paper. Size, 11 × 8⅝ inches. Pages, 204. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

Same work as the above.

---

No. **12562.** प्रसन्नराघवम्.
PRASANNARĀGHAVAM.

Pages, 133. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 12526.

Complete.

A well-known drama in seven acts by Jayadēva, son of Mahādēva of Kauṇḍinyagōtra. He mentions Cōrakavi, Mayūra, Bhāsa, Kālidāsa, Harṣa and Bhāṇa.

**Beginning:**

चत्वारः प्रथयन्तु विद्रुमलतारक्ताङ्गुलिश्रेणयः
श्रेयः शोणसरोजकोरकरुचस्ते शार्ङ्गिणः पाणयः ।
फालेष्वब्जभुवो लिखन्ति युगपद्ये पुण्यवर्णावलीः
कस्तूरीमकरीः पयोधरयुगे गण्डद्वये च श्रियः ॥

* * * *

प्रत्यङ्कमङ्कुरितसर्वरसावतारं नव्योल्लसत्कुसुमराजिविराजबन्धम् ।
घर्मेतरांशुमिव वक्रतयाभिरम्यं नाट्यप्रबन्धमतिमञ्जुलसंविधानम् ॥

सूत्र—पारिषद ! अपि जानासि किंनामासौ नाट्यप्रबन्ध इति ? [विमृश्य, विहस्य च] अये कथमहं निजशिरश्शेखरश्यालुमपि नीलोत्पलं रत्नाकरचपलवीचिमालापरिसरे विचारयामि ? यदस्य नामधेयमन्यतो निरूपयामि, नन्विदमिहैव श्लोके सप्ताक्षराष्टमपङ्क्तिक्रमविधानेन लिखिते स्फुटमास्ति प्रसन्नराघवनाटकं नामेति ।

नटः—[श्लोकं पठित्वा विमृश्य सहर्षविस्मयम्] अहो! देव्याः कवि-कुमुदविकासचन्द्रिकायाः सरस्वत्याः प्रसादमहिमा! यदनुभावादेवंविधाः परिणताः कवीनां चित्रमधुरस्फुटाः सूक्तयः समुल्लसन्ति ।

सू—एवमेवैतत्

* * * *

नटः—कः पुनरनेन प्रबन्धेन कविताकामिनीविला(स)कर्पूरहरलीलामनुभवति?

सू—[सप्रणयकोपम्] अय !

विलासो यद्वाचामसमरसनिष्यन्दमधुरः
कुरङ्गाक्षीबिम्बाधरमधुरभावं गमयति ।
कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो-
रयासीदातिथ्यं न किमिह महादेवतनयः ॥

अपि च,

लक्ष्मणस्येव यस्यास्य सुमित्रागर्भजन्मनः ।
रामचन्द्रपदाम्भोजे भ्रमद्भृङ्गायते मनः ॥

* * * *

नटः—नूनमस्य कवेः किमपि प्रमोदामोदमेदुरमन्तःकरणम्; यदेवंविधास्सुधाशीतलास्सूक्तयस्समुल्लसन्ति ।

सूत्र—

यस्याश्चोराश्चकुरानकरः कर्णपूरो मयूरो
भासो हासः कविकुलगुरुः कालिदासो विलासः ।
हर्षो हर्षो हृदयवसतिः पञ्चबाणश्च बाणः
केषां नैषा कथय कविताकामिनी कौतुकाय ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

आबाल्याद्वदनाम्बुजे तनुभृतां सारस्वतं जृम्भतां
देवे कौस्तुभधाम्नि चन्द्रमुकुटाद्वैता मतिः खेलतु ।
वाग्देव्या सह मुक्तवैशसरसा देवी च दीव्यादियं
शेषस्येव फणाबलेषु सततं लक्ष्मीः सतां सद्मसु

**End:**

रामः—तदागच्छत, पुष्पकादवतीर्य गुरुबन्धुपौरजनमानन्दयामः । [इति पुष्पकावतरणमभिनयति]

इति निष्क्रान्तास्सर्वे ॥

इति सप्तमोऽङ्कः ॥

**Colophon:**

इति प्रसन्नराघवनाटकं समाप्तम् ॥

---

### No. **12563.** प्रसन्नराघवम्.
### PRASANNARĀGHAVAM.

Pages, 36. Lines, 15 on a page.

Begins on fol. 112*b* of the MS. described under No. 1782.

Breaks off in the second act.

Same work as the above.

---

### No. **12564.** प्रसन्नराघवम्.
### PRASANNARĀGHAVAM.

Pages, 169. Lines, 16 on a page.

Begins on fol. 200*b* of the MS. described under No. 12080.

Breaks off in the sixth act.

Same work as the above.

---

### No. **12565.** प्रसन्नराघवम्.
### PRASANNARĀGHAVAM.

Substance, palm-leaf. Size, 18¼ × 1⅝ inches. Pages, 74. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the fourth act.

Same work as the above.

---

### No. **12566.** प्रसन्नराघवम्.
### PRASANNARĀGHAVAM.

Substance, palm-leaf. Size, 12¼ × 1¼ inches. Pages, 118. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 7*a*. The other work herein is Prahēlikā 1*a*.

Breaks off in the third act.

Same work as the above.

## No. 12567. प्रसन्नराघवम्.
## PRASANNARĀGHAVAM.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 118. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1a. The other work herein is Āmuktamālyadāvyākhyā (Telugu) 60a.

Complete.

Same work as the above.

---

## No. 12568. प्रसन्नराघवम्.
## PRASANNARĀGHAVAM.

Substance, palm-leaf. Size, 15⅞ × 1 inches. Pages, 154. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

Same work as the above.

---

## No. 12569. बालरामायणम्.
## BĀLARĀMĀYAṆAM.

Pages, 29. Lines, 8 on a page.

Begins on fol. 78a of the MS. described under No. 4982.

Breaks off in the second act.

A drama describing the story of Rāma commencing with Viśvāmitra's sacrifice and ending with the coronation of Rāma. The author is Rājaśēkhara, son of Durduka and Śīlāvatī and preceptor of King Mahēndrapāla. The author was the fourth in descent from Akālajalada and says that in his previous births he was born successively as Vālmīki, Bhartṛmēṇṭa and Bhavabhūti. The work is divided into ten acts, the names of which are given below :—

| | |
|---|---|
| १ पौलस्त्यप्रतिज्ञा. | ६. निर्दोषदशरथः. |
| २. परशुरामरावणीयम्. | ७. असमपराक्रमः. |
| ३. विलक्षलङ्केश्वरः. | ८. वीरविलासः. |
| ४. भार्गवभङ्गः. | ९. रावणवधः. |
| ५. उन्मत्तदशाननः. | १०. राघवाभ्युदयः. |

**Beginning :**

प्रसत्तेर्यः पात्रं तिलकयति यं सूक्तिरचना
य आद्यः स्वादूनां श्रुतिचुलुकलेह्येन मधुना ।
यदात्मानो विद्याः परिणमति यश्चार्व(र्थ)वपुषा
स गुम्भो वाणीनां कविवृषनिषेव्यो विजयते ॥

(नान्द्यन्ते)

सूत्रधारः—(ससम्भ्रमं परिक्रम्य पुरोऽवलोक्य च सप्रश्रयमञ्जलिं बद्ध्वा) भो भो भुजस्तम्भालानितलक्ष्मीकरेणुना रघुकुलतिलकेन श्रीमहेन्द्रपालदेवेनाधिष्ठिताः सर्वो वो गुणनिधिर्विज्ञापयति ।

* * * *

निर्भरगुरुर्य्यंघत्त च वाल्मीकि[ः]कथां किमनुसृत्य ।

भाषाविचित्रमेकालापकं च (पुरोऽवलोक्य) अये सूचनाक्रमोऽपि तातनातातं व्यालरामाजनं विचिन्त्य बालरामायणम् । विमृश्य नाट्ये बालरामायणमभिनेतव्यमित्यभिहितं भवति ।

* * * *

स मूर्तो यत्रासीद्गुणगण इवाकालजलद-
स्सुराका(न)न्दस्सोऽपि श्रवणपुटपेयेन वचसा ।
न चान्ये गण्यन्ते तरलकविराजप्रभृतयो
महाभागस्तस्मिन्नयमजनि यायावरकुले ॥

तदामुष्यायणो महाराष्ट्रचूडामणेरकालजलदस्य चतुर्थो दौहित्र(दौर्दुकि)-श्शीलवतीसूनुरुपाध्यायः श्रीराजशेखर इत्यपर्याप्तं बहुमानेन । (स्मृतिं नाटयित्वा) अहो ! किमपि कमनीया कवेराशीः ।

आद्यः कन्दो वेदविद्यालतानां जिह्वाचक्षुर्निर्निमेषं कवीनाम् ।
यो येनार्थी तस्य तत् प्रक्षरन्ति(न्ती) पत(वा)ङ्मूर्तिर्मे देवता सन्निधत्ताम् ॥

इदं च सूक्तमुक्तवान्—

जिह्वे देवि सरस्वती भगवतीमग्रे समग्रां कुरु
त्वां बद्धाञ्जलि राजशेखरकविः सोऽयं स्वयं याचते ।
स्तुत्येऽस्मिन्मनुवंशमौक्ति(क)मणौ रामे विरामे द्विषां
कुण्ठा मे प्रतिभेव दैवतवशाद्वाचां प्रवृत्तौ यदि ॥

पारि—ता कण किं अप्पणा ण वण्णीअदि ।

सूत्र—नन्विदमवं तावद्दैवज्ञकृतवर्णनमेकं तस्य ।

बभूव वल्मीकभवः कविः पुरा ततः प्रपेदे भुवि भर्तृमेण्ठताम् ।
स्थितः पुनर्यो भवभूतिरेखया स वर्तते सम्प्रति राजशेखरः ॥

अपि च किं श्रुतं सभ्यस्य शङ्करवर्मणो वर्णनम्—

पातुं श्रोत्ररसायनं रचयितुं वाचस्तु(स्स)तां सम्मता
व्युत्पत्तिं परमामवाप्तुमवधिं लब्धुं रसस्रोतसाम् ।
भोक्तुं स्वादुफलं च जिह्वि(जीवि)ततरोर्यद्यस्ति ते कौतुकं
तद्भ्रात(:) श्रु(शृ)णु राजशेखरकवेः सूक्तीः सुधास्यन्दिनीः ॥

अपि च,

आपन्नार्तिहरः पराक्रमधनः सौजन्यवारां निधि-
स्त्यागी सत्यसुधाप्रवाहशशभृत्कान्तः कवीनां गुरुः ।
वर्ण्यं वा गुणरत्नरोहणगिरेः किं तस्य साक्षादसौ
देवो यस्य महेन्द्रपालनृपतिश्शिष्यो रघुग्रामणीः ॥

* * * *

**Colophon:**

इति बालरामायणे पौलस्त्यप्रतिज्ञा नाम प्रथमोऽङ्कः ॥

See under the next number for the end.

---

No. **12570.** बालरामायणम्.

BĀLARĀMĀYAṆAM.

Substance, palm-leaf (Śrītāla). Size, 12⅝ × 2 inches. Pages, 205. Lines, 9 on a page. Character Malayāḷam. Condition, injured. Appearance, old.

Complete in ten acts. The first leaf is lost.

See under the previous number for the Beginning.

Same work as the above.

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

सम्यक्संसारविद्याविपदमुपनिषद्भूतमर्थाद्भुतानां
ग्रथ्नन्तु ग्रन्थिबन्ध्यं(बन्धं) वचनमनुपतत्सूक्तिमुद्राः कवीन्द्राः ।
सन्तः सन्तर्पितान्तःकरणमनुगुणं ब्रह्मणः काव्यमूर्ते-
स्तत्त्वं सात्त्विकैश्च प्रथमपिशुनितं भावयन्तोऽर्चयन्तु ॥

इति परिक्रम्य निष्क्रान्तास्सर्वे ।

**Colophon:**

राघवाभ्युदयो नाम दशमोऽङ्कः ॥

The scribe writes—

चित्रं यस्मिन्दशरथसुतप्रक्रमोक्तिच्छलेन
त्रैलोक्यान्तर्गतजनकथां षड्प्रबन्धो बबन्ध ।
दीर्घैरङ्कैरपि समुचितं बालरामायणं त-
द्दत्तं दोषैर्दशभिरलिलह्यासरैर्विष्णुशर्मा ॥
बालरामायणमिदं वीराद्भुतरसोद्धृतम् ।
राय . . रेण लिखितं राजशेखरनिर्मितम् ॥

---

## No. 12571. भगवदज्जुकम्.
## BHAGAVADAJJUKAM.

Pages, 59. Lines, 8 on a page.

Begins on fol. 93*a* of the MS. described under No 12540.

Complete.

A farce, belonging to the class of drama technically known as Prahasana, representing the ludicrous, and relating to the love of a courtezan. The name of the author is not known

**Beginning:**

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

त्वां पातु लक्ष्मणाढ्यः सुरवरमकुटेन्द्रचारुमणिवृष्टः ।
रावणनमिताङ्गुष्ठो रुद्रस्य सदर्चितः पादः ॥

* * * *

इदमस्मदीयं गृहम् । यावत्प्रविशामि ।

* * * *

तस्मात्प्रहसनमेव प्रयोक्ष्यामि ।

सूत्र—बाढम् ।

ज्ञानार्थं कृतबुद्धिस्त्वं सन्मार्गेणानुगच्छ गच्छन्तम् ।

(नेपथ्ये) शाण्डिल्य,

सूत्र—

योगीश्वरं द्विजवृष शिष्य इव मां परिव्राजः ।

(निष्क्रान्तौ) प्रस्तावना ।

(ततः प्रविशति परिव्राजः)

परिव्राजः—शाण्डिल्य, न तावदृश्यते सदृशमस्य तपोव्रतस्य । कुतः,

देहो भोग . . . वशगतो लीनान्तकाधिष्ठितो
यो नित्यप्रतिघातरुद्धविषयस्तीरे यथा पादपः ।
तं लब्ध्वा सुकृतैरनेकगुणितैर्देहात्मना विस्मितो
मत्तो यो बलरूपयौवनगुणैर्दोषान्न तान् पश्यति ॥

**End:**

चे—एसा अज्जुआ सद्दावे मन्तेदि ।
माता—जादे, वसन्तसेणे,
राम—प्रिये वसन्तसेने इतः ।
(निष्कान्ता गणिका, रामिलकः, चेटी च)
शा—भअवं किं एदं ।
परि—महती खलु कथा । आवासे कथयिष्यामि ।
अस्तं गतो हि दिनकृद्गगनान्तलम्बी मूषामुखस्थ इव तप्तसुवर्णराशिः ।
यस्य प्रभाभिरनुरञ्जितमेघबृन्दमालक्ष्यते दहनगर्भमिवान्तरिक्षम् ॥

**Colophon:**

श्रीभगवदज्जुकं समाप्तम् ॥

---

## No. 12572. भगवदज्जुकम्.

## BHAGAVADAJJUKAM.

Substance, palm-leaf (Śrītāla). Size, 7¼ × 1¼ inches. Pages, 50. Lines, 6 on a page. Character, Malayāḷam. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Sāmudrikalakṣaṇa 26*a*.

This is the original MS. from which the MS. described under the previous number has been restored.

Complete.

Same work as the above.

---

## No. 12573. भगवदज्जुकम्.

## BHAGAVADAJJUKAM.

Substance, palm-leaf (Śrītāla). Size, 6⅞ × 1⅞ inches. Pages, 80. Lines, 18 on a page. Character, Malayāḷam. Condition, much injured. Appearance, old.

Begins on fol. 51*a*. The other work herein is Subhadrādhanañjaya 1*a*.

Incomplete and fragmentary.

**Same work as the above.**

## No. 12574. भैमीपरिणयम्.
## BHAIMĪPARIṆAYAM.

Substance, palm-leaf. Size, 13¾ × 1½ inches. Pages, 134. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old. Complete in six acts.

A drama by Cakravarti Śaṭhakōpācārya, son of Śrīnivāsaguru of Śrīvatsagōtra. It represents the story of the marriage of Damayantī with Nala. It was intended to be staged on the occasion of the festival of Padmasahāya celebrated in the month of Caitra.

**Beginning:**

संभूता जगदद्भुताय सुमुखी दुग्धाम्बुधेर्मन्थने
सुत्रामादिसुरव्रजेषु परितः स . . . . . . . ।
. . न्महनीयकौस्तुभलसद्वक्षस्स्थलं शार्ङ्गिणं
या वव्रे रमणं स्वयंवरमहे सा भार्गवी पातु (वः) ॥

सू—अलमतिविस्तरेण ।

अद्य खलु निखिलसुरासुरमकुटतटघटितमणिकिरणनिकरनीराजितर . . . . . विनोदिनो भगवतः पद्मासहायस्य चैत्रोत्सवयात्रायां नानादेशदिगन्तागताननु . . . . गुणवयोविभवलक्षणविचक्षणान् सर्वतन्त्रस्वतन्त्रान् आर्यमिश्रानिमान्विज्ञापयामि । . . . . . लासंप्रदायविदः सभासदः । अहं खलु नाट्यवेदोपाध्यायस्य विद्याविशारदनामधेयस्य ।

मुनिना भरतेन या प्रणीता मृदुनाट्यागमसंप्रदायशैली ।
बहुशः परिशील्य तां समग्रां . . . . . . . . . मस्मि ॥

तदस्मिन्नुत्सवसमये . . . रूपकमभिनीय परिषदाराधनाय प्रयतिष्ये । कालिदासप्रबन्धे भवतां परितोषः । किं ब्रूथ । सम्यक् परिशीलिताः प्राचां प्रबन्धाः ।

पुण्यश्लोकचरित्रपावनतमं मिश्रं कथाकल्पनैः
शृङ्गारप्रचुरं तथेतररसै . . . . . . . . . ।
. . . महनीयमार्वरुचिरं नव्यं समारब्धकं
तादृग्रूपकमद्भुतं वयममी द्रष्टुं समुत्कण्ठिताः ॥

(नेपथ्याभिमुखमवलोक्य ।) आर्ये इतस्तावत् ।

(प्रविश्य) नटी । अय्य इअं ह्मि । आणत्तव्वं आण . . . . . . केति परिषदाज्ञा । श्लोकं पठित्वा)

* * * *

तदिदं नाटकं (श्रीवत्सवंश) कलशाम्बुधिपूर्णचन्द्रस्य चक्रवर्तिपदलाञ्छनस्य श्रीनिवासगुरोस्तनूजेन शठकोपनाम्ना कविना प्रणीतम् ॥

* * * *

त्वं राज्ञो नलस्य देव्याः कमलपालिकायाश्चेटीवेषधारिणी भव ।

**End :**

तथापीदमस्तु (भरतवाक्यम्)—

देवः श्रीमानवतु (जगतीं) देवकीपुण्यराशिः
पृथ्वीदेवाः सुकृतमहिते सत्पथे संचरन्तु ।
काले वर्षैः फलतु धरणिः सस्यज(जातैः सु)पूर्णा
भूयस्तोषं दधतु सुधियो नित्यमस्मिन्प्रबन्धे ॥

(इति निष्क्रान्ताः सर्वे) ॥

**Colophon :**

षष्ठोऽङ्कः । भैमीपरिणयं नाम नाटकं संपूर्णम् ॥

---

## No. 12575. भैमीपरिणयम्.
## BHAIMĪPARIṆAYAM.

Substance, paper. Size, 8¼ × 6¼ inches. Pages, 143. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Restored from the MS. described under the previous number.

Complete.

Same work as the above.

---

## No. 12576. मदनगोपालविलासः.
## MADANAGŌPĀLAVILĀSAḤ.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 31. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

A Bhāṇa by Gururāmakavi, son of Svayambhūnāthadēśika of Kāśyapagōtra and the daughter's son of Rājanātha. The plot of the drama is based on the love scenes of Rādhā and Kṛṣṇa. It was intended to be staged on the occasion of the annual festival in the month of Bhādrapada of God Vēṅkaṭēśa worshipped at Tirupati. The author has written another drama by name Subhadrādhanañjaya—vide No. 12723.

**Beginning :**

लक्ष्मीकुचाङ्कालङ्कारकारिणो दैत्यदारिणः ।
नृहरेः पान्तु शृङ्गारवीरोद्गारिशिखा नखाः ॥

अपि च—

स्निग्धच्छाय तमाल तापशमन स्वस्त्यस्तु ते संभवो
भूयः स्यादिति धात्रिकानुगतयाप्यामन्त्रितो राधया ।
अव्यादञ्जलिमञ्जरीमुपहरन् कुञ्जान्तरे माधव-
स्तद्व्याजात्कमले निमीलति पुनः सङ्केतमस्यै दिशन् ॥

(नान्द्यन्ते) सूत्रधारः—

(प्राचीमवलोक्य) अयमिदानीमरविन्दिनीनां प्रहसननाटकप्रस्तावनोचितं विस्तार्य सन्ध्यारागरक्तांशुकयवनिकामवतरति दिवस्पतिरचरमगिरिशृङ्गरङ्ग-महीम् ।

* * * *

वेङ्कटगिरितुङ्गशृङ्गसौधाधिरूढस्य भगवतो गरुडध्वजस्य भाद्रपदयात्रा-समागतैर्भागवतैः । यथा—दुरधिगमानेकपात्रसन्धानेभ्यः प्रबन्धेभ्यो बलवदु-द्विजामहे ।

अद्वैतपात्रमग्राम्यं हास्यं हरिकथाङ्कितम् ।
तद्दिदृक्षामहे दृश्यं नातिसंक्षेपविस्तरम् ॥

* * * *

विदित एव खलु पवित्रीकृतकाश्यपगोत्रस्य तत्रभवतः स्वयम्भुनाथ-देशिकस्य सुकृतपरिणामः सुगृहीतनामा रामकविः ।

सङ्ख्या(ङ्ख्या)वानयमेतदाशुकवितास्रोतांसि संख्याति यः
कश्चैतत्कृतिरत्नतत्त्वमखिलं यो वेत्ति विद्वानसौ ।
इत्थं यस्य जगर्ज दुर्जयसुधीपादार्जितं नूपुरं
प्रस्थानेषु स राजनाथकविराडेतस्य मातामहः ॥

तस्य कृतिमस्माभिरभिनीयमानं मदनगोपालविलासं नाम भाणं संभावयत सकृदवधानदानेन ।

(आकाशे कर्णं दत्वा) किं ब्रूथ ! एतत् खलु फाणितास्वादनाय वेतनसम-र्पणम् ।

मायाभीरयशःपूरकर्पूरप्रतिसंस्कृताम् ।
न कस्तूरीकरोत्युक्तिं कस्तूरीमिव नूतनाम् ॥

इयं किल चतुरता यदेष विश्वम्भरविलासावष्टम्भेन धूर्तचरितानुपातिनीमपि वाक्प्रवृत्तिमुच्चारयति इति । ख्यापितं च सुभद्राधनञ्जयनाम्नि नाटके तस्य कवेः सङ्कल्पितम्—

**End:**

> क्षोणे सत्यपि भूयसि प्रणयिनी स्नेहादियं लालिता
> विस्रम्भेण च तेन तेन गमिता राधेति संभावनाम् ।
> अन्यत्किं भवतः परिग्रहवशात् सानुग्रहं कैतवं
> शृङ्गारः सुकृती स्मरो बहुमतश्लाघ्या विलासश्रियः ॥

इति किं ते भूयः प्रियमुपहरामि ।

किमतः परं प्रियमस्ति । तथापीदमस्तु (भरतवाक्यम्)—

> अस्तुदारगुणकीर्तनोत्सवैः योगिनोऽपि तव भोगिनोऽपि वा ।
> विश्वभावन जनस्य पावनं शश्वदस्तु वचसां निगुम्भनम् ॥

**Colophon:**

इति गुरुरामकृतौ मदनगोपालविलासो नाम भाणः समाप्तः ॥

> नटनारभटीचटुलस्मरजिन्मकुटीतटिनीसमवाप्विहृतेः ।
> गुरुरामकवेः पुरतो विनुतौ गुरुरामकविः कविरामगुरुः ॥
> प्रतीतभाग्येऽत्र गुरुस्त्वयंभुवि प्रसूतिमासाद्य गुरुस्त्वयं भुवि ।
> गुणाभिरामो गुरुरामनामभाक् प्रसन्नकाव्यमणवींदमद्भुतम् ॥

---

## No. 12577. मदनमहोत्सवभाणः.
## MADANAMAHŌTSAVABHĀṆAḤ.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 61. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

A Bhāṇa satirizing certain scandals in the society known to the author: by Śrīkaṇṭha alias Nañjuṇḍa, son of Sāmayārya of Ātrēyagōtra and pupil of Paramēśvarādhvarin, Rāmasvāmimakhin, Saṅgamēśavidvat and Cidambarakavi. The drama was intended to be staged on the occasion of the marriage festival of God Viśvēśvara at Bālavyāghrapuri (Śirupuliyūr?) of which place the author seems to be a native.

**Beginning:**

> कल्याणवसनोऽनन्तकल्याणगुणसागरः ।
> कल्याणवेङ्कटाधीशः कल्याणानि करोतु नः ॥
> एकां वक्षसि लालयन् प्रियतमामन्यां स्वपार्श्वस्थिता-
> मामोदोत्पुलकां ह्रिया नतमुखीमालिङ्ग्य मन्दं हसन् ।

आलोकैरनुषज्यमानकरुणैराह्लादयन् वै परा-
मास्ते यः सततानुभूतविभवो देवो मुदे वोऽस्तु सः ॥
स जयति सकलसुरासुरमणिमकुटाराध्यशासनो वीरः ।
यस्येषुपातभीतो वामाङ्गे वहति कामिनीमीशः ॥

(नान्द्यन्ते सूत्रधारः)

सूत्रधारः—(पुरतोऽवलोक्य) अये पारिपार्श्विक किमद्यापि विलम्बसि ?

पारिपार्श्विकः—(सभयं) अयमहमागत एवास्मि ।

सूत्र—ननु भोः सकलनिगमागमप्रतिपाद्यमानमहाप्रभावस्य बालव्याघ्रपुरीकलितनिवासस्य भगवतो विश्वेश्वरस्य कल्याणमहोत्सवदिदृक्षासमागताङ्गवङ्गकलिङ्गकाश्मीरकोसलकोङ्कणलाटमराटादिविविधजनपदरसिकजनसमाजसन्दर्शजनितकुतूहलेन तदाद्यसं मदनमहोत्सवं नाम रूपकमभिनवमभिनेतुमारभमाणेन मया त्वमिदानीमेव तत्तद्भूमिकानिव(ह)णधुरीणकुशलकुशीलवकुलसंमेलनाय प्रतिबोधितोऽपि

* * * *

शृणु भोस्साधो ।

यः खलु प्रथमात्रेयगोत्रसागरचन्द्रमाः ।
श्यामयार्यतनूजातिः श्रीकण्ठपदसंज्ञितः ॥

मारि—(सानुस्मरणं) यं खलु—

आचार्यसंसेवितदेशिकाङ्घ्रिमाह्लादिताशेषजनान्तरङ्गम् ।
आलिप्तविद्वज्जनपादरेणुं नञ्जुण्डसंज्ञं कवयो वदन्ति ॥

सू(पारि)—(सश्लाघं) अथ किं, तत्तादृशविनयविधेयमानसस्य कवेः गुरुपरम्परां श्रोतुकामोऽस्मि ।

सू—(सकौतुकं) श्रूयतां तावत्—

सर्वज्ञस्समदर्शनः पृथुयशास्सङ्ख्यावतामग्रणीः
स्वाचारः करुणानिधिश्शिवपदाम्भोजातसेवारतिः ।
यद्रूपेण पुमाकृतिर्भगवती जाता त्रयी भूतले
सोऽयं श्रीपरमेश्वराध्वरिवरो यस्यादिमो देशिकः ॥

सोऽयं किल—

प्रथितकरुणासिन्धोरीशशिरश्श्लाघ्यसत्कलावन्धोः ।
रामस्वामिमखीन्दोरधिगतवाग्विभवो महान् यज्वा ॥

सोऽयं कविः सुकृतिनः किल सङ्गमेशविद्वन्मणेरधिगताखिलनाटिकार्थः ।
श्रीमच्चिदम्बरकवेः कृपयाभिपन्नसत्साहिती(वरकला)सुहितान्तरात्मा ॥
विरचय्य भाणमेकं विदुषां प्रीत्यै स विश्रुतो ह्ययम् ।
आनाय्य मां समायामभिनय मद्भाणमित्यभाणीच्च ॥

* * * *

सू—अयि प्रेयसि ! साधु निरूपितं भवत्या । इदानीं खलु आज्ञप्तोऽस्मि सामाजिकैः श्रीकण्ठकविप्रणीतं मदनमहोत्सवं नामाभिनवं रूपकं भवताभिनेतव्यमिति

* * * *

(इति परिक्रम्य परितो विलोक्य)

सा मधुरा सा काञ्ची सापि च दृष्टा मनोरमा काशी ।
बालव्याघ्रपुरीव क्वापि न दृष्टा च न श्रुता नगरी ॥

अत्र हि—

श्रीकण्ठ एव करुणारसरञ्जितात्मा साकं निजप्रणयिना रघुनायकेन ।
आखण्डलादिसुरवृन्दनिषेविताङ्घ्रिः सोत्कण्ठमत्र नगरे कुरुते विहारम् ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

राजा जयी भवतु रञ्जयतु प्रजाश्च देशः सदास्तु निरुपाधिरुदात्तसस्यः ।
भूयान्ममापि भुवनावनजागरूकश्रीवेङ्कटाचलपतिः सततं प्रसन्नः ॥

किं च,

विलसतु सौभाग्यश्रीर्विदुषां गेहेषु वीतचापल्यम् ।
परिहरतु वेङ्कटेशः पौनःपुन्येन जन्म मे भूमौ ॥

कविवाक्यम्—

यद्यस्ति दया विदुषां भविता कवितापि नीरसा सरसा ।
यदि नास्ति कृपा तेषां सरसापि भवेद्धि नीरसैव कवेः ॥
क्वाहं मन्दमनीषः क्व नु वा सरसोक्तिसंमितो भाणः ।
वागीश्वरीविलासो वसुधायां केन वर्णितुं शक्यः ॥

---

No. 12578. मदालसानाटकम्.

MADĀLASĀNĀṬAKAM.

Pages, 130. Lines, 9 on a page.

Begins on fol. 27*b* of the MS. described under No. 12471.

Complete in seven acts.

This drama represents the story of the marriage of Madālasā, daughter of Viśvāvasu, with Kuvalayāśva who brings her over from Pātāḷakētu. The authorship is ascribed to Kumāra Narēndrasāha, but it was composed by Gōkulanātha, one of the four sons of Pītāmbara, grandson of Rāmabhadra of Phaṇandahavaidēha family. The author belongs to the Śrī-Vatsagōtra and Madhyandina Śākha.

Copying was finished on the 8th day of Śuklapakṣa in the Śrāvaṇa month of Samvat 1878 and Śaka 1743.

**Beginning:**

अनल्पं कल्पान्तव्यसनमिह मग्ना वसुमती
न कल्पन्ते कापि क्तव इति सीदन्ति विषयः ।
विचिन्त्यैवं येन त्रिजगदुपकारे व्यवसितं
स ते क्रीडाक्रोडः प्रियविरहपीडां शमयतु ॥

(नान्द्यन्ते)

सूत्रधारः— अलमलमियता पूर्वरङ्गाङ्गविस्तरेण । त्वरयन्ति माममी पारिषदाः, कुमारश्रीनरेन्द्रसाहनिबद्धं मुदितमदालसं नाम नाटकमभिनेतुम् ।

**End:**

कुव — भगवति तातनागपतिप्रसादिताया भगवत्याः प्रसादादधिगतनिखिलाभ्युदयोऽस्मि । तथापीदमस्तु—

रसभावगुणाकल्पैराकल्पं जनमनोविनोदाय ।
चित्रेतिवृत्तमस्मच्चरितं कवय(:) प्रबध्नन्तु ॥

सरस्वती— भविष्यति फणन्दहवैदेहवंशवर्धनस्य, माध्यन्दिनमूर्धन्यस्य, वात्स्यायनस्य पवित्रकीर्तिश्रीरामभद्रतपोनिधिनन्दनस्य विद्यानिधेरुपाध्यायपीताम्बरस्य चतुर्णां पुत्राणामेकतमो दर्शनव्रजपरस्य रविप्रतिषेधसिद्धान्तोपदेशगुरुर्गोकुलनाथो नाम ॥

सोऽयं द्वैपायनमुनिसूक्तामृतसागरात्समुद्धृत्य ।
तर्पयिता जनतायाश्चुलकोत्सेकैः श्रवांसि रसैः ॥

(इति निःक्रा(ष्क्रा)न्तास्सर्वे) ॥

**Colophon:**

सप्तमोऽङ्कः ॥

No. 12579. मदालसाविवरणम्.

MADĀLASĀVIVARAṆAM.

Substance, paper. Size, 10¾ × 4¾ inches. Pages, 32. Lines, 9 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, old.

Breaks off in the sixth act.

A commentary on the drama described under the last number. The commentator's name is not given.

**Beginning :**

नमस्कृत्य शि(सि)तां वाणीं भक्तजाड्यस्य खण्डिनीम् ।
मदालसाविवरणं संक्षेपात्तन्यते मया ॥
" यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति सा नान्दी कीर्त्यते बुधैः ॥ "

इति नान्दीलक्षणम् ॥

" सूत्रं नाटकबीजं स्यात्तस्य धर्ता तु यो भवेत् ।
स एव सूत्रधारो हि नाटकज्ञैर्निगद्यते ॥

पात्ररचनास्थानं नेपथ्यम् ॥

**End :**

अद्य उदयति मिहिरे वयमत्रागताः । सखि मुञ्च वाचाटत्वम् ॥

**Colophon :**

इति पञ्चमोऽङ्कः ॥

आर्यपुत्र अहमन्धकारगर्भादुद्भवन्ती भगवती भागीरथी ।

* * * *

परित्रायत रे परित्रायत । हा आर्यपुत्र त्रैलोक्यभयभञ्जनस्य तव वल्लभो जनोऽनाथो विपद्यते । अरे हताश दुष्टदानव श्रीकुवलयाश्वस्य गृहिणी न बिभेमि मरणात् । न पुनर्मर्षयामि आर्यपुत्राधिक्षेपवचनम् । स्मर २. तं दिव-

---

No. 12580. मल्लिकामारुतम्.

MALLIKĀMĀRUTAM.

Substance, palm-leaf (Śrītāla). Size, 14 × 2¼ inches. Pages, 102. Lines, 13 on a page. Character, Malayāḷam. Condition, injured. Appearance, old.

Begins on fol. 1a. The other work herein is Nārāyaṇabaliprayōga 52a (Malayāḷa language).

Breaks off in the eighth act.

A drama in ten acts (Prakaraṇa) composed by Uddaṇḍa Śāstrin. He was the son of Raṅgadēvi and Raṅganātha, a native of Lāṭapura on the banks of the Pālār in the Tuṇḍiramaṇḍala, who was himself the son of Kṛṣṇa and grandson of Gōkulanātha and great grandson of Kavitāvallabha of Vādhūlagōtra and Āpastambasūtra. He was for many years, the Court-Paṇḍit of Mānavikrama, the Sāmudiripād (Zamorin of Calicut) of Kukkuṭakrōḍa, at whose instance this drama was composed. The author is said to have been praised by Mahēśvara, son of Maharṣi (Ṛṣinambūdiri).

**Beginning:**

मङ्गल्यं व(:) क्रियासुर्मिलदटनियुगस्थास्नुगीर्वाणभोगि-
क्षैणव्यत्यस्तकल्पद्रुमनवसुमनोनागहारावलीनि ।
नालीकश्लिष्टलक्ष्मीकरचलनलिनोद्वान्तमाध्वीकधारा
तिम्यत्फालेक्षणानि त्रिपुरहरधनुर्ज्यालताकर्षणानि ॥

* * * *

वीतिहोत्रकुलध्वजस्य शैलाब्धिचक्रवर्तिनो विक्रमभूपालस्य सभाजिताः सभासदः शृण्वन्तु मम प्रश्रयवती विज्ञापनाम्—अहमस्मि सकलहरिदन्तनगर-संसदाराधनज्ञातसारप्रयोगपाटवो विष्टपत्रितयप्रख्यातं कुक्कुटक्रोडपुरमुपश्रुत्य कुतूहलादभ्यागते(तो) रङ्गचन्द्रो नाम शैलूषकिशोरः ।

* * * *

सूत्र—(स्मरणमभिनीय, सहर्षम्)हन्त ! हस्तगतं माणिक्यमापणे मृग्यते । ननु निर्दिष्टगुणविशिष्टमुद्दण्डकविनिबद्धं प्रकरणरत्नमस्मद्वश एव ।

* * * *

अस्ति दक्षिणापथे दयमानकामाक्षीकटाक्षकालाम्बुदताण्डवितकविशिखण्डि-मण्डलेषु तुण्डीरेषु क्षीरनदीतरङ्गक्षालितोपशल्यो लाटपुरो(रं) नाम महानग्रहारः । तत्र च—

तपश्चरणचुञ्चवः सकलशास्त्रमुष्टिन्धया(:)
स्वनुष्ठितमहाध्वरा(:) श्रुतिपरायणा(:) श्रोत्रियाः ।
महाभिजनशालिनो वदनवर्तिवाग्देवता
वसन्त्यतिथिसत्कृतिक्षपितवासरा भूसुराः ॥

तत्र चामुष्यायणस्यापस्तम्बशाखाध्यायिनो वाधूलकुलतरुपल्लवस्य कविता-वल्लभस्य पञ्चमोऽन्वितकीर्तिरुपाध्यायगोकुलनाथपौत्रस्य कृष्णसूनोः पुत्रो भट्टरङ्गनाथस्योद्दण्डकविरित्युदारमभिजन्म ।

*　*　*　*

स किल विधिवदुपासिततीर्थादधिगतसकलाविद्यो दिदृक्षुर्दिगन्तराण्यान्ध्रकलिङ्गकर्णाटानाटीक्य केरलानवतीर्णो मज्जन्महानदीषु पश्यन्देवतास्थानानि सेवमानः सज्जनानभिनन्दन्नन्तर्वाणीनिदमेव ताम्रचूडकोडनगरमाढौकत । आढौक्य च—

आस्थानमध्यगतमुद्धतसौविदल्लभ्रूक्षेपचोदितनमच्चतुरन्तवीरम् ।
श्रीविक्रमं चतुरवारवधूकराब्जव्याधूतचामरमलोकत लोकनाथम् ॥

अस्तौष्ट च—

प्रत्यर्थिभूमिपालप्रतापघर्मोत्थपुष्कलावर्त ।
विश्वम्भराकुटुम्बिन् विक्रम ! विश्वैकवीर ! विजयस्व ॥

*　*　*　*

देवोऽपि परिसरवर्तिकोविदवदनाकृष्टेन विघटमानकमलदलशीतलेन कटाक्षेण सम्भावयन्नीषदुन्मिषितमन्दस्मितसुन्दरवदनेन्दुः सादरमिदमादिक्षत् ।

श्रीमन्नुद्दण्डविद्वञ्शृणु वचनमिदं मामकं कामदोग्ध्री
वाणी नाणीयसी ते खलु परिषदियं जाग्रती वाग्विलासे ।
तस्मादद्धाय सम्यक् प्रकरणमतुलं मल्लिकामारुताख्यं
किञ्च व्यञ्जद्रसार्द्रं विरचय विधिना सत्कवे सत्क्रियां मे ॥" इति ॥

सूत्र—आर्ये सत्यमिदमाश्चर्यकरमेव ।

कविहृदयेष्वनसूया कस्तूरीकर्दमेषु मालिन्यम् ।
अक्षारता पयोधावनीपाले च पाण्डित्यम् ॥

कृतमेव तन्मीमांसाचक्रवर्तिना महर्षिपुत्रेण महेश्वरेण ।

"वेदे सादरबुद्धिरुद्धततरे तर्के परं कर्कशः
शास्त्रे शातमति(:) कलासु कुशलः क(ा)व्येषु भव्योदयः ।
श्लाघ्यः सत्कवितासु षट्स्वपि पटुर्भाषासु स त्वं क्षितौ
सर्वोद्दण्डकविप्रकाण्ड ! ददसे कस्मै न विस्मेरताम् ॥"

*　*　*　*

मल्लिकामारुतं नाम मनस्संवननं नवम् ।
प्रयुञ्ज्महे प्रकरणं प्रसीदन्तु समासदः ॥

**End :**

एष क्रीडान्ततान्यत्कुसुमपुरवधूवक्त्रसौरभ्यबन्धु-
र्मुग्धं निद्राजडानां रसितमनुसरन् द्रावयन् सारसानाम् ।
आवात्यङ्गानुकूलश्वकितविचकिलश्रेणिगन्धानुधाव-
ल्लोलम्बोद्घुष्यमाणस्मरजयविरुदाडम्बरो मातरिश्वा ॥
इति निष्क्रान्ताः सर्वे ॥

**Colophon :**

उद्दण्डं रङ्गनाथः सुतमलभत यं रङ्गदेवी तथाम्बा
त्रैविद्येशो महर्षिर्निरवधिमहिमा यद्गिते जागरूकः ।
तस्य श्रीविक्रमाज्ञाबहुमतिरचिते मल्लिकामारुतेऽस्मिन्
सम्पूर्ण(र्णः) सप्तमोऽपि प्रकरणतिलके निष्कलङ्कोऽयमङ्कः ॥

* * * *

अनुसर्तुमना मनाङ्मनोज्ञं किमपि श्वेतत एव शीतधामा ।
वदनं निखिलोपमाविदूरं मदनातङ्कविपाण्डु मल्लिकायाः ॥
(विहस्य) यावदेनं दुर्लभप्रार्थनादुर्ललितं किंचिद्ब्रवीमि ।

---

No. **12581.** महानाटकम् .
MAHĀNĀṬAKAM.

Pages, 171. Lines, 18 on a page.

Begins on fol. 177*a* of the MS. described under No. 1800.
Complete.

A drama said to be by Hanūmat, but arranged by Madhusūdanakavi. It appears to have been compiled by culling stanzas from the works of other authors. It relates the story of the Rāmāyaṇa.

The subjects dealt with in the ten acts are—

१. विदेहतनयालाभः.
२. वैदेहीसुरतम्.
३. वैदेहीगमनम्.
४. वालिवधः.
५. संदेशाहरणम्.
६. सागरबन्धनम्.
७. दूताङ्गदम्.
८. मायारावणम्.
९. रावणकुम्भकर्णनिधनम्.
१०. स्वर्गारोहणम्.

Compare with this work the MSS. described under R. Nos. 609(*c*) and 1504(*a*) of the Triennial Catalogue of MSS.

**Beginning :**

विघ्नेशो वः स पायाज्जलनिधिमखिलं पुष्कराग्रेण पीत्वा
यस्मिन्नुद्धृत्य हस्तं विसृजति सकलं दृश्यते व्योम्नि देवैः ।
काप्यम्भः कापि विष्णुः क च(न) कमलभूः काप्यनन्तः क शैलाः
काप्यौर्वः कापि मत्स्याः क चन मणिगणाः कापि नक्रादिचक्रम् ॥

* * * *

(नान्द्यन्ते सूत्रधारः)

सूत्र—

वाल्मीकेरुपदेशतः स्वयमहो वक्ता हनूमान् कविः
श्रीरामस्य रघूद्वहस्य चरितं सौम्या वयं नर्तकाः ।
गोष्ठी तावदियं समस्तसुमनःसङ्घेन संवेष्टिता
तद्धीराः कुरुत प्रमोदमधुना वक्तास्मि रामायणम् ॥

**End :**

एवं दोर्दण्डदर्पं दिशि दिशि परमाश्चर्यदं गापयित्वा
कृत्वा दुर्वृत्तशान्त्या त्रिभुवनमखिलं स्वस्वधर्मप्रवृत्तिम् ।
भुक्त्वा राज्यं सहस्राधिकमयुतमथो वत्सरान्पूर्णकामः
सार्धं पौरैः समस्तैरगमदतिकृती राघवः स्वीयलोकम् ॥
श्लोका निबद्धाः खलु ये वसन्ति संगण्य तेषां सकलाङ्कपालिम् ।
संपूर्य वै विंशतिमास तत्र बुध्यस्व तैः सप्तशती समुद्राम् ॥

**Colophon :**

एष श्रीलहनूमता विरचिते श्रीमन्महानाटके
मिश्रश्रीमधुसूदनेन कविना संदर्भसज्जीकृते ।
वीरश्रीयुतरामचन्द्रचरिते प्रत्युद्धृते विक्रमैः
स्वर्गारोहणनामकोऽत्र दशमो यातः स चाङ्को महान् ॥
तव यदि नाम गृहीतं रघुनाथ घुणाक्षरन्याय(।)त् ।
अपि कृतदुष्कृतराशेर्मम किं यमकिङ्कराः करिष्यन्ति ॥

समाप्तश्चायं ग्रन्थः ॥

महानाटकसंज्ञं च ग्रन्थं रामचरित्रकम् ।
स्वकीयचाहरेद्यश्च सकुलं नरकं व्रजेत् ॥

## No. 12582. महानाटकम्.
## MAHANATAKAM.

Pages, 98. Lines, 36 on a page.

Begins on fol. 3a of the MS. described under No. 27.

Breaks off in the tenth act. The first 32 passages of the tenth act are added to the ninth act herein.

Mahānāṭakasudhānidhi is written side by side with Mahānāṭaka.

Same work as the above.

---

## No. 12583. महावीरचरित्रम्.
## MAHĀVĪRACARITRAM.

Pages, 65. Lines, 24 on a page.

Begins on fol. 158a of the MS. described under No. 12527.

Contains up to the 46th stanza of the 5th act.

A drama representing the story of Rāma up to his coronation after the destruction of Rāvaṇa: by Śrīkaṇṭha well-known as Bhavabhūti, son of Jātukarṇī and Nīlakaṇṭha, and grandson of Bhaṭṭagōpāla. He belongs to Padmanagara in the Dakṣiṇāpatha and to the Kāśyapagōtra and Taittirīyaśākhā. The work was intended to be enacted on the occasion of the festival of God Kālapriyānātha. The author is said to have written till the 46th stanza of the fifth act. The remainder till the seventh act is said to have been added by Subrahmaṇyakavi.

**Beginning:**

अथ स्वस्थाय देवाय नित्याय हतपाप्मने ।
त्यक्तक्रमविभागाय चैतन्यज्योतिषे नमः ॥

(नान्द्यन्ते सूत्रधारः)

सूत्रधारः – भगवतः कालप्रियानाथस्य यात्रायामार्यमिश्रा आदिशन्ति ।

महापुरुषसंरम्भो यत्र गम्भीरभीषणः ।
प्रसन्नकर्कशा यत्र विमलार्था च भारती ॥
अप्राकृतेषु पात्रेषु यत्र वीरः स्थितो रसः ।
भेदैः सूक्ष्मैरभिव्यक्ते(क्तैः) प्रत्याधारं विभज्यते ॥

स सन्दर्भोऽभिनेतव्यः" इति । महावीरचरितं तर्हि प्रयोक्तव्यमित्यादिष्टमर्थितो भवद्भिः ।

वश्यवाचः कवेर्वाक्यं सा च रामाश्रया कथा ।
लब्धश्च वाक्यनिष्यन्दनिकर्षनिकषो जनः ॥

सोऽहमेतद्विज्ञापयामि । अस्ति दक्षिणापथे पद्मनगरं नाम नगरम् । तत्र केचित्तैत्तिरीयाः काश्यपाश्चरणगुरवः पङ्क्तिपावनाः पा(प)श्चाग्नयो दृढव्रताः सोमपीथिन उदुम्बरनामानो ब्रह्मवादिनः प्रतिवसन्ति । तदामुष्यायणस्य तत्रभवतो वाजपेययाजिनो महाकवेः पञ्चमः सुगृहीतनाम्नो भट्टगोपालस्य पौत्रः पवित्रतरकीर्तेर्नीलकण्ठस्यात्मसम्भवः श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणज्ञो भवभूतिर्नाम जातुकर्णीपुत्रः कविर्मित्रधेयमस्माकमिति भवन्तो विदाङ्कुर्वन्तु ।

श्रेष्ठः परमहंसानां महर्षीणां यथाङ्गिराः ।
यथार्थनामा भगवान्यस्य ज्ञाननिधिर्गुरुः ॥
तेनेदमुद्धृतजगत्त्रयमन्युमूलमस्तोकवीरगुरुसाहसमद्भुतं च ।
वीराद्भुतप्रियतया रघुनन्दनस्य धर्मद्रुहो दमयितुश्चरितं निबद्धम् ॥

तदिदं भवन्तः परिपुनन्तु ।

**End:**

दौरात्म्यादरिभिर्निजार्जवशुचौ मायाविभिर्वञ्चिते
धर्मात्मन्यतिथौ निरागसि जगत्पूज्ये गृहानागते ।
एतस्मिन्नुचितं न नाम विहितं वाचापि नावेदितं
पापं प्रत्युत दारुणं व्यवसितं धिग्विप्रकार्यार्थिताम ॥

**Colophon:**

इति श्रीभवभूतिविरचिते महावीरचरित्रे पञ्चमोऽङ्कः ।. महावीरचरित्रं सम्पूर्णम् ॥

---

No. **12584.** महावीरचरित्रम्.
MAHĀVĪRACARITRAM.

Substance, paper. Size, 12¾ × 4⅞ inches. Pages, 90. Lines, 8 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Contains one to five acts.

Same work as the above.

Dated : Samvat 1907, Āśvina Śukla first, Wednesday, Bharatapura.

**End:**

कर्णावर्जितदिक्कतङ्गजयुगद्वन्द्वोपमर्दाश्च ते
पुच्छाच्छोटदलत्समुद्रविवरैः पाताळझम्पाश्च ताः ।

कापेयस्य च पौरुषस्य च तथा प्रेम्णो गरिम्णश्च य-
द्दोष्णामुन्मथितद्विषां सुसदृशं तन्मा स्म वो विस्मरत् ॥

इति निष्क्रान्ताः सर्वे ॥

**Colophon:**

महावीरचरिते आरण्यकं नाम पञ्चमोऽङ्कः ॥

---

## No. 12585. महावीरचरित्रम्.
## MAHĀVĪRACARITRAM.

Pages, 78. Lines, 8 on a page.

Begins on fol. 97*a* of the MS. described under No. 12180.

Contains up to the 46th stanza of the fifth act.

Same work as the above.

The fourth quarter of the last stanza is given thus:—

शान्तं . . . . मिदं निशाचरपतेः सख्येन मे जृम्भितम् ॥

---

## No. 12586. महावीरचरित्रव्याख्या—प्रद्योतिनी.
## MAHĀVĪRACARITRAVYĀKHYĀ: PRADYOTINĪ.

Substance, palm-leaf. Size, 15¾ × 1¾ inches. Pages, 286. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete in seven acts.

A commentary on the above work: by Vīrarāghava, the same as the commentator of the Uttararāmacaritra.

**Beginning:**

वन्दे वात्सल्यभरितं वरदं वीरराघवम् ।
निर्विघ्नं येन निर्वृत्तो [सो] वि(वे)श्वामित्रो महामखः ॥

तत्रभवान् भवभूतिरेकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्त इत्यादिश्रुत्या साधुशब्दप्रयोगं धर्मं मन्वानः "काव्यं यशसेऽर्थकृते" इत्यादिना काव्यात्मकं प्रचुरश्रेयोहेतुमवगच्छन् "यदि क्षुण्णं पूर्वैः" इत्युक्तरीत्या सर्वगुणाभिरामं राममेव काव्येन च(चि)कथयिषुः श्राव्यप्रबन्धाद्दृश्यप्रबन्धस्य प्रकर्षं विभाव्य तत्राभ्यर्हितत्वान्नाटकं चिकीर्षुः उत्तरचरितं उत्तररामचरितेन कथयिष्यन् पूर्वचरितं महावीरचरिताख्येन नाटकेन निबध्नन् प्रस्तावनाङ्गस्य पूर्वरङ्गस्य प्रधानाङ्गं नान्दीं रचयति—अथेत्यादिना । अथशब्दो माङ्गलिकः ।

**End:**

अत्र शुभशंसनरूपप्रशस्तिर्नाम सन्ध्यङ्गमुक्तम् । किं चास्मिन्नाटक इत्यादे(:) स्पष्टोऽर्थः । एवं साङ्गं नाटकं वृत्तम् ॥

शुद्धगुणलब्धरूपा सत्पात्रस्नेहसम्भृतालोका ।
दीपकलिकेव सुदृशां भावप्रद्योतनी रुचिं दिशतु ॥
जितामित्रो मित्रप्रियकृदनुरज्यद्भिरनुजैः
समं सीतादेव्या सह मुदमसीमा(म)नुभवन् ।
कृपातुङ्गैरस्माननुकलमपाङ्गैरभिमृशन्
सुतोक्तिप्रेमाणं कलयतु मदुक्तौ रघुवरः ॥

The scribe writes:

लक्ष्मीनारायणपुरे विद्वज्जनसमाश्रये ।
विदुषो वेङ्कटार्यस्य पुत्रो वेङ्कटराघवः ॥
वत्सरे पिङ्गले मासे कन्याख्ये पाण्डरे च्छदे ।
श्रीमहावीरचरितं द्वितीयायां लिलेख सः ॥

**Colophon:**

इति महावीरचरितव्याख्यायां प्रद्योतिनीसमाख्यायां सप्तमोऽङ्कः समाप्तः ॥

इति महावीरचरितव्याख्यानं समाप्तम् ॥

The scribe writes again:

चतुर्वेदपारङ्गतानाम्, षट्शास्त्रतलस्पर्शिनाम्, श्रीमद्भाष्यकारसिद्धान्तनिरतानाम्, अधीतिबोधानुष्ठानप्रचारणनिपुणानाम्, प्रतिदिनं श्रीमद्भाष्यकारपदपङ्कजसेवारसैकानन्दनिर्भराणाम्, प्रतिदिनं सूर्योदयात् प्रागेव स्नानं कृत्वा ऊर्ध्वपुण्ड्रतुलसीमालानलिनाक्षमालापवित्रादिकं धृत्वा नैमित्ति(त्यि)कसन्ध्यावन्दनादिकर्मसुनिष्ठानाम्, इतिहासपुराणपारायणसुनिष्ठानाम्, श्रीवैष्णवानामावासभूते श्रीमद्भूतपुरीनिष्ठश्रीमद्भाष्यकारालयदक्षिणवीथिरियमिति प्रसिद्धिमापन्ने भूमण्डलालङ्कारभूते लक्ष्मीनारायणाख्यपुरे सदा वेदपारायणजरीजृम्भमाणशब्दजा(जा)लशब्दायमाने तन्निष्ठश्रीवैष्णवाचरिताग्निहोत्रवाजपेयक्रतूत्पादितधूमवृन्दप्रच्छादनेनानतितापंकरसूर्यकिरणे वास्तव्यस्य श्रीसामशाखाप्रवीणस्य विदुषो भारद्वाजकुलपारावारपूर्णचन्द्रस्य श्रीवेङ्कटाचार्यस्य पुत्रेण वेङ्कटराघवेण कविलोकरञ्जनक(1)रिणी प्रद्योतिनीसमाख्या महावीरचरितव्याख्या सप्ताङ्कसहिता स्वहस्ताभ्यामेव विलिख्य समापिता ॥

### No. 12587. महावीरचरित्रव्याख्या—प्रद्योतिनी.

### MAHĀVĪRACARITRAVYĀKHYĀ : PRADYŌTINĪ.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 252. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the fourth act.

Same work as the above.

---

### No. 12588. महिषमङ्गलभाणः.

### MAHIṢAMAṄGALABHĀṆAḤ.

Substance, palm-leaf (Śritāla). Size, 4 × 1¼ inches. Pages, 128. Lines, 8 on a page. Character, Malayāḷam. Condition, good. Appearance, new.

Complete.

A Bhāṇa dealing as usual with the love affair of a courtezan. This is attributed to the Nambūdiripād of Mahiṣamaṅgala (Cochin State). He does not give his name, but a few stanzas at the end state that the work was composed at the instance of King Rājarājavarman of Cochin. He also states that he was a devotee of Goddess Kāmākṣi.

**Beginning :**

केलीकोपदशासु तन्वति नतिं चन्द्रार्धचूडामणौ
क्रीडाचन्द्रकलानुषङ्गकलया यद्दूयते कोमलम् ।
यद्वा कर्कशकासरासुरशिरोनिष्पेषणे निर्दयं
पायाद्वस्तदिदं गिरीन्द्रदुहितुः पादारविन्दद्वयम् ॥
(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

* * * *

भगवतो मकरध्वजस्य यात्रायां समागताः सकलशास्त्रसारविदः सभासदः । शृण्वन्तु मदीयामिमां विज्ञापनाम् । अद्याहमुद्दण्डभुजदण्डहिण्डमानमण्डलाग्रसन्दर्शनसमयसञ्जायमानसन्त्रासभारसन्नतविपक्षराजन्यमकुटतटघटितमणिनिकरतारकाजालपरिलसितचरणनखचन्द्रबिम्बस्य

* * * *

माठमहाराजस्य निर्देशात् निजचरणारविन्दसन्ततसमाराधनतत्परजनकल्पलतायमानायाः कल्पितवलयालयविहारायाः वलयाङ्कवामाङ्कमङ्गलालङ्क्रियायाः शिवकामसुन्दर्याः श्रीकामाक्ष्याः कटाक्षनालविगलदविरलदयामृतसदासेकप्रवृत्तकवित्वपादपेन केनापि कविना निबद्धं कमपि भाणं प्रणद्धं प्रयोगपदवीमवतारयितुमभिलषामि ।

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

वीतासूयैर्विपश्चिद्भिः साधु शोधितरीतयः ।
असम्प्राप्तखलश्रोत्राः सन्तु काव्यकृतां गिरः ॥

इदमप्यपरमाशास्महे—

राजत्कीर्तिविभूषितत्रिभुवनश्रीराजराजाह्वयो
राजेन्दुः क्षितिमायुगान्तसमयं पायादपेतापदम् ।
वामार्धं श्रितपुण्यपूरलहरीसोमार्धचूडामणेः
कामाक्षी कुलदेवता मम च सा कामप्रसूः कल्पताम् ॥

इति निष्क्रान्तः ॥

**Colophon:**

समाप्तश्चायं ग्रन्थः ॥

The scribe adds—

श्रीनीलकण्ठान्तेवासिना परमेश्वरेण लिखितमेतद्भाणम् ॥

---

No. **12589.** मालतीमाधवम्.
MĀLATĪMĀDHAVAM.

Pages, 217. Lines, 14 on a page.

Begins on fol. 154*a* of the MS. described under No. 12506.

Complete.

By Bhavabhūti. Same work as that described under No. 28 of M. Seshagiri Sastri's Report, No. 2. Critical editions of the work have been brought out in Bombay.

**Beginning:**

सानन्दं नन्दिहस्ताहतमुरजरवाहूतकौमारबर्हि-
त्रासान्नासाग्ररन्ध्रं विशति फणिपतौ भोगसंकोचभाजि ।
गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणे-
र्वैनायक्यश्चिरं वो वदनविधुतयः पान्तु सीत्कारवत्यः ॥

अपि च,

दन्तश्रेणिषु संगलत्कलकलव्यावर्तनव्याकुला
नासालोचनकर्णकण्ठकुहरेष्वुद्बुद्बुदध्वानिनः ।
गण्डग्रन्थ्यभिघातजर्झरशिलाश्रूडालवन्त्यूर्मयः
शम्भोर्ब्रह्मकपालकन्दरपरिस्पन्दोल्बणाः पान्तु वः ॥

* * * *

सूत्र—अस्ति दक्षिणापथे विदर्भेषु पद्मपुरं नाम नगरम् । तत्र ब्राह्मणाः केचित् तैत्तिरीयकाः पङ्क्तिपावनाः काश्यपाः पञ्चाग्नयो धृतव्रताः सोमपीथिनः औदुम्बरनामानो ब्रह्मवादिनः प्रतिवसन्ति । तदामुष्यायणस्य तत्रभवतो भट्टगोपालस्य पौत्रः पवित्रकीर्तेर्नीलकण्ठस्यात्मसंभवः श्रीकण्ठपदलाञ्छनः पद-वाक्यप्रमाणज्ञो जातुकर्णीपुत्रो भवभूतिर्नाम कविः निसर्गसौहार्देन भरतेषु प्रवर्तमानः स्वकृतिमेवं प्रगुणप्रभूयसीमस्माकमर्पितवान् । यत्र खल्वियं वाचो-युक्तिः—

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान् प्रति नैष यत्नः ।
उत्पत्स्यते मम तु कोपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥

**End:**

कामन्दकी—वत्स माधव,

यत्प्रागेव मनोरथैर्व्रतमभूत्कल्याणमायुष्मतो-
स्त्वत्पुण्यैर्मधु(दु)पकर्मैश्च फलितं हे वत्स मच्छिष्यया ।
निर्वृतश्च समागमोऽपि विहितस्त्वत्प्रेयसः कान्तया
संप्रीतौ नृपनन्दनौ चरमते(यदपरं)प्रेयस्तदप्युच्यताम् ॥

माधवः—

अतः परमपि प्रियमस्ति । तथापीदमस्तु (भरतवाक्यम्)—

मिथुनानामवियोगः काले काले बुधाश्च धनसहिताः ।
प्रकरणमपि भवभूतेस्तिष्ठतु नित्यं जगत्यलिले ॥

इति निष्क्रान्ताः सर्वे ॥

**Colophon:**

दशमोऽङ्कः । मालतीमाधवं समाप्तम् ॥

---

No. 12590. मालतीमाधवम्.
MĀLATĪMĀDHAVAM.

Pages, 159. Lines, 15 on a page.

Begins on fol. 72*a* of the MS. described under No. 12527.

Complete.

No. 12591. मालतीमाधवम्.

MĀLATĪMĀDHAVAM.

Substance, palm-leaf (Śrītāla). Size, 10¾ × 1½ inches. Pages, 212. Lines, 7 on a page. Character, Malayāḷam. Condition, injured. Appearance, old.

Complete.

Pages 213 to 232 contain a few passages from the first, second and third acts in duplicate.

---

No. 12592. मालतीमाधवम्.

MĀLATĪMĀDHAVAM.

Substance, palm-leaf. Size, 16¾ × 1¼ inches. Pages, 108. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

Copied by Kacchipēśvara.

---

No. 12593. मालतीमाधवम्.

MĀLATĪMĀDHAVAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 55a of the MS. described under No. 3944.

Contains only a fragment of the first act.

Same work as the above.

---

No. 12594. मालतीमाधवम्.

MĀLATĪMĀDHAVAM.

Substance, palm-leaf. Size, 17¾ × 1½ inches. Pages, 92. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

Breaks off in the tenth act.

Same work as the above.

---

No. 12595. मालतीमाधवव्याख्या.

MĀLATĪMĀDHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 17¼ × 1¾ inches. Pages, 159. Lines, 10 on a page. Character, Grantha. Condition, fair. Appearance, old.

Breaks off in the ninth act.

A commentary on the Mālatīmādhava by Tripurāri for acts one to seven and by Nānyadēva for the remaining three acts. Same work as that described under No. 29 of M. Seshagiri Sastri's Report, No. 2.

No. 12596. मालतीमाधवव्याख्या.
MĀLATĪMĀDHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 17¼ × 1⅝ inches. Pages, 34. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Wants the beginning and the end in the fifth act.

Same work as the above. By Tripurāri.

---

No. 12597. मालतीमाधवव्याख्या.
MĀLATĪMADHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 16¼ × 1⅝ inches. Pages, 42. Lines, 9 on a page. Character, Telugu. Condition, fair. Appearance, old.

Breaks off in the fourth act.

Same work as the above.

---

No. 12598. मालतीमाधवव्याख्या.
MĀLATĪMĀDHAVAVYĀKHYA.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 136. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

Breaks off in the fourth act.

Same work as the above.

---

No. 12599. मालतीमाधवव्याख्या.
MĀLATĪMĀDHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 16⅜ × 1½ inches. Pages, 94. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the acts five to seven.

Same work as the above.

---

No. 12600. मालतीमाधवव्याख्या.
MĀLATĪMĀDHAVAVYĀKHYĀ.

Pages, 28. Lines, 7 on a page.

Begins on fol. 58*a* of the MS. described under No. 3944, wherein this work has been omitted in the list of other works.

Breaks off in the first act.

Same work as the above.

## No. 12601. मालतीमाधवव्याख्या.
## MĀLATĪMĀDHAVAVYĀKHYĀ.

Substance, paper. Size, 10¼ × 4½ inches. Pages, 90. Lines, 9 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, new.

Breaks off in the second act.

A commentary by Jagaddhara on the Mālatīmādhava.

**Beginning:**

चञ्चच्चन्द्रिकचन्द्रचारुकुसुमो मावजटापल्लवो
दृप्यद्दारुणदन्दशूकमणिमान् तत्पवश्चालालयः ।
स्थाणुर्मे फलदो भवत्वतितरां गौरीमुखेन्दुद्रुव
. . . . दोहदादिवदधद्देवबदुमल्लं सदा (?) ॥

नत्वा गुरून् गुणगुरूनवलोक्य टीकां विश्वादिकोशभरतश्रुतिशब्दविद्याम् ।
छन्दस्यलङ्करणमर्थगतिं विचिन्त्य श्रीमान् जगद्धरकृती वितनोति टीकाम् ॥
श्रीकण्ठकण्ठविलुठत्पटुनाटकेऽस्मिन् टीका मयाल्पमतिनापि वितन्यते यत् ।
हासाय दुर्जनगणस्य भवेन्न चैतत उच्चैःपदं यदभिकाङ्क्षति सर्व एव ॥

इह तावदष्टपदी नान्दीं विदधान एव कविरप्रत्यूहमाहितसिद्धिमनुरुध्य प्रचण्डचण्डीपतेरकाण्डताण्डवाडम्बरेण स्व(स्वेष्ट)देवोक्तिनि(वस्तुति)रूपं मङ्गलं प्रकरणादौ निबध्नाति—सानन्दमित्यादि । वैनायक्यो वदनविधुतयश्चिरं वः पान्तु इति श्रोतन्सामाजिकान् कविराशास्ते ।

**End:**

तर्हि (ते हि) प्रबलशङ्खध्वनिनिबोधिताः कलकलन्ति (इति)भावः । मालती—अवयवार्थ (पवार्य)निभृतं निगूढनाद(ढभाव) संयुक्तमपिवादित्र (पवारित) कं भवेदिति भरतः । स.

---

## No. 12602. मालतीमाधवव्याख्या.
## MĀLATĪMĀDHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 18 × 1⅛ inches. Pages, 160. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Breaks off in the seventh act.

Same work as that described under No. 12595. By Tripurāri.

## No. 12603. मालतीमाधवव्याख्या.
## MĀLATĪMĀDHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 232. Lines, 6 on a page. Character, Grantha. Condition, fair. Appearance, old.

Contains one to sevn acts

Same work as the above.

---

## No. 12604. मालतीमाधवव्याख्या.
## MĀLATĪMĀDHAVAVYĀKHYĀ.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 37. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 31*a*. The other work herein is Gṛhārcāpratiṣṭhā-vidhi 1*a*.

Breaks off in the first act.

Same work as the above.

---

## No. 12605. मालविकाग्निमित्रम्.
## MĀLAVIKĀGNIMITRAM.

Pages, 110. Lines, 7 on a page.

Begins on fol. 138*a* of the MS. described under No. 12468.

Complete.

A well-known drama by Kālidāsa. It describes the love between Mālavikā and Agnimitra and their marriage after the overcoming of the obstacles in the way.

**Beginning:**

एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः पुरस्ताद्यतीनाम् ।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥

(नान्द्यन्ते)

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य) मारिष इतस्तावत् ।

(प्रविश्य) पारिपार्श्विकः—भाव अयमस्मि ।

सूत्र—अभिहितोऽस्मि परिषदा कालिदासग्रथितवस्तु मालविकाग्निमित्रं नाम नाटकमस्मिन् वसन्तोत्सवे प्रयोक्तव्यमिति ।

**End:**

(भरतवाक्यम्)

त्वं मे प्रसादसुमुखी भव चण्डि नित्यमेतावदेव मृगये प्रतिपक्षहेतोः।
आशास्यमित्यधिगमात्प्रभृति प्रजानां संपद्यते भुवन(न खलु)गोप्तरि नाग्निमित्रे ॥

इति निष्क्रान्ताः सर्वे ॥

पञ्चमोऽङ्कः ॥

**Colophon:**

समाप्तञ्चेदं कालिदासस्य कृतिर्मालविकाग्निमित्रं नाम नाटकम् ॥

---

No. 12606. मालविकाग्निमित्रम्.
MĀLAVIKĀGNIMITRAM.

Pages, 55. Lines, 8 on a page.

Begins on fol. 5*a* of the MS. described under No. 12367.
Complete.
Same work as the above.

---

No. 12607. मालविकाग्निमित्रम्.
MĀLAVIKĀGNIMITRAM.

Pages, 68. Lines, 7 on a page.

Begins on fol. 56*a* of the MS. described under No. 12470.
Complete.
Same work as the above.

---

No. 12608. मालविकाग्निमित्रम्.
MĀLAVIKĀGNIMITRAM.

Pages, 68. Lines, 21 on a page.

Begins on fol. 1*a* of the MS. described under No. 12465.
Complete.
Same work as the above.

---

No. 12609. मालविकाग्निमित्रव्याख्यानम्—कुमारगिरिराजीयम्.
MĀLAVIKĀGNIMITRAVYĀKHYĀNAM: KUMĀRA-GIRIRĀJĪYAM.

Substance, paper. Size, $8\frac{1}{4} \times 6\frac{3}{4}$ inches. Pages, 40. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.
Complete.

A commentary called Kumāragirirājīya on the above work by Kāṭaya Vemabhūpati, for particulars about whom see R. No. 295(6) of the Triennial Catalogue, Vol. I, Part I.

**Beginning:**

एकैश्वर्य इत्यादि । स ईश्वरः सन्मार्गालोकनाय सन् प्रशस्तो मार्गः मोक्षमार्गः तस्यालोकनाय वः तामसी तमस्संबन्धिनी वृत्तिं प्रवृत्तिं व्यपनयत्व-पाकरोत्विति संबन्धः । कथंभूतः ? यः प्रणतबहुफले बहूनि फलानि यस्मा-त्तथोक्तं प्रणतानां बहुफलं तस्तिन्नेकं मुख्यम् अनन्यसाधारणमिति यावत् । यदैश्वर्यमीश्वरभावस्तस्मिन् स्थितोऽपि अणिमाद्यैश्वर्ययुक्तोऽपीत्यर्थः ।

**End:**

अनेनाशंसनरूपेण शुभशंसनेन प्रशस्तिर्नाम सन्ध्यङ्गमुक्तं भवति । यथो-क्तम्—प्रशस्तिश्शुभशंसनमिति ।

सर्वत्र नाटकान्ते भरतेन सर्वकालसाधारण्येनाशंसावचने कर्तव्ये अत्र प्रजा-नामाशास्यसिद्धिं प्रति गोतुरग्निमित्रस्य कथनं तत्कालराजोपलक्षणमिति मन्तव्यम् ॥

**Colophon:**

इति श्रीकाटवेमभूपतिविरचिते कुमारगिरिराजीये मालविकाग्निमित्रव्याख्याने पञ्चमोऽङ्कः ॥

---

### No. 12610. मालविकाग्निमित्रव्याख्यानम्—कुमारगिरिराजीयम्. MĀLAVIKĀGNIMITRAVYĀKHYĀNAM: KUMĀRA-GIRIRĀJĪYAM.

Pages, 69. Lines, 8 on a page.

Begins on fol. 33*a* of the MS. described under No. 12367.

Complete.

Same work as the above.

---

### No. 12611. मालविकाग्निमित्रव्याख्या. MĀLAVIKĀGNIMITRAVYĀKHYĀ.

Pages, 65. Lines, 20 on a page.

Begins on fol. 105*a* of the MS. described under No. 4365.

Complete. This MS. is apparently a transcript of the MS. described under the next number.

Slightly different from that described under R. No. 602 of the Triennial Catalogue, Vol. I, Part I-C. This commentary is called Guṇōttarā and was written by Nīlakaṇṭha.

**Beginning:**

देवंदेवात्मजं नौमि जगतामेककारणम् ।
वारणं वदने व्याख्यां कर्तुं निर्विघ्नसिद्धये ॥
प्राच्यं पदं प्राथममाप्तवाचामाचारशुद्धा शतपत्रयोनेः ।
वाचामधीशा निजरत्नवीणां वाचालयन्ती पुरतः समिन्धे ॥

एकैश्वर्ये (इति) । प्रणतबहुफले नमस्कारेणातिशयप्रयोजनफलदे एकैश्वर्ये मुख्यसम्पदि अणिमाद्यष्टगुणोपेते ।

**End:**

एतावदेवावगमप्रभृति प्राप्तिमारभ्य प्रजानां प्राणिनामाशास्यं प्रार्थनीयं गोप्तरि अग्निमित्रे नन सम्पत्स्यते खलु जायत एव प्रजानां सर्वमपि प्रार्थनीयमस्मिन् सम्पत्स्यते इति ॥

**Colophon:**

इति मालविकाग्निमित्रव्याख्याने श्रीनीलकण्ठीये पञ्चमोऽङ्कः ॥

बालप्रबोधिनी व्याख्या श्रीकण्ठीया गुणोत्तरा ।
विदुषां स्वादये भूयाद्रसज्ञानां श्रुतेः प्रिया ॥

The scribe adds—

माकन्दद्रुममञ्जरीमधुझरीमाधुर्यधुर्या वचो-
घाटी यस्य सुधांशुचूडचरणध्यानावधूते(तै)नसः ।
लक्ष्मीनाथकविः स एष ललितां श्रीनीलकण्ठैः कृता-
मेतां मालविकाग्निमित्रचरितव्याख्यां लिलेखाधुना ॥

---

### No. 12612. मालविकाग्निमित्रव्याख्या—गुणोत्तरा.
### MĀLAVIKĀGNIMITRAVYĀKHYĀ : GUṆŌTTARĀ.

Pages, 86. Lines, 8 on a page.

Begins on fol. 60*a* of the MS. described under No. 11392.

Copied by Lakṣmīnāthakavi who adds a stanza at the end which gives his name. Part of foll. 94 and 95 are left unwritten probably on account of omission in the original.

Complete.

Same work as the above.

---

### No. 12613. मुकुन्दानन्दभाणः.
### MUKUNDĀNANDABHĀṆAḤ.

Pages, 96. Lines, 17 on a page.

Begins on fol. 177*a* of the MS. described under No. 11921.

Complete.

A drama of the Bhāṇa kind dealing with the love of Mukunda (Śri-Kṛṣṇa) to Mañjari. The author of the work is Kāśipati, son of Ramāpati of Kauṇḍinyagōtra. The work was intended to be staged on the occasion of the vernal festival of God Cūḍēśvara worshipped on the Badhiragiri (Bhadragiri in the printed edition) in the vicinity of Nūtanapura. The work has been printed in the Kāvyamālā.

**Beginning:**

वन्दे वन्दारुमन्दारमिन्दुभूषणनन्दनम् ।
अमन्दानन्दसन्दोहबन्धुरं सिन्धुराननम् ॥
कण्ठालिङ्गनमङ्गलं घनकुचाभोगोपभोगोत्सवं
श्रोणीसङ्गमसौभगं च सततं मत्प्रेयसीनां पुरः ।
प्राप्तुं कोऽयमितीर्ष्ययेव यमुनाकूले बलाद्यः स्वयं
गोपीनामहरद्दुकूलनिचयं कृष्णः स पुष्णातु वः ॥

* * * *

(नान्द्यन्ते) सूत्रधारः (पुरोऽवलोक्य सप्रमोदम्)—अद्य खलु फलितमामूलचूडमस्मदीयपुरातनपुण्यकल्पलताभिः ।

यतः—इत एव नूतनपुरपरिसरालङ्कारबधिरगिरिचूडामणेर्भगवतः चूडेश्वरस्य वसन्तोत्सवसमुत्सुकाः सामाजिकाः सकलाः कल्याणमण्डपमध्यमध्यासते ।

* * * *

सूत्र—आर्ये
कौण्डिन्यवंशरत्नस्य कवेः काशीपतेः कृतिः ।
मुकुन्दानन्दनामायं मिश्रभाणः प्रयुज्यते ॥

तदत्रेत्यर्धोक्ते नटी—अज्ज अच्चरियं अच्चरियं
तक्के कक्कसवक्कुत्तिनिट्ठुरा तस्स भारदी ।
जादा माहुरसन्दब्भे कव्वम्मि मिदुला कहम् ॥

छाया—
तर्के कर्कशवक्रोक्तिनिष्ठुरा तस्य भारती ।
जाता मधुरसन्दर्भे काव्येऽस्मिन्मृदुला कथम् ॥

सूत्र—(सपरिहासं) त्वमेव तावत्कथय
क्षणं प्रणयकोपे त्वं कर्कशापि कथं पुनः ।
प्रेमार्द्रहृदया जाता मृदुलप्रकृतिः प्रिये ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

वर्षन्तु कामा(मं) भुवि वारिवाहा गोब्राह्मणेभ्यः कुशलानि सन्तु ।
हृष्यन्तु सन्तः सुकविप्रबन्धैस्तेषां तु शाम्यन्तु खलोपसर्गाः ॥
मुकुन्दानन्दनाम्ना मे भाणेन परितोषितः ।
कमलाकामुकः कामं कल्लोलयतु मङ्गलम् ॥

**Colophon:**

इति कौण्डिन्यकुलतिलकश्रीमद्रमापतिसुधीतनयकाशीपतिकविविरचितोऽयं मुकुन्दानन्दभाणः सम्पूर्णः ॥

---

No. **12614.** मुकुन्दानन्दभाणः.

MUKUNDĀNANDABHĀṆAḤ.

Pages, 174. Lines, 12 on a page.

Begins on fol. 105*a* of the MS. described under No. 12080.

Complete.

Same work as the above.

---

No. **12615.** मुकुन्दानन्दभाणः.

MUKUNDĀNANDABHĀṆAḤ.

Substance, paper. Size, 8¼ × 6¾ inches. Pages, 152. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*b*. The other work herein is Vasantatilakabhāṇa 1576.

Incomplete.

Same work as the above.

The fly-leaf contains a note by Mr. C. P. Brown explaining the ten kinds of Rūpaka.

---

No. **12616.** मुद्राराक्षसम्.

MUDRĀRĀKṢASAM.

Pages, 166. Lines, 14 on a page.

Begins on fol. 31*a* of the MS. described under No. 12526.

Complete.

A drama in seven acts by Viśākhadatta, son of Mahārāja Pṛthu and grandson of Sāmanta Vaṭēśvaradatta. It describes the story of Candragupta and his victories over the nine Nandas through the intrigues of Cāṇakya.

**Beginning:**

धन्या केयं स्थिता ते शिरसि शशिकला किंनु नामैतदस्याः
नामैवास्यास्तदेतत्परिचितमपि ते विस्मृतं कस्य हेतोः ।
नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दु-
र्देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः ॥

अपिच—

पादस्याविर्भवन्तीमवनतिमवने रक्षतः स्वैरपातैः
सङ्कोचेनैव दोष्णां मुहुरभिनयतः सर्वलोकातिगानाम् ।
दृष्टिं लक्ष्येषु सोग्रज्वलनकणमुचं बध्नतो दाहभीते-
रित्याधारानुरोधात्त्रिपुरविजयिनः पातु वो दुःखनृत्तम् ॥

(नान्द्यन्ते)

सूत्रधारः—अलमतिप्रसंगेन । आज्ञापितोऽस्मि परिषदा यथाद्य त्वया सामन्तवटेश्वरदत्तपौत्रस्य महाराजपदभाक्पृथुसूनोः कवेर्विशाखदत्तस्य कृतिरभिनवं मुद्राराक्षसं नाम नाटकं नाटयितव्यमिति ।

**End:**

भो राजन् चन्द्रगुप्त भो अमात्य राक्षस, किं भूयः प्रियमुपकरोमि ।

राजा—किमतः परं प्रियमस्ति ।

राक्षसेन समं मैत्री राज्ये चारोपिता वयम् ।
नन्दाश्चोन्मूलिताः सर्वे किं कर्तव्यमतः प्रियम् ॥

राक्ष—तथापीदमस्तु (भरतवाक्यम्)—

वाराहीमात्मयोनेस्तनुमवनविधावास्थितस्यानुरूपां(नुरूपां)
यस्य प्राग्दन्तकोटिं प्रलयपरिगता शिश्रिये भूतधात्री ।
म्लेच्छैरुद्वेज्यमाना भुजयुगमधुना संश्रिता राजमूर्तेः
स श्रीमद्बन्धुभृत्यश्चिरमवतु महीं पार्थिवश्चन्द्रगुप्तः ॥

इति निष्क्रान्ताः सर्वे ॥

**Colophon:**

सप्तमोऽङ्कः ॥

## No. 12617. मुद्राराक्षसम्.
## MUDRĀRĀKṢASAM.

Pages, 51. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 5245.

Contains the acts one and two only.

Same work as the above.

---

## No. 12618. मुद्राराक्षसम्.
## MUDRĀRĀKṢASAM.

Substance, paper. Size, $11\frac{1}{4} \times 4\frac{3}{8}$ inches. Pages, 117. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Begins on fol. 1*b*. The other work herein is Vidagdhamādhava-vivaraṇa 60*a*.

Complete.

Same work as the above.

Name of the scribe—Allādi Vēṅkaṭēśvara. Date of transcription—Friday, the 7th day of the bright fortnight of the Caitra month in the year Vijaya.

---

## No. 12619. मुद्राराक्षसम्.
## MUDRĀRĀKṢASAM.

Pages, 26. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 12018.

Breaks off towards the close of the second act.

Same work as the above.

---

## No. 12620. मुद्राराक्षसव्याख्या—तात्पर्यबोधिनी.
## MUDRĀRĀKṢASAVYĀKHYĀ : TĀTPARYABŌDHINĪ.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{3}{4}$ inches. Pages, 228. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

A commentary on the above work; by Svāmi Śāstrin of Hāritagōtra and native of Anantasāgara or Śōḷavandān. The author is said to have been rewarded by King Rāmacandra. In the beginning three leaves contain stanzas relating the story briefly.

Date of transcription—Month of Arpiśi in the year Īśvara. Name of the scribe—Vēṅkaṭavīrarāghava, son of Kṛṣṇārya.

**Beginning:**

ध्यायं ध्येयं (ध्यायं) यत्पदाम्भोजयुग्मं लोका मूकाश्चापि शास्त्रप्रवेकाः ।
श्रेयो भूयो यान्ति दैवीश्च रायो भूयो भूयो नौमि तं बालकृष्णम् ॥
यत्र स्मृते भवति सर्वपदार्थबोधः सर्वत्र वीतविचिकित्समथात्मबोधः ।
मर्त्यं च शाश्वतमुदारमतिश्च सम्पत् क्षेमाय मे भवतु तद्गुरुपादपद्मम् ॥
मथुरामण्डलमण्डनभूतो वीतो विचक्षणप्रवरैः ।
अस्त्यग्रहारवर्यः नाम्ना यमनन्तसागरं ब्रुवते ॥

व्यवहारनाम्ना चोलवन्दानिति ।

यत्र सदा सन्निहितो देवः श्रीबालकृष्णोऽसौ ।
यदपाङ्गदर्शनजुषः सततं सुखिनो महाजनाः सर्वे ॥
तत्राग्रहारनायकमणिवद्विद्वन्मणिर्महोदारः ।
हरितसगोत्रोत्पन्नः सम्पन्नो धर्मकर्ता यः ॥
योऽसौ श्रीगुरुपादपद्मभजनात् प्राप्तप्रबोधोदयो
देवी यत्र तनोति लोकजननी कारुण्यदृष्टिं सदा ।
संमानं च स रामचन्द्रनृपतिर्भूमण्डलाखण्डलो
यश्चात्यद्भुतनाटकादिरचनानिष्णातवाग्वैभवः ॥
श्रीमान् भागवतप्रियः परमया भक्त्या प्रसन्नः सदा
कृष्णो यत्र परां श्रियं स कलयन्नास्ते कृपावारिधिः ।
ध्यानात्तत्पदपद्मयोरविरतं संप्राप्तविद्योदयो
यः कर्णाटनृपात्तसत्रमरणे नित्यान्नदानोत्सुकः ॥

अपिच—

सुधर्मायामाङ्गीरसमिव हि यं साधुहृदयं
स्तुवन्त्येनं शश्वत् सदसि विबुधाः काव्यनिपुणाः ।
महोदारा यद्वागमृतरसपानप्रमनसः
सदा प्रीतात्मानः सकलधरणीपालमहितम् ॥

किंच—

काव्यालङ्कृतिरूपकेषु निपुणो वेदान्तशास्त्रेषु च
प्रख्यातो जयति प्रगल्भविनुतः श्रीस्वामिशास्त्रीति यः ।
तेन श्रीपतिभक्तलब्धयशसा तात्पर्यबोधिन्यसौ
मुद्राराक्षसनाटकस्य रचिता व्याख्यात्र जीयाच्चिरम् ॥

इह खलु कश्चन विपश्चिद्धौरेयः विशाखदेवो नाम कविराजः "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदे-

शयुजे ॥ परिवड्ढइ विण्णाणं संभाविज्जइ जसो विसप्पन्दि गुणा। सुव्वइ सुपुरुसचरियं चिन्तजेण हरन्ति कव्वालावा।" यद्वेदात् प्रभुसंमितादधिगतं शब्दप्रधानाचिरं यच्चार्थप्रवणात् पुराणवचनादिष्टं सुहृत्सम्मितात् । कान्तासम्मितया यया सरसतामापाद्य काव्यश्रियं कर्तव्ये कुतुकी बुधो विरचितस्तस्यै स्पृहां कुर्महे।" इत्यादिवचनैः काव्यस्यानेकश्रेयस्साधनतां "काव्यालापांश्च वर्जयेत्" इति निषेधस्मरणस्य चासत्काव्यपरतां च पश्यन् प्रारिप्सितस्य मुद्राराक्षसनाटकाख्यस्य ग्रन्थस्य निष्प्रत्यूहपरिसमाप्तये प्रचुरगमनाय च कृतमाशीरूपं मङ्गलं स्वयमाचरन् शिष्यशिक्षायै ग्रन्थतो निबध्नाति—धन्येति। विभोः सर्वव्यापकस्य सर्वनियामकस्येति यावत्। तदुक्तम्—

अनियुक्ता अपि स्वे स्वे कृत्ये यत्सन्निधौ प्रजाः।
वर्तन्ते व्यग्रमनसः स विभुः परिकीर्तितः॥ इति॥

तथोक्तस्य परमेश्वरस्येत्यर्थः। यत् शाठ्यं शठभावः। गूढविप्रियकृद्भावः युष्मानव्यात् रक्षेदित्याशीर्लिङिति योजना।

**End:**

चन्द्रगुप्तः चन्द्रगुप्तनामा स पार्थिवः भूपालः। बन्धुमित्रैः सह उपलक्षितः सन्निति वाक्यशेषः। बन्धुमित्रजनैः सहैव राज्यभोगस्य श्लाघ्यत्वापत्तेः। अन्यथा—

किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा।
येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च॥

इति राज्यभोगस्य वैयर्थ्यापत्तेः। मही चिरं चिरकालम्। अनेन दीर्घायुष्मत्ता चोक्ता भवति। अवतु रक्षत्वित्याशिषि लोट्। अत्राभेदाध्यवसायरूपकालङ्कारः॥

**Colophon:**

इति श्रीस्वामिशास्त्रिविरचितायां मुद्राराक्षसव्याख्यायां तात्पर्यबोधिन्याख्यायामङ्कस्सप्तमः। व्याख्येयं समाप्ता॥

The scribe adds—

प्रख्याते महणाख्ययाऽत्रनिगमे श्रीवत्सवंशोद्भवः
नाम्ना राघव एष कृष्णतनुजो श्रीवासपौत्रोऽस्ति यः।
तेनैवं लिखितामनन्यविषया निर्मत्सरा भूसुराः
मुद्राराक्षसनाटकस्य विवृतिं सन्तोऽनुगृह्णन्तु माम्॥

## No. 12621. मुद्राराक्षसव्याख्या.
## MUDRĀRĀKṢASAVYĀKHYA.

Substance, paper. Size, $17\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 62. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains one to four acts complete.

Similar to the above. In the beginning two leaves contain stanzas narrating briefly the story of the plot contained in the drama.

**Beginning:**

श्रीमद्विशाखदत्तीये मुद्राराक्षसनाटके ।
कथोपोद्घातमाचष्टे संविधानावबुद्धये ॥
नन्दान्तं क्षत्रियकुलमिति पौराणशासनात् ।
कल्पादौ नन्दनामानः केचिदासन्महीभुजः ॥
सर्वार्थसिद्धिनामासीत्तेषु विख्यातपौरुषः ।
स चिरादशिषत्पृथ्वीं नवकोटिशतैर्वृतः ॥
वक्रनासादयस्तस्य कुलामात्या द्विजातयः ।
बभूवुस्तेषु विख्यातो राक्षसो नाम भूसुरः ॥
शुक्रनीतिप्रवीणः सन् षाड्गुण्यप्रविभागवित् ।
शुचिः शूरतमो नन्दैर्मान्यो राज्यधुरं दधत् ॥
राज्ञः पत्नी सुनन्दासीज्ज्येष्ठान्या वृषलात्मजा ।
मुराख्या सा प्रिया भर्तुः शीललावण्यसंपदा ॥

* * * *

क्रूरग्रहः स इत्यस्मिन् पद्ये प्रस्तावनामुखे ।
उक्तमर्थं विशेषेण कविः प्रस्तूयते पुनः ॥

इति मुद्राराक्षसनाटकीयावतारिका संपूर्णा ॥

अथेदं नाटकं साङ्गं लक्षणनिरूपणपुरस्सरं व्याख्यायते —

अत्र श्रीमान्विशाखदत्तनामा महाकविः पारिप्सितस्य नाटकस्य निर्विघ्नपरिसमाप्तिप्रचयसिद्ध्यर्थं स्वेष्टदेवतागुणसङ्कीर्तनपूर्वकाशीर्वचनपूर्वकं मङ्गलं शिष्यशिक्षार्थं नान्द्या निबध्नन्मनाक् अर्थतः शब्दतश्च नाटकीयवस्तु ध्वनयति। नान्दीलक्षणमग्रे वक्ष्यते। तत्राद्ये नान्दीपद्ये धन्या केयं स्थिता ते शिरसीति जटाजूटकुहरनिलीनां दिव्ययुवतीरूपधारिणीं गङ्गामवलोक्य सेर्ष्यायाश्शिवायाः शिवं प्रति प्रश्नः।

**End:**

इत्थमत्र नियताप्तिः प्रदर्शिता ॥

**Colophon:**

इति तृतीयोऽङ्कः सम्पूर्णः ॥

अथ चतुर्थेऽङ्के राक्षसविचारसंवादरूपाख्या कथाप्रकरी कथ्यते । हीहीमाण इति निपातसमुदाय आश्चर्यद्योतकः ।

* * * *

छाया बाहुल्ये इति नपुंसकत्वम् । पुरस्तात् पुरोभागे पुरोधायिसेवकवत् आशु शीघ्रमेव गत्वा पूर्वाह्णे तस्मिन्नस्तोन्मुखे सति निवृत्ताः तव परित्यज्य परमवृत्ता इव दृश्यन्ते । प्रायो मृत्या इत्यर्थान्तरन्यासः । तेन च मूलनेतुर्दुरवस्था ध्वन्यते ॥

**Colophon:**

चतुर्थोऽङ्कः सम्पूर्णः ॥

---

## No. 12622. मुद्राराक्षसव्याख्या.
## MUDRĀRĀKṢASAVYĀKHYĀ.

Pages, 9. Lines, 18 on a page.

Begins on fol. 26*a* of the MS. described under No. 12526.

Contains the first stanza incomplete.

Same work as the above, but without the introductory stanzas.

---

## No. 12623. मुद्राराक्षसव्याख्या.
## MUDRĀRĀKṢASAVYĀKHYĀ.

Substance, paper. Size, 11½ × 5¾ inches. Pages, 184. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old. Complete.

A commentary on the Mudrārākṣasa: by Grahēśvara, whose genealogy is given thus—

Cakrapāṇi of Śrīvatsagōtra
|
Jayāditya
|
Śrīdēva
|
Rāmaśarman
|
Siddhēśvara
|
Grahēśvara
(disciple of Mitravaṭēśvara.)

**Dated: Samvat 1880.**

**Beginning :**

त्रैलोक्यं रङ्गभूमिः सकलगुणवृता नायिका शैलपुत्री
व्योमैवान्तर्वितानं निजवसनपदं वाद्यदण्डं कपालम् ।
आनन्दप्राप्तिमुच्चैः कलिकलुषहतेर्यस्य लाभो जनानां
स्थाणुर्विश्वैकदृश्या स कपटनटनानर्तको वः पुनातु ॥
यद्यपि ते ते गुणिता येषामग्रे न मे [च]वचनशक्तिः ।
तदपि च तदनुग्रहमुपभवितुं वाञ्छा ममास्तीह ॥

* * * *

मित्रवटेश्वरगुरुतोऽधीतं यत्किमपि चेतसा कलितम् ।
तल्लेशतो विवेके मय(य)त्नः शुद्धबुद्धिसंसिद्ध्यै ॥
नत्वा शङ्करचरणं स्तुत्वा साधूंस्तु वी (विदि)तमाहात्म्यान् ।
कुरुते महेश्वराख्यो मुद्राया दीपिकां यत्नात् ॥

इह खलु ग्रन्थारम्भे मङ्गलाचरणेन समाप्तिमुद्दिश्य नाटकग्रन्थारम्भे विशिष्ट-सकलनाटकार्थनिर्वचनं सङ्क्षेपेण नान्दीश्लोक एव यदि भवति

* * * *

विशाखदत्तः प्रथमत एव तत्सर्वमभिदधाति स्म ।

अथ मूलश्लोकः—

धन्या केयं स्थिता ते शिरसि शशिकला किंनु नामैतदस्या
नामैवास्यास्तदेतत्परिचितमपि ते विस्मृतं कस्य हेतोः ।
नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दुः
देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः ॥

टीका—विभोर्महादेवस्य शाठ्यं शठस्य भावः शाठ्यं वञ्चना । तदनुकूल-वचनं वा । वो युष्मान् अव्यात्, त्रायताम् । अव रक्षणे आशिषि लिङ् ।

**End :**

देशे श्रीतीरभुक्तौ परिसरसहितश्चक्रपाणिर्गुणाढ्यः
श्रीवत्सस्तत्सुतोऽभून्नयविनयम(हा)तन्त्रवित्कः कवीन्द्रः ।
नृ(त)त्पुत्रः ख्यातकीर्तिः कविवरगणितः श्रीजयादित्यवीरः
श्रीदेवस्तत्सुतोऽभूत्तदुव(चि)ततनयः पण्डितो वा(रा)मशर्मा ॥
सिद्धेश्वरस्तत्तनयो बभूव द्विजेन्द्रवर्गे गणितप्रतिष्ठः ।
तत्सूनुरानम्रशिरा गुरुभ्यो महेश्वरः सन्नयमार्गसेवी ॥

तेनेयं रचितोऽचिर्येऽनन्मुद्राख्यनाटके टीका ।
सज्जनमनस्सु तोष यत्तां तत्तत्त्वबोधेन ॥

**Colophon:**

इति श्रीमहामहोपाध्यायश्रीमहेश्वरविरचितायां मुद्रादीपिकायां सप्तमोऽङ्कः समाप्तः ॥

---

## No. 12624. मृच्छकटिकम्.
## MṚCCHAKAṬIKAM.

Pages, 277. Lines, 7 on a page.

Begins on fol. 503b of the MS. described under No. 12441.

The last leaf is torn.

Complete.

A drama of the Prakaraṇa kind describing in ten acts the love-attachment between Cārudatta, a poor Brahmin, of Avanti and a dancing woman named Vasantasēnā. A clay-cart is said to have been made and presented to Cārudatta's son as a toy for playing, and this accounts for the title of the drama. By King Śūdraka who is said to have been a student of the Ṛgvēda and the Sāmavēda and well-versed in arts and sciences and to have lived for 100 years and 10 days.

Dated: Sunday, 12th of Śuklapakṣa of Māgha month.

**Beginning:**

पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानो-
रन्तःप्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य ।
आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्त्वदृष्ट्या
शंभोर्वः पातु शून्येक्षणघटितलयब्रह्मलग्नस्समाधिः ॥

अपि च,

पातु वो नीलकण्ठस्य कण्ठः श्यामाम्बुदोपमः ।
गौरीभुजलता यत्र विद्युल्लेखेव राजते ॥

(नान्द्यन्ते)

सूत्रधारः—अलमनेन परिषत्कुतूहलविमर्दकारिणा परिश्रमेण ।

एवमहमार्यमिश्रान् प्रणिपत्य विज्ञापयामि, यदिदं वयं मृच्छकटिकं नाम प्रकरणं प्रयोक्तुं व्यवसिताः, एतत्कविः किल—

द्विरदेन्द्रगतिश्चकोरनेत्रः परिपूर्णेन्दुमुखः सुविग्रहश्च ।
द्विजमुख्यतमः कविर्बभूव प्रथितः शूद्रक इत्यगाधसत्त्वः ॥

* * * *

अस्यां च कृतौ—

अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः किल चारुदत्तः ।
गुणानुरक्ता गणिका च यस्य वसन्तशोभेव वसन्तसेना ॥
तयोरिदं सत्सुरतोत्सवाश्रयं नयप्रचारं व्यवहारदुष्टताम् ।
खलस्वभावं भवितव्यतां तथा चकार सर्वं किल शूद्रको नृपः ॥

* * * *

**End:**

क्षीरिण्यः सन्तु गावो भवतु वसुमती सर्वसंपन्नसस्या
पर्जन्यः कालवर्षी सकलजनमनोनन्दिनो वान्तु वाताः ।
मोदन्तां जन्मभाजः सततमभिमता ब्राह्मणाः सन्तु सन्तः
श्रीमन्तः पान्तु पृथ्वीं प्रशमितरिपवो धर्मनिष्ठाश्च भूपाः ॥

इति निष्क्रान्ताः सर्वे ॥

**Colophon:**

संहारो नाम दशमोऽङ्कः ॥

---

## No. 12625. मृच्छकटिकाविवरणम्.
## MṚCCHAKAṬIKĀVIVARAṆAM.

Pages, 98. Lines, 9 on a page.

Begins on fol. 16 of the MS. described under No. 12444.

A commentary mainly on the Prākṛt portion of the work described above: by Dharānanda, son of Rāmabala, a native of Bharatapattana and grandson of Ṭhakur of Vāsiṣṭhagōtra. The author was a worshipper of Hanumat and the disciple of Paramānanda and had two uncles named Pūrṇadāsa and Dēvīdāsa. The commentary is said to have been composed in the Vikrama Saṁvat 1872 (1814 A.D).

**Beginning:**

नत्वा चरणसरोजं वैदेहीरामचन्द्रयोर्मनसा ।
मृच्छकटिकाविवरणं करोमि बालावबोधाय ॥

तत्रादावेतस्य प्रकरणत्वेन तल्लक्षणमुच्यते—

आत्मनाम कविर्यत्र कथां नायकमेव च ।
औत्पत्तिकं प्रकुरुते तद्धि प्रकरणं विदुः ॥

इदं च भरतेन—

शुद्धप्रकीर्णभेदेन तद्द्विधा प्रतिपादितम् ।
द्विधा प्रकरणं तत्तु शुद्धं सङ्कीर्णमेव च ॥

कुलस्त्रीरचितं शुद्धं सङ्कीर्णं वेश्ययान्वितम् ।

इदं च प्रकरणमेव । विविधाश्चात्र रसाः । चतस्रो वृत्तयः । पञ्च सन्धयः ।

मागध्यवन्तिजा प्राच्या शौरसेन्यर्धमागधी ।

वारुणी दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः ॥

इत्यलं विस्तरेण ।

* * * *

आर्ये किमस्माकं गृहे सर्वमस्ति अथवा परिहससि ।

परिहसिष्यामि तावत् । आर्यास्त्वापणे ।

अनार्ये एवं ते आशा छेत्स्यति ।

**End:**

दिष्ट्या कुशलिनी भगिनी । अधुना कुशलिनी संवृत्तास्मि । आर्य, कृतार्थास्मि । ईदृशं नृत्तं प्रेक्ष्यते । द्विगुणतरः प्रव्रज्यायां बहुमानः संवृत्तः । सांप्रतं जीवापितास्मि इति सर्वं शिवम् ॥

**Colophon:**

गोत्रे वासिष्ठसंज्ञे समजनि निपुणः स्वेष्टचित्तो वरीयान्
श्रीमान् श्रीठाकुराख्यः सकलगुणनिधिस्तस्य पुत्रत्रयं (यत्) ।
ज्येष्ठः श्रीपूर्णदासो हरिविहितमतिर्मध्यमो रांबलाख्यो
देवीदासस्तृतीयो बहुगुणनि(क)षा काश्यपीसंप्रतिष्ठः ॥
पुत्रो रामबलस्य मित्रपरमानन्दाप्ततत्त्वागमो
भूमौ तत्कृपया बुधेषु विदितः सच्छास्त्रशीलो द्विजः ।
श्रीमद्वायुसुतस्य सेवनरतो नाम्ना प्रसिद्धो धरा-
नन्देनेति चकार शास्त्रविषयेष्वभ्यासमत्यादरात् ॥
शिष्याणामुपकृतये तेन सुबुद्ध्या विरचिता रम्या ।
प्राकृतबोधसमर्था विवृतिरियं मृच्छकटिकायाः ।
वत्सरे विक्रमार्कस्य युग्माश्वेभेन्दुसम्मिते ॥
चैत्रशुद्धे दशम्यां च बुद्धेपूर्णाकृता ध्रुवम् ।

इति भरतपत्तननिवासिनो रामबलस्य सूनोः धरानन्दस्य कृतौ मृच्छकटिकाविवृतौ दशमोऽङ्कः समाप्तः ॥

समाप्तमिदं मृच्छकटिकाविवरणम् ॥

The scribe adds—

भरतपुरे कल्लाडिवेङ्कटेश्वरेण लिखितं मृच्छकटिकाविवरणं समाप्ततामगमत् ॥

## No. 12626. ययातितरुणानन्दम्.
## YAYĀTITARUṆĀNANDAM.

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 63. Lines, 8 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other work herein is Rōcanānanda 33*a*.

Complete.

This drama in five acts is based on the story of the love between Śarmiṣṭhā and Yayāti who became prematurely old on account of a curse, but became young again by exchanging his decrepitude with the youthfulness of his son Puru. It was intended to be staged in the vernal festival of God Mārgasahāya worshipped at Viriñcipuram.

This is also called Taruṇānanda. It was composed by Vallīsahāyakavi, pupil of Nārāyaṇaguru. He is said to be also the author of Rōcanānanda (No. 12639) wherein he is said to belong to Vādhūlagōtra. He is apparently the same as the author of Ācāryadigvijaya (No. 12380 anté).

**Beginning:**

प्रत्यूहच्छेदनोदग्रदन्तकुन्तविराजितम् ।
कल्याणदानधौरेयमव्याद्व्याहतं महः ॥
क्रीडानारतसङ्गमम्बुधिसुवस्संवीक्ष्य तत्तादृशं
सासूयामितरां विभाव्य सुचिरात्तान्वामनन्तार्तिहृत् ।
तत्साम्याकलनेन पीतवसनस्तामुद्धरिष्यन् शुचः
क्रीडाकारकुतूहली स जयति क्रीडाधुरीणो भुवः ॥

(नान्द्यन्ते)

सूत्रधारः—(परितो विलोक्य सानन्दम्) संप्रति किल विरिञ्चनपुरप्रपञ्चितविहारस्य भगवतो मार्गबन्धोर्वसन्तोत्सवसङ्घटितया रसिकविपश्चित्परिषदा समाहूतोऽस्मि ।

* * * *

वस्तु प्रसिद्धमनोहारि रसज्ञहारि नेताप्युदात्तगुणगौरवमान्यकीर्तिः ।
प्राधान्यमादिमरसस्य विभाति यत्र तादृग्दृशोः कुतुकदं नवनाटकं नः ॥

किञ्च—

सा विद्या सर्वतः श्लाघ्या गुरुशुश्रूषणोन्नता ।
ययातितरुणानन्दो विशदीक्रियते सताम् ॥ इति

(आकर्ण्य सश्लाघम्) अहो प्रभावस्सभासदाम्; यदत्रभवतः सन्देशे दुर्घट-रूपकगुणनगुणनेन दुर्धरां चिन्तामुत्पाद्यानुपदमेव तथाविधवस्तुघटितं नाटकं स्वोक्तिशेषेणैव स्पष्टयद्भिरवशात् स्वैरेव समुन्मार्जितव्यसनोऽस्मि यतः—

ययातितरुणानन्दसंज्ञं नाटकमद्भुतम् ।
वल्लीसहायकविना निर्मितं मयि वर्तते ॥

* * * *

सू—मारिष, सम्प्रति सभासदामाज्ञेयम्, वाधूलस्य रोचनानन्दकृतो महाकवेर्ययातिगुणचरित्रं तरुणानन्दं नाटकमभिनेतुमविस्मृततत्तत्पद्याः किम-स्मदीयाः ।

नटः—युष्म(च्छि)क्षितेषु कः पुनस्तादृशो विस्मरणशीलः । अस्य कवे-र्दक्षिणामूर्तिप्रसाद इवास्माकं युष्मदनुग्रहः । अनेन कविना पुरस्स्वगुरुरित्थमुप-श्लोकितः खलु, यथा—

यस्सूक्तिविस्मयी विधिरहिपतिमन्या(न्ना)य कुण्डलीकृत्य ।
हंसपदसंशयी स्वयमजनि स नारायणो गुरुर्जयति ॥

सू—मारिष,

जयशरचक्रहेतिललनार्पितमाम्यलसज्जयकरनन्दनप्रभुदयार्द्रतया सरसा ।
सुकविसरस्वती महितवस्तु सदृक् च सभा शुभयशसेऽत्र विश्वघटनानट-
[नाटकयोः ॥

नटः—सत्यमिदं तर्हि नाहुषस्य राजर्षेर्भूमिकापरिग्रहो भावमन्तरेण न कस्यापि समुचितः । मम तु तत्सारथेर्भूमिका । आर्ययोः पुनर्देवयानीशर्मिष्ठा-भूमिकापरिग्रहो युज्यते ।

End :

रा—(सोत्साहम्) किमितोऽपि प्रियमस्ति । (तथापीदमस्तु भरत-वाक्यम्)—

सुखित(न)स्सन्त्विह निखिलाः कविकुलदौर्गत्यमिन्दिरा भिन्द्यात् ।
स्फुरतु परात्मनि भक्तिः हरिहरभेदभ्रमं विनैव नृणाम् ॥

इति निष्क्रान्ताः सर्वे । पञ्चमोऽङ्कः ॥

Colophon :

पर्याप्तं तरुणानन्दं नाटकम् ॥

## No. 12627. ययातिदेवयानीचरितम्.
## YAYĀTIDĒVAYĀNĪCARITAM.

Substance, paper. Size, 16½ × 11 inches. Pages, 24. Lines, 26 on a page. Character, Dēvanāgari. Condition, good. Appearance, new. Complete.

This is apparently intended to be staged but was written without any division into acts and without following the canons of dramatic composition. The name of the author is not given. The plot deals with the story of the love between Yayāti and Dēvayānī.

**Beginning:**

लक्ष्मीं सान्त्वयतो रुषा परुषितां प्रेमोत्तराद्गौरवा-
दास्येन्दावधनेः सभीतिविनयव्यालोलनेत्राञ्चले ।
साकूतस्मितसुन्दरं मधुरिपोश्चातुर्यभङ्ग्या मुहुः
स्नेहार्द्रार्द्रमुदञ्चितो दिशतु नः सौख्यं कटाक्षाङ्कुरः ॥

(इत्युक्त्वा वेत्रधारी वक्ष्यमाणपदेन प्रविशति)

* * * *

वे—अये सकलधराधिपमणिमकुटकोटिमाणिक्यमयूखमञ्जरीनीराजितचरणारविन्दस्य सोमवंशमहार्णवपूर्णचन्द्रस्य ययातिमहाराजेन्द्रस्य मृगयोत्सवसाहाय्याय सन्नह्यन्ति समररङ्गसन्दर्शितशौर्यानुभावास्सर्वे शबरजीवाः ।

**End:**

(तथापीदमस्तु भरतवाक्यम्)—

मङ्गलं देवकीवसुदेवभाग्याय मङ्गलं जगदेकनायकाय ।
मङ्गलं भक्तेच्छयाङ्गीकृताङ्गाय मङ्गलं धर्मसंस्थापनाय ॥
मङ्गलं त्रैलोक्यलक्ष्म्यैकवासाय मङ्गलं गोपिकावल्लभाय ।
मङ्गलं पशुपालवेषसुमनोज्ञाय मङ्गलं गोवर्धनाचलभृते ॥
मङ्गलं द्रौपदीमानपरिपालाय मङ्गलं कुरुराजदूतवपुषे ।
मङ्गलं शक्रसुतसारथये मङ्गलं गीतामृताम्बुनिधये ॥

---

## No. 12628. रघुवीरचरितम्.
## RAGHUVĪRACARITAM.

Substance, paper. Size, 8½ × 6½ inches. Pages, 265. Lines, 16 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains one to six acts complete, and seven incomplete.

This drama containing in the first six acts the story of the Rāmāyaṇa from the sending of Rāma with Viśvāmitra up to the destruction of Rāvaṇa, was composed by Bhaṭṭa-Sukumāra alias Bhūṣaṇa, son of Śaṅkara and Pārvatī.

**Beginning:**

दैत्येन्द्रप्रमदाकपोलमकरीकल्पान्तवैज्ञानिक-
व्यापारैकरसाः शुभानि भवतां पुष्यन्तु विष्णोर्भुजाः ।
ये मुञ्चन्ति मुहुश्छलेन यमुनां मन्दाकिनीनिर्गम-
श्लाघासंहृतपाददर्पदमनश्रद्धासमृद्धा इव ॥

* * * *

सूत्रधारः—मुहूर्तमिव स्थित्वा, स्मरणनाटितकेन, शङ्करतनुजन्मनः पार्वतीनन्दनस्य भूषणापरनामधेयस्य भट्टसुकुमारस्य कवेः कृतिरभिनवं रघुवीरचरितं तद्यदि प्रयुञ्जीमहि महीयसी परिषदः स्यात् परितुष्टिः ।

**End:**

आखण्डलः—सकलभुवनहृदयशोकशङ्कूद्धरणसन्दर्शितया दशमुखवधवार्तया परितोषयितुममर्त्यानात्मसदनमुपगच्छावः ।

इति परिक्रम्य निष्क्रान्तास्सर्वे ॥

**Colophon:**

दशमुखवधो नाम षष्ठोऽङ्कः ॥

ततः प्रविशति राजकार्याधिकृतेन पुरुषेण निवेद्यमानमाकर्णयन् सुमतिर्नाम विभीषणसचिवः ।

सुमतिः—वत्स भद्रमुख,

मुच्यन्तामचिरेण चारकगता गीर्वाणवन्दीगणाः
नीयन्ताममरेश्वरस्य नगरीं भूयोऽपि कल्पद्रुमाः ।
पृथ्वीधारणखेदिनः फणिपतेः साहाय्यदानान्मुदं
तत्तत्सीम्नि यथापुरं ऋतु(कृत)पदाः कुर्वन्तु दिग्दन्तिनः ॥

* * * *

स्वभावः काठिन्यं भवतु तदपि प्राच्यशिखरी
चिरात् प्रत्यावृत्ते प्रियसुहृदि देवे हिमरुचि ।

The subject-matter of the first six acts are—

१. सुचरितागमनम्.
२. पिनाकभङ्गः.
३. परशुरामजयः.
४. दशमुखोत्कण्ठाविनोदः.
५. सुग्रीवराज्यलाभः.
६. दशमुखवधः.

## No. 12629. रत्नावली.

## RATNĀVALĪ.

Substance, palm-leaf (Śritāla). Size, 10¾ × ¾ inches. Pages, 111. Lines, 5 on a page. Character, Malayāḷam. Condition, injured. Appearance, old.

Complete.

A drama (Nāṭika) in four acts: by Śrīharṣa. The plot narrates the story of the marriage of Udayana, King of the Vatsa, with Vāsavadatta.

**Beginning:**

पादाग्रस्थितया मुहुः स्तनभरेणानीतया नम्रतां
शम्भोः सस्पृहलोचनत्रयपथं यान्त्या तदाराधने ।
ह्रीमत्या शिरसीहितः सपुलकस्वेदोद्गमोत्कम्पया
विश्लिष्यन्कुसुमाञ्जलिर्गिरिजया क्षिप्तोऽन्तरे पातु वः ॥

* * * *

सूत्र—अलमतिविस्तरेण । अद्याहं वसन्तोत्सवे सबहुमानमाहूय नानादिग्देशागतेन राज्ञ(:) श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः "अस्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालङ्कृता रत्नावली नाम नाटिका कृतेत्यस्माभि(:) श्रोत्रपरम्परया श्रुतम्; न तु प्रयोगतो दृष्टम् । तत्तस्यैव राज्ञ(:) श्रीहर्षदेवस्य सर्वजनहृदयाह्लादिनो बहुमानादस्मासु चानुग्रहबुद्ध्या वा यथावत् प्रयोगेण त्वया नाटयितव्या । इति ।

* * * *

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

उर्वीदु(मु)द्दामसस्या(स्यां) जनयतु विकिरन् वासवो वृष्टिमिष्टां
तुष्टौ त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः ।
आकल्पान्तं च भूयात् स्थिररसमुचितः सङ्गमं(मः) सज्जनानां
निश्शेषा यान्तु शान्ति खरजनवचसो दुस्सहा वज्रलेपाः ॥

[इति निष्कान्ताः सर्वे.] ॥

**Colophon:**

इति चतुर्थोऽङ्कः ॥

## No. 12630. रत्नावली.

## RATNĀVALI.

Substance, palm-leaf. Size, 17¾ × 1½ inches. Pages, 65. Lines, 5 on a page. Character, Grantha and Telugu. Condition, good. Appearance, new.

Fol. 30 is lost.

Begins on fol. 9*a*. The other work herein is Daśarūpakavivaraṇa 1*a*.

Complete.

Same work as the above.

---

## No. 12631. रत्नावली.

## RATNĀVALI.

Substance, palm-leaf. Size, 18¾ × 1½ inches. Pages, 50. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Prabōdhacandrōdaya 26*a*.

Complete.

Same work as the above.

---

## No. 12632. रत्नेश्वरप्रसादनम्.

## RATNĒŚVARAPRASĀDANAM.

Substance, paper. Size, 11 × 8¾ inches. Pages, 94. Lines, 22 on a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Complete.

This drama in five acts is based on the story of the marriage of Ratnacūḍa with Ratnāvali, daughter of a Gandharva named Vasubhūti. She is said to have accomplished her object by propitiating God Ratnēśvara worshipped at Benares. The drama was intended to be enacted on the occasion of the festival of God Svayambhūnātha worshipped at Mūlāṇḍanagara (Muḷḷaṇḍrum) in the North Arcot district. The author was Gururāma, son of Svayambhūnātha and grandson of Tyāgarāja of Kaśyapagōtra and the daughter's son of Rājanātha. The author mentions certain distinguished predecessors of his family, such as Aghōraśivadēśika, Prasādavallabha, Ḍhakkāsabhāpati and Bhāskarācārya. They are also mentioned in the work Vibhāgaratnamālikā described under R. No. 1739 of the Triennial Catalogue, Vol. II, Part I-C. Gururāma is the author also of Madanagōpālavilāsa (vide No. 12576 ante).

**Beginning:**

शम्भोस्तत्प्रथमं विहारभवनं सम्भाविताया रहः
स्तम्भोपान्तनिगूढसस्मितसखीनेत्राम्बुजैरर्चिता ।
चूडाचन्द्रसुलक्षिता मणिमये दीपेऽपि हस्तावृते
देव्याः प्रेमभय(र)त्रपाशबलिता मुग्धा स्थितिः पातु वः ॥

* * * *

नान्द्यन्ते सूत्रधारः—अये कथममी सीरोत्कषणसीमन्तितशालेयसीमान्तरप्रादुर्भूतस्य संसक्तटेश्वरीसाकूतनयनखञ्जनद्वयविहारव्यञ्जितसौभाग्यस्य शिशिरकरेखाभिज्ञानचीटिकासनाथस्य मूलाण्डनगरभागधेयनिधेर्भगवतः स्वयम्भूनाथदेवस्य यात्रायामुपस्थातव्याः सभास्ताराः । बहवः किल वलभि(व)दभिनन्दिताः कालिदासभवभूतिप्रभृतीनां प्रबन्धाभिनयेन । इदानीं तु कस्य वा कवेः कतमेन वस्तुना केन वा रूपकेण सभासदः समाजयामि ।

* * * *

पारि—भाव केवलमिदं जानामि रत्नेश्वरप्रसादनं नाम नाटकमस्तीति, न पुनरस्य निबन्द्धारम् ।

सू—विहस्य, अन्तरेण चन्द्रमसमनुभूतचन्द्रातपस्य सरणिमनुसृतोऽसि । श्रूयताम् । अस्ति खलु वेदाभिमतसकलशैवागमजीवातूनां सोमपीथिनामधीतिनां यजुषि सम्यगाम्नातिनां शास्त्रेषु दैनन्दिनशिवार्चनानुभूतजीवपैकतासमाधिसाधनक्षुब्धशक्तिस्रुतामृतधाराप्लावितबैन्दवशरीराणां चतुर्विधकविताचमत्कारविरुदढक्कारवढात्कारमुखरितहरिन्मुखानां पवित्रीकृतकाश्यपगोत्राणां परमशिवप्रभृत्यात्मपर्यन्ताविच्छिन्न[मवौघ]क्रमगुरुपरम्परासम्प्रदायप्रवर्त्तकानां चेरचोलपाण्ड्यप्रथमाराध्यानामघोरशिवदेशिकप्रसादवल्लभढक्कासभापतिभास्कराचार्यप्रभृतीनां प्राचामाचार्यपादानामनूचानवंशावतंसस्य त्यागराजाचार्यसुकृतपरिणामस्य पवित्रकीर्तेस्तत्रभवतः स्वयम्भूनाथदेशिकस्यात्मजन्मा साहित्यविषयसाम्राज्यपट्टाभिषिक्तस्य राजनाथकवेर्दौहित्रतानुकूलवाग्विलासः श्रीचिदम्बरेश्वरप्रसादलब्धपरिगृहीतो गुरुरामनामा गुरुकुलोत्तंसः । स एवास्य प्रबन्द्धा[स्य] नाटकस्य ।

**End:**

(तथापीदमस्तु भरतवाक्यम्)—

वर्तन्तां सुखिताः प्रजा वसुमती राजन्वती जायतां
वाचः संवननाय जाग्रतु सतां शब्दार्थताटङ्किताः ।

स्वायत्तेन्द्रियवृत्तयः श्रुतिमताचारा रमन्तां बुधाः
भक्तिः शम्भुपरायणा भगवती सर्वेषु सम्पद्यताम् ॥
इति निष्क्रान्ताः सर्वे ॥

इति पञ्चमोऽङ्कः ॥

**Colophon:**

इति गुरुरामकविकृतं रत्नेश्वरप्रसादननाटकं सम्पूर्णम् ॥

---

No. 12633. रसिकजनरसोल्लासभाणः.
RASIKAJANARASŌLLĀSABHĀṆAḤ.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 35. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, new.

Complete.

See for description and extract M. Seshagiri Sastri's Report No. I of 1896-97, pages 6 and 85 to 87.

This MS. is said to have belonged formerly to Annāsāmi Ayyaṅgār.

---

No. 12634. रामराज्याभिषेकनाटकम्.
RĀMARĀJYĀBHIṢĒKANĀṬAKAM.

Substance, palm-leaf. Size, 17⅞ × 1¼ inches. Pages, 286. Lines, 12 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete.

A drama describing the events that took place in the life of Rāma after his coronation: by Vīrarāghava, son of Īśvara of Kauṇḍinyagōtra and Kamākṣi. The author lived in Sahajimahārājapura, and also composed Vallipariṇaya (vide No. 12613).

**Beginning:**

प्रह्लादाभिमतप्रदानरभसादाकण्ठकण्ठीरवो
वक्षस्तीक्ष्णमुखैर्नखैर्विदलयन् हैरण्यमासेदिवान् ।
भक्ताभ्यर्थनया रुषं परिहरन् लक्ष्म्याश्च संवीक्षया
. . . . . परं दिशतु वस्तन्मङ्गलं मङ्गलम् ॥

* * * *

भो भो ज्योतिर्मखस्य महोत्सवदिदृक्षया समुपगता नानादिगन्तवासिनो दीर्घदर्शिनः तत्रभवतो वः अभिनवरूपकाभिनयेनानन्दयितुमुत्कण्ठितोऽस्मि ।

* * * *

सू—(सासूयमिव) किं सर्वविदितं तमपि पृच्छसि।

यद्वंश्याः सावुवश्याः सरसिरुहसुहृत्तेजसः स्वैस्तपोभिः
दुस्साधैर्लब्धवाणीरमणपदमुखाच्छ्रोत्रियाणां प्रवेकाः ।
कौण्डिन्याम्भोधिचन्द्राः कविकुलतिलकादीश्वरप्राज्ञवर्यात्
कामाक्ष्यां वीरशब्दादिमपदसहितो राघवो यः सुजातः ॥

पा—सानुस्मरणम्, अव्व सव्वं विण्णादं एव्व एक्कं मेत्तन्दस्सम् ।
इमंसरूवयस्स किण्णामहेयत्ति ।

*   *   *   *

सू—सरोषमिव किन्न विदितं श्रीरामराज्याभिषेकमिति पादयत्याद्यक्षरयोजनया ।

*   *   *   *

(नेपथ्ये) शृणु भोः समुत्पादितसर्वजनभद्रो रामभद्रो नाटकनेता ।

सू—(कर्णं दत्वा) अहो मन्मनोऽनुसारिता नेपथ्यवचनस्य । यतः श्रीरामराज्याभिषेकवर्णनप्रवृत्तयोरस्मन्मित्रयोर्वचनमिव श्रूयते ।

**End:**

(तथापीदमस्तु भरतवाक्यम्)—
विप्रा हर्षभराश्रयाः प्रकृतयो राजानुरक्ता मही
देशः सस्यमहीरुहैः पुलकितो धर्माः समुच्छ्रायिणः ।
निर्विघ्नं च तपस्विनां बहुतपांस्याम्नायमार्गाध्वगाः
सर्वे सन्तु महीभुजोऽपि च विशः शूद्राः स्वधर्मे रताः ॥

इति निष्कान्तास्सर्वे ॥

**Colophon:**

सप्तमोऽङ्कः ॥

---

## No. 12635. रामराज्याभिषेकनाटकम्.
## RĀMARĀJYĀBHIṢĒKANĀṬAKAM.

Substance, palm-leaf. Size, 10¼ × 1½ inches. Pages, 360. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, old.

Breaks off in the sixth act.

Same work as the above.

---

## No. 12636. रामाभ्युदयम्.
## RĀMĀBHYUDAYAM.

Substance, paper. Size, 12⅞ × 4⅞ inches. Pages, 27. Lines, 10 on a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Begins on fol. 1*b*. The other work herein is Laṭakamēlakaprahasana 15*b*.

Complete in two acts.

A drama by Vyasa-Rāmadēva describing the glorious events that occurred in the life of Rāma after his coronation. The author is said to have been in the court of King Mēru, son of Rāmadēva.

Dated: Samvat 1907, Kārtika, dark fortnight, 1st.

**Beginning:**

विश्वोल्लासि निशाविसारि तिमिरं दूरं निरस्यादरा-
दारादेव हुताशनाधिगतया कान्त्या स्फुरन्त्या युतः ।
उन्मीलत्कमलावलीपरिमलव्यालोलभृङ्गाङ्गना-
गीतस्फीतयशःप्रशस्तिरुदयं तन्वन् रविः पातु वः ॥

(नान्द्यन्ते)

सूत्रधारः—(समन्तादवलोक्य, सहर्षम्)

* * *

सूत्र—आर्ये विदितमेव तावद्भवत्या ।

अस्ति ध्वस्तसमस्तवैरिविपिनप्रोद्यत्प्रतापानल
ज्वालालीविमलीकृतत्रिभुवनः श्रीरामदेवात्मजः ।
आयुष्मानवनीवनीपकमनस्सङ्कल्पकल्पद्रुमो
मेरुः स्मेरयशःप्रसूनपटलप्रोल्लासितोर्वीतलः ॥

अपि च—

रणक्षोणीरङ्गप्रसृमरविपक्षक्षितिभुजां भुजादण्डोद्यत्तरसमरकण्डूभरहरः ।
शरद्राकाराकारमणकिरणालीशुचिलसद्यशश्श्रीः श्रीमेरुः कथमिव हि वर्ण्यः
[कविजनैः ॥

तेन च प्रबलरिपुकु(ल)जलधिसंशोषणागस्त्येन विविधवीरचूडामणिना महा-कारुणिकश्रीमेरुदेवेन समादिष्टोऽस्मि यथा "सरसकविना व्यासश्रीरामदेवेन विरचितमभिनवं रामाभ्युदयं नाम छायानाटकमभिनीयमानं निरूपयितुमिच्छामः ।

* * * *

तन्मन्ये ममापि फलितमद्य सङ्कल्पकल्पपादपेन । यतः—

श्रीरामस्य चरित्रमद्भुतमिदं सभ्या गुणग्राहिणः
शैलूषाश्च चतुर्विधेऽप्यभिनये वैदग्ध्यमाबिभ्रति ।
सारस्यं कलयन्ति रामसुकवेर्वाचः सुधासोदराः
श्रीमानेष समापतिर्विजयते मेरुर्वदान्याग्रणीः ॥

**End:**

वसिष्ठः—(रामं प्रति) वत्स ! किं ते भूयः प्रियमुपकरोमि ?

रामः—अतः परमपि प्रियमस्ति ? ।

यशो यदेतदखिलं दशाननजयादिकम् ।
मया प्राप्तं स सर्वोऽपि प्रभावो भवदाशिषाम् ॥

तथापीदमस्तु (भरतवाक्यम्)—

पर्जन्यः कामवर्षी भवतु च वसुधा रत्नसूर्मुक्तवैरा
भूपालाः पालयन्तु क्षितिवलयमिदं नीरुजः श(स)न्तु लोकाः ।
अश्रान्तं सज्जनानां मनसि नवसुधासारवर्षं वितन्व-
न्नासंसारं कवीनां विलसतु विमलः कोऽपि वाचां विलासः ॥

(इति [श्री] परिक्रम्य निःक्रान्तास्सर्वे)

**Colophon:**

द्वितीयोऽङ्कः समाप्तः ॥

---

## No. 12637. रुक्मिणीपरिणयम्.
## RUKMIṆĪPARIṆAYAM.

*Pages, 159. Lines, 25 on a page.*

Begins on fol. 1a of the MS. described under No. 11829.

Complete in seven acts.

A drama by Kavitārkikasiṁha, son of Vēṅkaṭadēśika and grandson of Nṛsiṁha, who was a pupil of Vēṅkaṭārya. It describes the marriage of Rukmiṇī and Kṛṣṇa. The author was born in the Śrīvatsagōtra and was a pupil of Raṅgarāmānujamuni. He was a native of Guptakuṭi, in the Bhūvarāhakṣētra, on the banks of the river, Maṇimuktānadi. This place is now known as Kūttakkuḍi, a village near Śrīmuṣṇam (South Arcot district).

**Beginning:**

या माता जगतां क्षितेः समुदिता सीरध्वजस्याध्वरे
यां सीतेत्युदितां स्वविक्रमफलं श्रीरामचन्द्रोऽग्रहीत् ।
ख्यातिं सोऽप्यभजद्ययैव विजयीत्येकातपत्रेश्वरः
सा श्रीराश्रितरक्षणैकनिपुणा भूयाज्जगत्सम्पदे ॥

*　*　*　*

पतङ्गराजतरङ्गिणीतीरपारिजातस्य प्रपन्नजनरक्षादीक्षितस्य हेमाब्जनायकी-प्राणनाथस्य देवनाथस्य भगवतो वसन्तोत्सवयात्रायां तत्रत्या नानादिगन्तरागताश्च सकलकलाविलासरसिका मत्सरपदवीदवीयांसो विद्वांसः श्रीमतः श्रुतिशिखरगुरो-र्विजयास्थानमण्टपमधिवसन्ति ।

*　*　*　*

नटी—देण हि तुम्हेहिं णादिचिरपरिल्लिअसिक्खिदकअपत्तवग्गं रुक्मिणीपरिणअं . . . . . . . . नाम नवीनं नाटकमभिनेतुमाज्ञापयत्वार्यः ।

* * * *

नटी—अय्य को उण तस्स पओअस्स कई (छाया—) कः पुनस्तस्य प्रयोगस्य कविः ? ।

सू—अस्ति खलु भगवतो भूवराहस्य प्रसादेन समधिगतभागीरथीप्रभावाया मणिमुक्ताख्यतरङ्गिण्यास्तीरे महर्षिगणनिवासयोग्यो गुप्तकुटीनामको ग्रामः ।

तत्र किल—

प्रतिभटकथाटोपोत्पाटक्रियापटुवागभू-
न्नरहरिगुरुः ख्यातः श्रीमान्नृसिंह इवापरः ।
समभजत यः सर्वा विद्या नवीनशिरोमणि-
प्रभृतिविहितस्फूर्तेस्तस्माच्च वेङ्कटदेशिकात् ॥

यश्चैतमनुदिनमेवमनुसन्धत्ते—

"अनवीनगवीशिरोविहारिण्यनपायेऽपि हये रमासहाये ।
स नवीनशिरोमणौ गुरौ मे सदृशो वेङ्कटदेशिकेऽस्तु भावः" ॥ इति ।
अजनि जनितामोदस्तस्माद्गुरोः शमभूषणो
हयमुखदयालब्धोद्बोधः स वेङ्कटदेशिकः ।
समनुकथयन्त्यात्मज्ञानां गुणव्रजमन्ततः
श्रिततनुमिह प्रादुर्भूतं समेत्य यदात्मना ॥
तस्य श्रीवत्सवंशामृतजलधिविधोर्देशिकस्यात्मजातः
श्रीमद्वेदान्तविद्यागुरुवरचरणाम्भोजनिध्यानशीलः ।
शान्तो भक्त्या विनीतः कविकथकहरेराख्ययालङ्कृतोऽसा-
विन्धे श्रीरङ्गरामानुजगुरुकरुणावाहिनीपावितात्मा ॥

योऽसावनुकूलमेवमावर्तयति—

श्रीरङ्गरामानुजदेशिकाख्यासारं गृणन् नान्यदहं स्मरामि ।
यत्कीर्तनाच्छ्रीपतिसंयमीन्द्रवेदान्तविद्यागुरवश्च तुष्टाः ॥
कवितार्किकसिंहनामकः कविरेष प्रणिनाय नाटकम् ।
इदमेव हि रुक्मा(क्मि)णीप्रियं रघुनाथं परितोषयन् हरिम् ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

जयतु जगति देवो रुक्मिणीप्राणकान्तस्त्रिजगति विजयन्तां श्रीपतेरेकभक्ताः ।
अधिगतपरमार्थाः सन्तु सन्तोऽपि लोके निगममकुटसूरेर्वाक्सुधास्वादनेन ॥

(इति निष्क्रान्ताः सर्वे)

सप्तमोऽङ्कः ॥

**Colophon:**

इति श्रीवत्सकुलतिलकस्य, नवीनवेङ्कटार्याधिगतसकलकलाविलासनिलय-नरसिंहदेशिकाभिधगुरुसिंहतनूजस्य, निखिलविद्यानिधेः, हयवदनपदनलिनचिन्तननिरन्तरान्तरङ्गस्य, श्रीमद्वेङ्कटदेशिकस्य तनयेन कवितार्किकसिंहनामकेन कविना विरचितं रुक्मिणीपरिणयं नाम नाटकं सम्पूर्णम् ॥

---

## No. 12638. रुक्मिणीपरिणयम्.
## RUKMIṆĪPARIṆAYAM.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 206. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

Same work as the above.

The former owner of the MS. is stated to be Kuppusvāmi Ācāriyar, son of Raṅgācārya of Maḍayāmbalam.

---

## No. 12639. रोचनानन्दम्.
## RŌCANĀNANDAM.

Pages, 20. Lines, 8 on a page.

Begins on fol. 33*a* of the MS. described under No. 12626.

Breaks off in the third act.

A drama the plot of which is the love between Aniruddha, son of Pradyumna, and Rōcanā, daughter of Rukmavān and the grand-daughter of Rukmin. The author is Vallisahāyakavi of Vādhūlagōtra (vide No. 12625), and the drama is said to have been enacted on the occasion of the festival of God Mārgasahāyasvāmin worshipped in Viriñcipuram.

**Beginning:**

भृङ्गीसङ्गीतसञ्जातकर्णतालमनोहरम् ।
निषादबृंहितं किञ्चिद्वस्त्वस्तु प्रस्तुताय नः ॥

* * * *

(नान्धन्ते) सूत्रधारः—

गुरुरिह भरतकुलस्य श्रीमान् पुनरुक्तमामकविबोधः ।

भुजगनटनादिविद्याविज्ञो नारायणो गुरुर्जयति ॥

(इति पुष्पाञ्जलिं विकीर्य, नेपथ्याभिमुखमवलोक्य) आर्ये, इतः ।

प्रविश्य, नटी—अय्य इयं ह्मि.

सू—आर्ये सम्प्रति पुनरुत्तरफल्गुन्युत्सवोत्तरे विरिञ्चिनगरीश्वरस्य भगवतो मार्गबन्धोः सेवासमागतैरादिष्टमिदमाकर्णितं किं भवत्या ।

* * * *

सू—(सानुस्मरणाश्चर्यम् ।) प्रतिष्ठितोऽत्रास्मि वरोरु दिष्ट्या, यतो लोचनानन्दमित्युक्तमार्यया ।

रोचनानन्दसंज्ञं तदस्ति नाटकमीदृशम् ।

वल्लीसहायकविना वाधूलेन विनिर्मितम् ॥

* * * *

नटी—वासुदेवस्य स्यालको रुक्मी खलु भगवतो विपक्षः तस्य पुत्रकन्यकां रोचनामनिरुद्धयोग्यरूपेति श्रुत्वा तया लाञ्छितं चित्रफलकमेष कुमारस्य प्रियवयस्यः गृहीत्वा किन्त्वागच्छति ।

**End:**

साक्षाच्छम्भोः साक्षिणी नाट्यवृत्तेः शैलीन्द्रश्रीस्फीतिनिरिन्द्रलक्ष्मीः ।

भूयः श्रेयश्शंसिनी सद्गुणानामार्यैवार्यैर्वन्द्यते साधु सन्ध्या ॥

तदेहि समयोचितमावश्यकं निर्वर्तयावः (इति निष्कान्तौ) ॥

**Colophon:**

द्वितीयोऽङ्कः ॥

नेपथ्ये—अपि नाम करूशेश्वरनन्दनागमसम्मोदातिरेकेण तत्सभाजनाय

* * * *

कलि—रुक्मवतीप्रणयनिर्बन्धाद्यवराजस्त्वं गतिः स्वसुस्नेहात् ।

सा पुनस्संविधानेन क्षपणीया ।

रुक्मी.

---

## No. 12640. लक्ष्मीस्वयंवरम्.

## LAKṢMĪSVAYAṀVARAM.

Pages, 60. Lines, 16 on a page.

Begins on fol. 1a of the MS. described under No. 12536.

Contains the acts two to five.

Same work as that described under No. 15 on pages 5, 81 and 82 of M. Seshagiri Sastri's Report No. 1.

This copy was transcribed from the MS. of the Library described under the next number.

---

## No. 12641. लक्ष्मीस्वयंवरम्.
## LAKṢMĪSVAYAMVARAM.

Pages, 158. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 12537.

Same work as the above.

This is the original of the MS. described above.

---

## No. 12642. लटकमेलकम्.
## LAṬAKAMĒLAKAM.

Pages, 25. Lines, 10 on a page.

Begins on fol. 155 of the MS. described under No. 12636.

Complete in two acts.

A Prahasana: by Śaṅkhadhara who wrote it at the instance of King Gōvindadēva.

**Beginning**:

गौरीचुम्बनचञ्चलाञ्चलवलच्चन्द्रप्रभामण्डलं
व्यावल्गत्फणिकुण्डलं रतिरसप्रस्विन्नगण्डस्थलम् ।
प्रौढप्रेमपरम्परापरिचयप्रोत्फुल्लनेत्राञ्चलं
शम्भोरस्तु विभूतये त्रिजगतामुन्मत्तगङ्गं शिरः ॥

* * * *

(नान्द्यन्ते)

सूत्रधारः—अलमतिविस्तरेण । यतः—

गोविन्ददेवः प्रथितः पृथिव्यां श्रीमान् महामाण्डलिकाधिराजः ।
कविप्रियो नाटकनर्तनार्थमादेशयन्मां रतिरङ्गमल्लः ॥

यदद्य "वसन्तसमयविकाससमुचितेन कविराजश्रीशङ्खधरविरचितेन लटकमेलकनाम्ना प्रहसनेनास्मान् विनोदय" इति ।

* * * *

(नेपथ्ये) अये कोऽयमनेकपण्डितमण्डितायां सभायां कविराजतां नाटयितुं समुद्यतः ? ।

सूत्रधारः—अलमतिप्रलपितेन । यतः—

चित्रं चरित्रं स्खलितमतानां शीलाकरः शङ्खधरस्तनोति ।
विद्वज्ज(ना)नां विनयानुवर्ती धात्रीपवित्रीकरणः कवीन्द्रः ।

किं च गोविन्ददेवेश्वरपुरस्कृतायाः सरस्वत्याः कुतो दुर्जनतर्जनावकाशः ? ॥

उक्तं च तेनैव कविना—

वक्रा विश्वविरोधिनः कतिपये द्वित्राः पवित्राशयाः
क्रूरोक्तिप्रकरोद्धुराश्चिचतुरा दोषोन्मुखाः पद्मयाः ।
दृष्टः क्वापि लसद्द्विजिह्वदमनव्यापारलीलानिधि-
र्गोविन्दादपरः परं परगुणग्राही न कश्चित्पुनः ॥

(श्रुत्वा पुरोऽवलोक्य च) अये दन्तुरायाः कुट्टिन्याः पुरतो भुजङ्गसङ्केतं वर्तते, तदुपसर्पामि ।

इति निष्क्रान्तः । प्रस्तावना ।

**End:**

भूदेवस्वस्तिवादैस्तिरयतु दुरितं निर्जराः सन्तु तुष्टा
दुष्टप्रौढारिवीरव्रजविजयकराः शीलिनः क्षोणिपालाः ।
आस्तां विद्वच्चकोरश्रवणपुटचमत्कारि काव्यं कवीना-
मस्तु व्यामोहशान्तिः सृजतु हृदि मुदं निश्चलां चन्द्रचूडः ॥

(इति निष्क्रान्ताः सर्वे)

द्वितीयोऽङ्कः ॥

**Colophon:**

इति कविराजश्रीशङ्खधरविरचितं लटकमेलकं नाम प्रहसनं नाटकं समाप्तम् ॥

संवत् १९०८.

---

## No. 12643. वल्लीपरिणयम्.
## VALLĪPARIṆAYAM.

Substance, palm-leaf. Size, 17¾ × 1⅝ inches. Pages, 78. Lines, 11 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete.

A drama the plot of which is the marriage between Vaḷḷiyammai and God Subrahmanya: by Vīrarāghava, son of Īśvara and Kāmākṣi. It is said to have been staged on the occasion of the festival of Kulīreśvara,

a form of Śiva, worshipped in Sahajimahārājapura (Tiruviśanallūr), the native place of the author. He is also the author of Rāmarājyābhiṣēka-nāṭaka (vide No. 12634) and Pārvatistōtra (vide No. 9608).

**Beginning :**

या गङ्गा शिरसा धृता सपदि सा प्राप्ता स्वयं पादयोः
पार्वत्याः प्रणतिं करोत्वपि च सा सापत्न्यवैरं त्यजेत् ।
इत्युद्वाहविधौ स्मरन्निव स यो नम्रीबभूवाश्मके
तत्पादग्रहकैतवात् पशुपतिर्भूयात्सुखौघाय वः ॥

(नान्द्यन्ते)

सूत्रधारः—(सरसमभितो विलोक्य सहर्षं) प्रवृत्तमेव रङ्गमङ्गलम् ।

भो भो निखिलनिर्लिम्पचूडामणिमरीचिवीचीतरङ्गितचरणारविन्दनखमयूखदुग्धाम्बुधेः सहजिमहाराजपुरवास्तव्यविद्वज्जनपुण्यपरिपाकस्य भगवतः कुलरीश्वरस्य महोत्सवदिदृक्षया सम्मिलिताः सभासदः ।

* * * *

(पुनः समन्ततोवलोक्य)

सभ्याः सारविदप्रियाः ससमयो वासन्तिको नायकः
सेनानीः सदसोऽधिपो वसुमतीनाथः शिवेन्द्राह्वयः ।
नव्यं भव्यगुणं च रूपकमिदं सोऽयं स्वतन्त्रः कविः
तन्त्रेष्वप्यखिलेषु नाट्यसरणौ कामं प्रवीणा वयम् ॥

* * * *

सू—(सरोषमिव) किं सोऽपि पष्टव्यः ।

यद्वंश्या भुवि पङ्क्तिपावनतमाः शास्त्राब्धिकूलङ्कषाः
सम्यक् प्रीणितदेवताश्शिथिलितद्वैतान्धकारोत्कराः ।
कामाक्षीश्वरयोः सतीमतिमतां कोटीरयोर्नन्दनः
साहेन्दोः पुरि वीरराघवसुधीः कौण्डिन्यगोत्रोद्भवः ॥

* * * *

सू—अयि मुग्धे नाद्यापि विज्ञातं वल्लीपरिणयमिति ।

* * * *

सू—मुग्धे शृणु पारमहंस्यं रहस्यम् ।

मृगाङ्गना सा शिवयोगिदर्शनादसूत वल्लीवलये यदेतिकाम् ।
ततो ह्यमुष्याः शबराधिपेन सा वल्लीति वात्सल्यवता कृताभिधा ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

सस्यौघैः पुलकीकृता वसुमती वर्षाभिवृद्धैरियं
विप्राणां निवहः श्रुतिस्मृतिविधिव्यग्रो हुतावग्रहः ।
मान्यो धन्यतमः कविश्च स सुतश्रीबन्धुमित्रान्वितो
राजा वर्णचतुष्टयीहितकरो श्रीताहितो वर्तताम् ॥

इति निष्क्रान्तास्सर्वे ॥

पञ्चमोऽङ्कः ॥

**Colophon:**

वल्लीपरिणयं नाम नाटकं सम्पूर्णम् ॥

---

No. **12644.** वसन्ततिलकभाणः.

VASANTATILAKABHAṆAḤ.

Pages, 87. Lines, 13 on a page.

Begins on fol. 157*b* of the MS. described under No. 12615.

Written on one side of paper. On the other side a translation by C. P. Brown with notes is given for five pages.

Complete.

Same work as that described under R. No. 1456(*a*) of the Triennial Catalogue of MSS., Vol. II, Part I-C. By Varadācārya.

**End:**

कटक्षेषु जयन्तु भूपतीनां कवयः काङ्क्षितकल्पपादपानाम् ।
वचसां वलमानदिव्यगन्धैः मधुरस्यन्दमनोहरैर्निगुम्भैः ॥

तथाप्येतदस्तु (भरतवाक्यम्)—

काञ्चीपुरीमधिवसन् कमनीयभूमा कामी स एव वरदः कमलामहिष्याः ।
आकल्पयन्वसुमतीमनुरज्यमानां कल्पद्रुमो जयतु कश्चन मानवानाम् ॥

**Colophon:**

इति श्रीवत्सकुलतिलकभूतघटिकाशतकविसूनुवरदाचार्यविरचितो वसन्ततिलको नाम भाणः ॥

---

No. **12645.** वसन्ततिलकभाणः.

VASANTATILAKABHAṆAḤ.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 49. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

No. 12646. वसन्ततिलकभाणः.
VASANTATILAKABHĀṆAḤ.

Substance, palm-leaf. Size, 16¾ × 1⅛ inches. Pages, 54. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

Copying was finished on Thursday, the 10th day of Phālguna Śuddha of Viśvāvasu year, by Koṇḍayya.

---

No. 12647. वसन्ततिलकभाणः.
VASANTATILAKABHĀṆAḤ.

Substance, paper. Size, 9¾ × 4⅝ inches. Pages, 33. Lines, 13 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above, but with the following colophon which mentions the name of the author as Ambālacārya :—

इति घटिकासुदर्शनाचार्यसूनुना श्रीमदम्बालाचार्येण विरचितो वसन्ततिलको नाम भाणः समाप्तः ॥

---

No. 12648. वसन्ततिलकभाणः.
VASANTATILAKABHĀṆAḤ.

Pages, 78. Lines, 15 on a page.

Begins on fol. 143*a* of the MS. described under No. 12430.

Complete.

Same work as the above.

---

No. 12649. वसन्ततिलकभाणः.
VASANTATILAKABHĀṆAḤ.

Substance, paper. Size, 9⅞ × 8¼ inches. Pages, 24. Lines, 36 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Paṇḍitarāyaśataka (Telugu) 13*a*.

Complete.

Same work as the above.

The work was copied in the village of Mappōḍu and was completed on Saturday, the 2nd of Āśvayuja Bahula in the year Kīlaka.

No. **12650.** वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 40. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old. Complete.

Same work as the above.

---

No. **12651.** वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

Pages, 34. Lines, 10 on a page.

Begins on fol. 14a of the MS. described under No. 12269.

Complete.

Same work as the above.

---

No. **12652.** वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

Pages, 61. Lines, 7 on a page.

Begins on fol. 1a of the MS. described under No. 12358.

Complete.

Same work as the above.

---

No. **12653.** वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

Substance, palm-leaf. Size, 14¾ × 1¼ inches. Pages, 48. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old. Complete.

Copying was finished by Mallayya, son of Kāmā Śāstri who studied at Benares as a pupil of Garimalla Bucchayya, on Sunday, the 7th day of Āṣāḍha Śuddha.

Same work as the above.

---

No. **12654.** वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

Substance, palm-leaf. Size, 15 × 1⅝ inches. Pages, 84. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old. Complete.

Same work as the above.

No. 12655. वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 35. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

---

No. 12656. वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

Substance, palm-leaf. Size, 14⅞ × 1¼ inches. Pages, 38. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1a. The other work herein is Śṛṅgāradīpakabhāṇa 20a.

Complete.

Same work as the above.

---

No. 12657. वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

Pages, 16. Lines, 7 on a page.

Begins on fol. 69a of the MS. described under No. 12431.

Incomplete.

Same work as the above.

---

No. 12658. वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

Substance, palm-leaf. Size, 16¼ × 1⅜ inches. Pages, 46. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Incomplete.

Same work as the above.

---

No. 12659. वसुमङ्गलनाटकम्, सव्याख्यानम्.

VASUMAṄGALANĀṬAKAM WITH COMMENTARY.

Pages, 160. Lines, 26 on a page.

Begins on fol. 1a of the MS. described under No. 11618.

Complete in five acts.

A drama the plot of which is the marriage between Uparicaravasu and Girikā, daughter of Mount Kōlāhala: by Pērusūri, son of Vēṅkaṭa of Kauśikagōtra, grandson of Pērusūri and a descendant of Śrīdhara. His mother was called Vēṅkaṭa, daughter of Aṇṇādhvarin of Gautamagōtra. The drama is said to have been enacted on the occasion of the

festival of the goddess Mīnākṣī of Madura. The author's other works are Rāmacandravijaya, Bharatābhyudaya, Cakōrasandēśa and Vēṅkaṭabhāṇa. The commentator's name is not stated.

**Beginning :**

(व्या.) अथ प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तये इष्टदेवतानमस्कारस्मरणपूर्वकमाशिषं प्रयुङ्क्ते :—

(मू.) अष्टाभिः स्वकलाभिरेव रमणीरूपाभिरापादिता
मुचद्रत्नघटीविनिर्गतमणीधाराभिषेकश्रियम् ।
कोटीरोपरि मानपन्नगविनीरागप्रणालीमिव
स्थेमा कश्चिदुदेतु मङ्गलपरिष्वङ्गानुषङ्गाय नः ॥

(व्या.) एषाष्टादशपदा नान्दी । यद्यपि उदेत्विति क्रियापदे उपसर्गरूपस्य पदस्य विभागेन प्रदर्शनं न कुर्वन्ति, तथापि तिङन्तेन सह समासनविरहान्न पृथक्पदत्वभङ्गः । संहिता तु नित्या भवति ।

"संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥

इति वचनात् । इयं च नान्दी पूर्वरङ्गाङ्गत्वात् पूर्वरङ्गमित्युच्यते । रूपकादिष्ववश्यकर्तव्यं चैतत् । तदुक्तमभिनवगुप्तपादैः—

"प्रथमं पूर्वरङ्गः स्यात्ततः प्रस्तावनेति च ।
आरम्भे सर्वनाट्यानामेतत्सामान्यमिष्यते ॥" इति ॥

* * * *

(मू.)
(सू.)—अद्य खलु तटाकाभिधानाया निजजैत्रयात्रावशीकृतभुवनमण्डलाया मलयध्वजनन्दिन्या मीनाक्षीमहादेव्याः प्रवर्तमानेषु शारदोत्सवेषु परितः समागत्य समुदिताः सामाजिकाः ।

* * * *

सू—शृणु मारिष !
ख्यातैव तस्य सुकवेरिह पेरुसूरीत्याख्या यदुक्तिमधुरिम्णि न शङ्कितोऽन्यः ।
तन्नाटकं च विदितं वसुमङ्गलाख्यं यत्रासि शिक्षितमतिर्बहुधा मया त्वम् ॥

* * * *

(मू.) विदितमेव खल्वेतत्—
श्रीरामचन्द्रविजयो भरताभ्युदयश्चकोरसन्देशः ।
वेङ्कटभाणश्चेति भ्रातृकुलं चास्य नाटकस्येति ॥

**End :**

(मू.) तथापीदमस्तु (भरतवाक्यम् )—

यस्य श्रीधरवंशजस्य जननी साध्वीमणिर्गौतमी
तातः कौशिकधुर्यहस्तदुभयी श्रीविट्ठटाख्योज्वला ।
तस्य स्वाख्यपितामहस्य सुकवेरण्णाध्वरीन्द्राग्रणी
दौहित्रस्य कृतिश्चिरं विजयतां श्रीपेरुसूरेरियम् ॥

अपिच—

द्रोग्धारः प्रशमं प्रयान्तु जगतो भूरस्तु राजन्वती
कल्याणात्मरसोदयाश्च कृतयो भुवः स्वयं प्रश्नताम् ।
इभ्याः सन्तु च सत्कविप्रणयिनः सस्यानि पुष्णातु गौः
सारं सारमुपैतु सर्वजनता नित्योत्सवाह्लादिनी ॥

(इति निष्क्रान्ताः सर्वे)

**Colophon :**

पञ्चमोऽङ्कः ॥

वसुमङ्गलनाटकं संपूर्णम् ॥

(व्या.) कि(मन्य)दित्यादि प्रश्नार्थे काकुरनुसन्धेया । तथापीदमस्तु वक्ष्यमाणं भवतु । भरतवाक्यं भरतस्य नटस्य वाक्यम् ।

यस्येति । अनेन प्रशस्त्याख्यमङ्गमुक्तम् । "प्रशस्तिः शुभशंसनम्" इति लक्षणात् । तथा चास्मिन् नाटके उपक्षेपा(दी)नि चतुष्षष्टच(ष्टि)सङ्ख्याका-न्या(न्य)ङ्गान्युक्तानि । शृङ्गारस्य प्राधान्येऽपीतरे रसास्तत्र तत्र प्रतिपादिता इति ध्येयम् ॥

---

No. **12660**. वसुमङ्गलनाटकम्, सव्याख्यानम्.

VASUMAṄGALANĀṬAKAM WITH COMMENTARY.

Pages, 65. Lines, 15 on a page.

Begins on fol. 105*a* of the MS. described under No. 12439.

Complete.

Same work as the above.

---

No. **12661**. वसुमङ्गलनाटकम्, सव्याख्यानम्.

VASUMAṄGALANĀṬAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17¼ × 1½ inches. Pages, 120. Lines, 5 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete.

Same work as the above.

The scribe adds—

प्रजोत्पत्त्यभिधे वर्षे मासे वृश्चिकनामके ।
वेङ्कटेशेन लिखितं नाटकं दशमीतिथौ ॥
दिवाप्रदीपं चालशयनं वेङ्कटेशदासस्य वसुमङ्गलं नाम नाटकम् ॥

---

## No. 12662. वासन्तिकापरिणयम्.
## VĀSANTIKĀPARIṆAYAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 64. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 88*a*. The other works herein are Raghuvaṁśa 1*a*, Śiśupālavadha 10*a*, Jyautiṣaviṣaya 23*b*.

Wants beginning in the first act and breaks off in the last stanza of the fifth act.

A drama the plot of which is the marriage between Vāsantikā, the daughter of a hunter, and God Nṛsiṁha worshipped at Ahōbila. It was intended to be staged on the occasion of the vernal festival of Nṛsiṁha of Ahōbila. The author is Śaṭhakōpasvāmin, one of the pontiffs of the Ahōbila Mutt. In a complete manuscript of this work the following genealogy of the pontiffs of the Ahōbila Mutt is given:—

Ādivaṇ Śaṭhakōpasvāmin
|
Nārāyaṇasvāmin
|
Parāṅkuśasvāmin
|
Śrīnivāsasvāmin
|
Vaṇ Śaṭhakōpasvāmin
|
Ṣaṣṭha Parāṅkuśa
|
Vaṇ Śaṭhakōpasvāmin
(the author)

He says that he was a native of Bālavanam (Iḷaṅgāḍu) in Toṇḍamaṇḍala and was the great grandson of Anantārya, grandson of Camaṇṇācārya [?] and son of Śrīnivāsācārya of Bhāradvājagōtra and that he was praised by Vāhinīpati, a great poet. His original name is stated to be Tirumala and he had the title of Kavitārkikakaṇṭhīrava.

**Beginning** of the work:

दत्ता(धत्ते) हस्तयुगी सुदर्शनदरी देवस्य यस्येत्यलं
सासूयं नु तदन्यहस्तयुगली तत्साम्यलाभाशया ।

पारावारसुतापयोधरतटीकण्ठं समालम्बते
स श्रेयांसि चतुर्भुजो रचयताल्लक्ष्मीनृकण्ठीरवः ॥
अकुतोजनुषाभावि भायया यस्य हेषया ।
अस्तु मे वस्तु मेधायै कन्धरोपरि सैन्धवम् ॥

(नान्द्यन्ते)

सूत्रधारः—आर्य मारिष इतस्तावत् । आदिष्टोऽस्मि निरन्तरनमस्क्रियालङ्कर्मीणसुरराजमकुटमणिकिरणकिम्मीरितचरणारविन्दस्य गरुडाचलकुटुम्बिनो भगवतः श्रीमदहोबलेश्वरस्य वसन्तोत्सवविलुलोकिषासमायातिभोगवतैः ।

मारिषः—कथमिव ।

सूत्र—अये नृकण्ठीरवविवाहनिरूपकं प्राथमिकरसोद्दीपकं रूपकमभिनेतव्यमिति ।

मा—ममेतदाकर्ण्य चिन्ताडोलायितं चेतः । अवश्यमनतिलङ्घनीयमाज्ञापनं प्राज्ञानाम् । प्रत्येकशो नो वीणाभि(न्वि)तैव नटनसामग्री । नरसन्निहिता एव सर्वे पारिपार्श्वगाः । समस्तमिदमास्ताम् ; किन्तु वसन्तवनविहारिण्या कयाचन तरुण्या विजितान्तरङ्गः तदुपलम्भसंभावनया नागत एव नटनकर्मनर्मानुसारी नरकसेरी । तदुपरि किं विधेयमिति ।

* * * *

परमभागवतैः परिवृते श्रीमदहोबिलपुरे ।

आसीद्व्यासस्य वीप्सा शुकमुनियमकं पुण्डरीकाद्विरुक्तिः
प्रह्लादस्यानुवादः प्रथितयतिकुलग्रामणीर्वण्ठठारिः ।
प्राज्ञानां यस्तु राज्ञां पदविनतिकृतामष्टवर्णोपदेष्टा-
दष्टैश्वर्याष्टभोगानदित समधिकामष्टविख्यातवांश्च ॥

मारिषः—(सानुस्मरणम्) आः किं स एवायम् । यं किल निरङ्कुशब्रह्मचर्यव्रतमनितरानुकार्यद्रविडगाथाचार्यकुलधुर्यमनिवार्यतपश्चर्यामर्यादानुमोदितनृहर्यक्षवितीर्णचतुस्सप्ततिसंख्यानिष्णातवैष्णवकुलभद्रासनाधिपत्यं पुराविद उदाहरन्ति—

प्रणामस्तत्पदाम्भोजपरागपरमाणवे ।
यत्सङ्गमात्रादभवन्नपरागाः पुराजनाः ॥

सू—

नारायणो मुनिवरोऽथ पराङ्कुशार्यः श्रीश्रीनिवासमुनिरप्यथ वण्ठारिः ।
पश्चात्परांकुशमहामुनिराविरासीदित्थं जना जगति हन्त न जानते किम् ॥

अस्य पराङ्कुशमुनेरखिललोकविदितमपदानं जानीहि—

पूर्वं यस्तु मुकुन्ददेवविभुना स्कन्धे धृतान्दोलिकः
प्राप्तः श्रीपुरुषोत्तमं रचितवान्भक्तप्रतिष्ठापनम् ।
लब्ध्वा दन्तितुरङ्गरत्नशिबिकाछत्रद्वयीचामर-
द्वन्द्वादीनि ययौ पुनश्च विजयी कर्णाटसिंहासनम् ॥

तत्र खलु विचित्रतरवादगोष्ठीषु(नि)ष्ठीयमानमेनं प्रति तदीयद्वारि विद्वत्कवि-मूर्धन्येन वाहिनीपतिना निगदितमेव हि बिरुदपद्यम्—

प्रथमश्चरमाश्रमस्थितानां फणिराजस्य पराङ्कुशो द्वितीयः ।

. . . . . . . . . . .

गाढध्यानावधानप्रमदवहहयग्रीवदेवप्रसादा-
दब्धत्साहित्यमार्गो जगति विजयते वण्ठारिर्यतीन्द्रः ।
भाट्टानामट्टहासः फणिपतिभणितेर्भागधेयं कणाद-
व्याहारप्राणनाडी कपिलमतफलं नर्म धर्मागमानाम् ॥
योगिश्रीवण्शठारिर्जगति विजयते किं च वेदान्तयुग्मा-
चार्यो वेदोक्तमार्गस्थितिजननम(गु)रुः सर्वतन्त्रस्वतन्त्रः ।

मा—(प्रकाशम्) ।

स्वस्मिन्नवस्थिते[नवस्थिते]ऽपि पराङ्कुशमेनमन्तेवासिनमङ्गीकृत्य शश्वदात्मना समं अहोबिलेश्वरशुश्रूषायै किमयुङ्क्त ।

सू—यदि न विदितमिदमाकर्ण्यताम् । कदाचन कमललोचनः पराङ्कुशमुनेः स्वप्ने प्रकटितप्रादुर्भावो देवो नृकण्ठीरवः तदानीं वाणीमभाषत ॥

मारि—कथम् ।

सू—अस्ति खलु तुण्डीरमण्डलमण्डनायमानो वालवनं नाम महानग्रहारः । तत्र खलु,

भारद्वाजान्ववायप्रथिततिरुवनन्तार्यवर्यप्रपौत्रः
[प्रादुर्भूत्तत्त्वबोधामृतकरमुषिताशेषमोहान्धकारः]
पौत्रः श्रीचामराचार्यविबुधमणेः श्रीनिवासार्यपुत्रः ।

प्रातस्त्याम्भोजजातस्तवकसमधिकस्यन्दिमारंदधारा-
धारालोदारसूक्तिस्तिहमलय इति ख्यातिशाली विभाति ॥

* * * *

अनेन खलु युगपदेव शतलेखनीलेखनानुगुणकविताधुरंधरेण वासन्तिका-परिणयं नाम नाटकं निर्माय संमानपूर्वकमस्माकं हस्ते समर्पितम् ॥

* * * *

(नित्यं)सेवाविधिषु(जनता) निर्मितानां मुनी(स्तुती)नां

**Beginning** in the present MS :

वारंवारं वरतरुशुका वाचमालोचयन्ति ॥

अत्र सविशेषं चित्रमशेषं पश्यावः ।

विदूषकः—(सहर्षम्) अतित्तरिदं गच्छाम्ह । अम्हे णेवेज्जमोदअखण्ड-अं वि लहेअं । अतित्वरितं गच्छावः । वयं नैवेद्यमोदकखण्डमपि लभामहे ।

देवः—(सत्वरमुपसर्पति) अस्मिन् वने तपोवन इव वनदेवतामाहात्म्यादितरेतरविधुतवैरातिरेका निश्शङ्कं निर्विशन्त्यमी सत्त्वसङ्घाः ।

तथाहि—

मूले मूले वनविटपिनां मुक्तमम्भो मदैभैः
सेवंसेवं गवयनिवहाः शेरते निर्विशङ्कम् ।
कारंकारं नखरशिखरैर्गण्डकण्डूतिमेणी
वल्गंवल्गं वसति पुरतो वन्यकण्ठीरवाणाम् ॥

* * * *

**Colophon:**

श्रीमद्वेदमार्गप्रतिष्ठापनाचार्यपरमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रोभयवेदान्ताचार्यशतलेखिनीलेखानुगुणकविताधुरंधरेण कवितार्किककण्ठीरवश्रीवण्ठारियतीश्वरस्य कृतौ वासन्तिकापरिणयनाम्नि नाटके प्रथमोऽङ्कः ॥

**End:**

पिता—किं ते भूयः प्रियमुपहरामि ।

एतस्यास्तपसः फलं च फलदोऽप्यासीस्त्वमेव स्वयं
लब्धेयं दयिता(ललाम भवता लक्ष्मीप्र)सादोदयात् ।
व्याघ्रत्वं व्यपनीय ते करुणया विद्योततेऽयं सुरैः
साध्यं कर्म न किंचिदप्यभिमतं सिद्धं समस्तं च मे ॥

तथापीदमस्तु (भरतवाक्यम्)—

अर्थानन्वहमार्जयन्तु विधिवद्धर्मेण साकं नृपाः

धात्री सस्यसमेत . . . . . . . . ॥

---

## No. 12663. वासन्तिकापरिणयम्.
## VĀSANTIKĀPARIṆAYAM.

Substance, paper. Size, 13 × 8⅛ inches. Pages, 84. Lines, 20 on a page. Character, Grantha. Condition, good. Appearanse, new.

Begins on fol. 113*a*. The other work herein is Saṅkalpasūryōdaya-vyākhyā 1*a*.

Wants the beginning; almost complete.

Same work as the above.

Restored from the MS. described above.

---

## No. 12664. वासलक्ष्मीकल्याणम्.
## VĀSALAKṢMĪKALYĀṆAM.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 64. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 1*b*. The other work herein is Nāmaliṅgānuśāsana with Tamil meaning 33*a*.

Breaks off in the third act.

The plot of the drama is the marriage between Varavara or God Raṅganātha and Vāsalakṣmī, well-known as Goddess Urayūr-Nāyccī-yār, who was born as the daughter of Niculādēvī and Dharmavarman, King of Niculāpurī or Urayūr. The drama is said to have been enacted in the vernal festival of God Vīrarāghava of Tiruvallūr. The author is Rāmānujācārya, son of Śaraṇāmbācārya of Vadhūlagōtra. He is said to have had the reputation to the effect that Goddess Lakṣmī used to speak to him in person. His other works are Vīrarāghavakanakavallī-vivāha, Vēdapādarāmāyaṇa, Rāmāyaṇacampu, Siddhāntasāra, Śukavā-cika and Vardhikanyāpariṇaya (Lakṣmīkalyāṇa). He is the same as the uncle and teacher of Rāmānujadāsa, author of the Rāmānujacampu (*vide* No. 12340 *ante*).

**Beginning:**

कल्याणव्रततीपतिः करुणया कामं सदालिङ्गितः

कल्याणं वितनोतु वः कमलभूचन्द्रार्धचूडादिभिः ।

संसेव्यो विबुधैस्तपस्विभिरपि श्रीशा(लिहोत्रादि)भि-
श्चित्तार्तिप्रसरस्तटे कृतपदः कल्पद्रुमः सेविनाम् ॥

* * * *

वीरराघवनामधेयस्य पुरुषोत्तमस्य वसन्तोत्सवविलुलोकिषया समवेताः समस्ताः सभास्ताराः ।

* * * *

सूत्रधारः—

मायिनां मेघनादानामप्रत्यक्षोपजीविनाम् ।
शिक्षको लक्ष्मणाचार्यो रक्षिता येन देशिकाः ॥

[पुङ्गवानाम् ।
सोऽयं त्यजन्निजजनान् स्वसुरात्मजातं (यं ना)त्यजत्परिवृढो यति-
विद्योतते स किल दाशरथिर्बुधानां द्वयो वधूलकुलवारिधिपूर्णचन्द्रः ॥

तत्कुलं स्वजनुषा (विभूष)यन् सत्कुलं गुणधनैः प्रतोषयन् ।
स श्रुतिस्मृतिविचारदक्षिणो विश्रुतो जयति रङ्गराड् गुरुः ॥

बन्धान्मुक्तो मदपरवशः प्र(प्रौढ)दन्तावलेन्द्रः
सेवित्वा यं सभयविनयं स्वीयमालानमाप ।
यत्पादाम्बुप्रथितविभवं सर्वरक्षोनिरासात्
शार्दूलो यत्करसरसिजस्पर्शतः प्राप . . ॥

(श्री)रामानुजपक्षधुर्ययमिनः सौम्योपयन्तुः पदे
संश्रित्य प्रथिता वरप्रदमुखा अष्टौ महान्तोऽभवन् ।
कोलाधीश्वरशासनेन दधतः शेषस्य भूमिं गजा
अष्टा . . . . . भप्रभृतयो धुर्त्यां सहाया इव ॥

तेषां वरप्रदगुरुः प्रवरो गुरूणां श्रीरङ्गराजपदपङ्कजरेखिकात्मा ।
आसीत्तदीयचरणाश्रितपङ्क्ति(धुर्यो) यो भूमिपालविधृतां शिबिकां प्रपन्नः॥

तद्वंशमौक्तिकमणी शरणाम्बार्यप्रसन्नवरदार्यौ ।
जन्मविबोधनजनकौ महितौ रामानुजस्य यस्यास्ताम् ॥

(जमृ)ततुलितवाचा हर्षिताशेषलोकः स किल सकलविद्याधाम रामानुजार्यः ।
व्यरचिषत मनोज्ञास्तेन केचित्प्रबन्धाः समजनि कमलायास्तस्य वाकेलि(रथ्या) ॥

नटी—के उणो पवन्धा । का णाम वाकेली । के पुनः प्रबन्धाः । का नाम वाकेली ।

सूत्र—

श्रीवीरराघवसुव(र्णलताचि)वाहो रामायणं निगमपाद्मदोऽन्त्यचम्पुः ।
सिद्धान्तसारशुकवाचिकवार्धिकन्याकल्याणमुख्यकृतयो विलसन्ति तस्य ॥

मातः काञ्चनवल्लि देहि सरसां (वाचं म)धुस्यन्दिनी
वत्सास्त्वेवमतः किमिच्छसि परं पद्मे मतिं ते स्तुतौ ।
बाल स्यादपरं किमम्ब नियतं वासस्त्वदीये पुरे
पुण्यावर्तसमाह्वये सुत शतं वर्षा(न् वसेस्त्वं) सुखी ॥

इति किल वाकेलिं कनकलतया चकार । किं दुर्लभमाचार्यकटाक्षसंधुक्षितबोधानां बुधानाम् । तेन किल कविना विरचितमिदं ना(टकं) तदन्तेवासिना श्रीनिवासनाम्ना विदुषा अस्मद्गुरोर्वीरराघवविनोदिनो हस्ते समर्पितम् । तदादेशेन मया परिशीलितं च ।

नटी—तस्स नाडअस्स महत्तं सिद्धं एव्व । जं तादिसा तुम्हारिसाणं उवदिसन्ति । तस्य नाटकस्य महत्त्वं सिद्धमेव । यत्तादृशा युष्मादृशानामुपदिशन्ति । किंणामअं तं णाडअं । किंनामकं तन्नाटकम् ।

सूत्र—

वैकल्पिकं पदं किं कीदृक् तत्त्वं परं व्रजे कृष्णः ।
चक्रे किं नु समुचितमुत्तरमाख्या च नाटकस्यास्य ॥

नटी—(सस्मितम्) पण्डिअजणवण्णणिज्जं कहं अम्हारिसेण पाअडजणेण पअडीकरणिज्जं । तहवि तुह सण्णिहिविसेसेण कहइस्सं । पण्डितजनवर्णनीयं कथमस्मादृशेन प्राकृतजनेन प्रकटीकरणीयम् । तथापि तव संनिधिविशेषेण कथयिष्यामि । (किंचिदाकुञ्चितनयनं ध्यानं नाटयित्वा) वासलच्छीविलासंति पडिभाइ । वासलक्ष्मीविला(समि)ति प्रतिभाति

* * * *

**Colophon:**

इति वाधूलशरणाम्बाचार्यनन्दनश्रीरामानुजाचार्यविरचिते वासलक्ष्मीकल्याणे प्रथमोऽङ्कः ॥

**End:**

वरवरः—यद्रोचते भगवते (इति तेन सह निष्क्रान्तः)

(निष्क्रान्ताः सर्वे)

**Colophon :**

इति श्रीवासलक्ष्मीकल्याणे द्वितीयोऽङ्कः ॥

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—

आज्ञा नृपस्य शिरसा जरया च साकमाविश्रतो मम निरस्तसुखं विनिद्रम् ।
राजाङ्गणेषु चरतश्चरणौ नितान्ततान्तीकृतौ तु नहि शाम्यति ह(न्त वा)ञ्छा ॥

* * * *

प्रातः पार्थिवपाणिपीडनविधिं कर्तुं वरोऽलंकृतः ।
साकं बन्धुजनैरिहैष्यति . . . . . . . ॥

---

No. **12665.** विक्रमोर्वशीयम्.
VIKRAMORVAŚĪYAM.

Pages, 97. Lines, 21 on a page.

Begins on fol. 265a of the MS. described under No. 1800.
Complete in five acts.
A well-known drama by Kālidāsa.

**Beginning :**

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निश्श्रेयसायास्तु वः ॥

(नान्द्यन्ते)

सूत्रधारः—अलमतिविस्तरेण (नेपथ्याभिमुखमवलोक्य) मारिष ! परिषदेषा पूर्वेषां कवीनां दृष्टरसप्रबन्धा, अहमस्यां कालिदासग्रथितवस्तुना विक्रमोर्वशीयनाम्ना नवेन तो (त्रो)टकेनोपस्थास्ये । तदुच्यतां पात्रवर्गः "स्वेषु स्थानेष्ववहितैर्भवितव्यं भवद्भिः" इति ।

(प्रविश्य,) नटः—यथाज्ञापयति देवः ।

सूत्र—यावदस्यामार्यविदग्धमिश्रान् शिरसा प्रणिपत्य विज्ञापयामि—

प्रणयिषु दाक्षिण्यवशादथ वा सद्वस्तु(पुरुष)बहुमानात् ।
शृणुत जना अवधानात् क्रियामिमां कालिदासस्य ॥

**End:**

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥
(इति निष्कान्ताः सर्वे)

**Colophon:**

इति श्रीकालिदासकृते विक्रमोर्वशीयनामत्रोटके पञ्चमोऽङ्कः ॥
समाप्तोऽयं ग्रन्थः ॥

---

No. **12666.** विक्रमोर्वशीयम्.
VIKRAMÔRVAŚÎYAM.

Substance, palm-leaf. Size, 16⅞ × 1½ inches. Pages, 50. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1a. The other work herein is Vikramōrvaśīya-vyākhya 26a.

Complete.

Same work as the above.

---

No. **12667.** विक्रमोर्वशीयम्.
VIKRAMÔRVAŚÎYAM.

Pages, 67. Lines, 20 on a page.

Begins on fol. 36a of the MS. described under No. 12465, wherein this work has been omitted in the list of other works.

Complete.

Same work as the above.

---

No. **12668.** विक्रमोर्वशीयम्.
VIKRAMÔRVAŚÎYAM.

Pages, 87. Lines, 9 on a page.

Begins on fol. 233b of the MS. described under No. 12441.

Complete.

Same work as the above.

---

No. **12669.** विक्रमोर्वशीयम्.
VIKRAMÔRVAŚÎYAM.

Pages, 105. Lines, 7 on a page.

Begins on fol. 84a of the MS. described under No. 12468.

Complete.

Same work as the above.

No. **12670.** विक्रमोर्वशीयम्.
VIKRAMÔRVAŚÎYAM.

Pages, 26. Lines, 6 on a page.

Begins on fol. 54*a* of the MS. described under No. 11558.

Begins in the course of the third act.

Same work as the above.

---

No. **12671.** विक्रमोर्वशीयम्.
VIKRAMÔRVAŚÎYAM.

Pages, 60. Lines, 7 on a page.

Begins on fol. 26*a* of the MS. described under No. 12470.

Complete.

Same work as the above.

---

No. **12672.** विक्रमोर्वशीयम्.
VIKRAMÔRVAŚÎYAM.

Substance, palm-leaf. Size, 15¼ × 1¼ inches. Pages, 94. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the acts one to four complete, and five almost complete.

Same work as the above.

---

No. **12673.** विक्रमोर्वशीयम्.
VIKRAMÔRVAŚÎYAM.

Substance, palm-leaf. Size, 16⅝ × 1½ inches. Pages, 78. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Subhāṣitatriśati-vyākhyāsāraślōka 40*a*.

Complete.

Same work as the above.

Copied by Vatsya-Narasiṁhārya and completed in the month of Āvaṇi of Prajōtpatti year.

---

No. **12674** विक्रमोर्वशीयम्.
VIKRAMÔRVAŚÎYAM.

Substance, palm-leaf. Size, 15¼ × 1¼ inches. Pages, 106. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete.

Same work as the above.

Date of the completion of the copying—Wednesday, the 5th day of the month of Āḍi in the year Rākṣasa.

No. 12675. विक्रमोर्वशीयव्याख्या—कुमरगिरिराजीया.

VIKRAMÔRVAŚĪYAVYĀKHYĀ : KUMĀRAGIRIRĀJĪYĀ.

Pages, 70. Lines, 7 on a page.

Begins on fol. 26*a* of the MS. described under No. 12666.

Complete.

A commentary by Kāṭaya Vēmabhūpāla on the drama Vikramōrvaśīya described above. For further particulars about the author, see under R. No. 295(*b*) of the Triennial Catalogue of MSS., Vol. I, Part I-A.

**Beginning :**

वेदादीनां विशुद्धानां विद्यानां जन्महेतवे ।
पार्वतीपरतन्त्राय परस्मै वस्तुने नमः ॥
जयतु विजयलक्ष्मीवल्लभो नित्यकीर्तिः
कोमरगिरिनृपालो राजवेश्याभुजङ्गः ।
मि(वि)रुदमसहमानः साभिमानो यदायं
भवति विमतवर्गो देववेश्याभुजङ्गः ॥

अत्र कविः कालिदासः प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थमिष्टदेवतास्मरणपूर्वकमाशिषं प्रयुङ्क्ते—वेदान्तेष्वित्यादि ।

स स्थाणुः शिवः । वः युष्माकम् । निश्श्रेयसाय नित्यानन्दाय । अस्त्विति सम्बन्धः । सदा तिष्ठतीति स्थाणुः । स्थो णुरित्यौणादिको णुप्रत्ययः । निश्श्रेयसमिति । अचतुरविचतुरेत्यादिना अच्प्रत्ययान्तं निपातितम् ।

**End :**

आयुषमित्यादिः स्पष्टः । एवमत्रानुगृहीतो भवता कथमसौ न पूज्यो भविष्यतीत्यत्र वरस्य गम्यमानत्वादुपसंहारो नाम सन्ध्यङ्गमुक्तं भवति ।

परस्परेत्यादि—परस्परविरोधिन्योरन्योन्यद्वेषिण्योः । श्रीसरस्वत्योर्लक्ष्मीभारत्योः । एकसंश्रयदुर्लभमेकस्मिन् संश्रये आश्रये दुर्लभम् । सङ्गतं सङ्गमः । सतां सज्जनानाम् । भूतये ऐश्वर्याय । सदा सर्वदा । अस्तु विघ्नताम् । अत्र शुभशंसनात्प्रशस्तिर्नाम सन्ध्यङ्गमुक्तं भवति ॥

इति निष्क्रान्ताः सर्वे ॥

**Colophon :**

इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीये विक्रमोर्वशीयव्याख्याने पञ्चमोऽङ्कः ॥

## No. 12676. विक्रमोर्वशीयव्याख्या.

## VIKRAMŌRVAŚĪYAVYĀKHYĀ.

Substance, paper. Size, 10⅝ × 5¼ inches. Pages, 136. Lines, 11 on a page. Character, Dēvanāgari. Condition, injured. Appearance, old. Complete.

A commentary by Raṅganātha, son of Bālakṛṣṇabhaṭṭa and grandson of Raṅganātha who was the son of Tānabhaṭṭa of Śri-Vēkaramanni family. The author had a brother named Vēṇi-Mādhava and a paternal uncle named Nārāyaṇa. The author is said to have been a resident of Vyōmakēśapura.

**Beginning:**

डा(ग)ण्डसिन्ध(न्दू)रमार्तण्डखण्डिताघतमश्चयः ।
शुण्डोत्क्षिप्तारिवृक्षोऽसौ रक्षताद्गणनायकः ॥

* * * *

श्रीबालकृष्णं पितरं विदु(विद्व)द्वृन्दशिरोमणिम् ।
नत्वा नारायणाख्यं च पितृव्यं विबुधोत्तमम् ॥
श्रीकालिदासरचितत्रोटकस्य यथामति ।
रङ्गनाथाख्यविदुषा व्याख्या विख्यापयिष्यते ॥
यदत्र मोहतः किञ्चिद्विच्युतं तद्बुधोत्तमैः ।
परोपकाररसिकैः संशोध्यं शुद्धमानसैः ॥

प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहसमाप्तिकामनया मङ्गलं नमस्यंतु(मनस्यनु)सन्दधत(धानः) अन्यार्थानीयमानपानीयभृतकुम्भस्येव सूत्रधारयाप्या(राख्येया)या अपि नान्द्या मङ्गलत्वमभिसन्दधत् [वा] नान्दीमवतारयति—वेदान्तेष्विति । स स्थाणुः शिवः वः स(ा)माजिकानां निश्श्रेयसाय मोक्षाय अस्तु ।

**End:**

कामानभिलाषान् । कामोऽभिलाष इत्यमरः । सर्वत्र सर्वस्मिन् स्थले सर्वस्मिन् काले च । नन्दतु आनन्दं प्राप्नोतु ॥

**Colophon:**

श्रीश्रीवेकरवंशभूषणमणिश्रीतानभट्टात्मजः
श्रीमद्दी(क्षि)तरङ्गनाथविबुधो धीरो धराविश्रुतः ।
श्रीनारायणबालकृष्णकृतिनौ जज्ञे तनूजौ स्फुर-
द्विद्वद्वादिकरीन्द्रकुम्भसरणिसंचारिपञ्चाननौ ॥

सर्वतन्त्रस्वतन्त्रश्रीबालकृष्णतनूद्भवौ(भवौ) ।
श्रीवेणीमाधवब(बु)धरङ्गनाथाभिधौ सुतौ ॥
व्योमकेशपुर(ट)भेदनवासी जानकीशपदपद्ममिलिन्दः ।
रङ्गनाथ इममाशु वितेने प्रीतये रघुवरस्य निबन्धम् ॥
कृतेयं विक्रमोर्वश्या रङ्गनाथमनीषिणा ।
प्रकाशिका काशिकादिपत्तनेषु प्रकाशताम् ॥
पौरोभाग्यनिवेशिताशयवतामापाततः पश्यता-
मामूलं कलुषैकसद्मद्दकृतामात्मस्तुतिं कुर्वताम् ।
किं नः कार्यमनार्यसङ्गतिमतामास्तामिह श्रीमता-
(मा)नन्दोत्कलिकाविकासितहृदां प्रेमैकदृष्टिः सताम् ॥
नयनधरणिभूमृद्भूमितेऽब्दे नभस्ये-
ऽसितदल इह नागानां(तिं)थावर्कवारे ।
सुरभिषगधिदैवत्येऽपि मे बुद्धियोगे-
ऽकृत कृ(त)मतिरेतं रङ्गनाथः प्रपूर्णम् ॥

**Colophon:**

इति श्रीमद्यायजूकप्रवरश्रीविकरमौनिवंशोत्तंसरङ्गनाथदीक्षितकुक्षिजबिन्दुष्ट-
हपुरन्दरश्रीबालकृष्णभट्टागाद्भूत(ङ्गोद्भव)रङ्गनाथविरचितायां विक्रमोर्वशीप्रकाशि-
कायां पञ्चमाङ्कोन्मेषः ॥

समाप्तोऽयं ग्रन्थः ॥

---

## No. 12677. विजयेन्दिरापरिणयनाटकम्.
## VIJAYENDIRAPARIṆAYANĀṬAKAM.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 71. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, new.

The codex opens in the course of the fourth act and finishes with the seventh act.

A drama in seven acts the plot of which is the marriage between Rāma and Sītā: by Subrahmaṇyakavi, son of Kṛṣṇasūri of Kāśyapa-gōtra.

**Beginning:**

(ततः प्रविशत उद्यानपालिके) एका—सारिगे रण्णो पल्लवोवहारं गिण्हिय प्पत्थिदा तुमं कहिंतुण्णं एव्व आयदा । शारिये राज्ञः पल्लवोपहारं गृहीत्वा प्रस्थिता त्वं कथं तूर्णमेवागता ।

अपरा—सुणुहि कलकण्ठिए अच्चरिअं । शृणु कलकण्ठिके आश्चर्यं ।

क—किहिय । कथमिव ।

* * * *

क—अथ महेन्द्रसदनादवतीर्णेन कलहकुतूहलिना महर्षिणा समं रहसि किमपि मन्त्रयित्वा प्रतिनिवृत्तो राजा सकलराजन्यसमानयने सेनासन्नाहं चाज्ञाप्यानुक्षणं किमपि विस्मयं स्मृत्वा गम्भीराकृतिरपि अधिकं निश्वस्य निश्वस्य पुनः पुनरपि कृशपाण्डराङ्गो नितरां शोभते इति श्रावितौ स्म ।

**End:**

य: किल—

श्रीमत्काश्यपवंश्यसत्कविमणिः श्रीकृष्णसूर्यात्मभू-
सुब्रह्मण्यकवेः स्वभावसुगुणा या सूक्तिमुक्तावलिः ।
न्यस्ता वक्षसि वीरराघवविभोः श्रीवल्लभस्यास्य ते
यावत्तावकसत्कथा जयति सा तावच्च विद्योतताम् ॥ इति ।

तथापीदमस्तु (भरतवाक्यम्)—

रामेणेव वसुन्धरा सुपतिना राजन्वती स्यात्सदा
सर्वैरत्र मखैर्यजन्तु सुधियो दद्यात्सुवृष्टिं वृषा ।
सस्यानीह फलन्तु सन्ततममी लोकाश्च सम्पु(न्तु)त्सुकाः
पुत्रैः पौत्रपरंपराभिरपि सत्सूक्तिश्च जीयाच्चिरम् ॥

इति निष्क्रान्ताः सर्वे ॥

**Colophon:**

सप्तमोऽङ्कः । सीताविजयेन्दिरापरिणयं नाम नाटकं संपूर्णम् ॥

(भरतस्य नटस्य वाक्यम्)

श्रीमदित्यादिना प्रशस्त्याख्यमङ्गमभिहितं भवति । प्रशस्तिः शुभशंसनमिति लक्षणात् । एवमास्मिन्नाटके उपक्षेपादीनि चतुष्षष्टिसंख्याकान्यङ्गान्युक्तानि । यद्यपि शृङ्गाररसप्रधानमिदं नाटकं तथाप्यन्येषामपि रसानां तत्रतत्राङ्गत्वेन निवेशोऽनुसन्धेयः ॥

---

No. 12678. विदग्धमाधवम्.

VIDAGDHAMĀDHAVAM.

Pages, 174. Lines, 9 on a page.

Begins on fol. 183*b* of the MS. described under No. 12471.

Complete.

A drama by Rūpadēva Gōsvāmin in seven acts describing the marriage between Śrī-Kṛṣṇa and Rādhā. The work has been printed in the Kāvyamālā. The date and place of composition of the drama are given as 1589 (Śaka ?) and Gōkula, respectively. The following subjects are dealt with in the work :—

१. वेणुनादविलासः.
२. मन्मथलेखः.
३. राधासङ्गमः.
४. वेणुहरणम्.
५. राधाप्रसाधनम्.
६. सरिद्विहारः.
७. गौरीविहारः.

Dated : 1878, Māgha Bahula, the 9th. Copied by Haridēvabrāhmaṇa of Bharatapore.

**Beginning :**

सुधानां चान्द्रीनामपि मधुरिमोन्मादमनी
दधाना राधादिप्रणयघनसारैस्सुरभिताम् ।
दुरन्तां सन्तापोद्गमविषमसंसारसरणी-
प्रणीतां ते तृष्णां हरतु हरिलीलाशिखरिणी ॥

* * *

(नान्द्यन्ते)

सूत्रधारः—अलमतिविस्तरेण । भो भोः समाकर्ण्यतामद्याहं स्वप्नान्तरे समादिष्टोऽस्मि भक्तावतरेण भगवता श्रीशङ्करदेवेन । 'अये' ताण्डवकलापण्डित इह किल वल्लवीचक्रचेतोवृत्तिमकरीविहारमकरालयस्य निरवद्यवेणुवादनविद्यास्वाध्यायसिद्धीनां प्रथमाध्यापकस्य सुगन्धिपुष्पावलीसौन्दर्यतुन्दिलायामरविन्दबान्धवनन्दिनीतीरान्तकाननलेखायामवलम्बितमत्तपुंस्कोकिललीलस्य परमानन्दवर्धनगोवर्धननितम्बे सम्भृतनव्याम्बुदाडम्बरस्य किशोरशिरोमणेर्व्रजेन्द्रनन्दनस्य प्रेमभराकृष्टहृदयो नानादिग्देशतः साम्प्रतं रसिकसम्प्रदायो बृन्दावनविलोकनोत्कण्ठया केशितीर्थोपकण्ठे समीयिवान् । स च धन्यः—

कृतं गोपीवृन्दैरिह भगवतो मार्गणमभू-
दिहासीत्कालिन्दीपुलिनवलये रासरभसः ।
इति श्रावंश्रावं चरितमसकृद्गोकुलपते-
र्लुठन्मुद्राप्पोऽयं कथमपि दिनानि क्षपयति ॥

* * *

(प्रविश्य) पारिपार्श्विकः—भाव भवता निबद्धस्य विदग्धमाधवनाम्नो नवीननाटकस्य प्रयोगानुसारेण गृहीतभूमिकाः कुशीलवा रङ्गप्रवेशाय तत्रभवन्तमनुज्ञापयन्ति ।

* * * *

सू—मारिष पश्य,

सोऽयं वसन्तसमयः समयाय यस्मिन् पूर्णं तमीश्वरमुपोढनवानुरागम् ।
गूढग्रहा रुचिरया सह राधयासौ रङ्गाय सङ्गमयिता निशि पौर्णमासी ॥

**End:**

किंच—

अन्तःकन्दलितादरः श्रुतिपुटीमुद्घाटयन् सेवते
यस्ते गोकुलकेलिनिर्मलसुधासिन्धूत्थबिन्दूनपि ।
राधामाधविकामधो मधुरिम[ा]स्वाराज्यमस्यार्जयन्
साधीयान् भवदीयपादकमले प्रेमोर्मिरुन्मीलतु ॥

कृष्णः—भगवति तथास्तु । तदेहि गोदोहावसरे मामपेक्ष्य चिन्तयिष्यन्तौ पितरावविलम्बं गोकुलं प्रविश्य नन्दयामः ॥

(इति निष्क्रान्ताः सर्वे)

**Colophon:**

गौरीविहारो नाम सप्तमोऽङ्कः । समाप्तमिदं विदग्धमाधवं नाम नाटकम् ॥

राधाविलासं विताकं(वीताङ्कं) चतुष्षष्टिकलाधरम् ।
विदग्धमाधवं साधु शीलयन्तु विचक्षणाः ॥
नन्दसिन्धुरबाणेन्दुसङ्ख्ये संवत्सरे गते ।
विदग्धमाधवं नाम नाटकं गोकुले कृतम् ॥
शान्तश्रियः परमभागवताः समन्ताद्वैगुण्यपुञ्जमपि सद्गुणतां नयन्ति ।
दोषावलीमपरितापितया मृदूनि ज्योतींषि विष्णुपदभाञ्जि विभूषयन्ति ॥

श्लोकाः ॥ २१७० ॥

---

No. **12679.** विदग्धमाधवप्राकृतविवरणम्.

VIDAGDHAMĀDHAVAPRĀKṚTAVIVARAṆAM.

Pages, 14. Lines, 28 on a page.

Begins on fol. 60*a* of the MS. described under No. 12618.

Wants the beginning.

A work giving the Sanskrit equivalent of all the Prākṛt passages of the drama described above.

**Beginning:**

भगवति किं खलु यथार्थमेव तत् ? । भगवति यदि वृषभानुनन्दिनी राधिका त्वया कृष्णेन सङ्गमनीया ततो सङ्गमानुकूलवासं गोकुलं त्यक्त्वा शन्तनुवासाल्वे भानुतीर्थे किमिति एषा सङ्गोप्य रक्षिता आसीत् ? । तथापि कथं राज्ञा विज्ञाता राधा ? ।

**End:**

दिष्ट्या सत्यमेव विश्वस्तोऽसि । मम गृहसर्वस्वा(मि)नि मथुरापुरे नियुक्तं जनं निवारयावः । कथं पामराभ्यां मथुरापुरे नेतुं निश्चिता असि ? ।

**Colophon:**

सप्तमोऽङ्कः ॥ समाप्तमिदं विदग्धमाधवविवरणम् ॥

---

## No. 12680. विद्धसालभञ्जिका.

## VIDDHASĀLABHAÑJIKĀ.

Substance, paper. Size, 11¼ × 4¼ inches. Pages, 91. Lines, 8 on a page. Character, Dēvanāgari. Condition, fair. Appearance, old.

Complete.

A Nāṭikā in four acts by Rājaśēkhara. The plot of the drama is the love between the King of the Kērala country and Mṛgāṅkāvalī, daughter of Candravarman, King of Lāṭapura. She was afterwards married to her beloved.

Dated: Samvat 192, Śrāvaṇakṛṣṇa 12, Wednesday (this 192 seems to be a mistake for 1920).

**Beginning:**

कुलगुरुरबलानां केलिदीक्षाप्रदाने परमसुहृदनङ्गो रोहिणीवल्लभस्य ।
अपि कुसुमपृषत्कैर्देवदेवस्य जेता जयति सुरतलीलानाटिकासूत्रधारः ॥

अपि च—

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ता(:)स्तुवे वामलोचनाः ॥

* * * *

(नान्द्यन्ते) सूत्रधारः —(नेपथ्याभिमुखमवलोक्य) न जाने का पुनरथ श्रीयुवराजदेवस्य परिषदाज्ञा ।

* * * *

सूत्र—(आकर्ण्य) अये ! यायावरेण दौहि(र्दु)किना कविराजशेखरेण रचिताया विद्धशा(सा)लभञ्जिकानामनाटिकाया वस्तूपक्षेपो गीयते ! (विभाव्य) तन्मन्ये तदभिनये श्रीयुवराजदेवस्य परिषदाज्ञा । तदहमपि मन्त्रिणो भागुरायणस्य प्रतीकृच्छ्या शिष्यैर्विहितचारुनाम्नोऽन्तेवासिनो हरदासस्य भूमिकां सम्पादयामि ।

(आकाशे)सखे सोमदत्त किमात्थ ? तदकालजलदस्य मणमुक्तस्य गुणगणः किमिति न वर्ण्यते ? (तत्रैव) शृणु—

क्रिमपरमपरैः परोपकारव्यसननिधेर्गणितैर्गुणैरमुष्य ।
रघुकुलतिलको महेन्द्रपालः सकलकलानिलयः स यस्य शिष्यः ॥

(आकर्णय च गोष्ठीगरिष्ठस्य कृष्णशङ्करशर्मणो वाचः)

श्रोतुं श्रोत्ररसायनं रचयितुं वाचः सतां सम्मता
व्युत्पत्तिं परमामवाप्तुमवधिं लब्धुं रसस्रोतसः ।
भोक्तुं स्वादु फलं च जीविततरोर्यद्यस्ति ते कौतुकं
तद्भ्रातः शृणु राजशेखरकवेः सूक्तीः सुधास्यन्दिनीः ॥

(इति निष्क्रान्तः) प्रस्तावना.

* * * *

तदिदमस्मद्गुरोश्चरितेषु समुपलभ्यते । तथाहि—

लाटेन्द्रश्चन्द्रवर्मा नरपतितिलकः कल्पिता तेन पुत्री
निष्पुत्रेणैकपुत्रः कथितमपि तदा मन्त्रिणस्तस्य चारैः ।
कामं पुत्रावकल्पच्छल(त) इह महाराजसन्दर्शनार्थं
तेनायानायितासौ निरुपधि दधता साधु षाड्गुण्यचक्षुः ॥

**End :**

तथापीदमस्तु—

वामाङ्के पृथुलस्तनस्तबकितं यावद्भवानीपते-
र्लक्ष्मीकण्ठहठग्रहव्यसनिता यावच्च दोष्णां हरेः ।
यावच्च प्रतिसामसारणविधौ व्यग्रौ करौ ब्रह्मणः
स्थेयासुः श्रुतिशुक्तिलब्धमधुरास्तावत्सतां सूक्तयः ॥

सर्वे मिलित्वा श्लोकाः १०८.

(इति निष्क्रान्ताः सर्वे)

**Colophon :**

चतुर्थोऽङ्कः ॥

## No. 12681. विद्धसालभञ्जिकाव्याख्या, मार्गदर्शिनीसहिता.
## VIDDHASĀLABHAÑJIKĀ WITH THE COMMENTARY MĀRGADARŚINĪ.

Substance, paper. Size, 13¼ × 8¾ inches. Pages, 159. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains one to three acts.

Same work as the above, but with a commentary called Mārgadarśinī, the author of which does not give his name. The commentator salutes his guru, named Karuṇākara.

**Beginning:**

(मू)—

कुलगुरुरबलानां केलिदीक्षाप्रदाने परमसुहृदनङ्गो रोहिणीवल्लभस्य ।
अपि कुसुमपृषत्कैः देवदेवस्य जेता जयति सुरतलीलानाटिकासूत्रधारः ॥

(व्या)—

मुक्तिप्रदा पदजुषां महिषोत्तमाङ्गव्यक्तस्थितिर्निखिलकाङ्क्षितकल्पवल्ली ।
भक्तस्य मे मनसि खेलतु सार्वकालमुक्तिस्थलीनिलयिनी परदेवता सा ॥

प्रत्यक्षीकृतनिःशेषविश्वविन्यासमाश्रये ।
अशेषविबुधाधीशं गिरीशं राजशेखरम् ॥

चित्ते निधाय करुणाकरनामधेयानस्मद्गुरून् गुरुकृपाभरपूरिताक्षान् ।
श्रीराजशेखरकवीन्द्रकृतेरमुष्याः क्रियते पदपदार्थविवेकसिद्ध्यै ॥

न प्रोन्मीलितशास्त्रवादविसरत्पाण्डित्यकण्डूतितो
नैवाजानकवित्वडम्बरमहागर्वज्वलोल्लासतः ।
कारुण्यप्रसरोल्लसद्गुरुकटाक्षालम्बतः केवलं
काव्योदन्वति राजशेखरकवेरस्मिन् विगाहामहे ॥

अपरिचयादतिविषमीभूतः पन्थाः प्रकाश्यते किमपि ।
गच्छन्तो यदि सन्तः पुनरिह शुद्धिं वितन्वन्तु ॥

अविचारकृतान्यत्र क्षमतां सकलान्यपि ।
बालस्य दुर्विनीतानि मम मातेव भारती ॥

अथ कविकुलपरमेश्वरो राजशेखरः शृङ्गारप्रधानत्वेन प्रबन्धमा(रि)रचयिषुस्तत्र शृङ्गारदेवतां रतिपतिमेव प्रथमतनं नमस्कर्तव्यत्वेनानुसन्दधानोऽभिनेतव्यस्य वस्तुनः प्रत्याहारादिषु पूर्वरङ्गाङ्गेषु अविघ्नपरिसमाप्तिहेतुतया अवश्यकर्त-

व्यत्वान्नान्दीमिव तावन्मुखे योजयति--कुलगुरुरित्यादिना पद्येन । अनङ्गो जयतीत्यन्वयः । जय उत्कर्षप्राप्तिः ।

**End:**

(मू.) विदू--तुरिदं विसज्जीअदु । अण्णहा पारावदसउणंव्व पञ्जरणिरुद्धा चिट्ठिस्सामो (इति यथायथं परिक्रम्य निष्क्रान्तास्सर्वे) ॥

**Colophon:**

इति राजशेखरकविकृतायां विद्धसालभञ्जिकाख्यायां नाटिकायां तृतीयः अङ्कः समाप्तः ॥

(व्या)--त्वरितं विसृज्यतामन्यथा पारावतशकुनय इव पञ्जरनिरुद्धाः स्थास्यामः । परस्परविरहः सुदुस्सह इति प्रसिद्धिः ॥

अन्योन्यसङ्गमाविष्टभावयोरादिदेवयोः ।
उद्गमितरसग्रन्थिस्सन्धिरस्तु ममात्मनि " ॥

**Colophon:**

इति विद्धसालभञ्जिकाव्याख्यायां मार्गदर्शिन्यां तृतीयाङ्कः समाप्तः ॥

---

## No. 12682. विद्यापरिणयम्.
## VIDYĀPARIṆAYAM.

Substance, palm-leaf. Size, 17 × 1⅝ inches. Pages, 100. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete.

An allegorical drama like the Prabōdhacandrōdaya, the plot of which is the marriage between the Jīvātman or the individual soul and Vidya or spiritual wisdom. The drama is said to have been enacted on the occasion of the festival of the Goddess Ānandavalli worshipped in Tanjore. The author is Ānandarāyamakhin, son of Nṛsiṁhādhvarin who had a brother named Tryambakamjayajvan. The work has been printed in the Kāvyamālā series.

**Beginning:**

सत्यज्ञानसुखाद्वयोऽपि बहुधा रूपाणि बिभ्रच्चिरा-
दप्रज्ञेयविलासवैभवनिजाविद्याविधेयीकृतः ।
. . . . . न्दान् विषयोदिताननुभवन् भूयः स्वया विद्यया
संश्लिष्टः परमार्थभोगमुदितः पायादुमायाः पतिः ॥

(नान्द्यन्ते) सूत्रधारः—(नेपथ्याभिमुखमवलोक्य) मारिष इतस्तावत् ।

(प्रविश्य) पारिपार्श्वकः—भाव एषोऽस्मि ।

सू—अत्र तञ्जानगरे देशान्तरादागताः पौरजानपदा जना भगवत्यास्ता-
वदानन्दवल्लयम्बाया महोत्सवदिदृक्षया सङ्घीभूताः ।

* * * *

सू—नन्वस्ति मम वशे सकलशमथनजनहृदयानन्दसमुद्घाटकं विद्यापरिणयं
नाम नाटकम् ।

पारिपार्श्वकः—कस्तस्य प्रबन्धस्य कविः ।

स—विद्वत्कल्पतरुरानन्दरायमखी । य एषः

गुरुदेवद्विजभक्तो नैमित्तिकनित्यकाम्यकर्मपरः ।
दीनजनाधीनदयो विहरति समरे च विक्रमार्क इव ॥

यस्य किल—

आनन्दरायमखिनो वाल्मीकेरिव योगिनः ।
इतरापेक्षणाद् सारस्वतस्सारस्वतोदयः ॥

अपि च—

नानापूर्वमहाक्रतुप्रणयनैरध्यात्मसम्मर्शनैः
कर्मब्रह्मपथप्रचारसविता षड्दर्शिनीवल्लभः ।
तातो यस्य किलैकराजवसुधाधौरन्धरीगोप्पतिः
क्षोणीपालकिरीटलालितपदः ख्यातो नृसिंहाध्वरी ॥

अपि च—

यस्य तातानुजा . . . . यशःपावितदिङ्मुखः ।
त्रिवर्गफलसम्पन्नस्त्र्यम्बकामात्यदीक्षितः ॥
यः स्नातोऽजनि दिव्यसिन्धुसलिले यः स्वात्मविद्याश्रुतः
येनाकारि . . . . दक्षिणमखो यः सद्भिराश्रीयते ।
सोऽयं त्र्यम्बकराययज्वतिलको विद्वत्कवीनां प्रभोः
बत्तातस्य नृसिंहरायमखि(ना तु)स्यप्रभावोऽनुजः ।

* * * *

चतुरुदधिपरिमुद्रितसकलराज्यतन्त्रस्य शरभमहाराजमन्त्रिशिखामणेरस्य जनकसनकसनन्दनप्रमुखाभिनन्दनतदी ( वती )दशमहाप्रबन्धनिबन्धनपटिमधौरन्धरीयमिति महदाश्चर्यम् ।

**End:**

तथापीदमस्तु—

अस्तु स्वस्ति जगत्त्रयाय जगती रक्षन्तु भूमीभुजो
धर्मेणैव पथा भवन्तु सुखिनः सर्वेऽपि गोब्राह्मणाः ।
पर्जन्यात्क्रमस्थक्रमेण जगतश्चक्रं तदावर्ततां
विद्वांसो विजयीभवन्तु भगवद्भक्त्या त्रयी वर्धताम् ॥

इति निष्क्रान्ताः सर्वे ॥

**Colophon:**

सप्तमोऽङ्कः ॥

---

No. 12683. विवेकविजयः.

VIVEKAVIJAYAḤ.

Substance, palm-leaf. Size, 15⅜ × 1⅝ inches. Pages, 128. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete in ten acts.

Another allegorical drama in which wisdom is represented as having subdued the lower desires and passions: by Rāmānujakavi of Hāritagōtra who salutes both Vēdāntadēśika and Rāmānuja. The author was the son of Pūrṇaguru and grandson of Rāmānujaguru who was born in the same family as that of Rāmānuja. The author's paternal uncle's name is given as Samarapuṅgava.

**Beginning:**

जयति जगतां निदानं किमपि महः कमलवासिनीमहितम् ।
नमतां चिन्तारत्नं निगमानां मौलिरत्नमपि ॥

(नान्द्यन्ते) सूत्रधारः—आदिष्टोऽस्मि

* * * *

भगवतः प्रणतार्तिहरस्य निखिलजननयनहृदयानन्दनाडिन्धमभावबोत्सवदिदृक्षया जलधिकाञ्चीमण्डलमण्डनं काञ्चीनगरं परिष्कुर्वद्भिः

* * * *

अत्रभवद्भिरार्यमिश्रैः ।

* * * *

संसारसागरनिमग्नसमस्तजन्तुसन्तारणाय धरणौ विहितावतारः
रामानुजो मुनिरखेलदयापयोधि(:) श्रीमानुदञ्चयतु नः सततं शुभानि ॥

* * * *

सू—आर्ये किं न जानासि विवेकविजयाभिधानमभिनवं नाटकरत्नम्? ॥

* * * *

अस्ति खलु सकलहरिदन्तरविख्यातहरितकुलकलशोदधिकलानिधेरखिलसप्ततन्तुसाङ्गानुष्ठानप्रतिष्ठापितसाधिष्ठयशसः सकलशिष्टाभिष्टुताष्टोत्तरशतदिव्यदेशलोभनीयाद्भुतवैभवमहाभूतपुरवास्तव्यस्य श्रीमत्केशवसोमयाजिनः पङ्क्तिरथस्येवानकदुन्दुभेरिव च कमलासखः सकलभवभयाभितप्तजनसञ्जीवनाय सूनुतयावतीर्णो रङ्गनाथवृषाचलेशकरीशश्रीरामप्रियकुरु . . . . पूर्णप्रख्यापितानितरसुलभप्रभावो यदुगिरिमहिमपुराणप्रकटितनिजावतारवैभवरहस्यो भगवान् रामानुजो नाम ।

* * * *

(सहर्षभक्तिपुलकोद्गमम्)

अनन्तत्रय्यन्तप्रवचनधुरीणो गुणनिधिः
प्रचण्डो वेतण्डः प्रतिकथकरम्भाविमथने ।
अमुष्मिन्वंशे विधुरिव पयोधौ गुरुवरः
कलापूर्णो रामानुज इति यदाख्या विजयते ॥

अतिवेलः खल्वमुष्य देशिकसार्वभौमस्य महिमा । तथा हि—

चत्वारस्तनुजा बृहस्पतिसमाः षड्दर्शनीपारगा
व्याख्यातागममौलयः प्रतिकलं रक्षन्ति सद्वर्तनीम् ।
छात्राः संयमिसार्वभौमपदवीजैत्रध्वजा जाग्रति
श्रीरामावरजस्य देशिकमणेर्दूरे गिरामुन्नतिः ॥

* * * *

तस्य कुमारेषु दाशरथिष्विव रामो ज्येष्ठो वेदान्तगुरुरिव समस्तविद्याविहारभूमिर्मूर्त इव सकलात्मगुणसमवायः समरपुङ्गवो नाम देशिकसार्वभौमः ।

* * * *

तस्यानुजस्तदुपमः प्रणतार्तिहारी पूर्णो गुरुः शमदमादिगुणौघपूर्णः ।
जागर्ति कीर्तिरनघा महती यदीया दिव्यापगेव भुवनत्रितयप्रतीता ॥

किं च—

व्याख्याताशेषवेदान्तोदन्तैः सर्वैरभिष्टुतः ।
स सन्त्वत्यद्भुतोदारवैभवः पूर्णदेशिकः ।

* * * *

अस्ति हि—

तस्यात्मजस्ततो लब्धवेदान्तः कविशेखरः ।
रामानुजार्यस्य कृपापात्रं तन्नामभूषितः ॥

* * * *

सू—(समन्तादवलोक्य सहर्षम्)

सुरभिरयमिदानीमुल्लसद्भिः प्रसूनैः सुरभयति निकामं मेखलामम्बुराशेः ।
नृपतिरिव विवेको विश्वविख्यातभूमा प्रतिहतरिपुवर्गः स्वैरुदारैर्यशोभिः ॥

कृतमिदं तेन नः केनापि सुकृतेन नाटकरत्नम् ।

**End:**

तथापीदमस्तु (भरतवाक्यम्)

सन्तः सन्तुष्टहृदयाः सन्ततं सन्तु निर्भयाः ।
वर्धतां वैष्णवो धर्मो यः सर्वाभीष्टकल्पकः ॥

किं च—

सन्तः सन्तोषयन्तो मुररिपुमनघं सन्तु सन्तुष्टचित्ताः
श्रीरङ्गार्येषु धामस्वनुभ(व)तु परां सम्पदं श्रीसहायः ।
रुन्धन्दोषानशेषान्कलिबलकुलितान्नन्दयन्विष्णुभक्तान्
श्रीमान् श्रीभूतपुर्यां विहरतु सततं देशिकेन्द्रो यतीन्द्रः ॥

अपि च—

लीलामृगेन्द्राङ्कविहारिणी सा शीलानुकम्पादिगुणौघहृद्या ।
तृष्णाधिकं काङ्क्षितमब्धिकन्या पुष्णातु वः सन्ततमाश्रितानाम् ॥

[इति हर्षं नाटयन्तो निष्कान्ताः सर्वे]

इति विवेकविजये दशमोऽङ्कः ॥

**Colophon:**

इति हरितकुलतिलकश्रीरामानुजगुरुप्रसादसमधिगतसकलागमान्तसारस्य निगमान्तगुरुचरणकमलचञ्चरीकस्य श्रीमद्रामानुजकवेः कृतिषु विवेकविजयाभिधानं नाटकरत्नं सम्पूर्णम् ॥

---

No. 12684. विवेकविजयः.

VIVEKAVIJAYAḤ.

Substance, paper. Size, 8¼ x 6¼ inches. Pages, 340. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

Same work as the above.

Restored from the MS. described under the previous number.

---

## No. 12685. वृषभानुजानाटिका.

## VṚṢABHĀNUJĀNĀṬIKĀ.

Substance, paper. Size, 10 × 4½ inches. Pages, 146. Lines, 6 on a page. Character, Dēvanāgari. Condition, good. Appearance, new.

Breaks off towards the close of the fourth act.

A Nāṭikā by Madhurādāsa of Kāyastha family. The author is said to have been born at Suvarṇaśēkhara, a town in the country between the Ganges and the Jumna. It deals with the marriage of Rādhā, daughter of Vṛṣabhānu, with Lord Kṛṣṇa as narrated in Kṛṣṇajanmakhaṇḍa forming part of the Brahmakaivartapurāṇa. It is said to have been enacted on the occasion of the festival of Rādhākṛṣṇa celebrated in the pleasure garden of Brindāvan.

**Beginning:**

कपोले पत्राली पुलकिनि विधातुं व्यवसितः
स्वयं श्रीराधायाः करकलितवर्तिर्मधुरिपुः ।
अभूद्धक्रेन्दौ यन्निहितनयनः कम्पितभुज-
स्तदेतत्सामर्थ्यं तदभिनवरूपस्य जयति ॥

* * * *

[नान्द्यन्ते]

सूत्रधारः—अलमतिव्याहृतेन । अद्य खलु बल्लवविलासिनीभिर्विनिद्रारविन्दवदनाभिः पद्मिनीभिरिव विलोभ्यमानमानसहंसस्य श्रीमद्वृषभानुनन्दिनीपादपद्मरजोराजितोपान्तेन मायूरमुकुटेनालङ्कृतमौलेरुन्मदकलहंसकामिनीकुलकोलाहलेन पुलिनवलयेन मुखरमेखलया परिगतनितम्बबिम्बेनेव विराजितायास्तपनतनयाया वेलावनान्तलतामण्डपेषु समारब्धकन्दर्पकेलिकलाकलापस्य यशोदानन्दयोर्नयनानन्दजननस्य त्रिभुवनविलोभनीयाभिनवकिशोरवयसः श्रीराधामोहनस्य वृन्दारण्यान्तर्गतानां विहारवनस्थलीनामवलोकनसुखमनुभवितुमनेकदेशान्तरादुपस्थितेन साधुजनवृन्देन समाहूय सादरमभिहितोऽस्मि । यथा—

"अस्मत्प्रियसुहृदातिप्रबलया भगवद्भक्त्या कायस्थकुलावतंसतामुपगतेन जह्नुकन्यकाकालिन्दीतीरावलम्बमध्यदेशशिरश्शेखरीभूते सुवर्णशेखरनाम्नि नगरे समवाप्तपरार्ध्यजन्मना श्रीमधुरादासेन या विरचिता विदग्धजनहृदयकुमुदानन्दैककौमुदी वृषभानुजा नामापूर्वनाटिका सा भवताभिनेतव्या" ।

* * * *

प्रयोगबन्धः सरसः कवीनां दृष्टो भवद्भिर्बहुशः सुकान्तः ।
गुणेन शून्योऽपि मम प्रबन्धः कृष्णप्रसङ्गादवलोकनीयः ॥

* * * *

**Colophon**.

इति श्रीमधुरादासेन विरचितायां श्रीवृषभानुजानामनाटिकायां प्रथमोऽङ्कः ॥

**End:**

अपि च—

स्थाने म्लानत्वमेतस्य श्रुतेर्निपतितं यतः ।
पुनस्तत्पदमारोढुं स्वाङ्गं शोषयतीव तत् ॥
इति निष्क्रान्ताः सर्वे ॥

**Colophon:**

इति श्रीमधुरादासेन विरचितायां श्रीवृषभानुजानामनाटिकायां तृतीयोऽङ्कः ॥

(ततः प्रविशति वृषभी चम्पकलता च)

चम्प—(स्वगतम्) अविकद्दि भविस्सदि मे पिअसही तमालिआ ।

* * * *

(इति कृष्णं सप्रणयं पश्यति)

कृष्णः—(प्रसादाभिमुखीं तामवधार्य, सप्रश्रयं तां मालां तत्कण्ठदेशे समर्प्य, शारदेन्दुप्रसन्नं तन्मुखं विलोकयन्)

प्रिये! सर्वथा तवामुना रूप.

---

## No. 12686. वेङ्कटेशप्रहसनम्.
## VEṄKAṬEŚAPRAHASANAM.

Pages, 56. Lines, 15 on a page.

Begins on fol. 214*b* of the MS. described under **No. 12430.**

Complete.

Same work as that described under R. No. 821(*g*) of the **Triennial Catalogue**, Vol. II, Part I-A. By Vāṅkaṭēśa.

Copied by Vāraṇāsi Rāmasvāmi on 1st August 1831.

## No. 12687. वेङ्कटेशप्रहसनम्.
## VEṄKAṬEŚAPRAHASANAM.

Pages, 51. Lines, 16 on a page.

Begins on fol. 145*a* of the MS. described under No. 11921.

Complete.

Same work as the above.

---

## No. 12688. वेङ्कटेशप्रहसनम्.
## VEṄKAṬEŚAPRAHASANAM.

Pages, 32. Lines, 24 on a page.

Begins on fol. 210*a* of the MS. described under No. 12527.

Complete.

Same work as the above.

---

## No. 12689. वेङ्कटेशप्रहसनम्.
## VEṄKAṬEŚAPRAHASANAM.

Substance, paper. Size, 7¼ × 3¾ inches. Pages, 62. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

Same work as the above.

---

## No. 12690. वेङ्कटेशप्रहसनम्.
## VEṄKAṬEŚAPRAHASANAM.

Substance, paper. Size, 7½ × 6 inches. Pages, 19. Lines, 25 on a page. Character, Telugu. Condition, fair. Appearance, old.

Incomplete.

Same work as the above.

---

## No. 12691. वेणीसंहारम्.
## VEṆĪSAṀHĀRAM.

Pages, 129. Lines, 15 on a page.

Begins on fol. 59*a* of the MS. described under No. 12506.

Complete.

A drama in six acts by Bhaṭṭanārāyaṇa. It describes the killing of Duśśāsana and Duryōdhana by Bhīmasēna in order to enable Draupadī to fulfil her vow that she would tie her hair only if they be made wet with the blood of those who attempted to disgrace her in open assembly.

**Beginning:**

जयति सनाभिर्जगतां स्वनाभिरम्भोद्भवाब्जगर्ह्यांजः ।
दामोदरो निजोदरगह्वरनिक्षिप्तजगदगाण्डौघ(गदण्ड): ॥

अपि च—

जयति भगवान् स कृष्णः शेते यः शेषभोगशय्यायाम् ।
मध्ये पयःपयोधेरपर इवाम्भोनिधि कृष्णः ॥

* * * *

यदिदं कवेर्मृगराजलक्ष्मणो भट्टनारायणस्य कृतिमभिनवां वेणीसंहारं नाम नाटकं किमप्यनुकर्तुमुद्यता(:)स्मः । तदत्र कविपरिश्रमानुरोधान्नवनाटकदर्शन-कुतूहलादुदात्तकथावस्तुगौरवाद्वा भवद्भिरवधानं दीयमानमभ्यर्थयामहे ।

**End:**

तथा प्रीतश्चेद्भगवान् तदिदं भवतु

(भरतवाक्यम्)—

अकृपणमतिः कामं जीवा(व्या)ज्जनः पुरुषायुषं
भवतु भगवन् भक्तिर्द्वैधं विना पुरुषोत्तमे ।
दयितभुवनो विद्वद्बन्धुर्गुणेषु विचक्षणः
सततसुकृतिर्भूयाद्भूपः प्रसाधितमण्डलः ॥

सर्वे—एवमस्तु (इति निष्कान्ताः सर्वे)

षष्ठोऽङ्कः ॥

**Colophon:**

समाप्तं वेणीसंहारं नाम नाटकम् ॥

---

No. **12692.** वेणीसंहारम्.

VEṆĪSAMHĀRAM.

Pages, 52. Lines, 11 on a page.

Begins on fol. 1a of the MS. described under No. 12159.

Breaks off in the sixth act.

Same work as the above.

---

No. **12693.** वेणीसंहारम्.

VEṆĪSAMHĀRAM.

Substance, palm-leaf. Size, 17⅜ × 1⅝ inches. Pages, 82. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

**Complete.**

Same work as the above.

Copied by Vēṅkaṭanṛsiṁhakavi in the month of Puṣya of Rudhirōdgāri.

---

No. **12694.** वेणीसंहारम्.

VĒṆĪSAṀHĀRAM.

Substance, palm-leaf (Śrītāla). Size, 16⅞ × 1⅜ inches. Pages, 72. Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1a. The other work herein is Bhāgavatacampu 37a.

Breaks off in the sixth act.

Same work as the above.

---

No. **12695.** वेणीसंहारटीका.

VĒṆĪSAṀHĀRAṬĪKĀ.

Substance, paper. Size, 10¼ × 5¼ inches. Pages, 120. Lines, 11 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

Complete.

A gloss by Jagaddhara on the Vēṇīsaṁhāra described above. The genealogy of the commentator has been already given under No. 12421 ante.

Dated: Samvat 1905

**Beginning:**

कण्ठस्थाहिमणीविभूषिततनु राजज्जटापल्लवो
हृष्यन्मौलिसुधाकरकै(कु)मुमच(स्त)त्पञ्चशाखाश्रयः ।
स्थाणुर्मे फलदोऽस्तु नित्यमधिकं गौरीमुखेन्दुद्रव-
त्पीयूषद्रवपानदोहदवशात्कल्पद्रुमत्वं वहन् ॥
गुरूपदेशमासाद्य विभाव्य निपुणं हृदा ।
श्रीजगद्धरधीरेण टिप्पणी क्रियते शुभा ॥

इह तावन्निर्विघ्नं प्रारिप्सितसिद्धिमनुरुध्य कविः स्वेष्टदेवताकीर्तनरूपं मङ्गलं नान्दीमुखेनाह—निषिद्धैरिति । अयं पुष्पाणामञ्जलिर्नोऽस्माकं सिद्धिं विधत्तां करोतु । कीदृशीम्, अस्य सदसः सभाया नयनसुभगां नेत्रप्रीतिजननीम् । तथा च सदस्या(ना)मपि नेत्रानुरागं विदधात्विति भावः ।

**End:**

यथाकामेप्सितानां मनीषितानां गुणान्तरं भवति तथेत्यर्थः । अत्र च कवेरयमाशयः—मत्कविताया अप्यलङ्कारशालिता रसयोगिता च स्वभावसिद्धैव।

भगवत्प्रसादेन पुनर्गुणान्तरयोगित्वमपि भवतु । तथा च काव्यलक्षणे— समस्तमिहापि स्यात्तत्कर्तृतया च कीर्तिविवर्तलाभः प्रीतिलाभश्च स्यादिति ।

तदुक्तं सरस्वतीकण्ठाभरणे—

"निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्वन्कीर्तिं प्रीतिं च विन्दति ॥"
क्वीह नाटकाम्बुधौ स्फुरन्ति नोज्ज्वला रसाः ।
मदीयबुद्धिरल्पिका क वेद तानशेषतः ॥
(मा)नादरं मम कृतौ नियतं तनुध्व-
मत्राधुना(तन)तया गुणदोषविज्ञाः ।
ग्राह्यं शिशोरपि सुभाषितमित्थमात्थ
यूयं ततोऽपि मम टिप्पणमाद्रियध्वम् ॥
लब्धं दुर्लभशासनं सुरगणग्रामोऽभिरामो गुणैः
विद्यावंशविभूषणे अपि शुभे छत्रे उभे धारिते ।
येनायं समभूद्द्विजावितिलकश्चण्डेश्वरः पण्डितो
मीमांसैकरहस्यवश्यहृदयो दाताबदाताशयः ॥
प्रासूतासावहितनगरीनागरीगीतकीर्तिं
विप्रे क्षिप्रं गुणदमधिकं वेदपूर्वं धरं तम् ।
कैवर्तानामलभत नृपाच्छासनं सोऽयमुच्चै-
रापत् पुत्रं गुणमयतनुं रामपूर्वं धरं तम् ॥
सोऽयं शुक्रामनगरे पदमाप श्व(शु)द्धे मीमांसको विमलकीर्तिपवित्रमूर्तिः ।
पुत्रं गदाधरमवाप गुणैरगाधं सत्तान्त्रिकं गुणिगणप्रथिताभिमानम् ॥
असूत विद्याधरमेष धीरं गुणैरनूनं सुकृताधिवासम् ।
तं रत्नपूर्वं धरमाप पुत्रं सोऽपि प्रसिद्धं गुणिनां गुणेन ॥
दमयन्त्यामयं धीरो लेभे सुतमरिन्दमम् ।
श्रीजगद्धरनामानमनर्घगुणशालिनम् ॥
विद्याच्छत्रं कुलच्छत्रं धारितं येन धीमताम् ।
जगद्धरः सुक(र)गणे सोऽपि नैयायिकः कविः ॥

येनापाठि कठोरगौतममतं वैशेषिकं खण्डनं
येनाश्रावि सकोषकाव्यनिवहं तत्पाणिनीयं मतम् ।
छन्दोऽलङ्करणं विशुद्धभरतं येनाध्यगायि स्थिरं
तेनानेन जगद्धरेण कविना टीका कृतेयं मुदा ॥
नानालङ्कृतिसुन्दरी रसवती नानागुणानां निधि-
र्नानाभावविभावनैकचतुरा नानार्थसार्थाधिका ।
टीकेयं विमलाङ्गनेव रहिता दोषैरशेषैरत-
स्तामेतामभिभूषयन्तु कृतिनस्तेभ्यो नमः सर्वदा ॥
यदि भवति मदीयग्रन्थमध्ये प्रमादः
क्वचिदपि स महिम्ना शोधनीयो महद्भिः ।
स्खलति गमनकारी प्रायशो नात्र चित्रं
भवति च गुरुहस्तालम्बनोऽपि प्रकारः ॥
असूत यं रत्नधरो गुणीशो नानागुणाढ्या दमयन्तिकापि ।
जगद्धरं तस्य कृतौ व्यरंसीत् षष्ठोऽयमङ्को वरटिप्पणेऽत्र ॥

**Colophon:**

इति महामहोपाध्याय(ध)र्माधिकारिकश्रीजगद्धरकृतौ वेणीसंहारटीकायां षष्ठोऽङ्कः समाप्तः ॥

---

## No. **12696.** वेदान्तविलासः.
## VĒDANTAVILĀSAḤ.

Pages, 59. Lines, 28 on a page.

Begins on fol. 99*a* of the MS. described under No. 4459.

Complete.

A drama describing the greatness and the life incidents of Rāmānujācārya, the founder of Śrī-Vaiṣṇavism: by Varadācārya or Ghaṭikāśata Ammāḷ of Śrīvatsgōtra. He was a propogandist of the doctrines of Rāmānuja and Vēdāntadēśika and was the son of Ghaṭikāśata Sudarśanācārya, and the fifth in descent from Varadaguru (well-known as Naḍādūr Ammāḷ) who was the preceptor of the author of Śrutaprakāśikā and the grandson of Sudarśana, the nephew of Bhagavad-Rāmānuja. The author lived in Kāñcī (Conjeeveram) and the work which is also called Yatirājavijaya was intended to be staged on the occasion of the festival in the Caitra month of God Raṅganātha worshipped at Srīraṅgam.

**Beginning**:

पद्मे! त्वन्नयने स्मरामि सततं भावो भवत्कुन्तले
नीले! मुह्यति किं करोमि महि! तैः क्रीतोऽस्मि ते विभ्रमैः ।
इत्युत्स्वप्नवचोऽनुभाष्य सरुषा निर्भर्त्सितो राधया
कृष्णस्तत्परमेव तद्व्यपदिशन् क्रीडाविटः पातु नः ॥

* * * *

(नान्द्यन्ते)

सूत्रधारः—

* * * *

श्रीरङ्गराजस्य चैत्रोत्सवयात्रायामात्मविद्याविदग्धैः अनवरतनिरवद्यभरतविद्याविनोदैरार्यमिश्रैरादिष्टोऽस्मि । यदत्र—

"अस्ति खलु भगवद्रामानुजमुनेः पूर्वाश्रमभागिनेय(ः)श्रीवत्सकुलचूडामणिः, अखिलपरदर्शनमदकर्शनस्सुदर्शनो नाम ।

सत्कुर्वता संसदि शेषवर्गाननन्यलभ्यैरखिलैः स्वचिह्नैः ।
श्रीभाष्यसिंहासनमात्मनीनं यस्मै च दत्तं यतिशेखरेण ॥
तस्य वेदान्तकूटस्थः पौत्रोऽभूद्वरदो गुरुः ।
श्रुतप्रकाशिकाद्याश्च ग्रन्था यच्छिष्यसम्पदः ॥

तस्य पञ्चगः प्रपञ्चविदितवैदुष्यनिधिः काञ्चीपुरीवास्तव्यश्रीघटिकाशतकसुदर्शनाचार्यसूनुः श्रीवेदान्ताचार्यरामानुजदर्शनस्थापनाचार्ययोः प्रसादभूमिर्वरदाचार्यो नाम कविः । तद्विरचितं वेदान्तविलासं नाम नाटकमस्माकं श्रोत्रपदवीमानन्दयति । तेन नेत्रपदवीमप्यानन्दय" इति ॥

पारिपार्श्वकः—(विचिन्त्य)—तदभिनेतव्यमित्युक्तम् । भवतु नाम । किं नाम नाटकस्य?

सूत्र—(विमृश्य)

चित्रकूटतटे रामश्चित्रमानो चकार यत् ।
सीताललाटे तन्नाम स्वरसंसिद्धमेव तत् ॥

न—(विचार्य, सहर्षम्) ललाटे कृतं हरितालतिलकमेव । तस्य स्वैरयतिराजविजयमिति सिद्धमेव तन्नाम ।

**End**:

तथापीदमस्तु (भरतवाक्यम्)—

काले वर्षतु वासवः क्षितिभुजो रक्षन्तु सम्यङ् महीं
सर्वे सन्तु निरामयाश्च कृतिनः सत्त्वोत्तराः प्राणिनः ।

पुण्या लोकमिमं पुनातु भगवद्भक्तिश्चिरस्थायिनी
मालावद्यतिशेखरस्य विहरत्वाज्ञा नृणां मूर्धनि ॥
(इति हर्षं नाटयन्तो निष्क्रान्ताः सर्वे.)

**Colophon :**

इति श्रीवत्सकुलतिलकश्रीघटिकाशतश्रीमदम्मालाचार्यविरचिते वेदान्तविलासापरनामधेये यतिराजविजये षष्ठोऽङ्कः ॥

---

## No. 12697. वेदान्तविलासः.
## VEDĀNTAVILĀSAḤ.

Substance, palm-leaf. Size, 13¾ × 1¼ inches. Pages, 118. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, new.

Breaks off in the sixth act.

Same work as the above.

---

## No. 12698. वेदान्तविलासः.
## VEDĀNTAVILĀSAḤ.

Substance, paper. Size, 11 × 8¼ inches. Pages, 131. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

Same work as the above.

Restored from the MS. described under the next number.

---

## No. 11699. वेदान्तविलासः.
## VEDĀNTAVILĀSAḤ.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 142. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

The scribe adds—

रङ्गराजस्य पौत्रेण रम्यजामातृसूनुना ।
शौरिराजेन लिखितो य(तीन्द्रविजयाभिधः) ॥

---

## No. 12700. वेदान्तविलासः.
## VEDĀNTAVILĀSAḤ.

Substance, palm-leaf. Size, 15¼ × 1½ inches. Pages, 102. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

The book was in the possession of Tirumala Śaṅkhapuram Ihai Rāghavācārya.

---

## No. 12701. शारदानन्दनभाणः.

## ŚĀRADĀNANDANABHĀṆAḤ.

Pages, 27. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 12269.

Complete.

A Bhāṇa describing the love between Rasikaśēkhara and Ānandalatā by Śrinivāsācārya of Kauśikagōtra, son and pupil of Varadācārya or Dēvādhirāja. It was intended to be staged on the occasion of the Kartikai festival celebrated in Śrīperumbūdūr and brings out the greatness of that festival.

**Beginning:**

चञ्चत्तारावृताभ्रं शशधरविलसन्मौक्तिकं क्षोलचक्रं
शङ्खोदञ्चद्विपश्रीनिनदमविरतोत्कम्पकुम्भाभिरामम् ।
भ्राम्यद्वापीकिमुञ्चत्पुलकमुरुचलन्मोचमुद्वेलहर्षं
भूयाद्भूत्यै महत्यै किमपि विलसितं सुभ्रुवां सन्ततं वः ॥

(नान्द्यन्ते)

सूत्रधारः—

*    *    *    *

(कर्णं दत्वा) किं ब्रूथ !

"यत्तात(:) प्रतिवादिवृन्दमकुटीमत्युत्तरत्नद्युति-
व्राताश्लेषणकर्बुराङ्घ्रियुगलो देवाधिराजो गुरुः ।
तस्य श्रीकुशिकान्ववायजनुष(:)श्रीश्रीनिवासस्य तां
वाणीं भाणपदं समेत्य जगतामुल्लासयोल्लासदाम् ॥" इति

*    *    *    *

सू—आर्ये समाज्ञप्तोऽस्मि ।

*    *    *    *

महाभूतपुरीपुरातनानेकपुण्यफलपरिणामायितस्य भगवतोऽनन्तचिन्तामणे-रनन्तसरस्तरङ्गसन्तानतालवृन्तापनीयमानकोकनदवासिनीकुचकलशपत्राङ्कुरकरण-जनितघर्माम्भसोऽशेषलोकशरण्यस्यादिकेशवस्य कृति(का)महोत्सवविलोकन-कुतूहलागतैः सकलविद्याविलाससङ्केतभूमिभिः सकलजनहृदयङ्गमैः सामाजिकैः श्रीनिवासकविवरनिरुपमसारस्वतसमुल्लासमखिलजनहृदयानन्दनं शारदानन्दनं नाम भाणमभिनेतुम् ।

सेयं भूतपुरी पुरन्दरपुरीसम्मानितावासभूः
सेयं साधुसुधांशुदीधितिविशदालोका शरत्पूर्णिमा ।
दिष्ट्यारम्भमहोत्सवोऽयमधुना दृष्टाश्च कोरीदृशः
सन्त्येते भगवान् प्रसन्नहृदयो भावोऽपि जातो मयि ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

काले वर्षतु वासवो वसुमती भूयाद्यथार्थाह्वया
कामः काङ्क्षितकल्पनाभिमुखतां यूना समालम्बताम् ।
कात्योन्मेषिसरोरुहान्तरनवोदश्चन्मधूलीभर-
प्रेयस्यः सरसा भवन्तु जगतां तुष्ट्यै कवीनां गिरः ॥ इति ॥
(एवमस्त्विति निष्क्रान्ताः सर्वे)

**Colophon:**

इति श्रीमत्कुशिककुलतिलकश्रीवरदाचार्यचरणनलिनयुगलपरिचर्यासमधि-गतसकलकला(कला)पस्य तदनन्यदैवतस्य श्रीनिवासस्य कृतिषु शारदानन्दनं नाम भाणः सम्पूर्णः ॥

---

### No. 12702. शृङ्गारदीपकभाणः.
### ŚṚṄGĀRADĪPAKABHĀṆAḤ.

Pages, 79. Lines, 8 on a page.

Begins on fol. 20a of the MS. described under No. 12656.

Two leaves are lost; otherwise complete.

A drama of the Bhāṇa king in which the chief character is Anaṅga-śekhara: by Viñjimūra Rāghavācārya. It was intended to be staged on the occasion of the vernal festival of God Varadarāja celebrated at Conjeevaram.

**Beginning:**

कल्याणं कलयन्तु लोकजननीकेदार्द्रसंवीक्षणा-
न्यातन्वन्ति निजप्रियस्य . . . गात्रेषु यान्यानने ।

कस्तूरीतिलकश्रियं गलतले मुक्तासरस्य श्रियं
कण्ठे वल्लवशेखरस्य सुषुमा गात्रे च रक्तागरोः ॥

* * * *

(नान्यन्ते) सूत्रधारः—(समन्तादवलोक्य)

* * * *

पुण्यकोटिनामाङ्कितविमानवरमलङ्कुर्वाणस्य श्रीहस्तिशैलाधिपतेर्देवराजस्य भगवतो निखिलभुवनप्रथितविभववैशाखमहोत्सवारम्भसम्भ्रमसौन्दर्यसन्दर्शनसमभिलाषसमागतैः ।

* * * *

अद्य खलु विचित्रतरः विविधरसभरभरितः कश्चिदपूर्वरूपकप्रबन्धः प्रयोजयिष्यते ।

* * * *

सोऽयं चारुसुधारसप्रतिमवागासारपूर्णः कविः
भाणः सद्गुणलालनीय (ललितः) शृङ्गारसम्पूरितः ।
सेयं सारविदां व्रजेन महतामध्यासिता रङ्गभूः
सर्वं नः सदनुग्रहेण महता संजातमद्यान्वितम् ॥

**End:**

(तथापीदमस्तु भरतवाक्यम्)—

[श्चारुलीलाम् ।
करिशिखरिनिवासी कामुकः कोऽपि लक्ष्म्याः कलयतु कुसुमेषोः कल्पयं-
मुदमधिकमुदारैरिन्दिराचारुवक्षोरुहयुगतटसीमासङ्गिभिर्वीक्षणैर्नः ॥

**Colophon:**

श्रीविञ्जिमूरकुलरत्नविशेषकेण कल्लोलमालितनयाकरुणास्पदेन ।
श्रीराघवार्यसुधिया परिनिर्मितोऽयं भाणश्चिरं कलयतात्कुतकं बुधानाम् ॥

---

No. **12703.** शृङ्गारपावनभाणः.

ŚṚṄGĀRAPĀVANABHĀṆAḤ.

Substance, paper. Size, 7¾ × 3¾ inches. Pages, 186. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, new.

A Bhāṇa describing the love and marriage between Rādhā and Lord Kṛṣṇa. It was intended to be staged on the occasion of the vernal festival of Tyāgarāja, a form of Śiva, worshipped in Tiruvālūr.

The author is Vaidyanātha, whose genealogy is thus given:

Karuṇākara
|
Śṛṅgāranātha
|
Kṛṣṇakavi
|
Vaidyanātha

The author's other productions are all mentioned in the beginning of the work and in the extract given below.

**Beginning:**

कण्ठोदञ्चत्कपोतध्वनिकृतभगवत्कर्णपीयूषवर्षा
हर्षासारप्रबुद्धप्रथमरसलताकोरकद्रोमहर्षा ।
रिङ्खद्वक्षोजशैला कलकलरशनानादकामाट्टहासा
राधापुम्भावकेली कलयतु सुभगम्भावुकं भावुकं वः ॥

* * * *

सू—अत्र किल पुरे श्रीमतः सौन्दर्यविटङ्कनामधेयस्य त्यागराजस्य निरुपाधिकृपासनाथस्य विश्वनाथस्य वसन्तयात्रायां समवेतान्

* * * *

कविरत्र कः ।

सू—

विख्यातः करुणाकरो जनयिता यस्यास यस्याननं
वाल्मीकेः परमाससाद वचसां देवी निरालम्बना ।
तस्माद्वत्सकुलोद्भवाद् बुधमणिः शृङ्गारनाथाभिधा-
जातोऽसौ कलशाम्बुधेरिव कलानाथः सनाथः श्रिया ॥

किंच—

यस्मै स्वप्नगता समर्पितवती वक्त्राब्जपेटीगतां
वीटीं स्वामनुकम्पयाद्भुतरसामम्बाखिलाण्डेश्वरी ।
सोऽयं सायमुदारनीरजलआमोदापदानाक्षम-
क्षेमाणां वचसां विलाससदनं जागर्ति कृष्णः कविः ॥

* * * *

सू—धिग्मौर्ख्यम् । तमपि न जानासि ।
शिष्या यस्य जयन्ति शिक्षितगिरः सर्वेऽपि खर्वेतरो-
पन्यासाः प्रतिवादिगर्वपटलीनिर्वापणोत्साहिनः ।
वक्त्रं यस्य विशेषतो विलसितं पादाङ्कवोक्तिस्रजा
जातः कस्य न गोचरः श्रवणयोः श्रीवैद्यनाथः सुधीः ॥

* * * *

सू—तस्य कवेः प्रबन्धाः—परदेवतामुखारविन्दशतकपद्मादिकिरीटान्त-वर्णनलक्ष्मीप्रसादमालाकर्णामृतशिवप्रार्थनावैखरीज्ञानप्रदीपकलिकानीलायताक्षीशत-कनीलकण्ठकण्ठकान्तिशतकचन्द्र(क)लाम्बाचरणस्तुतिरूपाः परमेश्वरप्रसादपरिपाकाः ककुभान्तराणि सुरभिलयन्ति ।

पा—कृतकृत्यः खलु कविः ।

सू—तदमुना कृतं शृङ्गारपावनं नाम भाणरूपकं प्रयुञ्जानाः सामाजिकमनांसि रञ्जयामः ।

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

तुल्यप्रेमभरं समस्तमपि च द्वन्द्वं विधत्तां विधि-
स्तत्र श्रीश्च सरस्वती च ललतां निर्मत्सरं सङ्गते ।
तस्य स्यान्न कदापि हन्त विरहः कल्पायुतैकक्षणः
कामश्चापि न चापकोटिघटितां विस्रंसयेज्ज्यां पुनः ॥

इतरैः किम्,

भूपाः पान्तु महीमहीनविभवाः काले च वर्षेद्घना
वर्णाः स्युः सकलाः स्वधर्मनिरता दीर्घायुषः श्रीजुषः ।
वस्तुन्यस्तु कवेरमुष्य च मतिर्ज्ञानात्मनि श्रीपदे
भाणोऽयं प्रथतामयं च कृतधीकामामृतानन्दनः ॥

इति निष्क्रान्ताः सर्वे ॥

**Colophon:**

इति शृङ्गारपावनभाणः सम्पूर्णः ॥

---

No. **12704.** शृङ्गारभूषणभाणः.

SṚṄGĀRABHŪṢAṆABHĀṆAḤ.

Substance, paper. Size, $6\frac{3}{4} \times 3\frac{3}{8}$ inches. Pages, 33. Lines, 14 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 41*a*. The other works herein are Śabdamañjarī (printed) 1a, Īśāvāsyōpaniṣad with Telugu Ṭīkā (printed) 61*a*.

Complete.

A Bhāṇa by Vāmanabhaṭṭabāṇa of Śrīvatsagōtra. It was intended to be staged on the occasion of the festival of God Virūpākṣa celebrated in the month of Caitra.

**Beginning:**

मैत्री येन मनोभवो विरचयन्विश्वं जयत्यञ्जसा
श्रेनोद्दीपनकारिणा विजयते शृङ्गारनामा रसः ।
रम्या यत्किरणाश्चकोरपरिषत्सौहित्यनाडिन्धमाः
सोऽयं वः सुखमातनोतु जगतामानन्दनश्चन्द्रमाः ॥

* * * *

हेमगिरिकूटलीलाकरहेमकूटशृङ्गविहितमङ्गलायतनस्य कामागमगन्धिवामभागस्य शेखरीभूतशीतभानुकमलस्य भगवतो विरूपाक्षस्य चैत्रयात्रामहोत्सवे ।

रतितन्त्रदेशिकानां रतिपतिनिगमान्तवावदूकानाम् ।
वैदग्ध्यभूषणानामेषां परिषत्समागता विदुषाम् ॥

सू—(स्मरणमभिनीय)
सौभाग्यस्य निधिः श्रुतस्य वसतिर्विद्यावधूनां वरो
लक्ष्याः केलिगृहं प्रसूतिभवनं शीलस्य कीर्तेः पदम् ।
निस्सामान्यविकासया कवितया जागर्ति वात्स्यान्वयः
श्रीमान् वामनभट्टबाणसुकविः साहित्यचूडामणिः ॥

तेन कविना प्रणीतं शृङ्गारभूषणं नाम भाणं प्रयुञ्जानैरस्माभिर्नियतमावर्जितैव सभा ।

**End:**

तथापीदमस्तु (भरतवाक्यम्)—
वेधोविष्णुमहेश्वरप्रभृतिभिः सम्भाविता निर्जरै-
राज्ञा शम्बरशासनस्य महती लोकत्रये दीव्यतु ।
सत्स्वन्येषु रसेषु चास्तु विजयी शृङ्गार एको रसः
सन्नाहिस्तनमण्डलं मृगदृशां तारुण्यमुज्जृम्भताम् ॥

**Colophon:**

इति कविकुलतिलकवामनकविविरचितं शृङ्गारभूषणाभिधानं भाणं सम्पूर्णम् ॥

---

No. **12705.** शृङ्गारभूषणभाणः.

ŚṚṄGĀRABHŪṢAṆABHĀṆAḤ.

Pages, 23. Lines, 7 on a page.

Begins on fol. 27*a* of the MS described under No. 3715.

Complete.

Same work as the above.

The scribe is probably a native of Mahadēvagrāma.

## No. 12706. शृङ्गारभूषणभाणः.
## ŚṚṄGĀRABHŪṢAṆABHĀṆAḤ.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 33. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Wants the beginning; otherwise complete.

Same work as the above.

---

## No. 12707. शृङ्गाररसोदयभाणः.
## ŚṚṄGĀRARASŌDAYABHĀṆAḤ.

Pages, 80. Lines, 18 on a page.

Begins on fol. 95a of the MS. described under No. 12430.

Complete.

A kind of Bhāṇa (Miśrabhāṇa) describing the love between Padmagandhini and Sarasaśēkhara: by Rāmakavi, son of Rāmakṛṣṇa, grandson of Hanūmatsūri, great grandson of Peddanasūri of Kaśyapagōtra and pupil of Rājaśēkhara Yatīśvara. He was a resident of Liṅgamaguṇṭa. The drama was intended to be staged on the occasion of the vernal festival of God Rāma in Cadaluvāḍa. The author had an elder brother named Vēṅkaṭārya.

**Beginning:**

श्रीमत्या जगतां मातुर्विधत्तां वः श्रियं स्मितम् ।
शिवेन स्वीकृते प्रेम्णा पाणौ तत्समयोदितम् ॥

* * * *

(नान्द्यन्ते)

सूत्रधारः—

* * * *

विविधदेशभाषानिपुणरसिकजनपरिवारनिवरीससञ्चारे श्रीमच्छदलुवाडनामपुरवरे

* * * *

भगवतः श्रीरामचन्द्रस्य वसन्तमहोत्सवदिदृक्षुणा

* * * *

विद्वद्बृन्देन किमपि रूपकमभिनेतव्यमिति ।

* * * *

(आकाशे कर्णं दत्वा, स्मृतिमभिनीय)

श्रुतं मया खल्वमरावतीनगरा(व)ती(ति)शाश्व(व्य)लङ्कारधुरन्धरायां नवरसमधुरायां (मधुरायाम् ।)

यथा किल—

"आसील्लिङ्गमगुण्टपट्टणवरे श्रीरामनामा कवि-
र्नेता पेद्दनधीमतो गुणनिधेः पौत्रो हनुमत्सुतः ।
पुत्रः काश्यपगोत्रिणः स्थिरमतेः श्रीरामकृष्णस्य स-
द्वाक्याबद्धकवित्वपद्धतिचणः श्रीविट्ठलार्यानुजः ॥
स कविर्बभाण भाणं शृङ्गाररसोदयाख्यमन्वर्थम् ।
भाषात्रयभूषितमतिगुणवोषितमवशेषितोक्तिभिः सहितम् ॥
स भाणः साधुप्रयोगः पण्डितजनहृदयानन्दकारी" इति ॥

अहमपि तेन रसिकजनसमुल्लासकरणमहिम्ना शृङ्गाररसोदयनाम्ना मिश्रभाणेन नवरसविस्तारानिमान् समास्तारानभिनन्दयामि ।

* * * *

भो भोः समास्ताराः सावधानमवधार्यतामिति लिखितपत्रिकां वाचयति—स्वस्ति श्रीजयाभ्युदयभावनामसंवत्सरे वैशाखबहुलपक्षद्वितीयायां शुभमुहूर्ते पद्मगन्धिनी सरसशेखरस्य कलत्रपदमनुभवत्विति मदनवसन्तजैवातृकान् साक्षीकृत्य कुक्कुटोपाध्यायेन लिखितपत्रिकायामनुलिखितं रामलक्ष्मणाभ्यामङ्गीकृतं भरतशत्रुघ्नाभ्यामूरीकृतं मारुतसुतेन प्रियमिति भाषितं सामाजिकैः ।

**End**:

स्योना पृथ्वी भवतु यनिभिर्ब्राह्मणा यायजूकाः
कानीनामा भुवि नृपतयः संहति(तौ) याचकानान ।
काले वृष्टिं सृजतु वरुणो भद्रमेवास्तु गोभ्यो
देशे देशे सुकविजनता प्राप्नुयाच्च प्रतिष्ठाम् ॥

**Colophon**:

इति श्रीराजशेखरयतीश्वरप्रसादासादितसाहित्येन श्रीविघ्नेश्वरचरणारविन्दवन्दनप्राप्ताष्टभाषाकवित्ववैभवधुरन्धरेण हनुमत्पण्डितपौत्रेण रामकृष्ण . . . लिङ्गमगुण्टरामसुकविशेखरेण विरचितः शृङ्गाररसोदयो नाम मिश्रभाणः समाप्तः ॥

---

No. 12708. शृङ्गारराजतिलकभाणः.

SṚṄGĀRARĀJATILAKABHĀṆAḤ.

Pages, 30. Lines, 21 on a page.

Begins on fol. 110*a* of the MS. described under No. 2580.

Complete.

A Bhāṇa by Avināśīśvara, son of Vandavāsi Rāma of Ātrēyagōtra and Veṅkaṭāmbā. The author is said to have been well-versed in Sūryasiddhānta. He is said to have been the grandson of Īśvara and the disciple of Śēṣādriguru. The drama was intended to be staged on the occasion of the vernal festival of God Varadarāja of Varadarājapura on the banks of the Kāvēri, near Srirangapatam, which festival after having been stopped for some time was again celebrated by Śrinivāsaprabhu at the instance of 'āmarāja, son of Kṛṣṇarāja, King of Mysore.

**Beginning :**

कल्याणानि करोतु नः करिमुखः शुण्डास्खलत्स्फूत्क्रिया-
निश्च्युतोत्पतदम्बुबिन्दुनिकरानालोक्य लोलेक्षणः ।
मुक्ताजालधियोत्तरीयचलनस्स्तेभकुम्भोज्ज्वल-
द्रुग्याहस्यकुचं समागतवतीः स्वर्वारकान्ता हसन् ॥

* * * *

कवेरतनयातटे स्फुरति नागगन्धर्वराड्सुग्रहविराजितं सघनवाहनं शोभनम् ।
बुधाभिमृ(ष्ट)तमप्सरोगणलसत्सुधर्माश्रितं पुरन्दरपुरोपमं वरदराजसंज्ञं पुरम् ॥

* * *

कृष्णरायनृपोदर[व]सुधाब्धिसुधाकरस्य राजश्रीचामराजराजन्यस्याज्ञया सकलाधिकारधुरन्धरेण

* * * *

मधुमथनकोरःप्रदेशेनेव श्रीनिवासेन तेनैव नाम्ना प्रख्यातेन प्रभुणा

* * * *

चिरकालपरिहृतमहोत्सवस्य पूजितराजीवजातादिराजराजस्य करिवरदराजस्य स्वामिनः पुनरारोध्यते नूतनवसन्तोत्सवः ।

* * * *

(स्मृतिमभिनीय, सशिरश्श्लाघम्)

पुरा खलु निरन्तरशङ्करचरणारविन्दध्यानशुद्धान्तरङ्गः, सूर्यसिद्धान्तादिसमस्तशास्त्रप्रवीणः, प्रथमात्रेयगोत्रप्रजातः, वन्दवाशिकुलकलशजलनिधिकलानिधिः, कुमार इवेश्वरनन्दनः,

* * * *

दाशरथिरिव श्रीरामाभिधानः कश्चन विद्वानाविरभूत् । अपि च—एवमेवं खलु वर्णयन्ति लोकाः

दयानिवासः सुकृतस्य धामा प्रभाकरो दुर्जनकैरवाणाम् ।
विद्यानिधवा गुणरत्नपेटी साहित्ययोषित्कुचकुम्भहारः ॥

श्रीरामविदुषस्तस्य येन पुत्रेण पुत्रिणी ।
सुव्रता वेङ्कटाम्बाभूद्देवकी शौरिणा यथा ॥
यस्य सन्दर्शनान्मूकः प्रव्रजेद्वावदूकताम् ।
शेषाद्रिगुरुणा तेन प्राप्तविद्यो बभूव यः ॥

* * * *

स किल कविः—

श्रीरामसूरितनया(यो) विनयाभिराम(:)
श्रीकण्ठदेवचरणाम्बुजसक्तचित्तः ।
शृङ्गारवीररसमन्दिरमीश्वराख्य(:)
शृङ्गारराजतिलकं स बभाण भाणम् ॥

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

* * * *

श्री(शा)पाङ्गविलोकनात्कुशलिनः सर्वे महान्तो जना
भूयासुर्नरनायकाश्च धरणीं रक्षन्तु धर्मे रताः ।
भाणोऽपीश्वरनिर्मितो विजयतां शृङ्गारसाराकरः
चन्द्रः पञ्चशरासनश्च कलटा जारो रमन्तां चिरम् ॥

**Colophon:**

श्रीमतः प्रथमात्रेयगोत्रप्रजातस्य बन्दवाशिकुल(तिल)कस्य श्रीरामसंज्ञस्य विद्वन्मणेर्नन्दनेन वेङ्कटाम्बागर्भसम्भवेन अविनाशीश्वराख्येन कविना विरचितः शृङ्गारराजतिलको नाम भाणः समाप्तो भूयात् ॥

अस्य ग्रन्थस्य ग्रन्थसङ्ख्या पञ्चाशदधिकचतुश्शतम् ॥

---

No. 12709. शृङ्गारसर्वस्वभाणः.

ŚṚṄGĀRASARVASVABHĀṆAḤ.

Pages, 54. Lines, 5 on a page.

Begins on fol. 75*a* of the MS. described under No. 12308.

Complete.

A Bhāṇa dealing with the love between Līlāvatī and Līlāvataṁsa: by Svāmī Śāstrin, brother of Subrahmaṇyasudhī and son of Anantanārāyaṇa Śāstrin. The drama was intended to be staged on the occasion of the vernal festival of Mātṛbhūteśvara, i.e., Tāyumānavar, a form of Śiva, worshipped in Trichinopoly.

The copying was finished on Friday, the 5th of Āṣāḍha Bahuḷa of Piṅgaḷa year, by the son of Veṅkaṭācala Jōsyulu.

**Beginning**:

आत्मानं रमणं च चित्रफलके मकान्तकामाहवा-
बालिस्य स्मितपूर्णगण्डफलकामालोकयन्ती रहः ।
आश्लिष्याद्रिसुतां त्रपावनतमप्युन्नम्य तस्या मुखं
आम्यन्मूलतमुल्लसन्नयनमाजिघ्रन् हरः पातु वः ॥

* * * *

(नान्द्यन्ते)

सूत्रधारः—

* * * *

त्रिशिरःपुर्यां नित्यनिवासरसिकस्य निखिलगीर्वाणाभिवन्दितचरणस्य मुग्धेन्दुशकलालङ्कृतकोटीरस्य सुगन्धिकुन्तलाकुचासक्तपाटीरस्य भगवतो मातृभूतेश्वरस्य वसन्तयात्रायाम्

* * * *

सू—(स्मृतिमभिनीय, सानन्दम्) अमुं किं न जानासि?

जयत्यवनिमण्डले स्वयमनन्तरा(ना)रायणः
सुधीर्गुहपदाम्बुजद्वितयगाढलग्नान्तरः ।
यदीयचरणाम्बुजं भवति चारु नीराजितं
वदावदबुधावलीमकुटकोटिरत्नाङ्कुरैः ॥

पारिपार्श्वकः—अयं किल सत्याद्रिनिवासिनः शरजन्मनो मूर्तिरपरा नराकृतिरिति सन्तः कथयन्ति ।

सू—भगवतः काश्यपस्य महेन्द्रोपेन्द्राविव तनयावस्य सकलभुवनविख्यातौ जयतः । तयोरयं प्रथमः—

वाचो यस्य जयन्ति सौरभकिरः सायं प्रहर्षोल्लस-
न्नीलाम्भोरुहगर्भनिर्भरगलन्माध्वीकधारामुचः ।
विद्यावान् विनयी विशुद्धचरितो विख्यातनामा च यः
सुब्रह्मण्यसुधीरिति क्षितितले सौभाग्यलक्ष्मीनिधिः ॥

पारिपार्श्वकः—ज्ञात एवायं महाभागः । ततः—

सू—तस्यायमनुजन्मा ।

सरसमधुरगंभीरोदारसाहित्यभङ्गीन(सु)मुत्रुमितवच[ल]श्श्रीलब्धकीर्तिप्रचारः ।
जयति निगमशास्त्रश्रौतसम्पत्समृद्ध सकलविबुधचन्द्रः स्वामिशास्त्री कवीन्द्रः ॥

तेन किल प्रणीतं शृङ्गारसर्वस्वं नाम भाणं निरूपयद्भिरस्माभिरभिनन्दनीयाः सामाजिकाः ।

**End:**

तथापीदमस्तु (भरतवाक्यम्)—

सन्तः सन्तु समन्ततोऽपि मु(वंन) सम्पूर्णकामाः कवि-
श्रेणी वृद्धिमुपैतु सत्प्रनुसभालङ्कारनिषाहि(ष्पादि)का ।
कान्ताभिः सह कामशास्त्रपदवीपाण्डित्यपारङ्गताः
स्वच्छन्दं विहरन्त्वमी रसिकमूर्धन्यास्तु धन्याः सुखम् ॥

**Colophon:**

इति स्वामिशास्त्रिणा विरचित(तं) शृङ्गारसर्वस्वं नाम भाणं सम्पूर्णम् ॥

---

No. 12710. सङ्कल्पसूर्योदयः.
SAṄKALPASŪRYODAYAḤ.

Pages, 234. Lines, 26 on a page.

Begins on fol. 1*a* of the MS. described under No. 5775.

Complete.

By Vēdāntadēśika. Same work as that described under R. No. 1855(*b*) of the Triennial Catalogue of MSS., Vol. II, Part I-C, wherein see for the beginning.

**End:**

(भारतवाक्यम्)—

अङ्गीकुर्वन्त्वकलुषधियो नित्यमध्यात्मविद्या-
मार्यो धर्मः स्पृशतु वसुधामाशिषः पारवर्ती ।
देवः श्रीमान् निरवधिदयासिन्धुरस्मिन्निबन्धे
वक्ता श्रोता वचनविषयः श्रीयतां वासुदेवः ॥

(इति निष्क्रान्ताः सर्वे)

**Colophon:**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु संकल्पसूर्योदये निःश्रेयसलाभो नाम दशमोऽङ्कः ॥

स्तोतुं निन्दितुमस्मदुक्तमथवा सोढुं समूढं जगत्
किं नदिछ्यमनन्तचिन्तनरसे सुस्थे सुखं तस्थुषाम् ।

शिष्याः शिक्षितबुद्धयः श्रुतिपथे येषां वयं ये च न-
स्तत्संतोषसमर्पणक्षममिदं साडम्बरैः किं परैः ॥

---

No. 12711. सङ्कल्पसूर्योदयः.
SAṄKALPASŪRYŌDAYAḤ.

Substance, palm-leaf. Size, 17⅞ × 1⅜ inches. Pages, 173. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above.

---

No. 12712. सङ्कल्पसूर्योदयः.
SAṄKALPASŪRYŌDAYAḤ.

Substance, palm-leaf. Size, 15¼ × 1¼ inches. Pages, 36. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains the first act.

Same work as the above.

---

No. 12713. सङ्कल्पसूर्योदयव्याख्या—प्रभाविलासः.
SAṄKALPASŪRYŌDAYAVYĀKHYA : PRABHĀ-VILĀSAḤ.

Substance, paper. Size, 11 × 8¼ inches. Pages, 253. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

Same work as that described under R. No. 1855(a) of the Triennial Catalogue of MSS., Vol. II, Part I-C. By Ahōbalacārya of Ātrēya-gōtra.

---

No. 12714. सङ्कल्पसूर्योदयव्याख्या—प्रभाविलासः.
SAṄKALPASŪRYŌDAYAVYĀKHYA : PRABHĀ-VILĀSAḤ.

Pages, 123. Lines, 25 on a page.

Begins on fol. 565 of the MS. described under No. 12500.

Contains the acts three to ten.

Same work as the above.

**End:**

वीक्ष्यमाणो सुज्ञान एवात्मकृतं विपाकं हृद्याग्वपुर्भिः

* * * *

फलेन पृच्छति—क्षिप्तेति । तदुक्तम् ।

* * * *

त्वयैव प्रभया राजन् दुष्प्रेक्ष्या देवदानवैः ।
तद्धि ज्योतिषि सर्वाणि प्राप्य नाभान्ति तेजसा ॥
इति सर्वं समञ्जसम् ॥

**Colophon :**

इत्यात्रेयगोत्रसंभवेन श्रीमदहोबलनाम्ना विदुषा विरचिते सङ्कल्पसूर्योदयव्याख्याने प्रभाविलासाख्याने दशमोऽङ्कः ॥

---

## No. 12715. सङ्कल्पसूर्योदयव्याख्या.
## SAṄKALPASŪRYŌDAYAVYĀKHYĀ.

Substance, paper. Size, 11 × 8⅞ inches. Pages, 391. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

Another commentary on the Saṅkalpasūryōdaya. The name of the commentary is not given. Up to a portion of the sixth act this commentary agrees with that printed in Telugu characters under the name of Prabhāvalī in the Conjeeveram Literary Institution Series, which is said to have been written by Śrīnivāsa.

**Beginning :**

ब्रह्मतन्त्रयतीन्द्रोक्तरहस्यार्थविचक्षणम् ।
श्रीशैलताततनयमनन्तार्यमहं भजे ॥
भगवन्तमिवानन्तकल्याणगुणसागरम् ।
वेदान्तदेशिकं नौमि वेङ्कटेशगुरूत्तमम् ॥
संसाराख्यनिशीथसुप्ततनुभृत्संबोधनाग्रणीः
सूरीणां स गुरुर्व्यधात्प्रकरणं सङ्कल्पसूर्योदयम् ।
यत्रैतत्परिचिन्वतां स भगवत्सङ्कल्पसूर्यो निशां
मायां भागवतीं विमोक्ष्य विमलां धत्ते दृशं शाश्वतीम् ॥
यत्र सर्वे गुणाः पूर्णा दोषो यत्र न कश्चन ।
व्याकुर्महे तं सङ्कल्पसूर्योदयमनुत्तमम् ॥
वेदान्तदेशिकगिरां भावः केनावगम्यते ।
अथापि तद्दयाधारो व्याख्यास्यामि यथामति ॥

इह सङ्कल्पसूर्योदये सकलशारीरकशास्त्रार्थः संगृहीतः । शारीरकशास्त्रार्थश्च पञ्चविधः—स्वसिद्धान्तप्रतिष्ठापनं

* * * *

सुधारसविधाभृतः शशिकराकृतिव्याकृताः
पुरस्कृततिरस्कृतेक्षुरसशर्करासत्क्रियाः ।
कथं च वितथं विशङ्कटितवेङ्कटार्योक्तयः
स्फुटं विकटबुद्धिभिः सपदि विप्रथेरन्निह ॥
अतीतोदन्वति प्रौढं हनुमति तु जाग्रति ।
सांयात्रिकाः संचरन्ते किं न पोतैर्महार्णवे ॥
महत्सु सत्सु विद्वत्सु सङ्कल्पमिहिरोदयम् ।
व्याख्यातुमुत्सुको मोहादहं तत् क्षन्तुमर्हथ ॥

इह खलु वेदान्ताचार्यः सर्वजगत्प्रसिद्धः कवितार्किकसिंहापरगुणनामधेयः श्रीवेङ्कटेशगुरुसार्वभौमः संसारदवदहनदंदह्यमानं

* * * *

यद्भक्तीति । नारायणो मे समस्तविपदुत्तारायास्त्वित्यन्वयः । यत्संकल्पसूर्योदयः यस्य श्रीमतो नारायणस्य भक्तिर्निदिध्यासनं तस्य प्रचयः दर्शनसमानाकाररूपपरिपाकविशेषः । तदात्मके दिनमुखे प्रातःकाले भक्तिमतां ज्ञानगोचरः सन् क्षेत्रिणः जीवस्य; जात्येकवचनम् ।

* * * *

**Colophon:**

इति श्रीसङ्कल्पसूर्योदयव्याख्यायां स्वपक्षप्रकाशः प्रथमोऽङ्कः ॥

**End:**

श्रीपराशरब्रह्मर्षिवत् जगतां मङ्गलमाशास्ते । यथा स्वप्रबन्धान्ते अपजन्मजरादिकां समृद्धिमिति जगतां भद्रमाशासितवान्, तथा अयमपि श्रीवेदान्ताचार्यः स्वप्रबन्धान्ते जगतां भगवत्प्रसादरूपं मङ्गलं भद्रमाशास्ते इति ॥

**Colophon:**

इति श्रीसङ्कल्पसूर्योदयव्याख्यायां निःश्रेयसलाभो नाम दशमोऽङ्कः ॥

स्वग्रन्थे मत्सरग्रस्तान् प्रत्याह—स्तोतुमिति । अस्मदुक्तं यत्किंचिद्गुणे सति स्तोतुं दोषे सति निन्दितुम् । अथवा दोषे सत्यपि

* * * *

अन्तर्निःसारत्वेऽपि बहिःससंभ्रमैः परैरितरैः किं प्रयोजनम् ॥

श्रीमान् रामानुजार्योक्त्यमलसुरनदीपाविताशेषलोको
विद्यासंपन्निधद्या कविकथकघटामस्तकन्यस्तपादः ।
अन्याहिव्यैः प्रबन्धैः श्रुतिगहनगुहादीपमालासगन्धैः
वेदान्ताचार्यवर्यो गुणनिधिरिह मां सर्वतन्त्रस्वतन्त्रः ॥

---

## No. 12716. सङ्कल्पसूर्योदयव्याख्या.
## SAṄKALPASŪRYŌDAYAVYĀKHYĀ.

Pages, 37. Lines, 8 on a page.

Begins on fol. 10*a* of the MS. described under No. 1840, wherein this work has been mentioned as Saṅkalpasūryōdaya in the list of other works.

Complete.

A summarized version of the commentary on the Saṅkalpasūryōdaya of Vēdāntadēśika described under the previous number.

**Beginning:**

सङ्कल्पसूर्योदये सकलशारीरकशास्त्रार्थः संगृहीतः । स च पञ्चविधः । स्वसिद्धा . . . . . . . . . . . . . . विरोधिविलय-पूर्वकमुपायपरिग्रहः । ततो मोक्षप्राप्तिः । प्रथमेऽङ्के स्वसिद्धान्तस्थापनम् । द्वितीये स्वसिद्धान्तविरोधिनः परसिद्धान्ताः प्रतिक्षिप्ताः । तृतीये स्वसि-द्धान्तोपायनि . . । चतुर्थाद्यष्टमान्तेषु उपायविरोधिनो निरस्ताः । उपायपरिकरा-श्चोक्ताः

* * * *

भक्तिर्निदिध्यासनम् । प्रचयः दर्शनसमानाकारः । अभ्रनिभूषणायमानैः ।

**End:**

मत्सरग्रस्तान् प्रत्याह—स्तोतुमिति । गुणैः स्तोतुं दोषैः निन्दितुम् । अथवा दोषे सत्यपि सोढुम् । किं नश्छिन्नम् अस्माकं का हानिः । सुखे अपायरहिते अनन्तस्य भगवतः चिन्तनरसे ध्यानास्वादे सुखं तस्थुषां नः । वेदमार्गे शिक्षितबुद्धयः वयं येषां शिष्यास्ते अस्मदाचार्याः । ये च नः अस्म-च्छिष्याः । इद नाटकं तेषां संतोषसमर्पणक्षमम् । इदं परिपालयन्त्वित्यर्थः । साडम्बरैः अन्तरसारत्वेऽपि बहिः ससंभ्रमैः किं प्रयोजनम् ॥

**Colophon:**

दशमाङ्कव्याख्या संपूर्णा ॥

## No. 12717. सङ्कल्पसूर्योदयव्याख्या.
## SAṄKALPASŪRYŌDAYAVYĀKHYĀ.

Substance, palm-leaf. Size, 17 × 1¾ inches. Pages, 172. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off towards the close of the tenth act and wants the seventh act. Some leaves are wanting in the sixth act.

Another commentary on the Saṅkalpasūryōdaya of Vēdāntadēśika. The commentator's name is not given.

**Beginning:**

श्रीमान्वेङ्कटनाथार्यः कवितार्किक (. . . .) ॥

* * * *

परनामा सर्वतन्त्रस्वतन्त्रः कवितार्किकसिंह इति प्रख्यात

* * * *

तः सङ्कल्प सङ्कल्पसूर्योदयाख्यप्रकरणरूपेणोज्जग . . . . तस्यामाद्यश्लोकः— यद्भक्तीत्यादि । इह भक्तिशब्देन वेदनादिपदवाच्यदर्शन . . . स्मृतिरुच्यते । तस्याः प्रचयः सान्तत्यं विजातीयज्ञानानन्तरितत्वमिति यावत् । स एवात्मा रूपं यस्य स तथोक्तः । दिनमुखे प्रभातसमये भक्तिप्रचयस्य . . . . य साधन-त्वाद्दिनमुखत्वनिरूपणम् । दृष्टिक्षमः ज्ञानप्रदानशक्तः । दर्शनयोग्य इति वा । सूर्यपक्षेऽपि स एवार्थः ।

* * * *

**Colophon:**

इति कवितार्किकसिंहकृतस्य संकल्पसूर्योदयस्य विवरणे प्रथमोऽङ्कः ॥

**End:**

नन्विति । सुमतिजानिः ; सुमतिः जाया यस्य स तथोक्तः अहमेकधीः एकचित्तो ननु सुमतिजानिर्नन्विति वा संबन्धः । विवेकसहधर्मचारिणि विवेकस्य यो धर्मः स एव तवापि धर्म इत्यर्थः । अनन्यभावयोरन्याभिप्रायरहितयोः आव-योरर्थ्यं प्रार्थनीयम् अर्थ याच्ञायामिति धातुः । अर्थादनपेतमिति अर्थ्यं प्रम . . .

---

## No. 12718. सङ्कल्पसूर्योदयव्याख्या.
## SAṄKALPASŪRYŌDAYAVYĀKHYĀ.

Pages, 221. Lines, 24 on a page.

Begins on fol. 1*a* of the MS. described under No. 12663.

Breaks off in the tenth act and wants the latter portion of the sixth act and the whole of the seventh act.

Same work as the above.

Restored from the MS. described above.

---

## No. 12719. सम्पत्कुमारविलासभाणः.
## SAMPATKUMĀRAVILĀSABHĀṆAḤ.

Pages, 33. Lines, 7 on a page.

Begins on fol. 26*a* of the MS. described under No. 10536, wherein this work has been mentioned as Mādhavabhūṣaṇabhāṇa in the list of other works.

Complete.

A Bhāṇa by Raṅganāthamahādēśika of Śrīvatsagōtra and belonging to the family of Muḍumbai Nallān Cakravarti. Śrībhāṣya Śrīraṅgācārya is said to have eulogised the author mentioned above.

**Beginning :**

लक्ष्मीं वक्षसि बिभ्राणं यदुक्षोणीवराधिपम् ।
नरकण्ठीरवं वीरं प्रपद्ये पुरुषोत्तमम् ॥

अपिच,

नीलास्वादितपल्लवाधररसं . . . लिङ्गितं
श्रीवत्साहतवक्षसं वसुमतीसंसेविताङ्घ्रिद्वयम् ।
राधाराधितदिव्यदेहसुषुमं धाराधरानीलभं
नन्दानन्दकरं हरिं मम गिरां लाभाय वन्दामहे ॥

* * * *

अथापि संपत्कुमारविलासमिति सुस्पष्टं सर्वे संवदन्त्विमं भाणमिति ममाव-माशयः । अलमलमेतद्विस्तारेण । पृच्छ पृच्छ शङ्कान्तरम् । (कर्णं दत्वा) किं ब्रवीषि ।

तर्ककर्कशचित्तस्य वेदान्तकुशलस्य च ।
तस्य कोमलता काव्ये सरसत्वं कथं भवेत् ॥

इति ।

* * * *

सोऽयं कविर्विश्वजनानुकूलः सारश्च भाणो दशरूपकेषु ।
सभा हि सारज्ञमुखा किमन्यदेतत्त्रयं दैववशादिहासीत् ॥

**End:**

(भरतवाक्यम्)—

आब्रह्मकल्पपर्यन्तमनङ्गस्यानुशासनम् ।

आसेतुहिमशैलान्तं जीयात् . . . . . ॥

(सरभसमुत्थाय सविनयप्रेमादरमञ्जलिबन्धं विधाय)

संपत्पुत्रविलासाख्यः शृङ्गाररसभास्वरः ।

भाणोऽयं जयतु श्रीमान् श्रीमुनाथश्च शा(श्वतम्) ॥

* * * *

चक्रवर्तिकुलाचार्यं यादवाचलभूषणम् ।

श्रीवत्सवंशसंजातमाश्रितामरभूरुहम् ॥

श्रीशदेशिकपादासं रङ्गनाथमहागुरुम् ।

मत्स्यादिकल्किपर्यन्त . . . . षु वै हरेः ॥

योजयस्व महाविद्वन्नर्थान्तरविशेषतः ॥

इति । हन्त हन्त श्रीभाष्यश्रीरङ्गाचार्यमहाकविः श्रीरङ्गनाथमहादेशिकं श्रीशस्य दशावताररीत्या वर्णयामासेति ।

(सहर्षमञ्जलिं बद्ध्वा) सावधानेनाहमप्याकर्णयामि—

* * * *

**Colophon:**

इति श्रीवत्सवंशकलशोदधिराकासु(धाकरस्य) . . . . . . . . त्र श्रीमुष्णनन्विनल्लान्चक्रवर्तिकुलललामभूतस्य श्रीरङ्गनाथमहादेशिकस्य . . संपत्कुमारविलासाख्योऽसौ भाणः संपूर्णः ॥

---

## No. 12720. सीतादिव्यचरित्रम्.

### SĪTĀDIVYACARITRAM.

Substance, paper. Size, 13½ × 8¼ inches. Pages, 242. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

**A drama** in seven acts based upon the leading incidents which occurred in the life of Rāma from his marriage with Sīta down to his coronation: by Śrīnivāsakavi, a native of Śrīmuṣṇa, a village in the South Arcot district. He was the son of Varadaguru of Kauṇḍinyagōtra. The drama was intended to be staged on the occasion of the vernal festival of God Bhūvarāha worshipped in Śrīmuṣṇam. As the codex was copied from an old injured MS. there are many omissions in the end.

**Beginning:**

श्रीरामः सततं श्रियं दिशतु नः सीतामनोवल्लभः
पारावारभयाभयप्रदकलापाण्डित्यशौण्डेक्षणः ।
क्षीरात्यद्भुतयद्धनुर्भुजगराडत्यन्ततुन्दीकृतो
नाराचाह्वयजिह्वया दशमुखप्राणानिलास्वादनैः ॥

अपिच,

गोपायेदखिलानेष गोपा येनाभिपालिताः ।
सत्यभामासमाक्रान्तः सत्यभामासमन्वितः ॥

(नान्द्यन्ते) सूत्रधारः—(नेपथ्याभिमुखमवलोक्य) अये किमिदानीं (सादरबहुमानम्) । भो जगदेकसूत्रधारेत्याहूयादिष्टोऽस्मि श्रीभूमिनीलासहचारितधर्मणः, श्रीमुष्णदिव्यनगरीसीमन्तमुक्तामणेः अतिविपुलविपुलातपत्रराजतदण्डायमानदंष्ट्राङ्कुरस्य भगवतः श्रीभूवराहस्य वसन्तमहोत्सवसेवासमुत्कण्ठितमानः(स)पुण्डरीकेण पाण्डितमण्डलेन । यथा—

सत्कृतसीजन्येन (हि) कौण्डिन्यवर(प्र)दगुरुजन्येन ।
सत्कविमूर्धन्येन श्रीमुष्णश्रीनिवासधन्येन ॥
रचितं साधु पवित्रं रामायणमनुविधायिरसमित्रम् ।
सीतादिव्यचरित्रं रूपकमभिनीय बहुतरविचित्रम् ॥

**End:**

(सर्वतोऽवलोक्य) भो भोः . . . . . . . . . . तथाप्यस्त्विदं भरतभारता—

श्रीभूमी जयतां स . . . . . . नीतिर्नृपाणां भवेत् ।
श्रीरामः सह सीतया . . . . . विजयतां श्रीभूवराहो . . ॥

**Colophon:**

सीतादिव्यचरित्रे नाटके सप्तमोऽङ्कः ॥

---

No. 12721. सीताराघवनाटकम्.
SĪTĀRĀGHAVANĀṬAKAM.

Pages, 210. Lines, 12 on a page.

Begins on fol. 1*a* of the MS. described under No. 12225.

The MS. contains one to seven acts, the seventh being incomplete. Many leaves in the middle are wanting. There is no colophon beyond the fifth act.

A drama describing the leading incidents in the life of Rāma, from the time the sage Viśvāmitra took him to his hermitage down to the coronation of Rāma. The author is Rāmapāṇivāda or Rāmavāriyar, pupil of Nārāyaṇabhaṭṭa (vide No 11706). Mention is made of King Vañcimārtāṇḍa of Trivandrum. The drama was intended to be staged on the occasion of the festival of Padmanābha in Trivandrum.

**Beginning:**

अशेषाधारमप्येकं शेषाधारमनेकवत् ।
व्यक्तमप्यलमव्यक्तं परं ज्योतिरुपास्महे ॥

(नान्द्यन्ते सूत्रधारः.)

सूत्र—

यमिवानुहरन् प्रीत्या चूडाचन्द्रोऽपि नृत्यति ।
सा वः सायं प्रकुंसस्य त्रायतां ताण्डवक्रिया ॥

अलमतिप्रसङ्गेन (नेपथ्याभिमुखमवलोक्य) आर्ये, इतस्तावत् ।

(प्रविश्य)नटी —अय्य इयं ह्मि ।

सूत्र—आर्ये,

श्रीनारायणभट्टपादकरुणापीयूषगण्डूषणा-
दिष्टां पुष्टिमुपैति यस्य कविताकल्पद्रुबीजाङ्कुरः ।
रामो नाम स पाणिवादकुलजस्तस्य प्रसूतं फलं
सीताराघवनामनाटकमिदं सभ्यार्थमभ्यागमत् ॥

तदभिनवं नाटकमभिनयेन सफलीकर्तुमभिलषामः ।

* * * *

स्यानन्दूराभिधाने महितमहिमनि क्षीरवारां निधाने
तल्पे सर्पेशरूपे रुचिमति पतगाधीशयानः शयानः ।
आधाता वाञ्छितानामवनिवलभिदां वञ्चिभूपालनाम्ना-
मास्राग्वज्ञापकेन स्फुटमिह विलसत्यात्मना पद्मनाभः ॥

* * * *

अधिस्यानन्दूरं जयति जगतीपालनपरं
परं ज्योतिः शीतद्युतिधवलशेषाहिशयनम् ।

यदन्तः सन्तन्वन्नखिलनृपतीनां न तु परं
सुराणामप्युच्चैरधिवसति मार्ताण्डनृपतिः ॥

* * * *

अये प्रस्तुतवस्तुनि प्रक्रान्तमेव कुशीलवैः ; यतो विश्वाभ्युदयहेतोरध्वरस्य परित्राणाय भगवता विश्वामित्रेण स्वमाश्रममुपनीते रामचन्द्रे तद्विरहपर्युत्सुकस्य महाराजदशरथस्य प्रावेशिकी ध्रुवा गीतिरियमाकर्ण्यते ।

**End:**

शत्रुघ्नः (नेपथ्याभिमुखमवलोक्य सहर्षम्)—
पूर्णाभिषेकमङ्गल्यः पूर्णचन्द्रसमद्युतिः ।
विश्वामित्रं पुरस्कुर्वन्नार्योऽयमभिवर्तते ॥

* * * *

निजकुसुमकोदण्डदाहक्रोधक्षुभितमनाः कुसुमायुधः खल्वेषः ।
विदलयति विषमेक्षणस्य चापं रूपं पश्य युज्यते वैरनिष्क्रियोऽस्य ॥
इति रहस्यमणं जानकीम् ।

---

## No. 12722. सुबालावज्रतुण्डनाटकम्.
## SUBĀLĀVAJRATUṆḌANĀṬAKAM.

Pages, 36. Lines, 16 on a page.

Begins on fol. 74*a* of the MS. described under No. 11861.

Complete.

A drama in five acts: by a prince named Rāmakavi. The plot of the drama is the killing of a serpent named Raktāṅgada by a rat named Vajratuṇḍa for having carried off his beloved, Subālā, as its prey.

**Beginning:**

चन्द्रचूडं परं धाम चन्द्रिकाविमलच्छवि ।
स्पन्दतां हृदि संतापसंतानशमनाय नः ॥

(नान्द्यन्ते सूत्रधारः)

सूत्र—

श्रीकण्ठस्य ललाटलोचनपुटादुद्भ्रान्तसप्तार्चिषा
साकं पुष्पशरैः सहेक्षुधनुषा दग्धे मनोजन्मनि ।
या स्वोन्मुक्तकटाक्षसायकवरेणादत्त देहार्धकं
पत्युः सा तुहिनाचलप्रियसुता भूयात्प्रमोदाय वः ॥

* * * *

सूत्रधारः—आदिष्टोऽस्मि सकलविस्मयनीयविद्यादयागुणभाजनेन समाजनेन; यथा—कविना श्रीरामनाम्ना नृपसुवा रचितं सुबालावज्रतुण्डं नाम नाटकं भवताभिनयचतुष्टयेन प्रवृद्धरसं प्रयोक्तव्यमिति । तदावां संनद्धावः ।

* * * *

गृहिणीमानयाम्येनां निहत्य रिपुमाहवे ।
मूषिकप्रवरामात्यो वज्रतुण्डो यथा प्रियाम् ॥

प्रस्तावना ॥

(ततः प्रविशति गौली).

गौली—अहो नु खलु अतिबहुमानास्पदं मूषिकामात्यस्य वज्रतुण्डस्यमहिमा; यस्य प्रतापादिगुणेन विनायकवाहनो मूषिकराजोऽपि अस्मदमात्यो भवतु भवानित्युक्तवान् ।

**End :**

महामूषकः—किं ते प्रियान्तरमुपहरामि।

वज्रतुण्डः—

अभिमतदयितापि जीविता मम भगवन् भवतः प्रसादतः ।
युधि रिपुरपि निर्जितो बली प्रियतरमन्यदतो न विद्यते ॥

तथाप्येतदस्तु (भरतवाक्यम्)—

इष्टं भूयाज्जनानामभिमतफलमाशालिनी भूतधात्री
कृत्स्नां कुर्वन्तु कल्पावधि सलिलधराः कालवृष्ट्या नितान्तम् ।
एवं युष्मत्प्रसादाद्दिनमनुभवताच्छ्रेयसे मामकीना
भक्तिर्विश्वेशपादाम्बुजयुगलगताप्यस्तु जन्मान्तरेऽपि ॥

(इति निष्क्रान्ताः सर्वे) ॥

**Colophon :**

इति पञ्चमोऽङ्कः ॥

---

## No. 12723. सुभद्राधनञ्जयम्.

## SUBHADRĀDHANAÑJAYAM.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 62. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

A drama in five acts, the plot of which is the love between Subhadrā and Arjuna and their marriage; by Gururāmakavi of Kaśyapagōtra,

son of Svayambhū and grandson (by the daughter) of Rājanātha. He was a native of Mūlāṇḍa (Muḷḷaṇḍram,? a village in the North Arcot district) of Tuṇḍiramaṇḍala. He has compiled, he says, a Campu-kāvya relating to Śiva and a poem about Kṛṣṇa.

**Beginning :**

शंभोः पञ्चसु वक्त्रेषु दीप्तिमन्मध्यमं नुमः ।
अघोरमपि यत्प्राहुरसतां निग्रहक्षमम् ॥

अपिच,

शश्वत्पार्श्वविवर्तनं च्युतिभिया धत्ते न शेषास्तरे
गात्रोन्मर्दभयात्करोति भुजनोदामावृतं कौस्तुभम् ।
नाभीपद्मरजः प्रमार्ष्टि नयनासङ्गव्यथाशङ्कया
लक्ष्म्या वक्षसि लालनाय रचितायासो हरिः पातु वः ॥

किंच,

भौमासुरव्यतिकरप्रतिबोध्मलानि भामामुखेन्दुपरिशीलनशीतलानि ।
शौरेरहस्करसुधाकरलोचनत्वं व्यञ्जन्ति शर्म वितरन्तु विलोकनानि ॥

(नान्द्यन्ते) सूत्रधारः—अहो वेङ्कटगिरेरनुभावः ।

* * * *

शेषाचलशिखरभूषामणेर्भगवतो गरुडध्वजस्य यात्रायां समागता एव भागवताः ।

* * * *

अस्ति किल काश्यपगोत्रस्य तत्रभवतो रामकवेः कृतिः सुभद्राधनंजयं नाम नाटकम् । नूनं तदुद्देशी परिषदादेशः ।

* * * *

अस्ति खलु तुण्डीरमण्डले मूलाण्डं नाम महानग्रहारः ।
तत्र केचन वसन्ति काश्यपाः श्रोत्रिया धृतशिवार्चनव्रताः ।
यैरघोरशिवदेशिकादिभिः प्रत्यपादि परतत्त्वमेश्वरम् ॥

अपिच,

सार्वभौमकविप्राग्र्या वश्यवाचो बहुश्रुताः ।
गुणोत्तरतया सर्वे गुरून् संभावयन्ति यान् ॥

तेषामन्वयभूषणस्य तनुभूरेष स्वयंभूगुरो-
दौंहित्रः कवितानिरूढयशसः श्रीराजनाथस्य च ।
एनामप्यकरोत्कृतिं श्रितगुणग्रामः स रामः कविः
काव्यं कृष्णपरं व्यधाच्छिवपरं चम्पूप्रबन्धं च यः ॥

नटी—येण खु रअणेसरप्पसादणं णाम णाडअं णिबद्धं ॥

सूत्र—अथकिम् ।

मारिषः—(सबहुमानम्)

देवीं वाचमुपास्य केचन वचोरत्नानि यत्नादपि
प्रासानि प्रणदन्ति पामरकथालापान्धकूपान्तरे ।
पुण्यश्लोकजनस्य वा भगवतः शौरेः पुरारेरपि
श्लाघायै स तु वाचिकाय तपसे संदर्भमभ्यस्यति ॥

**End :**

अतः परमपि किं प्रियमस्ति । तथापीदमस्तु (भरतवाक्यम्)—

सद्वस्तुप्रथनाय तत्रभवतः शिल्पं विधेः कल्पतां
धर्मैकप्रवणार्थकामानिरता धात्रीभुजः सन्त्वमी ।
जायन्तां सुखिताः समग्रविभवा दीर्घायुषः साधवो
जिह्वाग्रेषु च रोचनं कवयतां जागर्तु सारस्वतम् ॥

निष्क्रान्ताः सर्वे ॥

**Colophon :**

पञ्चमोऽङ्कः ॥

भद्रायास्तु सुभद्रा मे विजयं विजयः क्रियात् ।
बलाय बलदेवः स्यात् श्रीपतिः कल्पतां श्रिये ॥
सभ्याः कृष्णधनञ्जयोज्वलकृतिं संभावयध्वं बुधाः
सद्वस्तुप्रणयेन मास्तु भवतां शङ्कोन्मुखं वाङ्मुखम् ।
अस्थाने यदि शङ्कितेयमनघा नान्येव सोढुं क्षमा
कौलीनं कुलटेव किं कुलवधूर्मुग्धा तितिक्षिष्यते ॥
साहित्यैतिह्यमर्थप्रभवमभिनवां शब्दसन्दर्भशुद्धिं
व्युत्पत्तेः सिद्धिमग्र्यां विविधरससुधास्रोतसां(सोऽ)गाधतत्त्वम् ।
चित्रं शौरेश्चरित्रं किमपि रसवितुं चेतसा पारिषद्या
यथार्हंसावतंसीकुरुत गुरुकुलोत्तंसरामप्रबन्धम् ॥

## No. 12724. सुभद्राधनञ्जयम्.
## SUBHADRĀDHANAÑJAYAM.

Substance, palm-leaf. Size, 14¼ × 1⅜ inches. Pages, 50. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above

---

## No 12725. सुभद्राधनञ्जयम्.
## SUBHADRĀDHANAÑJAYAM.

Pages, 145. Lines, 10 on a page.

Begins on fol. 1a of the MS. described under No. 12522.

Complete.

Same work as the above.

---

## No. 12726. सुभद्राधनञ्जयम्.
## SUBHADRĀDHANAÑJAYAM.

Pages, 100. Lines, 9 on a page.

Begins on fol. 1a of the MS. described under No. 12573.

Wants two leaves in the beginning.

The plot of this drama is the same as that found in the previous work of the same name. The author is Kulaśēkharavarman, King of the Kērala country. His other work is Tapatīsaṁvaraṇa which has been already described in this catalogue. Both the works have been printed in the Trivandrum Sanskrit Series.

**Beginning :**

(कथय क)पिल वाचं सूनृतां त्वं दृढस्यो वितर विधिवदर्घ्यं पैल पाद्यं प्रयच्छ ।
उपहर मधुपर्कं धौम्य धेनुं पयोध्नीमुपनय च सवत्सां वत्स वात्स्यायन त्वम् ॥

(आकाशे) किं ब्रूथ, अनुष्ठितैवेयमस्माभिरस्य समुचिता सपर्येति । तथाव-दहमपि सुगृहीतनामानमेनमाशीर्भिरभिनन्द्य प्रस्तुते कर्मणि व्याप्रिये ।

(निष्क्रान्तः) विष्कम्भकः ।

ततः प्रविशति (धनुर्बाणपाणि)र्धनंजयः ।

धनंजयः—(सचिन्तं निश्वस्य) अहो नु खल्वतीतेऽपि कथंचित् तीर्थयात्रा-नियमयापयितव्ये वत्सरे,

अम्बास्तन्यमहाभिषेकमुपरि प्रेमाश्रुपातं गुरो-
रार्यस्यापि वृकोदरस्य चरणाश्लेषं समाश्लेषणम् ।

कृष्णायाश्च कटाक्षवीक्षणसुखं नासादयं प्रापितः
पुष्पेषोर्विशिखैर्मुकुन्दसहजासन्मार्गपुष्पस्पृहाम् ॥

**End:**

तथाप्येतावदस्तु—

मेघाः कुर्वन्तु पृथ्वीं प्रतिनवकलमश्यामकेदारबन्धा-
मार्द्रीनासां प्रजानामपहरतु भवान् नित्यमानन्दबन्धुः ।
प्रध्वस्तध्वान्तवृत्तेर्जलधरपटलश्रीमुषश्चक्रपाणे-
र्मैत्रीपात्रीभवेयं तव जनितजगच्चक्र जन्मान्तरेऽपि ॥

(निष्क्रान्ताः सर्वे)

**Colophon:**

पञ्चमोऽङ्कः ॥

---

No. **12727.** सुभद्राधनञ्जयव्याख्यानम्—विचारतिलकम्.

SUBHADRĀDHANAÑJAYAVYĀKHYĀNAM : VICĀRA-TILAKAM.

Substance, paper. Size, $8\frac{1}{4} \times 6\frac{3}{4}$ inches. Pages, 304. Lines, 16 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

A commentary on the Subhadrādhanañjaya of Kulaśēkharavarman described above. This work has been printed in the Trivandrum Sanskrit Series, and therein the name of the commentator is given as Śivarāma.

**Beginning:**

शिवायाशेषगुरवे शिवायै तद्भिदाभिदे ।
आभ्यामनन्यरूपाय मह्यं च सततं नमः ॥
यतः शिवस्याङ्कुरिता विदुषां च कृपा मयि ।
व्याकरोमि यथाबोधं तत्सुभद्राधनंजयम् ॥

लक्ष्मीपङ्कजनेत्रयोरित्यादि । लक्ष्मीपङ्कजनेत्रयोः प्रथमोपगूहनविधिः वः मङ्गलं पुष्णात्वित्यन्वयः । इह दिव्यमिथुनसंबन्धमवयवपरिस्पन्दपरिकरादिकमेव विश्वानुग्रहायालम् । तत्रापि परिकल्पितभिन्नरूपयोरभेदप्रकाशकस्योपगूहनविधे-राधिक्यमिति तस्यैव मङ्गलसंपादकत्वमाशास्यते । तत्कालावस्थानुगुणं विशि-नष्टि—स्मररसप्रस्तावमातन्वतोः ।

**End:**

एवं नाटकान्ते नायकरूपाभेदेन नटेन तन्मुखेन प्रबन्धनिर्मात्रा महाकविना च सकलक्षेमाय शुभशंसनं कृतमिति सर्वमङ्गलमस्तु ॥

शब्दार्थवपुषोरेष शिवयोर्नाटकच्छलात् ।
यथामति विचारोऽस्तु विद्वत्प्रीतिकरोऽपि नः ॥

**Colophon:**

इति सुभद्राधनंजयव्याख्याने विचारतिलकनाम्नि प्रथमाङ्कव्याख्यानं परिसमाप्तम् ॥

---

## No. 12728. सुभद्राधनञ्जयम्.
## SUBHADRADHANAÑJAYAM.

Substance, palm-leaf. Size, 10¾ × 1¼ inches. Pages, 22. Lines, 6 on a page. Character, Nandināgari. Condition, good. Appearance, old. Begins on fol. 63*a*. The other work herein is Subhadrāpariṇaya 1*a*. Contains the first act which wants the beginning and the end. Similar to the above. By Vijayīndrayati.

**Beginning:**

कथमयमुदित एव मुदितमुनिजनमानससारस. कुवलयहितरुचिरतररुचिसंबन्धेऽपि नलक्षितनलिनलपनप्रसन्नतां पतिदेवतासंनताङ्गीशिरोमणिमधिपतिवियोगेनेव मलिनीभूतामलिनीभिः कमलिनीं

* * * *

श्रीवत्सकौस्तुभभूषणोज्ज्वलनिजभुजान्तरालस्य जानकीजानेः विचित्रमहामहयात्रायां समागतानस्मानसमानकविताभिनयाह्लिनोदयायेति । अस्ति खलु जगति

* * * *

गम्भीरगुणसान्द्रः कुवलयहितचन्द्रो विजयीन्द्रो नाम संयमीन्द्रः । अयं खलु निखिलमार्गणानिर्गलमार्गशाखिनो भार्गवान्तेवासिनो भारद्वाजस्य निरवद्यविद्याविलाससदनं

* * * *

सुत्रामसुखसत्राशनसंसदनवरतजेगीयमानापदानो धनंजयो नाम ।

* * * *

किंचिदवनम्रकम्रलपनेन स्मरादिमशास्त्रवित्रासनमतिचित्रमतिविपुलत्रपाभरमासूचयन्ती नयनरुचिविजितकंजवना संजवनाभोगमवतरति सुभद्रा ।

**End:**

ससीत्कारगृहीतबिम्बोष्ठगतसुधारससमास्वादनेन . . . . . गाढालिङ्गनमाचरंश्चटुलतरविटधर्मनटनपटुतरो व्यत्यस्तीकृतसमस्त.

## No. 12729. सुभद्रापरिणयम्.
## SUBHADRĀPARIṆAYAM.

Pages, 124. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 12728

Contains two acts.

Similar to the above. By Sudhindrayati, disciple of Vijayīndrayati.

**Beginning :**

वन्दारौ नवरत्ननूत्नमकुटीवृन्दामरेन्द्रव्रजे
मन्दारोपवनप्रवालललितौ मन्दाकिनीसंश्रितौ ।
कुन्दाक्षेपिमरन्दनीरजरुचा सन्दानितौ सम्पदे
दीव्यामो वयमिन्दिरेशचरणौ कन्दावमन्दश्रियाम् ॥

* * * *

स्था—साधु साधु तदद्य निरवद्यतरगद्यपद्यात्मकप्रबन्धप्रवीणस्य कस्य वा कवेः कृतिमभिनयामः (इति चिन्तयति) ।

मा—(पुरोऽवलोक्य), क एष पत्रचित्रीयमाणपाणिस्समायाति ।

(प्रविश्य पुरुषः)

* * * *

तदन्तेवासिना सुधीन्द्रयतीन्द्रेण विरचितम्,

पद्या(द्यैः) सुष्ठु नियन्त्रितं श्रुतिसुखं नानारसोपस्कृतं
दिव्यं तद्रचनादहं रतिसुहृल्लाटव्यपारिप्लवम् ।
विद्वद्राजसमर्पिताकृतिमहोत्सेकं प्रवीणश्रितं
तन्वङ्गीपटसंविधानविभवं तन्वन्तु वन्द्यैः श्रितम् ॥

मा—भाव न नाम लिखितं नामधेयं प्रबन्धस्य ।

* * * *

मा—आर्य मयेदानीं वलयद्वयविनिर्गतवर्णैरवगतं सुभद्रापरिणयनाटकमिति ।

* * * *

आर्य, सुधीन्द्रयतीश्वरस्य लोकातिशायि माहात्म्यम् ।

स्था—भद्रे सत्यमेतत् । तथापि तद्गुरोर्विजयीन्द्रसंयमीन्द्रस्य महिमा वचसामगोचरः; यत्पादपरिचरणधुरीणधरारमणस्यापि,

निरन्तरमहीसुरप्रवररत्नदानक्रियासमानसमयोचितप्रवहमाणपाथोधिना ।

**End:**

ननु ते विमोक्षिनां तामेव सङ्घटयिष्यन्ति । तस्मात्तेषामेव पन्थानं चिन्तयामः ।

इति परिक्रम्य निष्क्रान्तास्सर्वे ॥

**Colophon:**

द्वितीयोऽङ्कः ।

---

## No. 12730. स्वप्नवासवदत्तम्.
## SVAPNAVĀSAVADATTAM.

Pages, 98. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 12542.

Complete.

A drama in six acts, the plot of which may be briefly stated thus: Yaugandharāyaṇa, the minister of Udayana, king of the Vatsa country, wished to bring about the marriage between the king and Padmāvatī, daughter of another king named Darśaka. For this purpose the minister made the king believe that his wife Vāsavadattā was burnt away in a general conflagration in the village of Lavaṇaka and thereupon the marriage between Udayana and Padmāvatī took place. Vāsavadattā did not really die, and the minister, disguising himself as a Brahmin, took Vāsavadattā and entrusted her to the custody of Padmāvatī describing her as his sister. One day while on bed, the king of Vatsa had a dream of Vāsavadattā and lamented her loss to Padmāvatī. The whole trick of the minister was afterwards discovered, and the king lived happily with his two wives. The work has been printed in the Trivandrum Sanskrit Series according to which the author is Bhāsa.

**Beginning:**

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्र—

उदयनवेन्दुसवर्णावासवदत्तावलौ बलस्य त्वाम् ।
पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम् ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किं नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग पश्यामि

(नेपथ्ये)— उस्सरह, उस्सरह । अय्या उस्सरह ।

सूत्र—भवतु विज्ञातम् ।

भूत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः ।
पृष्ठमुत्सार्यते सर्वस्तपोवनगतो जनः ॥

**End:**

राजा—सर्व एव वयं प्रयास्यामो देव्या वासवदत्तया सह ।
(भरतवाक्यम्)—

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः ॥

(निष्क्रान्ताः सर्वे) ॥

**Colophon:**

षष्ठोऽङ्कः ॥
स्वप्नवासवदत्ता समाप्ता ॥

---

## No. 12731. सोमवल्लीयोगानन्दम्.
## SÔMAVALLĪYÔGĀNANDAM.

Substance, palm-leaf. Size, 12⅜ × ⅞ inches. Pages, 108. Lines, 4 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Complete.

Same work as that described under R. No. 1611(*b*) of the Triennial Catalogue of MSS., Vol. II, Part I-C. By Aruṇagirinātha.

---

## No. 12732. सोमवल्लीयोगानन्दम्.
## SÔMAVALLĪYÔGĀNANDAM.

Substance, palm-leaf. Size, 17 × 1 inches. Pages, 31. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

Same work as the above.

---

## No. 12733. हरिविलासभाणः.
## HARIVILĀSABHĀṆAḤ.

Pages, 66. Lines, 22 on a page.

Begins on fol. 77*a* of the MS. described under No. 2580.

Complete.

A Bhāṇa by Haridāsa describing the love between Madanamañjarī and Mādhava. It was intended to be staged on the occasion of the vernal festival of Lakṣmīnārāyaṇa worshipped in Prauḍhadēvamahārājapuram.

**Beginning:**

श्रीलक्ष्म्या वदनश्रीवसाम्यं द्रष्टुमिवादरात् ।
पद्मशङ्खौ वहन् दोर्भ्यां मुकुन्दः श्रेयसेऽस्तु वः ॥

अपिच,

कल्याणं कलयन्तु वो मृदुहृदावालप्ररोहत्कृपा-
वल्लीपल्लवतल्लजव्रजमहस्सन्देहसान्दायिनः ।
गाढाश्लिष्टमुरारिकौस्तुभमणीरोचिर्विशङ्काकराः
श्रीलक्ष्मीकुचमण्डलीमकरिकासिन्दूरबिन्दूत्कराः ॥

नान्द्यन्ते सूत्रधारः (पुरोऽवलोक्य, सानन्दम्)—

* * * *

मोढदेवमहाराजपुरमन्दिरस्याङ्कपर्यङ्कतलविलसदिन्दिरस्य

* * * *

भुवनैकसुन्दरस्य भगवतः सकललोकपरायणस्य श्रीलक्ष्मीनारायणस्य वसन्तोत्सवे

* * * *

अये भरतपुङ्गव, हरिदासस्य कृतिं हरिविलासमधुञ्जरीपरिभावम(न)धुरीण निजमाधुरीभरितभारतीरीतयः श्रीहरि . . . भिनीयामोदनीया वयमिति ।

**End:**

. . . . . . समुचितसमये कर्षकान् हर्षयन्तो
भूमिः पूर्णा च सस्यैर्भवतु नृपतयः सन्तु सन्तानकल्पाः ।
गोविप्राणां विपत्तिर्गर . . . . . . . . . .
. . . . . भवतु बलवती भक्तिरामुक्तिसौख्यम् ॥
(इति निष्क्रान्ताः सर्वे) ॥

---

No. **12734.** हस्तिगिरिमाहात्म्यम्.
HASTIGIRIMĀHĀTMYAM.

Pages, 10. Lines, 5 on a page.

Begins on fol. 42*a* of the MS. described under No. 2818.

A drama, the prelude of which is contained in the codex and that without beginning and end. It brings out the greatness of Hastigiri at Kāñci. It was intended to be staged in the vernal festival of God **Dēvarāja of Conjeeverm.**

**End:**

प्रणतार्तिहरनामधेयस्य भगवतो देवराजस्य प्रसादनाय प्रस्तुतवसन्तयात्रोत्सवानुकूलं कमलभवद्वयमेवदि . . . . भूतविष्णुचरिताभिधेयमभिरूपरसिकहृदयविधेयं हस्तिगिरिमाहात्म्यनामधेयमभिनवं रूपकमभिनेतव्यं भवतेति ।

---

## 10. KĀVYA SUPPLEMENT.

---

### No. 12735. अच्युतरायाभ्युदयम्.

### ACYUTARĀYĀBHYUDAYAM.

Pages, 7. Lines, 11 on a page.

Begins on fol. 62*a* of the MS. described under **No.** 12142.

Contains the second Sarga complete and the third incomplete.

Same work as that described under No 11451.

---

### No. 12736. आग्नीध्ररामायणसारः.

### ĀGNĪDHRARĀMĀYAṆASĀRAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 76*a* of the MS. described under No. 1222'.

Incomplete.

A summary in verse of the story of the Rāmāyaṇa giving only the main points and the leading incidents. The reason for the adjunct **आग्नीध्र** in the title is not apparent.

**Beginning:**

श्रीशारदाचरणपद्मयुगं निधाय चित्ते गणेशचरणौ प्रणयेन कृत्वा ।
रामायणीयमखिलं मुनिभिः प्रणीतमार्यैरहं तदिह सारतरं प्रवक्ष्ये ॥
मुग्धस्निग्धतमालसालरुचिरो नीलाचलश्यामलो
विद्युद्भास्वरदुग्धसिन्धुतनयावासो मुकुन्दाम्बुदः ।
सेव्यो व्योम्नि(म)तलप्रसारिमरुतां वृन्दैरजस्रं तप
स्तप्तानाममृतं स्वभक्तशिखिनां पूर्णाकृतिः पातु नः ॥
अस्ति श्रीशुभकोसलेषु मनुनायोध्या पुरी निर्मिता
राजा तत्र महारथो दशरथो जातो रघोरन्वये ।
पुत्रार्थं क्रतुमृश्यशृङ्गमुनिना कर्तुं प्रवृत्तः परं
प्राप्तं पावकतोऽथ पायसमसौ पत्नीश्च तत्प्राशयत् ॥

**End:**

श्रीरामाङ्गुलिकं समर्प्य हनुमान् सीताशिरोभूषणं
चूडारत्नवरं प्रगृह्य पुनरप्याश्वास्य तां निर्गतः ।
भग्नं तेन वनं त्वनङ्गदिवसे त्यक्त्वाश्रितं सीतया
क्रव्यादः शतशो बलेन भुजयोरक्षादयो खा(घा)तिताः ॥

ब्रह्मास्त्रेण . . . .

No. 12737. उत्तरराघवीयम्.
UTTARARĀGHAVĪYAM.

Substance, palm-leaf (Śritāla). Size, 9⅝ × 2 inches. Pages, 98. Lines, 9 on a page. Character, Malayālam. Condition, good. Appearance, old.

Complete in five Sargas.

Same work as that described under No. 11456 ante.

**Colophon:**

इत्युत्तररामचरिते पञ्चमः सर्गः ॥

No. 12738. उत्तररामचरित्रम्.
UTTARARĀMACARITRAM.

Substance, palm-leaf. Size, 16¼ × 1⅝ inches. Pages, 84. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as that described under No. 12500 ante.

The scribe adds—

नलवर्षे तुलामासे लिलेखामृतसन्निभम् ।
औत्तरं रामचरितं दासो वेङ्कटराघवः ॥

• • • •

तत्पादपङ्कजं वन्दे वीराचार्यमहागुरोः ।
आजन्मशुद्धशीलस्य शिष्यो वेङ्कटराघवः ॥

• • • •

सान्निध्ये पठनं विधाय (कमला)नारायणाख्ये पुरे
वास्तव्यस्य यतीन्द्रपद्धतिजुषो वीरार्यनाम्नो गुरोः ।
वेदे व्याससमप्रभाव इति स प्रज्ञावतां कीर्तनं
भाजा वेङ्कटराघवेण लिखितं कोशं त्विदं पाणिना ॥

## No. 12739. कलिविडम्बनम्.
## KALIVIḌAMBANAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 44a of the MS. described under No. 12209 ante.
Complete.

Same work as that described under R. No. 1438(a) of the Triennial Catalogue of MSS., Vol. II, Part I-B.

---

## No. 12740. कालिन्दीमुकुन्दम्.
## KALINDĪMUKUNDAM.

Pages, 225. Lines, 16 on a page.

Begins on fol. 250a of the MS. described under No. 1657.
Complete.

Same work as that described under No. 12226 ante.

---

## No. 12741. कालिन्दीमुकुन्दव्याख्या—साहित्यदर्पणम्.
## KĀLINDĪMUKUNDAVYĀKHYĀ: SĀHITYA-DARPAṆAM.

Substance, paper. Size, 12 × 7¾ inches. Pages, 328. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A commentary on the Kālindīmukunda-Campu described under No. 12226 ante. It is stated by Liṅgambhaṭṭa, son of Koṇḍubhaṭṭa of Vidyāpīṭha Indrakaṇṭhi family that he writes this commentary called Sāhityadarpaṇa on the text composed by himself. It is also stated that the author's father had a poetic fame, that his grandfather Liṅgaśāstrin was learned in the Śāstras and that his great grandfather Koṇḍubhaṭṭa wrote a commentary on the Naiṣadha.

The MS. copy is said to have been compared with the original and completed on the 5th of March 1838.

**Beginning:**

विद्यापीठेन्द्रकण्ठ्यन्वयमकविराट्कोण्डुभट्टार्यसूनुः
लिङ्गंभट्टोऽर्थभेदप्रथितपदततेस्तत्रतत्राल्पबुद्ध्या ।
श्रीकालिन्दीमुकुन्दे ध्वनिरसगुणसंपूर्णचम्पूप्रबन्धे
टिप्पण्याख्यां सुबोधां रचयति विबुधास्तत्र संशीलयन्तु ।

नारिकेलफलद्राक्षाफलपाका मयेरिता ।
अत्राथस्यैव विवृतिः क्रियते सन्मुदे मुदा ॥

आदौ शारदाप्रार्थनं क्रियते—पद्मासनेति । पद्मा श्रीस्तस्याः सद्म पद्मं तदेवासनं पीठं तत्र तिष्ठतीति तथोक्ता ।

**End:**

विद्यापीठेन्द्रकण्ठान्वयभवकविराट् कोण्डुभट्टोऽकरोद्यः
टीकां श्रीनैषधस्याजनि तत उरुशास्त्रोदविर्लिङ्गशास्त्री ।
तत्सूनुः कोण्डुभट्टः स्वलिखितकविताकीर्तिरस्यौरसोऽस्मिन्
लिङ्गभट्टश्चकार स्वविरचितकृतौ गूढशब्दार्थटीकाम् ॥
श्रीकालिन्दीमुकुन्दस्य नाम्ना साहित्यदर्पणम् ।
लिङ्गभट्टोऽतनोट्टीकां सदा लोकमुदेऽस्तु सा ॥

---

## No. 12742. कालिन्दीमुकुन्दव्याख्या—साहित्यदर्पणम्.
## KĀLINDĪMUKUNDAVYĀKHYĀ : SĀHITYA-DARPAṆAM.

Substance, palm-leaf. Size, 17¾ × 1½ inches. Pages, 272. Lines, 8 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other work herein is Dakṣiṇāmūrtistōtra 137*a*.

Complete.

Same work as the above.

---

## No. 12743. कृष्णप्रबन्धः.
## KṚṢṆAPRABANDHAḤ.

Pages, 37. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 11832.

Incomplete.

A small poem narrating the story of the mediation which Śrī-Kṛṣṇa wanted to effect between the Pāṇḍavas and the Kauravas but which failed on account of the insolence of the latter.

**Beginning:**

साकं राजा समर्थैः समयजलनिधिं दुस्तरं साधुकीर्त्या
निर्मुक्तो वक्त्रपङ्क्तिं दहिरुरिव तमसो भासमानो नितान्तम् ।

पाणिं पार्थात्मजेनाकृत भुजमहसा ग्राहयन्नुत्तरायाः
सन्तुष्यन् बन्धुवर्गैः सह शमनसुतो मात्स्यपुर्यां न्यवात्सीत् ॥
सौभद्रस्य विराटजापरिणये वृत्ते समं पाण्डवै-
रास्थाने मिलितेषु रामशिनिभूपालमात्स्यादिषु ।
स्वैरालापकथावधौ स भगवान् दैत्यान्तकः सौहृदात्
पार्थानां करणीयशेषविषयामित्थं बभाषे गिरम् ॥
विज्ञातं खलु सर्वमेतदखिलैर्यद्धार्तराष्ट्रैः कृतं
द्यूतच्छद्म विधाय पाण्डुतनयेष्वव्याजवृत्तेष्वपि ।
एतैरप्यभिमर्षितं तदखिलं सत्यस्थितैर्विग्रहे
शक्तैरप्यनुभूतदुःखनिवहैरेतावतो वत्सरान् ॥
तत्सर्वैरपि चिन्तनीयमधुना लभ्यं यथा पैतृकं
राज्यं पाण्डुसुतैर्यथा न च भवेन्नाशः कुरूणां कुले ।

**End:**

राधासुते हसति कम्पितहस्ततालं दुःशासने च दृशि सूचितसन्धिदोषे ।
सम्प्रेक्ष्य मातुलमुखं प्रहसन् कुरूणामीशोऽपि केशवमुवाच वचो नृशंसः ॥
आबाल्याद्वै विरोधं व्यदधत विविधं साधुवृत्तेष्वकस्मा-
दप्यस्मास्वाचवैराः सदसि विनिकृता देवने ते सुदीनाः ।
नीता मे नीतियोगादहह वनमुचं भीममुख्यास्त्वदीयाः
प्रायो वृत्तं तदेतत् त्रिभुवनविदितं दूत जानासि नो वा ॥

---

No. **12744.** कृष्णविजयम्.

KṚṢṆAVIJAYAM.

Substance, palm-leaf. Size, 17 × 1¾ inches. Pages, 80. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains one to four Yavanikāntaras complete, and five incomplete.

This is a drama belonging to the class called Dima which is said to consist in representing a well-known story in four acts, with Raudra (the furious) as the principal sentiment by means of deeds of magic, sorcery, combat, etc. The author is Veṅkaṭavarada, son of Appalācārya, grandson of Varadācārya and great grandson of Śrīnivāsācārya of Kaundinya-gōtra. The author states that he belongs to the Vīravalli family, one of the important members of which named Varadācārya is said to have

been a disciple of Rāmānuja. The names of a number of persons of this Vīravalli family are given as also the literary works of some of them. Śrīnivāsa, the great grandfather of the author, is the same as the author of Ambujavalliparinaya, Sītādivyacaritra, Ambujavallīdandaka, etc. For further details, see the extracts given below.

**Beginning:**

श्रीमान् पातु सदा युष्मान् श्रीपुष्पपुरनायकः ।
श्रितानां यस्तु मन्दारः शृङ्गारधृतभूः स्वयम् ॥

* * * *

(नान्द्यन्ते)

सूत्रधारः—सहर्षम्, (सर्वतश्चक्षुः प्रसार्य) अहो महानयं गुरुप्रसादः ।

* * * *

आर्य, त्वया चतुराननेन भवितव्यम् । किन्नाम रूपकं तत् । केन कृतम् । यस्य प्रयोगेणार्यरसिकानन्दं सम्पादयामः ।

सू—(सोल्लासरोमाञ्चम्)

आकर्ण्यतां तदिदमम्बुजलोचनास्ये दास्येन कापि सदृशी तव दृश्यतेऽद्य ।
रूपेण गीतिकलनेन च नर्तकेन लक्ष्म्या गिरा रतिकया सहनेन शक्त्या ॥

कवेरस्य कवेरस्य कन्या कनति वागिव ।
वंशप्रकाशको यस्य स सुशीलो महामुनिः ॥

* * * *

श्रौतस्मार्तविचक्षणः श्रुतिशिरोयुग्मार्थदः श्रीधरः
श्रीरङ्गेशकृपाकटाक्षविषयः श्रीभूवराहप्रियः ।
(श्रीम)द्वेङ्कटशैलनाथकरुणापात्रं पवित्राकृति
स्तद्वंश्यो वरदो गुरुर्यतिपतेः शिष्याग्रणी राजते ॥

जयन्ति गुरवो यस्य पूर्वे विख्यातवैभवाः ।
. . . . . . . . जाताः सन्ति सहस्रधा ॥

श्रीमद्रामानुजमुनेर्दासं वीरलताङ्कितम् ।
कौण्डिन्यमाद्यमस्माकं गुरुं वरदमाश्रये ॥

. . . . . . . . . . . . स्य पूर्वोत्तरस्थितगुरुवंशजनामप्रकाशकश्लोका विलिख्यन्ते—

श्रीमान् श्रीः पृतनापतिः शठरिपुर्नाथो मुनिः (पद्मदृक्)
रामो यामुनयोगिराडपि महापूर्णो मुनिर्लक्ष्मणः ।

कौण्डिन्यः करिशैलराडिति च तौ श्रीवासवर्यार्थदौ
. . . . . . . लक्ष्मणगुरुः बुद्धिप्रदश्चेत्यमी ॥

श्रीनारायणवासवार्चितकरश्रीश्रीनिवासादिकैः

* * * *

एतेषां वीरवल्लीगुरून् . . . . स्थितानां गुरूणां मध्ये श्रीरामानुजकौण्डिन्यश्रीवीरवल्लीवरदाचार्य इति प्रसिद्धं जगति । तमेवाह—

जयति जगति कश्चिच्चित्रचर्यो विपश्चित् प्रवरगुरुयतीन्द्रप्रेक्षितो भूमिचन्द्रः ।
सकलसुगुणबन्धुः सर्वलेकैकबन्धुर्वरदगुरुवराख्यो वाग्विलासाभिमुख्यः ॥
तदभिमततनूजः सत्कलानां समाजः श्रितबुधशतवन्द्यः श्रीवराहाभिनन्द्यः ।
जयति भुवि सुमूर्तिर्देशिकोत्तंसकीर्तिर्विमलसुगुणधुर्यो वीरवल्लचप्पलार्यः ॥

श्रीमत्कौण्डिन्यगोत्राद्वरदगुरुवरात् सर्वधार्याख्यवर्षे
तिष्ठत्यर्के तुलायां यदुकुलतिलकश्रीहरेस्तारकायाम् ।
श्रीमान् जातो विभाति प्रवरगुणनिधिः श्रीनिवासार्यवर्यः
क्षीराब्धेः कौस्तुभाख्यो मणिरिव महतामुत्सवाय श्रियै नः ॥
शास्त्रे शास्त्रे सद्बहुग्रन्थकर्ता पात्रे पात्रे सर्वविद्याप्रदाता ।
श्रीवासार्यः साहितीसारधुर्यः श्रीमद्रङ्गे राजते राजपूज्यः ॥
कर्णाटसिंहासनभूमिपालैः सम्मानितो हाटकशाटिकाद्यैः ।
(यो)नाटकाद्यैः स्वकृतैः प्रबन्धैरानन्दयत्यार्यजनानशेषान् ॥
रङ्गाचार्यप्रभृतिगुरुभिः पूजितः पालितोऽसौ
प्रौढः शास्त्रे परहितपरो रञ्जको मञ्जुसूक्त्या ।
साहित्ये तु प्रथमगणितः सर्वभाषाप्रबन्धैः
श्रीवासार्यो जयति भुवने वीरवल्लीकुलेन्दुः ॥

अस्य वृद्धपितामहसप्तपूरुषात् पूर्वं स्थितः अनेन प्रस्तूयते—

हस्तीशं लोकविख्यातं कौण्डिन्यं विदुषां वरम् ।
रामानुजार्यसिद्धान्तस्थापनाचार्यमाश्रये ॥

अस्य दशपुरुषात् पूर्वं स्थितः अनेन प्रकाश्यते—

सौम्योपयन्तृयतिराजवरप्रदार्यपादारविन्दविनिवेशितसर्वभारम् ।
कौण्डिन्यवीरलतिकाकुलपद्मभिन्दुमरमद्गुरुं वरददेशिकमाश्रयामः ॥

इति । अथ स्थितः अनेन वर्ण्यते—

नारायणार्यनप्तारं श्रीनिवासार्यपौत्रकम् ।
वरदाचार्यजातं त्वामप्पलाचार्यमाश्रये ॥

अनेन प्रतिपादितादप्पलाचार्यात् वेङ्कटवरदाचार्यो नाम कश्चित् बालविपश्चिदाविरासीत् । तेन कृतोऽयं प्रबन्धः श्रीकृष्णविजयनामा डिमः । तेनैव सर्वानानन्दयिष्यावः ।

* * * *

इदं पुनरवशिष्यते—अस्य त्रिपुरुषात् पूर्वकूटस्थः अनेन कथ्यते—
कौण्डिन्य(श्री)वीरवल्लीवरदार्यसहोदरम् ।
श्रीरङ्गनगरीनाथं श्रीनिवासगुरुं भजे ॥

किञ्च—
श्रुतीनां सर्वासामनुपदविशेषार्थघटकः
कवीनां पूर्वेषां कवयति गिरां तुल्यकवनम् ।
यजुःशाखाध्यायी शुभमतिरयं श्रीनिधिकविः
बुधानन्दी भूमौ विलसति सुतो यस्य सुगुणः ॥
तदनुजोऽपि विभाति शुभोदयः सकलवैदिकलौकिकसारवित् ।
सुहृदशेषजनस्य निसर्गतः स जयलक्ष्मणसूरिवराह्वयः ॥

अनेन श्रीवेङ्कटेशविषया बहवः प्रबन्धाः कृताः । तेषां नामानि कथ्यन्ते—श्रीनिवासचरित्रं, श्रीनिवासकुशलाब्धिचन्द्रिका, श्रीनिवाससेवामृतार्णवः, श्रीदिव्यदम्पतिवरस्तवः, अतिकामकल्पवल्लीत्येतानि कृतानि । क्रियमाणानि च कल्याणसाधिकादीनि करिष्यमाणानि चानेकानि प्रबन्धजातानि प्रकाशन्ते । एतानि कवेरस्य कनिष्ठभार्यात्मजश्रीवास . . . न्तवराहाचार्यचरित्राणि कथितानि ।

अस्याग्रजायात्मभवाप्पलार्यतनूभवौ द्वौ वरदः शठारिः ।
गुरुत्वपीठे . महे वसन्तौ . . . सम्प्रति राज . ततौ ॥

अस्य भ्रातरश्चत्वारः । तेऽपि विद्यावित्तकुलाभिमानकरुणासम्पत्प्रतिष्ठाश्रया भासन्ते । तथाहि—
श्रीमद्राघवदेशिकेन्द्रतनयाः श्रीरङ्गदेशे स्थिताः
श्रीवासार्यमुखाः सुखायनगुणाः श्रीशैलनाथात्मजाः ।
श्रीकृष्णाह्वयरङ्गदेशिकसुतास्तज्जाश्च तज्ज्ञा इमे
श्रीमन्तो वरदार्यबालवनितापुत्राश्च लक्ष्मीपुरे ॥

* * * *

इदानीं तु सप्तसप्ततिवयाः कथमेतत् कृष्णविजयप्रबन्धं कृतवानिति ।

* * * *

एतत्तातपादैरशीतिवृद्धैरनेकप्रबन्धाः कृताः

* * * *

त्रय एव हि लोकेऽस्मिन् कवयो बुधसम्मताः ।
प्राचेतसमुनिर्व्यासः श्रीनिवासगुरूत्तमः ॥

यत्सूक्तिपद्धतिरियं सरसं श्रूयताम् — आदौ अम्बुजवल्लीपरिणयम्, वराहविजयम्, अनङ्गमङ्गलमष्टपदी कोरवञ्जि वृत्तालङ्कारमालिकावराहचम्पूबकुलमालिनीगीतापरिणयं, सीतादिव्यचरित्रं, भारतचन्द्रिकान्यायसङ्ग्रहः मूलं व्याख्यानं, मीमांसासारसङ्ग्रहः, वेदान्तसारः, अम्बुजवल्लीदण्डक . . . श्रीवराहचूर्णिका ध्यानचूर्णिका, श्रीरङ्गदण्डकं, चूर्णिकाकीर्तनानि, श्रीरङ्गराजचरितं, गानपदानि वर्णं सप्तपदार्थीव्याख्या . . . . थापिनाथीयव्याख्यानं, भूवराहविजयव्याख्यानं, माघरघुवंशनैषधामरुकश्रीरङ्गराजस्तवयामुनस्तुतिव्याख्यानानि, रहस्यरत्नम् एतानि मया दृष्टानि ।

* * * *

श्रीमत्कौण्डिन्यवरदनारायणगुरोः सुतम् ।
श्रीनिवासगुरुं वन्दे तदायत्तस्वरूपकम् ॥

* * * *

आर्य, तस्य पुत्रस्य वरददेशिकस्य कृतयः नोदिताः । तान्यहं वदामि शृणु । (संस्कृतमाश्रित्य)

लक्ष्मीनारायणचरित्रम्, रघुवरविजयम्, कमलनयनचर्या, रामायणसंग्रहम्, गद्यरामायणम्, शब्दका . . . . . हात्म्यमौक्तदर्पणे, अम्बुजवल्लीशतकम्, श्रीवराहशतकम्, प्राकृतरत्नाकरम्, स्मृतिसारः, निघण्टुसारः, रहस्यरत्नम्, श्रीरङ्गराज . . . . . श्रीरङ्गनायिकादशकमित्यादिप्रबन्धजातानि कृतानि । तानि क्रियमाणकृष्णविजये निदर्शितानि करिष्यमाणानि च बहूनि सन्ति ।

* * * *

सू—(श्रवणमभिनीय)

मुख्यं सख्यं विभ्रदेको नृपः स्यान्नो चेद्राजा सेनसेनासमेतः ।
दृष्ट्वा सर्वं भूतलं सद्विशालं प्राप श्रीमान् द्वारकाद्वारसीमाम् ॥

अतएव वेषभाषाद्यनन्तरकरणीयायावामपि सज्जीभवाव: ।

इति निष्क्रान्तौ (प्रस्तावना)

* * * *

त्वदुदीरितोऽयं दृष्टान्तस्तावदनयोर्धर्मनन्दनसङ्क्रन्दननन्दनयो: समान: ।
. . . . . . . . . . . . . नारदोदितप्रतिज्ञापरिपालनेन पुनरपि तयोर्घटना जाताप्यप्राकृतश्रीकृष्णप्रसादेन सुभद्रापाणिग्रहणभद्रसम्पादनेन च ।

End:

आर्यपुत्र त्वया कथितो यथार्थं एव । मयापि तथैव स्वप्नो दृष्ट: । यदा मम जठरे क्षीरसागरादवतीर्ण: परमपुरुष: तदा प्रभृति त्रयस्त्रिंशत्कोटि-देवगणै: कमलसम्भव: मां प्रदक्षिणीकृत्य प्रणमन् सकलोपचारं कुर्वन् (आस्ते)। देवाङ्गनाभिरर्चितपादा तिष्ठामि । अत अच्युताग्रजस्तस्यानुज: द्वावपि विश्वचिद्-चिन्नयनाधिकारकल्पकाविति मन्यमाना भवामि । तस्मादावां परमपुरुष-जननि.

---

## No. 12745. गीतगोविन्दम्.
## GĪTAGŌVINDAM.

Pages, 17. Lines, 5 on a page.

Begins on fol. 57a of the MS. described under No. 401.
Incomplete. Wants the beginning and the end in the sixth Sarga.
Same work as that described under No. 11937.

---

## No. 12746. चम्पुरामायणम्.
## CAMPURĀMĀYAṆAM.

Substance, paper. Size, 11 × 8¾ inches. Pages, 264. Lines 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in six Kāṇḍas.

A Campukāvya dealing with the story of the Rāmāyaṇa as contained in the first six Kāṇḍas. The author is Śivarāmakavi of Kauṇḍinya-gōtra and disciple of Bōdhānanda Ghanēndra.

**Beginning:**

सिद्धिर्दृष्टचरी यदीयचरणाम्भोजद्वयाचञ्चला-
भक्तीनां बहुधा नृणां सुमहति प्रारिप्सिते कर्मणि ।
दायादश्शिवयोश्च य: स भगवानाकण्ठदन्तावल:
क्षिप्रं पूर्तिकृते चिकीर्षितकृतेर्भोतु लम्बोदर: ॥

उपास्य भक्तामरशाखिनं यं मूकोऽपि लोकोत्तरमाप्य बोधम् ।
विनैव यत्नं कुरुते प्रबन्धान् तं दक्षिणामूर्तिमिह प्रपद्ये ॥
तुम्बुरुप्रभृतिवैणिकस्तुता कम्बुदुग्धशरदिन्दुपाण्डरा ।
अम्बुजासनवधूरुपास्यते चम्पुरामचरितं चिकीर्षुणा ॥
आस्यरङ्गभुवि लास्यमाशु मेऽपास्य बुद्धिजडतातिरःपटीम् ।
उत्तरङ्गयतु भारती नटी चारुशब्दवलयैरलंकृता ॥
येन रामकथां श्रुत्वा सङ्क्षेपान्नारदान्मुनेः ।
रचितं रामचरितं तस्मै वाल्मीकये नमः ॥
प्राचीनाः कति रामचन्द्रविषया व्यङ्ग्यप्रधानाः स्फुर-
च्छब्दार्थोभयचित्रिता न कृतयः सन्ति प्रणीता बुधैः ।
तत्सारस्यविदः कवेरनुचितं काव्यान्तरारम्भणं
भक्तिस्तत्र तथापि चोदयति मां रामे गुणानां निधौ ॥
श्रीमद्रामकथासुधारसझरीं वाल्मीकिवक्त्रेन्दुजां
सत्त्वस्थैरमृतार्थिभिश्च विबुधैः पेपीयमानां क्रमात् ।
पायम्पायमशोद्गिराम्यलमहं चम्पुप्रबन्धात्मना
हारंहारमुदन्वदम्बु जलदो वर्षन् प्रशस्तो न किम् ॥

* * * *

वल्मीकभूर्मुनिवरोऽथ स नारदोक्तां वाणीं सुधासमधुरां मधुरां निशम्य ।
घोराघसन्ततिनिवारणजागरूकनीरामवाप तमसामवगाहनाय ॥
तामवाप्य विचचार तापसस्तत्तटीवनविलोकनोत्सुकः ।
तत्र कुत्रचिदसौ व्यलोकयत्क्रौञ्चयोर्मिथुनमुत्तमस्वनम् ॥

* * * *

**Colophon:**

एवं श्रीशिवरामसूरिरचिते सत्साहितीसारवि-
द्विद्वद्व्रमनोविनोदकलनोदारार्थभास्वत्पदे ।
काव्ये बालसुखावबोधजनके श्रीचम्पुरामायणे
सम्पूर्णोऽस्य समं कवेरभिमतैः श्रीबालकाण्डोऽमुकः ॥
उत्सार्य मात्सर्यमुदारशीलाः कुत्सां पुरोभागितयोदितां च ।
गुणागुणानां प्रविचारणाभिरेतं प्रबन्धं परिशोधयन्तु ॥

**Colophon:**

इति श्रीशिवरामदीक्षितकृते चम्पुरामायणे बालकाण्डः ॥

**End:**

तदनु मनुकुलपतिना रामेण यथार्हं सभाजितेषु सविभीषणेषु सुग्रीवप्रमुखेषु बलीमुखयूथपतिषु यथागतं गतेषु अनङ्गीकृतयौवराज्ये सौमित्रौ तत्पदे भरतमभिषिच्य चतुरर्णवीमेखलां विश्वम्भरां परिपालयामास ।

रामे शासति राज्यमात्मगुणसंरक्षावनीमण्डले
भूमिः सस्यवती बभूव फलिनो भूमीरुहाणां गणाः ।
पर्जन्योऽप्यनुकूलवृष्टिरनिलः सौख्यप्रदः प्राणिना-
मासन् धर्मपरा नराः प्रमुदिता दीर्घायुषः श्रीजुषः ॥

**Colophon:**

इति श्रीकौण्डिन्यान्वयकलशवाराशिशशिनो
दृढाभक्ते रामे कृतिषु शिवरामस्य सुमतेः ।
अयं काण्डः षष्ठः सरसकविहृन्मोदजनके
समग्रश्चम्प्वात्मन्यवनितनयानाथचरिते ॥
यः शारीरकभाष्यमद्वयमतोद्धारप्रवृत्तं मुखा-
द्बोधानन्दघनेन्द्रसंयमिपतेर्मेधाविनोऽधीतवान् ।
तेनैषा शिवरामसूरिकविना चम्पुप्रबन्धात्मना
षट्काण्डी रचितास्तु राघवमुदे वाल्मीकरामायणे ॥

समाप्तोऽयं ग्रन्थः ॥

---

## No. 12747. चाटुश्लोकाः.

## CĀṬUŚLOKĀḤ.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 14. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old. Incomplete and imperfect.

A collection of didactic and witty stanzas.

**Beginning:**

संप्रीतौ नृपनन्दनौ यदपरं प्रेयस्तदप्युच्यताम् ॥
शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु शान्तिं सर्वत्र जनः सुखी भवतु ॥
मान्धाता स महीपतिः कृतयुगालङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।

अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते
नैकेनापि समं गता वसुमती नूनं त्वया यास्यति ॥

**End:**

उक्तञ्च—

अश्वप्लुतं वासवगर्जितं च स्त्रीणां च चित्तं पुरुषस्य भाग्यम् ।
अवर्षणं चाप्यतिवर्षणं च देवो न जानाति कुतो मनुष्यः ॥

उक्तं च—

मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यत्र सिद्धिर्भवति तादृशी ॥

---

No. **12748.** चाटुश्लोकाः

CĀṬUŚLOKAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 83a of the MS. described under No. 12219.
Similar to the work described under No. 12015.

**Beginning:**

गेहे गेहे जङ्गमा हेमवल्ली वल्ल्यां वल्ल्यां जायते चन्द्रबिम्बः ।
बिम्बे बिम्बे कोकिलानां विरावो रावे रावे मन्मथः पञ्चबाणः ॥
मत्तुल्यो वसति मदन्तिके बकोऽसावित्थं ते मनसि मराल मास्तु चिन्ता ।
त्वत्कान्तागतिसदृशीं गतिं विदध्यात् किं कुर्यादुदकपयोविवेचनं च ॥
व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
भेत्तुं वज्रमणीन् शिरीषकुसुमप्रान्तेन सन्नह्यते ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
मूर्खान् यः पथि नेतुमिच्छति सदा सूक्तैः सुधास्यन्दिभिः ॥

**End:**

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥

---

No. **12749.** चाटुश्लोकाः.

CĀṬUŚLOKAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 34a of the MS. described under No. 12222.
Similar to the above.

**Beginning:**

जगदधिपालोमारो ना यो नरि योजयत्यशुभ वतं दमे ।
यद्दुर्विनीतं मर्त्यानिव सूनुरंशुमतः ॥
भार्या मातामही यस्य यस्य पुत्रः पितामहः ।
(ज)नकः श्वशुरो यस्य स मां पातु कुभृपतिः ॥
कज्जले कमलं भाति कानने भाति सुस्मितम् ।
कपटे सद्गुणो भाति कविरामे किमद्भुतम् ॥

**End:**

केशवं पतितं दृष्ट्वा पाण्डवा हर्षमाययुः ।
रुदन्ति कौरवाः सर्वे हाहा केशव केशव ॥
राघवस्य शरैर्घोरै(र्घोरे रावणमाहवे) ।
अत्र क्रियापदं वक्तुर्हेमं दास्यामि कङ्कणम् ॥

---

No. 12750. चाटुश्लोकाः, आन्ध्रपद्यसहिताः.
CĀTUŚLŌKĀḤ WITH TELUGU STANZAS.

Pages, 22. Lines, 5 on a page.

Begins on fol. 10a of the MS. described under No. 10279.

A collection of select stanzas on various subjects together with similar stanzas in Telugu.

**Beginning:**

पाणौ गृहीतापि पुरस्कृतापि स्नेहानि(हीन)सत्य(म्यक्)परिलालितापि ।
परोपकाराय भवत्यवश्यं वृद्धस्य भार्या करदीपिकेव ॥
अनङ्कुरितकूर्चकः शितशिलोपलाब्जं पयः
स्वयैव धृतकूर्चको न लवणाम्बुतकोपमः ।
स एव सितकूर्चकः स्वरितगुग्गुलूद्भपक(काः)
भवन्ति हरिणीदृशां प्रियतमेषु भावास्त्रयः ॥

**End:**

क्षुधातुराणां न रुचिर्न पक्वं कामातुराणां न भयं न लज्जा ।
विद्यातुराणां न सुखं न निद्रा अर्थातुराणां न गुरुर्न बन्धुः ॥

## No. 12751. नवसाहसाङ्कचरित्रम्.
## NAVASĀHASĀṄKACARITRAM.

Substance, paper. Size, 8¼ × 6¾ inches. Pages, 199. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

This copy was taken from a manuscript of the Tanjore Palace Library.

Contains 1 to 17 Sargas. The printed edition contains 18 Sargas.

A Mahākāvya narrating the chief incidents in the life of Nava-Sāhasāṅka, King of Ujjain in Avanti. The work has been printed in the Bombay Sanskrit Series. The author of the work is Padmagupta alias Parimala-Kālidāsa, son of Mṛgāṅkadatta. The poet refers in the introduction to Bhartṛmeṇṭha and Vākpatirāja and his brother Vikrama, the latter two being his patrons.

**Beginning:**

अव्यात्स वो यस्य निसर्गवक्रः स्मरत्यथिज्यं स्मरचापलीलाम् ।
जटापिनद्धोरगराजरत्नमरीचिलोढोभयकोटिरिन्दुः ॥

* * * *

तत्त्वस्पृशस्ते कवयः पुराणाः श्रीभर्तृमेण(ण्ट)प्रमुखा जयन्ति ।
निस्त्रिंशधारासदृशेन येषां वैदर्भमार्गेण गिरः प्रवृत्ताः ॥
पूर्णेन्दुबिम्बादपि सुन्दराणि तेषामपूरे पुरतो यशांसि ।
ये भर्तृमेण(ण्ट)ादिकवीन्द्रसूक्तव्यक्तोपदिष्टेन पथा प्रयान्ति ॥
सरस्वतीकल्पलतैककन्दं वन्दामहे वाक्पतिराजदेवम् ।
यस्य प्रसादाद्वयमप्यमुत्र कवीन्द्रचीर्णे पथि संचरामः ॥
दिवं यियासुर्मम वाचि मुद्रामदत्त यां वाक्पतिराजदेवः ।
तस्यानुजन्मा कविबान्धवस्य भिनत्ति तां सम्प्रति विक्रमार्कः ॥
नैते कवीन्द्राः कति काव्यबन्धे तदेव राज्ञा किमहं नियुक्तः ।
किं वालुकापर्वतके धरेयमारोप्यते सत्सु कुलाचलेषु ॥
अहो महत्साहसमेतदेव यद्वर्णनीयो नवसाहसाङ्कः ।
दूरे परिच्छेदकथा हि सत्यमेतद्गुणानामुदधेरपां च ॥

* * * *

श्रीसाहसाङ्कोज्ज्वलकीर्तिगर्भा ममाथ वा कं न हरन्ति वाचः ।
कस्यात्र लोभाय न शुक्तयस्ता मुक्ता हि यासामुदरे स्फुरन्ति ॥

एतान्यवन्तीश्वरपारिजातजातानि तारापथपाण्डुराणि ।
सम्प्रत्यहं पश्यत दिग्वधूनां यशःप्रसूनान्यवतंसयन्ति(यामि) ॥
अस्ति क्षितावुज्जयिनीति नाम्ना पुरी विहायस्यमरावतीव ।
बबन्ध यस्यां पदमिन्द्रकल्पो महीपतिर्वाक्पतिराजदेवः ॥

* * * *

राजास्ति तस्यां सकुलाचलेन्द्रनिकुञ्जविश्रान्तयशस्तरङ्गः ।
भास्वान् ग्रहाणामिव भूपतीनामवाप्तसङ्ख्यो धुरि विक्रमार्कः ॥
निर्व्यूढनानाद्भुतसाहसं च रणे वृतं च स्वयमेव लक्ष्म्या ।
नाम्ना यमेके नवसाहसाङ्कं कुमारनारायणमाहुरन्ये ॥

**End:**

तं संयुगस्फुटपरीक्षितशौर्यसारं राज्ये रिपोः फणिकुमारकमभ्यषिञ्चत् ॥
मूर्तं मनोरथमिवोपवनात् स कन्दमादाय तत्कनककोकनदं नरेन्द्रः ।
आदातुमीप्सितमहीन्द्रसुतेति रत्नमभ्युत्सुकस्तदनु भोगवतीं प्रतस्थे ॥
देवः साहसिकोऽप्यमन्द्रमुरजध्वानानुमेयोत्सवा-
मुत्तम्भैः परितो महीं मणिगृहैरुत्तम्भयन्तीमिव ।
(तामस्तु)न्नतरत्नतोरणशिखाभिङ्गोलमुक्ताफल
प्रालम्बोच्चलदच्छकान्तिनिकरस्मेरामवापत्पुरीम् ॥

**Colophon:**

इति परिमलकालिदासस्य कृतौ साहसाङ्कचरिते हेमकमलहरणः सप्तदशः सर्गः ॥

---

No 12752. नीतिसारः, द्राविडटीकासहितः.

NĪTISĀRAḤ WITH TAMIL COMMENTARY.

Substance, palm-leaf. Size, 17 × ¾ inches. Pages, 46. Lines, 4 on a page. Character, Grantha and Tamil. Condition, good. Appearance, new.

Complete.

Similar to the work described under No. 12062.

The author salutes Jina.

**Beginning:**

प्रणम्य सर्वलोकेशं देवदेवं जिनेश्वरम् ।
नीतिसारं प्रवक्ष्यामि सर्वशास्त्रसमुद्भवम् ॥

* * * *

श्रूयतां सर्वधर्मत्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥
* * * *
अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥

**End:**

अत्यन्तमपि मेधावी त्रयाणामेघ(क)मस्तिते(मास्थितः) ।
अल्पायुरनव(प)त्यो वा दरिद्रो वा न संशयः ॥
* * * *

**Colophon:**

नीतिसारव्याख्यानं सम्पूर्णम् ॥

— —

### No. 12753. पञ्चबाणविजयभाणः.
### PAÑCABĀṆAVIJAYABHĀṆAḤ.

Substance, paper. Size, 13¾ × 8¾ inches. Pages, 81. Lines, 21 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 69*a*. The other works herein are Saṅgītadarpaṇa 1*a*, Kavisamayakallōla 35*a*.

Incomplete.

Same work as that described under No. 12538.

---

### No. 12754. प्रपन्नसपिण्डीकरणनिरासः.
### PRAPANNASAPIṆḌĪKARAṆANIRĀSAḤ.

Substance, paper. Size, 8½ × 6¼ inches. Pages, 35. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 169*a*. The other works herein are Prāyaścitta-subōdhinī 1*a*, Boppanabhaṭṭiya 127*a*.

Incomplete.

Same work as that described under No. 12548.

---

### No. 12755. प्रबोधचन्द्रोदयम्.
### PRABŌDHACANDRŌDAYAM.

Pages, 61. Lines, 9 on a page.

Begins on fol. 26*a* of the MS. described under No. 12631.

Complete.

Same work as that described under No. 12549.

## No. 12756. प्रहेलिका.
## PRAHELIKĀ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 12566.

Incomplete.

A collection of enigmatical stanzas.

**Beginning:**

विन्दन्तो विवदन्तोऽपि बोध(य)न्तः परानपि ।
स्वयं कर्म न कुर्वीत पुलिन्दशकुनिर्यथा ॥
पुलिन्दशकुनिर्नाम हरेर्दारितदन्तिनः ।
मुखादामिषमादत्ते वदेन्मा कुरु साहसम् ॥

* * * *

राम त्वयि रणं प्राप्ते मध्यमं नागयोषितः ।
आदिमं भेजिरे शूराः पौरवश्रादिमं रणम् ॥

**End:**

चमरीवामरी भाषा कश्चिदस्ति वनान्तरे ।
इयं तु पामरी भाषा सूकरीव गृहे गृहे ॥

---

## No. 12757. भद्राचलचम्पुः.
## BHADRĀCALACAMPUḤ.

Substance, paper. Size, $8\frac{1}{4} \times 6\frac{3}{4}$ inches. Pages, 16. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

A work in prose and verse describing the sacredness and importance of Bhadrācala on the banks of the Gōdāvarī which mount is described herein to be the offspring of the Himālayas. Rāma with Lakṣmaṇa and Sītā is said to be always present in Bhadrācala where a temple has been built for them. The work was written by Rāghava at the instance of Sundarēśa, to whom Rāma is said to have appeared in a dream in the splendour of his coronation. The author salutes **Parāśarabhaṭṭa** and Rāmānuja.

**Beginning:**

श्रीमहीसेवितपदं शेषपर्यङ्कशायिनम् ।
रक्षणे सर्वजगतां दक्षिणं रङ्गिणं श्रये ॥

निस्सीमविविधसीमा निगमशिखाशेखरशिवादीव्यः ।
अस्तु दुरितच्छिदायै निस्तुलधामा मृगेन्द्रगिरिभूमा ॥

* * * *

प्रीतः पूजनतस्तवास्मि नय मां श्रीसुन्दरेशप्रभुं
तस्याप्यस्तु मदर्चनात्सफलतेत्यादिश्य कश्चिद्गुरुम् ।
स्वप्ने तेन मुदायि(न्वि)तोऽत्र रमते यः सुन्दरेशालये
सीतालक्ष्मणसंयुतोऽस्तु स विभुः पट्टाभिषिक्तो मुदे ॥
मधुजिन्निजोपमेया मधुरा मधुरापुरीधुरीणा नः ।
कलयतु गिरोऽतिकान्ताः कलशपयोराशिकन्यकाकान्तः ॥

* * * *

त्रिदण्डपरिमण्डितं तरलपङ्कजाक्षस्रजं
कनत्कनकवाससं कलितमूर्ध्वपुण्ड्रश्रिया ।
शिखारचितशेखरं शुचितरोपवीतोज्ज्वलं
श्रये यतिपुरन्दरं शमितगर्वदुर्वादिकम् ॥
श्रीरङ्गराजचरणाम्बुजराजहंसं श्रीवत्सलाञ्छनपयोनिधिपारिजातम् ।
विज्ञानभक्तिविनयादिमहागुणाब्धिं वन्देय सम्प्रति पराशरभट्टसूरिम् ॥

* * * *

सुन्दरनायकचन्द्रो निस्तन्द्रो रामचन्द्रगुणगणने ।
बध्नाति चित्रपद्यैर्भद्रं भद्राचलस्य माहात्म्यम् ॥

* * * *

तथाहि—गोदावरीतीरे शुभे मोदावहे योगस्पृशां श्रीराघवक्षेत्राभिधो घोराशुभध्वंसी महान् भद्राचलाभिख्यो गिरिर्विद्रावितध्वान्तश्रिया नेता भुवो यत्रेक्ष्यते सीतापतिस्सौमित्रिणा ।

* * * *

गोदावरीरोधसि कश्चिदीडे भद्राचलो नाम नगाधिराजः ।
यमद्रिराजस्य सुतं सुमेरोः प्राहुः परं धाम परस्य धाम्नः ।
द्रुतं तदभ्यर्णमुपेत्य तत्र गोदावरीसैकतमण्डलान्ते ।
हरं समुद्दिश्य चरंस्ततस्त्वं तूर्णं समेष्यस्यरिवर्गशान्तिम् ॥
इत्थं समुद्दिश्य तमेत्य देशं तमेनमुद्दिश्य तपश्चचार ।

End:

इत्थं राघवसूरी रघुवरगुणरत्नवर्णनपवित्रम् ।
चित्रं शुभाद्रिचम्पुं व्यरचयदरुणाब्जलोचनप्रीत्यै ॥
अपदिश्य सुन्दरविभोरादेशं राघवार्यदासेन ।
भद्रगिरिचम्पुरित्थं रचितो रघुनायकप्रसादात ॥

---

## No. 12758. भर्तृहरिसुभाषितम्.
## BHARTṚHARISUBHĀṢITAM.

Substance, palm-leaf. Size, 17¾ × 1⅝ inches. Pages, 9. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 20*b*. The other work herein is Alaṅkārasaṅgraha 1a.
Contains the Vairāgyaśataka incomplete.
Same work as the above.

---

## No. 12759. भर्तृहरिसुभाषितम्.
## BHARTṚHARISUBHĀṢITAM.

Pages, 41. Lines, 6 on a page.

Begins on fol. 61*a* of the MS. described under No. 11933.
Contains the Nīti and Śṛṅgāra Śatakas.
Same work as that described under No. 12080.

---

## No. 12760. भागवतचम्पुः.
## BHĀGAVATACAMPUḤ.

Pages, 82. Lines, 11 on a page.

Begins on fol. 37*a* of the MS. described under No. 12694.
Contains Vilāsas one to three only, but wants the beginning.
Same work as that described under No. 12328.

---

## No. 12761. मणिमञ्जरी, सव्याख्या.
## MAṆIMAÑJARĪ WITH COMMENTARY.

Pages, 7. Lines, 6 on a page.

Begins on fol. 76*a* of the MS. described under No. 10101.
Breaks off in the 15th stanza of the first Sarga.

The Maṇimañjarī of Nārāyaṇapaṇḍitācārya, son of Trivikramapaṇḍitācārya, described under No. 11866, with a commentary.

**Beginning:**

वन्दे गोविन्दमानन्दज्ञानदेहं पतिं श्रियः ।
श्रीमदानन्दतीर्थार्यवल्लभं परमक्षरम् ॥

वन्द इति । आनन्दज्ञानदेहम् आनन्दश्च ज्ञानं च ते एव देहो यस्य स तथा(भू)तं श्रियः पतिम् । श्रीमदानन्दतीर्थार्यवल्लभं श्रीरेषामस्तीति श्रीमन्तः आनन्दतीर्था एव आर्याः श्रीमन्तश्च ते आनन्दतीर्थार्याश्च तेषां वल्लभः पतिः तम् ।

**End:**

विकुक्षिः समभूत्तस्य पुरञ्जयपुरोगमाः ।
तदन्वये व्यजायन्त सुरा राजर्षयः परे ॥

विकुक्षिरिति । तस्य इक्ष्वाकोः तदन्वये स चासावन्वयश्च तस्मिन् प्रसिद्धवंशे विकुक्षिः इन्द्रो विकुक्ष्याख्यः राजा ।

---

## No. 12762. महानाटकसुधानिधिः.
## MAHĀNĀṬAKASUDHĀNIDHIḤ.

Pages, 149. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 12223.

Complete.

By Immaḍi Dēvarāya. Same work as that described under R.No. 1504(a) of the Triennial Catalogue of MSS., Vol. II, Part I-C.

---

## No. 12763. महानाटकसुधानिधिः.
## MAHĀNĀṬAKASUDHĀNIDHIḤ.

Pages, 151. Lines, 17 on a page.

Begins on fol. 127*b* of the MS. described under No. 12526.

Complete.

Same work as the above. Some additional stanzas are given in the beginning.

---

## No. 12764. महानाटकसुधानिधिः.
## MAHĀNĀṬAKASUDHĀNIDHIḤ.

Pages, 113. Lines, 20 on a page.

Begins on fol. 126*a* of the MS. described under No. 12334.

Complete; a few stanzas at the end of the Yuddhakāṇḍa are wanting.

Same work as the above.

No. 12765. महानाटकसुधानिधिः.
MAHĀNĀṬAKASUDHĀNIDHIḤ.

Substance, palm-leaf. Size, 15 × 1¾ inches. Pages, 40. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Contains the Bālakāṇḍa complete and breaks off in the 93rd stanza in the Ayōdhyākāṇḍa.

Same work as the above.

---

No. 12766. महानाटकसुधानिधिः.
MAHĀNĀṬAKASUDHĀNIDHIḤ.

Substance, palm-leaf. Size, 14½ × 1¼ inches. Pages, 30. Lines, 5 on a page. Character, Nandināgarī and Kanarese. Condition, very much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Kṛṣṇakarṇāmṛta 16*a*.

Breaks off in the Bālakāṇḍa.

Same work as the above.

---

No. 12767. महानाटकसुधानिधिः.
MAHĀNĀṬAKASUDHĀNIDHIḤ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 80. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains from the Ayōdhyākāṇḍa to the Yuddhakāṇḍa complete.

Same work as the above.

Copied by Tattaṅguḍi Śrīnivāsa.

---

No. 12768. महानाटकसुधानिधिः.
MAHĀNĀṬAKASUDHĀNIDHIḤ.

Pages, 98. Lines, 24 on a page.

Begins on fol. 3*a* of the MS. described under No. 27.

Complete.

Same work as the above. Mahānāṭaka is written side by side with the Mahānāṭakasudhānidhi.

The scribe adds—

श्रीहनुमद्रामायणमहापूर्वकनाटकौ यथास्थानम् ।
मिलितौ सितरक्ताभ्यां तिलतण्डुलवत् क्रमादत्र ।
कोपनवैशाखसितद्वादश्यामर्कवारहस्तोढौ ।
तडकमलकृष्णरायः व्यलीलिखदान्ध्रेण सुविचित्रम् ॥

No. 12769 महानाटकसुधानिधिः.
MAHĀNĀṬAKASUDHĀNIDHIḤ.

Substance, palm-leaf. Size, 17⅞ × 1¼ inches. Pages, 41. Lines, 8 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Contains the Bālakāṇḍa complete and breaks off in the 90th stanza of the Ayōdhyākāṇḍa.

Same work as the above.

---

No. 12770. यादवाभ्युदयम्.
YĀDAVĀBHYUDAYAM.

Substance, palm-leaf. Size, 8¼ × 1¼ inches. Pages, 10. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1a. The other works herein are Adhikārasaṅgraha (Tamil) 9a, Rahasyatrayādhikārasaṅgrahaślōka 27a, Kōyiltiruvāymoḻi 48a, Viṣṇustōtra 74a.

Breaks off in the first Sarga.

Same work as that described under No. 11624.

---

No. 12771. रघुवंशम्
RAGHUVAMŚAM.

Pages, 17. Lines, 8 on a page.

Begins on fol. 1a of the MS. described under No. 12662.

Contains the 11th Sarga complete and the 3rd Sarga incomplete.

Same work as that described under No. 11636.

---

No. 12772. राजकालनिर्णयः.
RĀJAKĀLANIRṆAYAḤ.

Pages, 50. Lines, 8 on a page.

Begins on fol. 1a of the MS. described under No. 5197.

Apparently complete.

A work purporting to give the history of the Vijayanagar with the time of the kings who ruled there: by Vidyāraṇya, son of Vidyāśaṅkara.

**Beginning:**

विद्याशङ्करशिष्येण विद्यारण्येन धीमता ।
भारतीकृष्णयतये रहस्येव कृपाबलात् ॥
आख्यातो नृपवंश्यानां राज्ञां कालविनिर्णयः ।
कदाचित् गुरुसान्निध्यं गत्वैवं प्रार्थितो गुरुम् ॥

कृतानां वेदभाष्याणां संशयस्य निवर्तने ।
विद्याशङ्करयोगीन्द्र देह्याज्ञां मम देशिक ॥
काशीं प्रति गमिष्यामि प्रसादं कुरु मे प्रभो ।
वसन्ति मुनयस्तत्र संशोध्य गमनाय मे ॥

* * * *

पीठेष(ष्व)ष्टसु सङ्ख्या च नगरी विजयाह्वया ।
आयामविस्तरतया योजनद्वयसम्मिता ॥
मतङ्ग इति शैलेन्द्रो राजते सर्वकामदः ।
सा पुरी कालदोषेण क्षयं प्राप्तास्ति साम्प्रतम् ॥
संशोध्य सर्वतन्त्राणि भूयोऽपि नगरीमिमाम् ।
सम्यङ्निर्माय चैकत्र अन्नदानं प्रकल्प्य च ॥
इति श्रुत्वा वचस्तस्य मतङ्गेऽत्र स्थिते मयि ।
तस्मिन् काले तु सम्प्राप्तौ नाम्ना सायणमाधवौ ।
मां प्रसाद्य महाभक्त्या सन्तानं तावयाचताम् ॥

* * * *

एतस्मिन्नन्तरे काले कुरुवंशप्रसूतजम् ।
कोशागारप्रतीहारी वीररुद्रमहीपतेः ॥
सुरत्राणेन निर्जित्य वीररुद्रे धृते तदा ।
रामनाथं सिषेवाते राजानं कोशपालने ॥
तस्मिन्नपि हते पश्चात् भ्रातरौ तु यशस्विनौ ।
ज्येष्ठो हरिहरो नाम कनिष्ठो बुक्कसंज्ञकः ॥
सुरत्राणभटैर्नीतिर्वीरै रक्षणलक्षितौ ।

* * * *

तुङ्गभद्रानदीतीरे हस्तिकोणाह्वये पुरा ॥
निवसन्तौ कदाचित्तौ मृगयागमनोत्सुकौ ।
तुङ्गभद्रानदीतीरदक्षिणे दिग्विभागके ॥

* * * *

विरूपाक्षस्य भक्तास्ते त्रयोदश नरेश्वराः ।
हरिहरो बुक्कधरणीनाथविक्रमसंज्ञकाः ॥

विक्रमादयोऽन्ये राजानो भविष्यन्तीत्यर्थः ।

सिंहासनाधिपत्यस्य तेषां कालोऽधुनोच्यते ।
वर्षाणां दशकं यावत्तावद्धरिहराह्वयः ।
पालयिष्यति धर्मेण विरूपाक्षकृपाबलात् ॥

**End :**

हस्तिकोणाह्वयपुरे स्थापितं गोपितं तदा ।
आहिताग्निसुतो वापि गोत्रे हरितसंज्ञके ॥
इत्थं नः शङ्खचक्रादिचिह्नयुक्तकराम्बुजः ।
प्रदर्शयिष्यति यदा शासनार्थसुयन्त्रितम् ॥
प्रदर्शयित्वा विप्राय नृपमालावलीमिमाम् ।
सप्ताङ्गान्यपि देयानि राक्षसायार्थिना(ने)तदा ॥
यस्य निश्वसितं वेदाः यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
विरूपाक्षं जगद्गुरुं . . . . . . . .

---

## No. 12773. वल्लीपरिणयम्.
## VALLIPARIṆAYAM.

Substance, paper. Size, $8\frac{1}{4} \times 6\frac{3}{4}$ inches. Pages, 140. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in five acts.

A drama the plot of which is the marriage between God Subrahmaṇya and Vallīyambā The author is Bhāskarayajvan, son of Śivasūryayajvan of Śrīvatsagōtra. He was patronized by Vīrarāghavamakhin and highly esteemed by the kings of Cēra, Cōla and Pāṇḍya, and is said to have been the preceptor of King Halaghaṭṭi who assisted the Pāṇḍya kings in establishing their power. The drama was intended to be staged on the occasion of the festival of Jambunātha a form of Śiva, celebrated in the month of Phālguna at Tiruvānaikkāval. The author states that his father was descended from one who was the daughter's son of a great poet who vanquished Kavimalla and deprived him of the honorific trumpet Diṇḍima.

**Beginning :**

करेणैकेन कोदण्डमितरेण शरं धरन् ।
पातु रामः परानीकभेदी विघ्नान् भिनत्तु नः ॥

शिवः साक्षा(त्सूर्यः) स्थिरतरमहामोहतिमिरं
निरस्य ज्ञानाब्जं सदयमयमुन्मीलयति यत् ।
अतो विद्वद्वृन्दैर्गदितशिवसूर्याध्वरिवर-
प्रसिद्धिं वन्देऽहं गुरुमखिलविद्यापरिणतिम् ॥

* * * *

(नान्द्यन्ते) सूत्रधारः । अद्य खलु भगवतो देवदेवस्य निखिलामरकोटीरकोटिमणिकान्तिनीराजितपादपद्मस्य दन्तितन्तुवायवरसन्ततसन्तन्यमानसपर्याविशेषस्य अखिलाण्डेश्वरीकरकमलस्पर्शस्तम्भितामृतदेहस्य

* * * *

ज्ञानक्षेत्राधीशस्य श्रीजम्बुनाथस्य फाल्गुनोत्सवसेवासमागतान् सामाजिकान् केन वाभिनवेन रूपकेणानुरञ्जयामि ।

* * * *

सू— (विचिन्त्य) अस्ति खलु सर्वलोकैकगुरोः वटमूलवासिनो देवदेवस्य मुखकमलमकरन्दायमानवीटीरसास्वाद . . . . . सेन निर्जितात् कविमल्लात् उल्लुण्ठितडिण्डिमचण्डरवनपुंसकीकृतपण्डितषण्ड . . . . सकलकलासार्वभौमस्य दौहित्रवंशमुक्तामणिः भृगुकुलमण्डनतास्खण्डितकवियशःपिण्डः लोकगुरुतया न्यक्कृतदेवगुरुः श्रीमान् शिवसूर्याध्वरिवरेण्यः ।

श्रीवत्सान्वयवारिधेरुदभवच्छ्रीमान् कलानां निधिः
सन्मार्गैकरतो द्विजावलिसमुल्लासैकतानोदयः ।
यः सर्वज्ञशिखामणिर्विशदयन् गोभिर्दिशां मण्डलं
विख्यातः शिवसूर्ययज्वतिलको लोकेषु किं न श्रुतः ॥

पारि—आम् २; यः किल भगवन्तं काञ्चीपुराधीश्वरं कामाक्षीदयितमुपश्लोकितवान्—

मूले माकन्दतरोः शैलेन्द्रसुतातपःफलं जयति ।
यत्परिणामपरीक्षणतत्परगौरीस्तनाङ्कितं मग्नम् ॥ इति ॥

उपश्लोकितश्च सरसकविताभिमानिना वीरराघवमल्लिना—

प्रत्यूषस्फुटदम्बुजन्मविगलन्माध्वीकराडान्तिनी
यः पीयूषझलञ्झलीसहचरीं प्रासोष्ट वाग्वैखरीम् ।
तस्मै विस्मयनीयसद्गुणमणिस्तोमैकधामात्मने
पुष्णीमः शिवसूर्ययज्वधरणीदेवाय सेवाञ्जलीन् ॥ इति ॥

सू—योऽसौ सन्ततसन्तन्यमानसप्ततन्तुहुतहविस्तुन्दिललेखसन्ततिः त्रयी-निगूढतत्त्वार्थविवेचनचणो वादाहङ्कृतिशालिवादिमदगजकण्ठीरवो वेदाभिमतशैवागमजीवातुर्दैनन्दिनशिवार्चनानुभूतजीवपरैकतासमाविसाधनक्षुण्णशक्तिस्स्वतामृतधाराप्लावितैन्दवशरीरः चेरचोलपाण्ड्यप्रथमाराध्यः पाण्ड्यमकुटस्थापकश्रीहालघट्टिनृपालकुलगुरुः विजयते हि श्रोत्रियाग्रगण्यः ।

तस्य तनूजः सुधियां भास्करयज्वा चकार कमनीयम् ।
वल्लीपरिणयसंज्ञं नाटकमस्मात्तु निदधे तत् ॥

* * *

सू—आर्ये, सम्प्रति वल्लीपरिणयनाम्ना अभिनवेन नाटकेन सभाजयितव्याः सभासदः ।

End :

तथापीदमस्तु (भरतवाक्यम्)

यजन्तु देवान् मनुजाश्च यज्ञैस्तेषामभीष्टं कलयन्त्वमी च ।
सर्वे च भक्तिं त्वयि देव कुर्युः सा हीष्टदा कामदुघा यथा गौः ॥
अखिलाण्डमातुरधुना दयया गजराजकाननक्षेत्रे ।
वसतां महीसुराणां भवन्तु कल्याणमेदुरा दिवसाः ॥

Colophon :

(इति निष्क्रान्ताः सर्वे) पञ्चमोऽङ्कः ॥

* * * *

The scribe adds—

गौतमान्वयदीपस्य नारायणविपश्चितः ।
कर्णीयानलिखत्पुत्रो भास्कराध्वरिनाटकम् ॥
यः श्रीमच्छिवसूर्य(य)ज्वतनयो यद्वक्त्रपङ्केरुहे
वाणी तिष्ठति भूविहारमधुना द्रष्टुं सवाञ्छेव सा ।
तन्यन्ते सरसाश्च येन कविता नन्दन्ति यं पण्डिता
वन्दे भास्करदीक्षितं तमनिशं लोकैकविद्वज्जनम् ॥

* * * *

आङ्गिरसाब्दे कटके शुक्लपक्षे दिने गुरोः ।
त्रयोदश्यां गौतमाब्धिसुधांशू रामनामकः ॥
व्यलिखद्भास्करकृतं नाटकं भ्रातृचोदितः ।
वल्लीपरिणयाभिख्यमृक्षे पाशुपते च सः ॥

## No. 12774. वसन्ततिलकभाणः.
## VASANTATILAKABHĀṆAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 17*a* of the MS. described under No. 12706 Incomplete.

Same work as that described under No. 12644.

---

## No. 12775. विक्रमसेनचरितम्.
## VIKRAMASĒNACARITAM.

Pages, 33. Lines, 9 on a page.

Begins on fol. 17*a* of the MS. described under No. 11968. Incomplete.

A collection of stories narrated to Vikramasēna, King of Pratiṣṭhānagara. He is said to have been directed by an ascetic named Kṣāntiśīla to go to a neighbouring Śiṁśupā tree. The incidents that occurred there and the stories related by a vampire are stated herein. The work is probably an imitation of Vētālapañcaviṁśati, wherein a vampire narrates stories to King Vikrama.

**Beginning :**

सायं प्रस्तुतचण्डताड(ण्ड)वलसद्गङ्गातरङ्गावली-
रिङ्खत्पत्ररजोऽतिवेलकपिलश्रीमज्जटामण्डलः ।
नृत्ताटोपविलोककौतुकजुषा वैमानिकानां मनः-
पाथोजातविकासवासरमणिः पायादुमायाः पतिः ॥

अस्ति खलु निखिलजननयननलिनसमुदयसुखविधायिगुणगणरमणीया

* * * *

नीतिशास्त्रविशदमतिमण्डितपण्डितप्रतिष्ठा प्रतिष्ठाभिधा [नाम] नगरी । तस्यां च(अ)विरतावगाह्यमाननयागमेतिहासपुराणनाटकालङ्काराख्यायिकाव्याख्याननिव- न्धनाम्भोधिवीचीपरम्परान्दोलितमतिः

* * * *

निजतनुलावण्यपरिमृदितमदनाभिख्यः श्रीमान् विक्रमसेनाभिख्यो राजा रराज । तस्मिन्महीमण्डलाखण्डले निराबाधमनुशासति वसुमतीं कदाचिन्मयमेयमायागहनः क्षान्तिशीलाभिधानः कश्चन श्रमणः.

**End :**

न किमपि हन्त वेद्मि करुणागुरुणा
मणिमयहार एष सत्यमद(ा)यि करे ।

अहमिह विक्रयाय विचरामि तदीयगिरा
यदिम(यि) संशयोऽस्ति ननु गच्छत पृच्छत ॥
इति तद्गिरमाकर्ण्य कर्णोत्पलविभोर्भटाः ।
निन्युस्तं देशिकाभ्यर्णं मन्युस्तम्भितमानसाः ॥

अथ तापसच्छात्रविशे(वेषे)ण प्रच्छादितेऽपि निजकारिनिरुपमरुचिरनिजतनुरुचिभूम्ना प्रकटितमहाभाग्येन सौ.

---

## No. 12776. शिशुपालवधः.

## ŚIŚUPĀLAVADHAḤ.

Pages, 24. Lines, 8 on a page.

Begins on fol. 10*a* of the MS. described under No. 12662.
Contains the second Sarga only without the beginning.
Same work as that described under No. 11710.

---

## No. 12777. शिशुपालवधव्याख्या.

## ŚIŚUPĀLAVADHAVYĀKHYĀ.

Pages, 18. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 12095.
Contains 21 stanzas in the sixth Sarga.
Same work as that described under No. 11811.

---

## No. 12778. श्रुतकीर्तिविलासचम्पुः.

## ŚRUTAKĪRTIVILĀSACAMPUḤ.

Substance, palm-leaf. Size, 16¾ × 1⅜ inches. Pages, 30. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 17*a*. The other work herein is Rasamañjarī 1*a*.
Complete.

A Campukāvya describing the sacred rivers and places to which a Brāhmmaṇa named Śrutakīrti, a native of Viriñcipuram on the banks of the Pālār, went on pilgrimage: by Sūryanārāyaṇādhvarin of Bhāradavājagōtra who may be the same as the author of the Sītāpariṇaya (vide No. 11820 ante).

**Beginning:**

भूयः श्रेयः स दत्तां कटुगहनजनस्थानसंविष्टरक्षो-
मुष्टीमुष्टया हतारिप्रियतरवरदोःकाण्डकण्डूयनेन ।

रामेणाराक्षि सीता मुनि . . . . प्रीतिमा दण्डकाया
गर्भे यन्त्रा विशां मे विधुमधुरमुखोऽसीमहर्षेत्वजायः ॥

नागबन्धः—

कल्याणकारी भवतादिभास्यः कल्याणशैलेष्वसनात्मजो नः ।
कल्या . . . यत्पदपद्मसेवाकल्याच(ण)हन्तुं(हेतुं)श्रियमाशु दातुम् ॥

* * * *

कदाचिदाकाश . . . गोत्रां गोत्रारिधाम्नोऽवतरन्तमारात् ।
पात्रीकृतं नारदमात्महस्तोरात्रियनामात्तनतिं बभाषे ॥
लोकाः समस्ता भगवन्नपाङ्गव्यापारतः पारण . . . . ।
तपस्विसेव्यस्तपसोऽभिवृद्ध्यै कश्चित्प्रदेशो मम कीर्तनीयः ॥

* * * *

इति ब्रुवाणं प्रणतं प्रवीणं वीणामुनिर्विस्मयदत्तचित्तः ।
कथां सुधाधिकरणीमनैषीदव्याजलभ्या महतां दया हि ॥

भो भोः तापसडिम्भ . . . . . ससंभ्रमं संभ्रमता मया नयनपात्रतां प्रापितेषु गम्भीरगुणगुम्भितेषु अम्भोजसम्भवाद्यखिलसुरसम्भावनीयशाम्भवपद-प्रदानापदानेषु पातककुलवरत्रालवित्रेषु पवित्रेषु केषुचिदतिमात्रेषु क्षेत्रेषु,

पारे क्षीरापगाया विधिमलहतये साग्रहं सप्रवेगं
गच्छन्त्यास्सिन्धुपत्न्याः श्रवणपुटपरिभ्रष्टताटङ्कशङ्काम् ।
प्राकारेणावृता(सज)नहृदि दिशता दीप्यमानेन रत्नैः
वैरिञ्ची पुर्युदाश्वि(श्री)न्निजमहिमपराभूतनाकप्रशस्तिः ॥

* * * *

नमश्चरध्येयतपश्चरित्रो विपश्चितां कश्चिदपश्चिमोऽभूत् ।
तस्यां जगद्विश्रुतकीर्तिरात्तमूर्तिस्त्रयीव श्रुतकीर्तिनामा ॥

* * * *

स कदाचिदखिलधरणीमण्डलमण्डनायमानचण्डकिरणपुण्डरीकनयनतनया-दिमनदीनदसरसीषु सरसीकृतहृदया

* * * *

सुरसारङ्गनयना शृङ्गाररसोत्तरङ्गसङ्गीतकलातरङ्गितसिद्धयुवमानसोल्लासं कैलासं नाम शैलराजमभजत ।

**End:**

उत्तुङ्गगोपुरमुपेत्य पुरं विरिञ्चेरुत्तुङ्गतामुपगतः स तपोधनानाम् ।
उत्तीर्णसंसृतिपयोधिरुपे(मे)शमर्चञ्चलुब्धवचाभिरुपचारशरीभिरास्ते ॥

स्थले कलितसन्निधिं निजपदानतानां निधिं
नि(धी)शसखमर्चय त्वमपि तत्र दत्ताञ्जिज ।
अभीष्टफलसिद्धिरप्युपनमेत्तवैवाचिरा-
दितीरित(क)थो वियत्पथमुपासदन्नारदः ॥

**Colophon:**

भारद्वाजकुलाब्धीन्दुः सूर्यनारायणाध्वरी ।
श्रुतकीर्तिविलासाख्यं कृतिं सत्कृतवान् कृती ॥

The scribe adds—

भारद्वाजकुलाब्धीन्दुनारायणविपश्चिता ।
लिखितं श्रुतकीर्त्याख्यं चम्पुकाव्यं मनोहरम् ॥
कल्यब्देषु च मुक्तेषु कालसप्ताष्टवार्धिभिः ।
माधवे कैरवप्रेयःपक्षे शाम्भववासरे ।

---

## No. **12779.** सङ्कल्पसूर्योदयः.
## SAṄKALPASŪRYŌDAYAḤ.

Pages, 165. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 12558.
Complete.
Same work as that described under No. 12710.

---

## No. **12780.** सिन्दूरप्रकरः, द्राविडव्याख्यासहितः.
## SINDŪRAPRAKARAḤ WITH TAMIL MEANING.

Pages, 66. Lines, 25 on a page.

Begins on fol. 51*a* of the MS. described under No. 12291.
Complete.
Same work as that described under No. 12125.

---

## No. **12781.** सुभाषितत्रिशतीव्याख्यासङ्ग्रहश्लोकाः.
## SUBHĀṢITATRIŚATĪVYĀKHYĀSAṄGRAHAŚLŌKĀḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 40*a* of the MS. described under No. 12673.
Incomplete.

A collection of select stanzas taken from the commentary of the Subhāṣitatriśatī.

**Beginning:**

श्रीहर्षोक्तम्—

पूर्वपुण्यविभवव्ययलब्धाः सम्पदो विपद एव विमृष्टाः ।

भगवतोक्तम्—

मात्रास्पर्शाश्च कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनो नित्यं तांस्तितिक्षस्व भारत ॥ इति ।
यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥ इति ।

**End:**

यस्तु पर्यटते देशान् यस्तु सेवेत पण्डितान् ।
तस्य विस्तारिता बुद्धिस्तैलबिन्दुरिवाम्भसि ॥

---

### No. 12782. हरिभक्तिसुधार्णवः.
### HARIBHAKTISUDHĀRṆAVAḤ.

Pages, 136. Lines, 7 on a page.

Begins on fol. 70*a* of the MS. described under No. 12226.

Contains Kallōlas 1 to 4 incomplete, as foll. 7 to 15, 21, 23 to 29 and 39 to 41 are wanting. Kallōlas 5 to 14 are found complete.

A poem describing the leading incidents in the life of Lord Kṛṣṇa from His birth. It is based on the tenth Skandha of the Bhāgavata. The author is Nārāyaṇatīrtha.

**Beginning:**

हिमगिरितनयापत्यं हेमाचलचापसमुदितं तेजः ।
किमपि महत्तममद्य स्मर्तव्यं विघ्नतिमिरहरणाय ॥
समीहितार्थान् स्मरतां ददाति यत्कथासुधावाम्लहरी सुरापगा ।
महाकवीनामपि काव्यनायकं विना कमन्यं स्पृहयेन्मदीयवाक् ॥

* * * *

पुरा मही सासुरभारविह्वलामरेन्द्रलोकं समवाप्य रूपिणी ।
उवाच देवेन्द्रमियं सुदुःखिता सुरारिबृन्दस्य बलं सुदुस्सहम् ॥
अनुज्ञया तस्य मही सुरैः समं जगाम लोकं कमलासनस्य हि ।
चतुर्मुखं प्रत्यसुरोन्नतिं तदा पराजयं देवगणस्य चाब्रवीत् ॥

* * * *

महासुरः कोऽपि महीपतेः सुतः किलोग्रसेनस्य तु कंसनामकः ।
महाबलो देवगणैः सुदुर्जयस्ततोऽतिभीता वयमास्महेऽधुना ।

**End:**

पित्रोः समीपं प्रति बालकाभ्यां गतं महद्भ्याममरोत्तमाभ्याम् ।
तयोर्मुहुः स्नेहविवर्तकाभ्यामहो सुताभ्यां बलकेशवाभ्याम् ॥
सादरं तौ परिष्वज्य मूर्ध्न्युपाघ्राय केशवम् ।
रामं निजसुतं गाढं स्वान्तमारूढमास्थितौ ॥
उग्रसेनं नृपं कृत्वा रामकृष्णौ महामती ।
पालयन्तौ च तद्राज्यमासाते पितुरन्तिके ॥

**Colophon:**

इति श्रीनारायणतीर्थकृते हरिभक्तिसुधार्णवे.

---

No. **12783.** हितोपदेशः.

HITŌPADĒŚAH.

Pages, 88. Lines, 21 on a page.

Begins on fol. 105a of the MS. described under No. 1800.

Complete.

A Sanskrit rendering of the portion of the Bible, known as Solomon's Psalms. It consists of 31 Adhyāyas.

**Beginning:**

विद्यां ग्राहयितुं लोकान् समुपादेष्टुमेव च ।
प्रबोधकारिवाक्यानि परिज्ञापयितुं तथा ॥
बुद्धिं धर्मं विचारं च न्यायं ग्राहयितुं जनान् ।
दातुं विवेकमज्ञाय यूने ज्ञानं च मन्त्रणाम् ॥
इस्रायेल् राजदायूदस्तनयेन सुलेमना ।
अयं हितोपदेशानामभिप्रायः प्रदर्श्यते ॥

**End:**

लावण्यं वचनोत्पादि सौन्दर्यं चानृतं भवेत् ।
किन्तु भाता परेशाचा तत्प्रशंसा भविष्यति ॥
तस्या एव प्रदीयेत तस्याः करकृतं फलम् ।
विचारस्य समज्यायां क्रिया तस्याः प्रशस्यताम् ॥

**Colophon:**

हितोपदेशोऽयं समाप्तः ॥

# GENERAL INDEX.

[NOTE.—The names printed in *italics* are those of the works described.]


*Abhijñānaśākuntala*, 8366 to 8370, 8374
*Abhijñānaśākuntalaprākṛtavivṛti*, 8373, 8376
*Abhijñānaśākuntalaṭīkā*, 8362, 8375
*Abhijñānaśākuntalavyākhyā : Arthadyōtanikā*, 8370, 8371
*Abhijñānaśākuntalavyākhyāna*, 8373
*Abhijñānaśākuntalavyākhyāna : Kumāragirirājīya*, 8371, 8372
*Abhijñānaśākuntalavyākhyā : Sāhityaṭīkā*, 8373
Abhinavabhaṭṭabāṇa, 8334 to 8336
Abhinavacārukīrti, 8140
Abhinavakālidāsa, 8260 to 8263
Abhinavagupta, 8498
*Abhiṣēkanāṭaka*, 8375, 8376
Abjadṛk, 8241
Ācāryacampu, 8293
*Ācāryadigvijaya*, 8307, 8309, 8477
Ācāryavijayacampu, 8290
Āccādīkṣita, 8243
Āccānaudhi, 8339
Acyutadēva, 8314
Acyutarāya, 8256, 8257, 8379, 8380, 8392, 8393
*Acyutarāyābhyudaya*, 8256, 8565
Addaṅki, 8334, 8335
Adhikārasaṅgraha, 8587
Ādityavarman (king), 8323, 8324
Ādivaṇśaṭhakōpasvāmin, 8298, 8299, 8500
Advaitavidyāguru, 8265
Agastyappa, 8129
Aghōraśivadēśika, 8482, 8483, 8556
*Agnihōtravarānandyīdāndra*, 8565
Ahmad, 8150, 8151
Ahōbala, 8121, 8131
Ahōbalācārya (Ātrēya), 8545, 8546
Ahōbalanāthīya, 8416
Ahōbalasūri, 8271, 8273
Ahōbila, 8500
Akālajalada, 8434, 8435, 8517
Akkaya (Paidighantam), 8372
Akkayasūri, 8262, 8263
Akṣōbhyatīrtha, 8122
Alamēlumaṅga, 8314
Alaṅkārakaumudīṭīkā, 8368
Alaṅkāramuktāvalī, 8413
Alaṅkārasaṅgraha, 8534
Alaṅkārasarvasva, 8226
Amara, 8198, 8202, 8204, 8215, 8217, 8322, 8325, 8330, 8355, 8511
Amaruka, 8186, 8188, 8573
Ambālācārya, 8495
Ambujavallīdaṇḍaka, 8570, 8573
*Ambujavallīkalyāṇa*, 8364, 8365
Ambujavallīpariṇaya, 8364, 8570, 8573
Ambujavallīśataka, 8573
Ammā, 8236 to 8238
Ammāḷ (Naḍādur), 8530
Ammāḷācārya, 8532
Amṛtanagara, 8311
Āmuktamālyadāvyākhyā, 8434
Ānandagiri, 8150, 8307, 8308, 8310, 8326
*Ānandarāghava*, 8379, 8380, 8392
Ānandaraṅgam Piḷḷai, 8311
*Ānandaraṅgavijayacampu*, 8311, 8312, 8314, 8315
Ānandarāyamakhin, 8519, 8520
Ānandasāgara, 8408, 8460
Ānandatīrtha, 8119 to 8121, 8133, 8135, 8585
*Anaṅgabrahmavidyāvilāsa*, 8344, 8346
*Anaṅgajīvana*, 8342, 8344
Anaṅgamaṅgalam, 8573
Anaṅgaraṅga, 8150, 8151
*Anaṅgavijaya*, 8347, 8349, 8350
Ananta, 8152, 8165
Anantabhaṭṭa, 8198, 8199, 8201, 8202
Anantācārya, 8295, 8297
Anantaguru, 8297
Anantamā, 8238, 8228, 8229
Anantānandagiri, 8336, 8338, 8339
Anantanārāyaṇa, 8193, 8195, 8196, 8250
Anantanārāyaṇaśāstri, 8542, 8548
Anantārya, 8500
Anantāsanapura, 8391
Anantaśayana, 8310
Anantasūri, 8130
*Anargharāghava*, 8350 to 8352, 8360 to 8362
*Anargharāghavaślōka*, 8362
*Anargharāghavavyākhyā*, 8350 to 8352, 8354 to 8357
*Anargharāghavavyākhyā : Iṣṭārthakalpavallī*, 8358 to 8360
*Anargharāghavavyākhyā : Pañjikā*, 8361, 8362
*Anargharāghavavyākhyā : Tātparyadīpikā*, 8360
Aṇṇādhvarin, 8497, 8499
Aṇṇāsāmi Ayyaṅgar, 8484
Aṇṇāswāmi, 8181, 8244
Aṇṇayadēśika, 8423, 8424
Aṇṇayārya, 8223 to 8225
*Aṇumadhvavijaya*, 8119
Aṇumalla, 8310
Aṇumatīrtha, 8120
*Anumitipariṇaya*, 8356, 8362, 8383
Anyāpadēśaśataka, 8403, 8404
Appalācārya, 8569, 8572
Appaya, 8180, 8181
Appayācār, 8342
Appayācārya (Ātrēya), 8422, 8423
Appayadīkṣita, 8226, 8229, 8249
Āravamudu Ayyaṅgar, 8292

Ardhanārīśvaradīkṣita, 8379, 8380, 8392, 8393
Arhaddāsa, 8247, 8249
Arthadyotanikā, 8370
*Arthapañcakamālikā*, 8281, 8377, 8422
Arthapura, 8310
Aruṇagirinātha, 8256, 8258, 8563
Āryaka, 8403, 8405
Asaṅga, 8128, 8140
*Āścaryacūḍāmaṇināṭaka*, 8375, 8376, 8380 to 8382
*Āścaryacūḍāmaṇināṭaka with commentary*, 8383
Āścaryamañjarīkathā, 8406
Asuśāsanapariṇaya, 8389
Atikāmakalpavallī, 8572
Ātmānanda, 8213
Avanti, 8474, 8475, 8579
Avināśīśvara, 8541, 8542
Ayana, 8314
Ayodhyā, 8150 to 8152, 8181, 8183, 8184, 8311, 8421

Badarikāśrama, 8285, 8311
Badhiragiri, 8465
*Bālabhāgavata*, 8249 to 8251, 8254
*Bālabhāgavatavyākhyā : Kaumudī*, 8251, 8255, 8256
*Bālabhāgavatavyākhyā : Sudhācandrikā*, 8249, 8251, 8253
Bālakṛṣṇa, 8402, 8403
Bālakṛṣṇabhaṭṭa, 8511, 8512
*Bālarāmāyaṇa*, 8434 to 8437
Bālasāyana, 8280, 8285
Bālavanam, 8500, 8501
Bālavyāghrapurī, 8442 to 8444
Ballāla, 8166
Bāṇa, 8186, 8188, 8316, 8317 to 8319, 8335, 8340, 8416, 8431, 8432
*Bāṇāsuravijayacampu*, 8249
Bangalore, 8281
Basavayya, 8345
Benares, 8482, 8496
Bhadrācala, 8582, 8584
*Bhadrācalacampu*, 8582
Bhadrahari, 8310
*Bhagavadajjuka*, 8417, 8437, 8438
Bhagavadārādhanaprayōga, 8241
Bhāgavata, 8163, 8164, 8193, 8250, 8253, 8258, 8260, 8506
*Bhāgavatacampu*, 8256, 8258 to 8262, 8528, 8594
*Bhāgavatacampuvyākhyā : Ratnadīpī*, 8262, 8263
Bhāgīrtiliṅga, 8189 to 8191
*Bhaimīpariṇaya*, 8439, 8440
Bhairavasiṃhadēva, 8352 to 8354
*Bhaimīpariṇayacampu*, 8264, 8392
Bhāmati, 8430
Bharadvājagrāma, 8383, 8384
Bharata, 8160
Bharatābhyudaya, 8496
Bhāratacampu, 8263, 8264
*Bhāratacampuṭilaka*, 8263
Bharatacandrikā, 8573
Bharatapaṭṭana, 8475, 8476
Bharatapur, 8356, 8452, 8476, 8514
Bhāravi, 8236
Bhartṛhari, 8171
*Bhartṛharisubhāṣita*, 8584
Bhartṛmeṇṭha, 8434, 8435, 8579
Bhāsa, 8341, 8375, 8419, 8420, 8431, 8432
Bhāskara, 8212 to 8214
Bhāskarācārya, 8482, 8483
Bhāskararayajvan, 8589, 8591
Bhaṭṭa, 8171, 8338
Bhaṭṭagopāla, 8451, 8452, 8457
Bhaṭṭanārāyaṇa, 8526, 8527
Bhavabhūti, 8186, 8188, 8236, 8384 to 8387, 8434, 8435, 8451 to 8453, 8457, 8489
Bhāvadīpa, 8120
Bhāvanācārya, 8273, 8278 to 8280
Bhavānandasiddhāntavāgīśa, 8141, 8143
Bhavānī (river), 8178
Bhavānīpura, 8310
Bhāvapradyōtinī, 8454
Bhava Svāmibhaṭṭa, 8379, 8380, 8392
Bhōja, 8166, 8169, 8170, 8180 to 8182, 8206, 8207, 8214 to 8217, 8353
*Bhōjacarita*, 8166, 8167
Bhūmidēvī, 8243
Bhūṣaṇa, 8480
Bhūsārapura, 8385, 8387
Bhūtapurī, 8278, 8279, 8454, 8522, 8523, 8534
Bhūvarāhavijayavyākhyāna, 8573
Bōdhānandaghanēndra, 8574, 8576
Bombay, 8315, 8340, 8456, 8579
Bommaya, 8314
Boppanabhaṭṭīya, 8581
Brahmagupta, 8310
Brahmakaivarta, 8524
Brahmatantrayati, 8546
Brahmasūri, 8249
Brahmasūtra, 8148
Bṛhatkathā, 8152, 8153, 8165, 8341
*Bṛhatkathāmañjarī*, 8165
Bṛndavan, 8514, 8524
Brown, C.P., 8157, 8319, 8466, 8494
Bucchayya (Garimalla), 8496
Buddha, 8311
Bukka, 8588

Caḍalavāḍa, 8539
Cakōrasandēśa, 8498
Cakrakavi, 8236 to 8238
Cakramīmāṃsā, 8124, 8125
Cakrapa, 8189
Cakrapāṇi, 8472, 8473
Calicut, 8447
Cāmaṇṇācārya, 8500
Cāmarācārya, 8502
Cāmarāja, 8541
Campakāraṇya, 8196
*Campubhārata*, 8198 to 8202, 8204
Campubhāratavivṛti, 8205
*Campubhāratavyākhyā*, 8202, 8203, 8205
*Campubhāratavyākhyā : Sarasvatīvilāsa*, 8203 to 8206
Campubhārata with commentary, 8201

*Campurāmāyaṇa*, 8166, 8182, 8200, 8206, 8212, 8214, 8215, 8263, 8574 to 8576
*Campurāmāyaṇavyākhyā*, 8208, 8127, 8219
*Campurāmāyaṇavyākhyā*: *Padayōjanā*, 8213, 8214, 8215
*Campurāmāyaṇavyākhyā*: *Sāhityamañjarikā*, 8218
*Campurāmāyaṇa with the commentary Sāhityamañjarikā*, 8216
Cāṇakya, 8155, 8466
*Caṇḍakauśika*, 8352, 8400
Caṇḍēśvara, 8332, 8528, 8529
Candragiri, 8314
Candragupta, 8157, 8171, 8466
Candrakalāmbācaraṇastuti, 8537
*Candrakalākalyāṇa*, 8401
Candramati, 8136, 8137
*Candrarēkhāvilāsa*, 8401, 8402
Candraśēkhara, 8204, 8261
Candravarman, 8516, 8517
*Cāṭuślōka*, 8180, 8182, 8576, 8577
*Cāṭuślōka with Telugu stanzas*, 8578
Caundōji Bāḷāji, 8404
Cenji, 8191, 8192
Cenna Kṛṣṇapaṇḍita, 8347, 8348
Cēra, 8488, 8589, 8591
Chittoor, 8319
Cidambarakavi, 8259, 8442, 8444
Cidambaram, 8392
Cidvilāsasudhānanda, 8310
Cidvilāsayati, 8145
Cikadēvarāya, 8347, 8348
Cikkamā, 8236, 8257
Cinabhūpa, 8392
Cinna Bomma, 8229
Cinna Cevva, 8379, 8380
Cirañjīvakavi, 8141, 8144
Citrakavitvadarpaṇa, 8326
Citramīmāṃsāvyākhyā, 8352
Citraratnākara, 8236 to 8238
Citravāḍa, 8387
Cochin, 8455
Cōla, 8488, 8589, 8591
Cōlaṅgipuram, 8319
Cōlaya, 8314
Cōlēndra, 8314
Conjeevaram, 8275, 8342, 8343, 8399, 8408, 8424, 8425, 8530, 8534, 8546, 8564
Cōrakavi, 8186, 8188, 8340, 8431, 8432
Cranganoor, 8398
Cūḍāmaṇināṭaka, 8382 to 8384
Cūrṇikākīrtana, 8573

Dakṣiṇāmūrtistōtra, 8568
*Damaruka*, 8403 to 8405
Damayantī, 8332, 8333, 8529, 8530
Damayantīpariṇaya, 8236, 8237
*Dānakēlikaumudī*, 8368, 8407, 8408
Daṇḍin, 8217, 8262, 8320 to 8322
Dantidyōtidīvāpradīpa, 8265
Darpaṇa, 8320
*Daśakumāracarita*, 8320, 8321
*Daśakumāracaritavyākhyā*: *Padacandrikā*, 8321, 8322

Dāśarathi, 8275, 8276, 8345, 8386, 8387, 8505
Daśarūpaka, 8352
Daśarūpakavivaraṇa, 8482
*Dattātrēyacampū*, 8230 to 8232
Dattātrēyakavi, 8230 to 8232
Dattātrēya Udāra, 8266, 8267
Daurduki, 8517
Dāvud, 8150, 8152
Delhi, 8279
Dēśikadāsa, 8424
Dēvadāsa, 8172, 8475, 8476
Dēvadatta, 8128
Dēvādhirāja, 8533
Dēvāditya, 8239
Dēvaki, 8257
Dēvarājabhaṭṭa, 8281
Dēvarājaśēkhara, 8314
Dēvalapalli, 8251, 8255
Dhakkāsabhāpati, 8482, 8483
*Dhanañjayavijayavyāyōga*, 8410
Dhanapāla, 8127, 8128
Dhanyakumāra, 8127 to 8129
*Dhanyakumāracarita*, 8127 8129
Dhārā, 8166
Dharānanda, 8355, 8475, 8476
Dharma, 8226
Dharmaprastha, 8310
Dharmaśivayōgin, 8226, 8228
Dhyānasetuṭīkā, 8573
Diṇḍima, 8589
*Divyadēśaprasiddhacampu*, 8232, 8233, 8235
*Divyasūricarita*, 8125 to 8127
Draviḍa, 8398
*Draupadīcarita*, 8322, 8323
*Draupadīpariṇaya*, 8408, 8409
*Draupadīpariṇayacampu*, 8235, 8237, 8238
Duplier, 8311
Durduka, 8424, 8425
Dvātriṃśatsālabhañjikā, 8169, 8170
Dvārakā, 8311
Dvirūpakōśa, 8327
Dvitrigrahayōgādhyāya, 8400

Ēkākṣararatnamālā, 8225
England, 8157

Gadādhara, 8332, 8333, 8529
Gadyarāmāyaṇa, 8573
Gānapadānivantam, 8573
Gaṇēśa, 8347
Gaṅgādhara, 8206, 8207, 8263, 8264, 8315
Gaṅgādhara (Śrīvatsa), 8311, 8312, 8314, 8315
Gaṅgādharakavi, 8266, 8267
Gaṅgāmbikā, 8206, 8207, 8216, 8217, 8263, 8264
Ganges, 8524
Garuḍadēva, 8314
Garuḍavāhanapaṇḍita, 8125, 8126
Gauḍa, 8141, 8142, 8144
Gaurīkathā, 8402

Gautama, 8247
Gayā, 8311
Germany, 8157
Ghanaguruvarya, 8387, 8389, 8390
Ghanaśyāmapaṇḍita, 8403, 8405
Ghanavaradaguru, 8275 to 8277
Ghaṭikāśata Ammal, 8530
Ghaṭikāśatakavi, 8494
Ghaṭikāśudarśana, 8495
Gingee, 8191, 8285, 8286
*Gītagōvinda*, 8574
Gōdā, 8127
*Gōdāpariṇaya*, 8399, 8400
*Gōdāpariṇayacampu*, 8196 to 8198
Gōdāvari (river), 8231, 8381, 8582, 8583
Gōkula, 8514, 8515
Gōkulanātha, 8445, 8447, 8448
Gōpāladāsa, 8297
Gōpāladēśika, 8232, 8233, 8235
Gōpālamuntria, 8430
Gōpālayatīndra, 8215
Gōpālēndrasarasvatī, 8212, 8213
Gōvinda, 8309, 8313, 8314
Gōvindabhaṭṭāraka, 8241
Gōvindadēva (king), 8491, 8492
Grahēśvara, 8472 to 8474
Gṛhārcāpratiṣṭhāvidhi, 8461
Gūḍhārthadīpikā, 8353
Guha, 8388
Guṇāḍhya, 8152, 8165
Guṇapura, 8310
Guṇottarā, 8463, 8464
Guptakuṭi, 8487, 8488
Gurabhāvaprakāśikā, 8125
Guru Rāmakavi, 8440 to 8442, 8482 to 8484, 8555, 8556

Hālaghaṭṭi (king), 8589, 8591
Hālāsyamāhātmya, 8279
Halāyudha, 8329
Hanumadrāmāyaṇa, 8586
*Hanumadvijaya*, 8177, 8178
Hanuman, 8450
Hanumanta, 8449
Hanumantācārya, 8132
Hanumatsūri, 8539, 8540
Haradatta, 8305
Haribhaktisudhārasa, 8186
*Haribhaktisudhārṇava*, 8596, 8597
Hariścandra, 8219, 8222, 8223, 8341
Haridāsa, 8563, 8564
Haridēvabrāhmaṇa, 8514
Harihara, 8358, 8588, 8589
*Harivilāsakāvya*, 8563
Harṣa, 8186, 8187, 8312, 8431, 8432
*Harṣacarita*, 8340, 8342
Hastāmalaka, 8148, 8310
Hastāmalakastōtra, 8144
Hastigiricampu, 8281, 8284
*Hastigirimāhātmya*, 8564, 8565
Hastikōṇa, 8588, 8589
Hastinā, 8199
Hēmanta, 8314
Hindupur, 8275
*Hitōpadēśa*, 8178 to 8180, 8597

Ilampaḷḷi, 8280, 8285
Iḷangōdu, 8284, 8500
Immaḍi Dēvarāya, 8585
Indrakaṇṭhi, 8567
Indraprastha, 8310
Indupuri, 8275
Irugupatiyanna, 8159
Īśa, 8403, 8404
Īśāvāsyōpaniṣad with Telugu ṭīkā, 8537
Īśvara, 8256, 8257, 8492, 8493, 8541, 8542
Īśvara (Kauṇḍinya), 8484, 8485
Īśvarasūri, 8241

Jagaddēśika, 8241
Jagaddhara (Mahāmahōpādhyāya), 8332 to 8334, 8460, 8529 to 8530
Jagannātha, 8410
Jaimini, 8389
Jaiminibhārata, 8178
*Jānakīpariṇaya*, 8402, 8403
Jātavēdas, 8417 to 8419
Jātukarṇi, 8451, 8452, 8457
Jayadēva, 8431, 8432
Jayāditya, 8472, 8473
Jayalakṣmaṇasūri, 8572
*Jayamaṅgalā*, 8290, 8292
Jayatīrtha, 8121
*Jayatīrthavijaya*, 8121
*Jayatīrthavijayavyākhyā*, 8121
Jijñāsādarpaṇa, 8223
Jīvandhara, 8219, 8221, 8222
*Jīvandharacampū*, 8219, 8222, 8223
Jñānakaṇḍa, 8310
Jñānapradīpakalikā, 8597
Jumna, 8524
Jyōtiṣaviṣaya, 8500

Kacchipēśvara, 8458
*Kādambarī*, 8315, 8317 to 8320, 8340
Kairavinī, 8348, 8363
Kālaḍi, 8149, 8309
Kalānidhi, 8193, 8195
Kālatattvārṇavasētu, 8141, 8143
*Kalāvatīkāmarūpa*, 8185, 8396, 8397
Kālidāsa, 8186, 8188, 8227, 8236, 8257, 8305, 8241, 8366, 8373, 8431, 8439, 8461, 8462, 8483, 8507, 8509, 8510, 8511
Kalijit, 8241
*Kālidāsaviśvāsabhāṣya*, 8398
*Kālindīmukundacampū*, 8188, 8567
*Kālindīmukundacampūvyākhyā: Sāhityadarpaṇa*, 8567, 8568
Kaliṅga, 8448
Kaliviḍambana, 8230
Kalyāṇamalla, 8150 to 8152
Kalyāṇapuri, 8270
Kalyāṇasādhikā, 8572
Kalyāṇavallīkalyāṇa, 8275, 8279, 8280
Kāmākṣī, 8379, 8380, 8392, 8393, 8484, 8485, 8492, 8493
Kāmākṣīpura, 8202, 8209
Kamalānārāyaṇapura, 8566
Kamalanayanācaryā, 8573
*Kamalinīkalahaṁsa*, 8390 to 8396
*Kamalinīrājahaṁsa*, 8394, 8395

Kāmā Śāstri, 8496
Kāmaya, 8189, 8190
Kāñcipuram, 8126, 8127, 8192, 8282, 8283, 8285, 8292, 8293, 8305, 8309, 8311, 8338, 8339, 8422, 8423, 8444, 8494, 8521, 8530, 8531, 8564
Kandarpavijaya, 8219, 8387, 8389, 8390
Kando Rao, 8218
Kāntōpayantr, 8255
Kapardi, 8212, 8213
Kārikādarpaṇa, 8342
Karṇāṭa, 8400, 8448, 8469
Karpūramañjari, 8395
Karpūramañjarīvyākhyā, 8395, 8396
Karṇāmṛta, 8537
Karuṇākara, 8518, 8536
Kashmir, 8152, 8165
Kāśi, 8311, 8396, 8403, 8404, 8444, 8588
Kāśinātha, 8141, 8142
Kāśīpati, 8465, 8466
Kāśirāju (Poršil), 8318
Kathāsaritsāgara, 8152, 8154, 8155
Kāṭaya Vēmabhūpāla, 8371, 8463, 8510
Kauṭilyaśāstra, 8155, 8156
Kāvēri (river), 8178, 8541
Kavi Kuñjara, 8167, 8168
Kavimalla, 8589, 8590
Kavīndrācāryasarasvati, 8321, 8322
Kavirañjani, 8255
Kavisamayakallōla, 8581
Kavitārkikakaṇṭhīrava, 8500, 8503
Kavitārkikasiṁha (Śrīvatsa), 8487 to 8489
Kavitārkikasiṁhaguru, 8295
Kavitāvallabha, 8447, 8448
Kavivādiśēkhara, 8305, 8306
Kavivaidyapurandara, 8125, 8126
Kāvyadarpaṇa, 8392
Kāvyādarśa, 8320
Kāvyādarśavyākhyā, 8366
Kāyastha, 8524
Kedārakṣētra, 8211
Kērala, 8149, 8302, 8324 to 8327, 8405, 8406, 8448, 8516, 8558
Kēśavanandi, 8161, 8162
Kēśavanātha, 8128
Kēśavārya, 8279, 8280
Kēśavasōmayājin, 8522
Kirātārjunīya, 8303
Koduṅgalūr, 8398
Kōlāhala, 8401
Kōmāndūr, 8295
Koṇḍājyautiṣika, 8402, 8403
Koṇḍōbhaṭṭa, 8212, 8214
Koṇḍōpaṇḍita (Śāṇḍilya), 8216, 8217
Koṇḍubhaṭṭa, 8567, 8568
Koravañji, 8573
Kōṭiliṅga, 8398
Kōyiltiruvāymoli, 8587
Kṛṣṇa, 8177, 8191, 8209, 8241, 8265, 8314, 8358, 8447, 8448, 8470
Kṛṣṇa (Narakēsimalla), 8189, 8191
Kṛṣṇabhaṭṭa, 8379, 8380, 8392
Kṛṣṇabhūṣaṇa, 8189 to 8191
Kṛṣṇābhyudaya, 8342
Kṛṣṇadāsa, 8396, 8397
Kṛṣṇakarṇāmṛta, 8586
Kṛṣṇakavi, 8536
Kṛṣṇamācārya (Maitrēya), 8241, 8242
Kṛṣṇamiśra, 8290, 8417, 8426, 8429, 8430
Kṛṣṇaprabandha, 8568
Kṛṣṇarāya, 8191, 8192, 8275, 8276, 8313, 8314, 8347, 8348, 8541, 8586
Kṛṣṇārya, 8339, 8468
Kṛṣṇaśaṅkaraśarman, 8517
Kṛṣṇaśāstri, 8232, 8233
Kṛṣṇasūri (Kāśyapa), 8512, 8513
Kṛṣṇavilāsa, 8191 to 8193, 8195, 8196
Kṛṣṇavilāsacampu with the commentary Kalānidhi, 8193
Kṛṣṇasūnu, 8395
Kṛṣṇasūri, 8408, 8409
Kṛṣṇavijaya, 8569, 8572, 8573
Kṣāntiśīla, 8592
Kṣēmēndra, 8165, 8305
Kṣēmēśvara (Ārya), 8400
Kūḍalūr, 8390
Kukkuṭakrōḍa, 8447, 8448
Kulaśēkhara, 8270
Kulaśēkharavarman, 8405, 8406, 8558, 8559
Kumāragirirājīya, 8371, 8372, 8463
Kumāradhārā (river), 8310
Kumārasvāmin, 8212, 8213
Kumāratātācārya, 8204, 8205
Kumārila, 8311, 8383, 8384, 8417
Kumbakōṇa, 8203
Kuppammā, 8230, 8231
Kuppusvāmi Ācāryar, 8489
Kūranātha, 8279, 8291
Kūrmapurāṇa, 8163
Kūttakkuḍi, 8487
Kuvalayapura, 8310

Lādakhān, 8150 to 8152
Lakṣmāmbā, 8271, 8273
Lakṣmaṇa, 8182, 8183, 8206, 8207, 8311, 8314
Lakṣmaṇabhaṭṭāraka, 8215
Lakṣmaṇācārya, 8505
Lakṣmaṇaguru, 8571
Lakṣmaṇakavi, 8180 to 8184, 8191 to 8193
Lakṣmaṇamuni, 8570
Lakṣmaṇārya, 8126, 8277, 8278, 8299
Lakṣmaṇasūri, 8263, 8264
Lakṣmaṇayōgin, 8423
Lakṣmī, 8193, 8195, 8196, 8314, 8379, 8380, 8392
Lakṣmīdhara, 8265, 8359, 8411, 8414
Lakṣmīkalyāṇa, 8504
Lakṣmīnārāyaṇacarita, 8573
Lakṣmīnārāyaṇapura, 8210, 8454
Lakṣmīnāthakavi, 8464
Lakṣmīnṛsiṁhasūri, 8135
Lakṣmīpatibhaṭṭa, 8124, 8125
Lakṣmīprasādamālā, 8537
Lakṣmīpura, 8572
Lakṣmīsvayaṁvara, 8415, 8490, 8491
Lāṅgalagajapati, 8314
Laṭakamēlaka, 8485, 8491, 8492
Lāṭapura, 8447, 8516, 8517
Liṅgamaguṇṭa, 8539, 8540
Liṅgambhaṭṭa, 8507, 8583

Liṅgapañcaka, 8311
Liṅgaśāstri, 8567, 8568
Lōdi, 8150, 8151
Lōkācārya, 8278
Lōkanātha, 8236 to 8238

*Madālasāṣṭaka*, 8368, 8444
*Madālasāvivaraṇa*, 8446
*Madanagōpālavilāsa*, 8440 to 8442, 8482
*Madanamahōtsavabhāṇa*, 8442 to 8444
Maḍayāmbalam, 8489
Maddagiri, 8319
Mādhava, 8310
Mādhavabhūṣaṇabhāṇa, 8480
Mādhavīya, 8149, 8150
Madhurā, 8189, 8197, 8258, 8387, 8389, 8444, 8469, 8539, 8583
Madhurādāsa, 8524, 8525
Madhurakavi, 8295
Madhusūdanakavi, 8449, 8450
Madhva, 8122, 8123, 8132, 8133
Madhvavijaya, 8119, 8120, 8131 to 8133, 8135
Madhvavijayaṭīkā, 8133 to 8136
Madhvavijayavyākhyā, 8132, 8134
*Madhvavijayavyākhyā : Padārthadīpikā*, 8133
*Madhvavijayavyākhyā : Padārthadīpikōdbōdhikā*, 8134
*Madhvavijayavyākhyā : Padārthaprakāśikā*, 8135, 8136
Madhyālayārya, 8119
Madhyārjuna, 8310
Madra, 8266
Madrakanyāpariṇaya, 8266, 8267
*Madrakanyāpariṇayacampu* with *Viṣamapadaṭippaṇī*, 8265
Madras, 8362
Madura, 8270, 8498
Magadha, 8311, 8321
Māgha, 8236, 8257, 8573
Mahābhārata, 8163, 8198, 8274, 8322, 8340, 8406
Mahābhāṣya, 8300
Mahādēva, 8212, 8214, 8403, 8404, 8431, 8432
Mahādēvagrāma, 8538
Mahādēvasōmayājin, 8387, 8389
*Mahānāṭaka*, 8449 to 8451, 8586
*Mahānāṭakasudhānidhi*, 8183, 8285, 8410, 8451, 8585 to 8587
Mahāpūrṇa, 8279, 8570
Maharṣi, 8447, 8448
Mahārya, 8388
*Mahāvīracarita*, 8155, 8386, 8410, 8451 to 8454
*Mahāvīracaritavyākhyā : Pradyōtinī*, 8453 to 8455
Mahāvyāghrapura, 8302
Mahēndrapāla, 8434 to 8436, 8517
Mahēśa, 8141, 8142
Mahēśvara, 8447, 8448
Mahēśvarabhaṭṭa, 8387, 8389
Mahīdhara, 8322
Mahīpāla, 8400
Mahiṣamaṅgala, 8455
*Mahiṣamaṅgalabhāṇa*, 8455
Mahōdayapura, 8405, 8406
Maiḷāpura, 8278
Mairāvaṇacaritra, 8178
Malabar, 8209, 8390
*Mālatīmādhava*, 8392, 8410, 8456 to 8458, 8460
*Mālavikāgnimitra*, 8293, 8366 to 8368, 8461, 8462
*Mālavikāgnimitravyākhyā*, 8458 to 8461, 8463, 8464
*Mālavikāgnimitravyākhyā : Gupitārtha*, 8464
*Mālavikāgnimitravyākhyā : Kumāragirirājīya*, 8292, 8462, 8463
Malayadhvaja, 8270
Mallāri, 8310
Mallayya, 8496
*Mallikāmāruta* 8446, 8448, 8449
Mallinātha, 8212, 8213
Mānavikrama, 8447, 8448
Maṇḍanamiśra, 8147, 8311, 8338
*Mānavēdacampūbhārata*, 8267
Mānavēdarāja, 8267
Maṅgā, 8182, 8183
Maṇimañjarī, 8584
*Maṇimañjarī with commentary*, 8584
Maṇimuktānadī, 8487, 8488
Mannārgoḍi, 8295
Manoharārāya, 8410
Mantrārthadīpa, 8141, 8142
Manaḷīghaṭṭa, 8426
Manu, 8203
Mappēḍu, 8495
Mārgadarśanī, 8518, 8519
*Mārgasahāyacampū*, 8268, 8270
Masulipatam, 8319
Māṭha, 8455
Matsyapurāṇa, 8163, 8164
Māyana, 8558
Mayūra, 8257, 8431, 8432
Mēghasandēśa, 8394
Meru (king), 8486
Mīmāṃsāśāstrasaṅgraha, 8573
*Mīnākṣīkalyāṇacampū*, 8270, 8271
Mīnākṣyārya, 8230, 8231
Mithyātvabhaṅga, 8132
Mitravaṭēśvaram, 8472, 8478
Mōkṣaguṇḍa, 8262
*Mṛcchakaṭika*, 8352, 8474, 8476
*Mṛcchakaṭikāvivaraṇa*, 8475, 8476
Mṛcchakaṭikavyākhyā, 8285
Mṛgāṅkadatta, 8579
Mṛtyuñjaya, 8238
Mudaliyāṇḍān, 8275, 8345
Muditamadālasā, 8445
*Mudrārākṣasa*, 8155, 8410, 8466 to 8472
Mudrārākṣasakathāsaṅgraha, 8156, 8157
Mudrārākṣasavyākhyā, 8410
*Mudrārākṣasavyākhyā : Tātparyabōdhinī*, 8468, 8470
Muhilkoṇḍa, 8271
Muktinātha, 8361, 8362
Mukunda, 8197
Mukundadēva, 8502
Mukundalīlā, 8124, 8125
*Mukundānandabhāṇa*, 8464 to 8466
Mūlāṇḍa, 8482, 8483, 8556

Muḷḷandram, 8482, 8556
Muñja, 8166
Murāri, 8236, 8350, 8353, 8354, 8356, 8362
Muttembi Śāstri, 8243
Mysore, 8247, 8541

*Nāṭyānanda*, 8413, 8414
*Nāṭyānandavyākhyā*, 8414
Nāganātha (Kaudukuru), 8270, 8271
Nāgeśvara, 8212 to 8214
Naiḍuḍam, 8368
Naiṣadha, 8212, 8213, 8567, 8568, 8573
Nalābhyudaya, 8379
*Nalacampu*, 8239
Nallāṇcakravarti (Muḍumbai), 8550
Nāmaliṅgānuśāsana with Tamil meaning, 8504
Nambūdripād, 8455
Nanda, 8466
Nandana, 8140
Nandanaprabhu, 8478
Nañjunda, 8442, 8443
Nānyadēva, 8458
Nāradīyapurāṇa, 8163
Narakāsuravadha, 8410
*Narakāsuravijaya*, 8410, 8411
Narasa, 8256, 8257, 8347, 8348
Narasakkā, 8212
Narasiṁha, 8125, 8189, 8191, 8241, 8385
Narasiṁhabhāratī, 8209
Narasiṁhācārya, 8203, 8204
Narasiṁhadēva, 8352
Narasiṁhapurāṇa, 8163
Narasiṁhārya (Vātsya), 8509
Narasiṁhasūri, 8193 to 8196
Nārāyaṇa, 8120, 8133, 8178, 8212, 8214, 8215, 8243, 8274, 8323, 8324, 8347, 8348, 8350, 8511, 8572, 8591, 8595
Nārāyaṇabaliprayōga, 8446
Nārāyaṇabhaṭṭa, 8553
Nārāyaṇācārya, 8123 to 8125
Nārāyaṇadīkṣita, 8243
Nārāyaṇa (Kumāra), 8580
Nārāyaṇamuni, 8298, 8299
Nārāyaṇapaṇḍitācārya, 8119, 8120, 8121, 8134, 8584
Nārāyaṇapura, 8477, 8478
Nārāyaṇasvāmin, 8500, 8502
Nārāyaṇatīrtha, 8596, 8597
Nārāyaṇaviṁśatistōtra, 8281
*Nārāyaṇīvilāsa*, 8415
Narēndrasiṁha (Kumāra), 8445
Nārēri, 8390
Nāṭakacandrikā, 8412
Nātha, 8241, 8272, 8282, 8290, 8388, 8570
*Nāthamunivijayacampū*, 8241, 8242
Navagrahaśānti, 8290
Nāvalpākkam, 8424
*Navamālikā*, 8352, 8411, 8412
*Nava*[illegible], 8579
Navīnakāḷidāsa, 8166

Navīnaśirōmaṇi, 8488
Nayana, 8314
Nidalāpuri, 8504
*Nigamāntācāryacarita*, 8129 to 8131
Nigamāntadēśika, 8203, 8523
Nigamāntasūri (Paravastu), 8290
Nighaṇṭusāra, 8573
Nikṣēparakṣā, 8292
Nīlādri Rao, 8250, 8253
Nīlakaṇṭha, 8390, 8391, 8451, 8452, 8456, 8457, 8463, 8464
Nīlakaṇṭhādhvarin, 8402, 8403
Nīlakaṇṭhadīkṣita, 8243
Nīlakaṇṭhakaṇṭhakāntiśataka, 8537
Nīlakaṇṭhamakhin, 8236, 8238
*Nīlakaṇṭhavijayacampū*, 8155, 8180, 8242 to 8244
Nīlāyatākṣīśataka, 8537
Nītisāra, 8580, 8581
*Nītisāra with Tamil commentary*, 8580
North Arcot, 8268, 8482, 8556
*Nṛgamōkṣa*, 8244, 8246
Nṛsiṁha, 8290, 8314, 8339, 8487 to 8489
Nṛsiṁhācārya, 8204, 8295
Nṛsiṁhādhvarin, 8519, 8520
Nṛsiṁhakavi, 8362, 8363, 8401
Nṛsiṁhārya (Bhāradvāja), 8356
Nṛsiṁhasūri, 8408, 8409
Nūtanapura, 8465
Nyāyakarpūravartikā, 8392
Nyāyakusumāñjali, 8353
Nyāyasaṅgraha, 8573

Oudh, 8150
Oxford, 8141

Padacandrikā, 8321
Pādādikirīṭāntavarṇana, 8537
Padārthadīpikā, 8133
Padārthadīpikōdbōdhikā, 8134
Padārthaprakāśikā, 8135, 8136
Padmadṛk, 8570
Padmagupta, 8579
Padmanābhabhaṭṭa, 8281
Padmanagaru, 8451, 8452
Padmapāda, 8148, 8310
Padmarāja, 8250, 8253 to 8256
Pālār, 8447, 8593
*Pañcabāṇavijayabhāṇa*, 8415, 8581
*Pāñcālīsvayaṁvara*, 8346
Pañcanadabhāyajvan (Iḷayavalli), 8295
*Pañcatantra*, 8157 to 8160, 8178
*Pañcatantra with Kanarese meaning*, 8160, 8161
*Pañcatantra with Telugu meaning*, 8160, 8161
Paṇḍitarāyaśataka, 8495
Pāṇḍya, 8197, 8236, 8237, 8270, 8483, 8589, 8591
Pāṇini, 8185
Pañjikā, 8362
Paradēvatāmukhāravindaśataka, 8537
Paramānanda, 8475, 8476
Paramēśvara, 8450

Paramēśvarādhvarin, 8442, 8443
Parāṅkuśasvāmin, 8500, 8502
Parāśarabhaṭṭa, 8582, 8583
Paravastu, 8291
Pārijātaharaṇa, 8379
Parimalakālidāsa, 8579, 8580
Pārśvanātha, 8129
Pārvati, 8311, 8314, 8488, 8490
*Pārvatīpariṇaya*, 8236, 8237, 8416
Pārvatīstōtra, 8498
Paṭṭāmbi, 8390
Pedda Kōmaṭi Vēma, 8334, 8335
Peddaṇasūri, 8539, 8540
Peddabhaṭṭa, 8212, 8213
Pērubhaṭṭa, 8150, 8371
Pērusūri, 8497 to 8499
Phaṇanda Vaidēha, 8445
Pītāmbarā, 8445
Piḷḷaipākkam, 8295
Piṭhāpura, 8250, 8253
Pōlāpragada, 8161
Pondicherry, 8311
Poonamallee, 8385
Prabhāvali, 8546
Prabhāvati, 8127, 8128
*Prabōdhacandrōdaya*, 8384, 8417, 8426 to 8430, 8482, 8519, 8581
*Prabōdhacandrōdayavyākhyā*, 8428
*Prabōdhacandrōdayavyākhyā : Prauḍhaprakāśa*, 8429 to 8431
Pradyotani, 8454
*Pradyumnānandīya*, 8422 to 8424
Prahasana, 8410
*Prahēlikā*, 8433, 8582
*Prahlādavijaya*, 8162 to 8165
Prākṛtaratnākara, 8573
Pramēyaratnamālikā, 8119 to 8121
Praṇatārtiharguru, 8281, 8282
*Prapannasampādikārasanirṇaya*, 8424, 8581
Prasādavallabha, 8482, 8483
*Prasannarāghava*, 8410, 8431, 8433, 8434
Pratāparudrīya, 8198, 8212, 8213
*Pratijñāyaugandharāyaṇa*, 8419, 8420
*Pratimānāṭaka*, 8375, 8376, 8420, 8421
Pratiṣṭhānagara, 8592
Prativādibhayaṅkara, 8255
Praudhadēvamahārāyapura, 8563, 8564
Pravarasēna, 8341
Prāyaścittasubōdhini, 8581
Prayāga, 8311
Pṛthu (Mahārāja), 8466, 8467
Pṛthvidhara, 8370, 8371
Puṇḍarīka, 8300
Puṇḍarīkākṣa, 8130, 8279
Puṇyāsrava, 8162
*Puṇyāsravakathā*, 8161
Puradēva, 8247, 8249
*Puradēvacampu*, 8247, 8249
Purāṇajyōtirmuni, 8394
Pūrṇadāsa, 8475, 8476
Pūrṇaguru, 8521, 8522
Pūrṇaprajña, 8120
*Pūrṇapuruṣārthacandrōdaya*, 8417, 8418
Pūrṇasarasvati, 8374
Puruṣōttama, 8502
Puṣpakēśa, 8140
Puṣpapura, 8157
Rādhāpura, 8141
Rāghava, 8184, 8185, 8241, 8370, 8423, 8424, 8470, 8572
Rāghava (Kōsala), 8223, 8225
Rāghavābhyudaya, 8398, 8436
Rāghavācārya, 8255, 8256, 8298, 8300
Rāghavācārya (Tirumala Śaṅkhapuram), 8533
Rāghavācārya (Viñjimuri), 8534, 8535
Rāghavadēśika, 8424, 8572
Rāghavapāṇḍavayādavīya, 8259
Rāghavārya, 8205, 8285, 8286
Rāghavārya (Vaṅgi), 8424
Rāghavasūri, 8584
Rāghavēndra, 8141, 8142
Raghunātha, 8180, 8181, 8232, 8233, 8281 to 8283, 8422, 8423
Raghunāthabhūpavijaya, 8379, 8380
Raghunāthanāyaka, 8379, 8380
Raghunātharāya, 8392, 8393
Raghunāyaka, 8444
Raghōttama, 8121
*Raghuvaṃśa*, 8500, 8573, 8587
*Raghuvīracarita*, 8479, 8480
Raghuvīragadya, 8409
Raghuvīravijaya, 8573
Rahasyaratna, 8573
Rahasyatrayādhikārasaṅgrahaślōka, 8567
Rahasyatrayādhikāravyākhya, 8429
Rājacūḍāmaṇidīkṣita, 8265, 8379, 8380, 8392, 8393
Rājadāyanda (Isrāyal), 8597
Rājagōpālamuni, 8271, 8273
*Rājakīyanirṇaya*, 8587
Rājanātha, 8256, 8258, 8440, 8441, 8482, 8483, 8556, 8557
Rājarājavarman (king), 8455
Rājaśēkhara, 8167, 8395, 8434 to 8437, 8516 to 8519
*Rājaśēkharacarita*, 8167, 8168
Rājaśēkharayatīśvara, 8539, 8540
*Rājasūyaprabandha*, 8245, 8274
Rājataraṅgiṇi, 8141
Rājendra, 8141, 8143
Ramā, 8191, 8192
Rāma, 8232, 8414, 8415, 8570, 8591
Rāmabala, 8355, 8475, 8476
Rāmabhadra, 8445
Rāmabhadradīkṣita, 8402
Rāmabhaṭṭa, 8152
*Rāmābhiṣēkacampu*, 8281
*Rāmābhyudaya*, 8485, 8486
Rāmacandra, 8161, 8162, 8216, 8217, 8314, 8375
Rāmacandra (king), 8468, 8469
Rāmacandravijaya, 8498
Rāmadēva, 8141, 8143, 8314, 8486
Rāmadēvarāya, 8314
Rāmadhara, 8529
*Rāmakathā*, 8323, 8324
*Rāmakathāvyākhyā*, 8324
Rāmakavi (Kuratī), 8202, 8203, 8539, 8540, 8554, 8555
Rāmakṛṣṇa, 8539, 8540
Rāmānandāśrama, 8359
Rāmanātha, 8588
Rāmāntarvāsi, 8251, 8255

Rāmānuja, 8191, 8192, 8204, 8241, 8271, to 8273, 8275, 8277, 8278, 8281, 8298, 8505, 8506, 8521 to 8523, 8570, 8571, 8582
Rāmānuja (Kauṇḍinya), 8571
*Rāmānujacampū*, 8275, 8279, 8280, 8504
Rāmānujācārya, 8284, 8504 to 8506, 8530, 8531
Rāmānujadāsa, 8241, 8242, 8375, 8379, 8380, 8504
Rāmānujadēśika, 8275, 8278 to 8280
Rāmānujakavi (Hārita), 8521 to 8523
Rāmānujārya, 8275, 8277, 8280, 8288, 8548
Rāmānujayōgin (Vādhūla), 8425
Rāmapāṇivāda, 8553
Rāmāpati, 8465, 8466
*Rāmarājyābhiṣēkanāṭaka*, 8484, 8485, 8493
Rāmarāya, 8312, 8314
Rāmaśarman, 8472, 8473
Rāmaśāstri, 8319
Rāmasūri, 8251, 8252, 8255
Rāmasvāmi (Vāraṇāsi), 8345, 8525
Rāmasvāmi Makhin, 8442, 8443
Rāmavāriyar, 8553
Rāmāyaṇa, 8180, 8181, 8206, 8207, 8217, 8252, 8323, 8375, 8420, 8449, 8480, 8552, 8565, 8574, 8576
Rāmāyaṇacampū, 8504
Rāmāyaṇasaṅgraha, 8573
Rāmāyaṇasāra, 8183
Rāmēśa, 8374
Rāmēśvaram, 8207, 8310, 8332, 8333
Ramyajāmātṛ, 8532
Raṅga (Rēpalli), 8287
Raṅgācārya, 8262, 8489, 8571
Raṅgācārya (Pattuṅgi), 8210
Raṅgadēśika, 8572
Raṅgadēvi, 8447, 8449
Raṅgāmbikā, 8347, 8348
Raṅganātha, 8298 to 8300, 8447 to 8449, 8511, 8512
Raṅganāthācārya, 8211
Raṅganāthamahādēśika (Śrīvatsa), 8550, 8551
Raṅganāthastōtra, 8125
Raṅganāthasvāmin, 8298
Raṅgarāja, 8275, 8276, 8458, 8532
Raṅgarājādhvarin, 8229
Raṅgarājaguru, 8130
Raṅgarāmānujamuni, 8487, 8488
Raṅgarāṭ, 8505
Raṅgārya, 8416
Raṅgasūri, 8276, 8308, 8309
Rasacandrikā, 8388
Rasagaṅgādhara, 8325
Rasakalpadruma, 8413
Rasamañjarī, 8593
Rasaprakāśa, 8358
Rasārṇavasudhākara, 8344
Rasataraṅgiṇīvyākhyā, 8413
*Rasikajanamanōllāsabhāṇa*, 8484
Rasikaśēkhara, 8167, 8168
Ratnadhara, 8332, 8333, 8529, 8530
Ratnakhēṭa, 8265
Ratnamālā, 8135
*Ratnāvalī*, 8262, 8481, 8482
*Ratnēśvaraprasādana*, 8482 to 8484, 8557
Ṛgvēdiśrāddhaprayōga, 8290
*Ṛkcandrānanda*, 8477, 8478, 8489, 8490
Ṛṣinambūdri, 8447
Ṛṣyaśṛṅga, 8311
Rucipatidatta, 8352 to 8354
*Rukmiṇīpariṇaya*, 8487, 8489
Rūpadēva gōsvāmin, 8514

Śabdamañjarī, 8537
Sabhārañjanaprabandha, 8167, 8168
Saccaritrarahasya, 8292
Ṣaḍbhāṣācatura, 8265
Ṣaḍbhāṣākāvya, 8403
Sāhajīmahārājapura, 8484, 8493
Sāhasāṅkacarita, 8580
Sāhityadarpaṇa, 8567, 8568
Sāhityadarpaṇavyākhyā, 8368
Sāhityamañjūṣikā, 8216, 8217
Sāhityaṭīkā, 8373
Sakalakīrti (Bhaṭṭāraka), 8127, 8129
Śākambharī, 8403, 8404
Sakhārāma, 8207
Śaktibhadra, 8381, 8382, 8384
Śākuntala, 8368, 8369, 8372, 8373, 8375
Sāmantavaṭēśvaradatta, 8466, 8467
Samarapuṅgava, 8521, 8522
Samarapuṅgavadīkṣita, 8226, 8228, 8229
Śāmayārya, 8442, 8443
Sāmba, 8319
Śambhu, 8212, 8214
Samitpāṇiśuddhākṛti, 8310
*Sampatkumāravilāsabhāṇa*, 8550, 8551
Sāmudrikalakṣaṇa, 8438
Sāmūdripād, 8447
Śanagara, 8263, 8264
Saṅgamagrāma, 8390, 8391
Saṅgamēśavidvat, 8442, 8444
Saṅgītadarpaṇa, 8581
*Saṅkalpasūryōdaya*, 8428, 8544 to 8549, 8595
*Saṅkalpasūryōdayavyākhyā*, 8384, 8504, 8546 to 8549
*Saṅkalpasūryōdayavyākhyā : Prabhāvalī*, 8545, 8546
Śaṅkara, 8189, 8384, 8480
Śaṅkarācārya, 8145, 8146, 8149, 8150, 8307, 8308, 8310, 8311, 8336, 8338, 8339
*Śaṅkarāśrayacarita*, 8144, 8145
Śaṅkarācāryavijaya, 8307
*Śaṅkarānandacampū*, 8303, 8304
Śaṅkaranārāyaṇa, 8243
Śaṅkaravarman, 8436
*Śaṅkaravijaya*, 8336, 8338 to 8340
*Śaṅkaravijayavilāsa*, 8145, 8146
Saṅkarṣaṇa, 8121
Śaṅkhadhara, 8491, 8492
*Śaṅkṣēpaśaṅkaravijaya*, 8146, 8147, 8149, 8150
Sanmārgakaṇṭakōddhāra, 8425, 8426
Ṣaṇmukha, 8136, 8138
Sannyāsaviṣayavacana, 8230

*Santānagopālaprabandha*, 8307
Śāntinātha, 8220
Saptapadārthīvyākhyā, 8573
Sarabhamahārāja, 8521
*Śāradānandabhāṇa*, 8209, 8533, 8534
Śaraṇāmbācārya, 8504 to 8506
Śaraṇammācārya, 8275, 8277
Sārārthasaṅgraha, 8387, 8389
Sarasā, 8311
Sarasvatīkaṇṭhābharaṇa, 8253, 8529
Sarasvatīvilāsa, 8204
Śārṅgapāṇi, 8310
Saroyogin, 8272
Sārvabhauma, 8556
Sarvajñasiṅga, 8213
Sarvamaṅgalastavarāja, 8311
Sarvārthasiddhi, 8157, 8292
Śāstradīpikā, 8265
Śatadūṣaṇī, 8293
Śātavāhana, 8341
Śaṭhadviṭ, 8290
Śaṭhajit, 8241, 8389
Śaṭhakopa, 8298
Śaṭhakopācārya (Cakravartī), 8439, 8440
Śaṭhakopārya, 8400
Śaṭhamathana, 8225
Śaṭhāri, 8282
Śaṭharipu, 8272, 8570, 8572
Satyandhara, 8219, 8221
Saumyopayantṛ, 8505, 8571
Śaurirāja, 8583
Sāyaṇa, 8588
Seriṅgapatam, 8319
Śeṣācārya, 8121
Śeṣādri, 8209
Śeṣādriguru, 8541, 8542
Śeṣārya (Ghaṭṭa), 8425
Śeshagiriśāstri M, 8141, 8144, 8242, 8249, 8259, 8406, 8410, 8456, 8458, 8484, 8491
Setumādhava, 8132
Siddhāntasāra, 8504, 8506
Siddhāntavāgīśa, 8142
Siddhāropasaṅgraha, 8244
Siddheśvara, 8472, 8473
Śīlāvatī, 8434, 8435
Siṃhāditya, 8239
Sindhula, 8166
*Sindūraprakara with Tamil commentary*, 8595
Śiṅgarāchāri (Traya Murti Candalla), 8319
Śiṅgarārya, 8241
Śirupuliyūr, 8442
*Śiśupālavadha*, 8500, 8593
*Śiśupālavadhavyākhyā*, 85-3
Sītādevyacarita, 8551, 8552, 8570, 8573
Sītākalyāṇa, 8236, 8237
Sītāmbā, 8281, 8283, 8422, 8423
Sītāpariṇaya, 8593
*Sītārāghavanāṭaka*, 8185, 8552, 8553
Sītārāma, 8339
Śiva, 8120
Śivābharaṇa, 8311
*Śivacaritacampu*, 8265, 8304 to 8306
Śivaguru, 8149, 8150
Śivaprārthanāvaikharī, 8537
Śivarāma, 8559
Śivarāmakavi, 8574 to 8576
Śivarāmakṛṣṇa, 8347, 8349, 8350
Śivasūryayajvan (Śrīvatsa), 8589 to 8591
Śivendra, 8493
Smṛtisāra, 8573
Śokkanāthamakhin, 8402, 8403
Solavandān, 8468, 8469
Solomon, 8150
Solomon's Psalms, 8597
Somadeva (Bhaṭṭa), 8152, 8154
*Somavallīyogānanda*, 8568
South Arcot, 8364, 8487, 8551
Śrautakārikāvṛtti, 8212, 8213
Śreṇika, 8219, 8247
Śrībhāṣya, 8277, 8278
Śrībhāṣyasaṅgraha, 8397
Śrīdeva, 8472, 8473
Śrīdhara, 8314, 8497, 8499, 8570
Śrīdhara (Śāṇḍilya), 8239
Śrīdivyadampatīvarastava, 8572
Śrīharṣa, 8236, 8413, 8414, 8481, 8596
Śrīkaṇṭha, 8243, 8314, 8442 to 8444, 8451, 8452, 8457
Śrīkṛṣṇa, 8572
Śrīkṛṣṇatātācārya (Tiruppuṭkuli), 8424 to 8426
Śrīmuṣṇam, 8285, 8364, 8365, 8487, 8551, 8552, 8570
Śrīnivāsa, 8470, 8506, 8546
Śrīnivāsācāri, 8369
Śrīnivāsacaritra, 8572
Śrīnivāsācārya, 8223, 8298 to 8300, 8345, 8346, 8373
Śrīnivāsācārya (Bhāradvāja), 8500, 8502
Śrīnivāsācārya (Kauṇḍinya), 8225, 8569 to 8573
Śrīnivāsācārya (Kauśika), 8533, 8534
Śrīnivāsadīkṣita (Satyamaṅgala Ratnakheṭa), 8379, 8380, 8392
Śrīnivāsaguru, 8241, 8283, 8345
Śrīnivāsaguru (Śrīvatsa), 8439, 8440
Śrīnivāsakavi, 8125, 8126, 8311, 8312, 8314, 8315, 8364, 8365, 8551, 8552
Śrīnivāsakuśalābdhicandrikā, 8572
Śrīnivāsamakhin, 8265
Śrīnivāsan, 8202, 8210, 8211
Śrīnivāsaprabhu, 8541
Śrīnivāsarāghavācārya, 8205, 8234
Śrīnivāsa Rao, G, 8247
Śrīnivāsārya, 8281 to 8283, 8342 to 8344
Śrīnivāsārya (Koṭagiri), 8159
Śrīnivāsārya (Paravasta), 8290, 8292
Śrīnivāsasevāmṛtārṇava, 8572
Śrīnivāsasvāmin, 8298, 8500, 8502
Śrīnivāsatātārya, 8223, 8224, 8226

Śrīnivāsa (Tattaṅgoḍi), 8585
Śrīnivāsayogin, 8298 to 8301
Śrīperumbūdūr, 8532
Śrīrāmārya, 8275, 8277
Śrīraṅgācārya (Śrībhāṣya), 8550, 8551
Śrīraṅgadaṇḍaka, 8573
Śrīraṅgam, 8192, 8193, 8280, 8285, 8314, 8334, 8387, 8425, 8530, 8572
Śrīraṅganāyikādaśaka, 8573
Śrīraṅgapaṭam, 8541
Śrīraṅgarājacarita, 8573
Śrīraṅgarājastava, 8573
Śrīraṅgārya, 8276, 8277
Śrīśaila, 8140, 8199
Śrīśailādhipa, 8241
Śrīśailāmbā, 8184, 8185
Śrīśailanātha, 8572
Śrīśailapūrṇa, 8279
Śrīśailatāta, 8546
Śrīśaileśvarārya, 8232, 8233
Śrīvarāhacūrṇikā, 8573
Śrīvarāhāṣṭakamu, 8573
Śrīvatsāṅkārya, 8277
*Śṛṅgārabhāṣaṇabhāṇa*, 8537 to 8539
*Śṛṅgāradīpakabhāṇa*, 8497, 8534
Śṛṅgāramañjarī, 8136
Śṛṅgāranātha, 8536
*Śṛṅgārapāvanabhāṇa*, 8535, 8537
*Śṛṅgārarājatilakabhāṇa*, 8540, 8542
*Śṛṅgārarasodayabhāṇa*, 8344, 8539, 8540
*Śṛṅgārasarvasvabhāṇa*, 8242, 8542, 8544
Śṛṅgeri, 8307
*Śrutakīrtivilāsacampu*, 8593, 8595
Śrutaprakāśikā, 8530, 8531
Śrutyantadeśika, 8313
Stein, M. A., 8152, 8165
*Subālavajraṭuṇḍanāṭaka*, 8524, 8556
Subandhu, 8325 to 8327, 8331, 8332
Subbarāyuḍu (Viśjimūri), 8160
*Subhadrādhanañjaya*, 8408, 8438, 8440, 8441, 8555, 8556, 8558 to 8560
*Subhadrādhanañjayavyākhyāna*: *Vicāratilaka*, 8559, 8560
*Subhadrāpariṇaya*, 8560, 8561
*Subhāṣitatriśatīvyākhyā*: *Saṅgrahaśloka*, 8595
Subhāṣitatriśatīvyākhyāsāraśloka, 8599
Subrahmaṇya, 8295, 8358
Subrahmaṇyakavi, 8151, 8512, 8513
Subrahmaṇyakṣetra, 8310
Subrahmaṇya Sudhī, 8429 to 8431, 8542, 8543
Subuddhi, 8167, 8168
Sudarśana, 8530, 8531
Sudarśanācārya (Ghaṭikāśata), 8530, 8531
Sudharma, 8219, 8221
Sudhīcandrikā, 8251, 8253
Sudhīndrayati, 8561
Śūdraka (king), 8474, 8475
*Śukasaptatikathā*, 8172, 8175, 8177
Śukavāsikā, 8504, 8506
Sūkṣmadarśanī, 8331
Sūktimuktāvalī, 8219
Sukumārabhaṭṭa, 8480
*Sulaimaccaritra*, 8150 to 8152
Sulaiman, 8150, 8152
Sundaravara, 8241
Sundareśa, 8582 to 8584
Sundarī, 8404
Suratrāṇa, 8588
Sureśvarācārya, 8311
Sūryanārāyaṇa, 8226, 8228
Sūryanārāyaṇādhvarin (Bhāradvāja), 8593, 8595
Sūryanārāyaṇa (Kauśika), 8259
Sūryasiddhānta, 8541
Suvarṇaśekhara, 8524
Svāmiśāstrī, 8468 to 8470, 8542, 8544
*Svapnavāsavadatta*, 8419, 8562, 8563
Svayambhū, 8556, 8557
Svayambhūnātha, 8482, 8483
Svayambhūnāthadeśika, 8440, 8441
Svayambhūnātharāmaguru, 8303, 8304
Śvetāraṇya, 8129
Syānandūr, 8553

Tālaparṇī, 8385
Tāmūru Tāttaceri, 8375
Tāmraparṇī, 8273
Tānabhaṭṭa, 8511
Tanjore, 8377, 8529
Ṭaṅka, 8388
Tantraśikhāmaṇi, 8202
Tapatīsaṁvaraṇa, 8405, 8406, 8558
Tarkāmṛta, 8424
Tarkāmṛtataraṅgiṇī, 8424
Taruṇānanda, 8477, 8478
Tātācārya, 8281, 8283
Tātayārya, 8225, 8342
Tātparyabodhinī, 8469, 8470
Tātparyacandrikā, 8292
Tātparyadīpikā, 8360
*Tattvaguṇādarśa*, 8223 to 8225
*Tattvaguṇādarśavyākhyā*, 8225
Tattvamārtāṇḍa, 8228
Teluṅgārya (Korrapāḍa), 8191, 8192
Thākur, 8475, 8476
Timmabhūpa, 8256, 8257
Timmayārya (Vaikhānasa), 8373
Timmayyasūri, 8330, 8331
Tinnevelly, 8163
Tippaśāstrī (Nelavaṅgalam), 8319
*Tīrthaprabandha*, 8122, 8123, 8125
Tīrthaprabandhavyākhyā, 8122
*Tīrthaprabandhavyākhyā*: *Gurubhāvaprakāśikā*, 8123, 8124
*Tīrthayātrāprabandha*, 8226, 8229, 8230
Tirukkaṇṇapuram, 8377, 8378
Tirukkoilur, 8285
Tirumala, 8314, 8500, 8503
Tirumalārya, 8423
Tirumaḷisai, 8385
Tirupati, 8422, 8440
Tiruppallāṇi, 8232
Tirupputkuḻi, 8426

Tiruvālaṅgāḍu, 8226
Tiruvālūr, 8535
Tiruvānaikkāval, 8589
Tiruvellūr, 8184, 8275, 8504
Tiruvisanallur, 8493
Tiruvēṅkaṭācārlu (Mukāmi), 8288
Tiruvēṅkaṭanātha, 8163, 8165
Tōlappārya, 8225
Toṇḍamaṇḍala, 8500
Tōṭaka, 8148
Tōtārambā, 8130
Travancore, 8301
Trichinopoly, 8542, 8543
Triliṅga, 8235
Triplicane, 8345, 8362
Tripurāri, 8458 to 8460
Trivandrum, 8275, 8406, 8419, 8420, 8553, 8558, 8559, 8562
Trivikramabhaṭṭa, 8239, 8240
Trivikramakavi (Mēdhāvi), 8329, 8330
Trivikramapaṇḍitācārya, 8119, 8121, 8584
Trivikramārya, 8133
Tirumalai Ghanagiri, 8271
Tryambakarājavajvan, 8519, 8570
Tuṇḍīramaṇḍala, 8447, 8556
Tuṅgabhadrā, 8311, 8588
Tyāgarāja, 8482, 8483

Udayanapura, 8302
Uddaṇḍaśāstrin, 8447 to 8449
Ugrabhairava, 8148
Ujjain, 8127, 8128, 8136, 8137, 8169 to 8171, 8310, 8311, 8419, 8579, 8580
Unmādavāsavadattā, 8381
Upaniṣadarthavicāra, 8241
Uttara, 8314
*Uttaracampu*, 8180 to 8182
*Uttaracampurāmāyaṇa*, 8182, 8183
*Uttararāghavīya*, 8566
*Uttararāmacarita*, 8384, 8385, 8458, 8566
*Uttararāmacaritavyākhyā*, 8359, 8385, 8387, 8403
Uttararāmāyaṇa, 8180
*Uttararāmāyaṇacampu*, 8184, 8185
Uṛayur, 8304
*Uṣāpariṇayacampu*, 8185

Vādihaṁsāmbuda, 8291, 8292
Vādirāja, 8122 to 8125
Vādirājasūri, 8136 to 8138
Vāgīśatīrtha, 8122
Vāhinīpati, 8500, 8502
Vaidyanātha, 8536
Vaikkam, 8301, 8302
*Vaikuṇṭhavijayacampu*, 8298, 8301
Vākpatirāja, 8579, 8580
Vakulabhūṣaṇa, 8293
Vakulamālinīgīrvāṇapariṇaya, 8573
Valaraciḷbhaṭṭa, 8171
Valliyanūr, 8283
*Vallabhācāryacarita*, 8141
Vallabhapaṇḍita, 8166, 8167
*Vallīpariṇaya*, 8484, 8492 to 8494, 8580, 8591
Vallīsahāyakavi, 8307, 8309, 8477, 4788, 8489, 8490
Vālmīki, 8184, 8206, 8213, 8375, 8434
Vāmalūr, 8347
Vāmanabhaṭṭabāṇa, 8334, 8335, 8537, 8538
Vāmanācārya, 8414
Vāñchinātha, 8205
Vañci Mārtāṇḍa, 8553, 8554
Vāṇiyambāḍi, 8218
Vaṇ Śaṭhakōpasvāmin, 8500, 8502
Varada, 8358
*Varadābhyudayacampu*, 8181 to 8184
Varadācārya, 8494, 8533, 8534, 8569, 8571, 8572
Varadācārya (Śrīvatsa), 8530, 8531
Varadadēśika (Kauṇḍinya), 8364, 8365
Varadaguru, 8276, 8277, 8505, 8530, 8531
Varadaguru (Ātrēya), 8342, 8344
Varadaguru (Kauṇḍinya), 8551, 8552
Varadaguru (Kauśika), 8387 to 8389
Varadanārāyaṇaguru, 8572
Varadarāja, 8345, 8346
Varadarājapura, 8541
Varadarājastava, 8279
Varadārya (Vādhūla), 8345, 8346
*Varāhacampu*, 8573
Varāhacūrṇikā, 8573
Varāhavijaya, 8573
Vārāṇasī, 8311
Varavaramuni, 8316, 8240
Vardhamāna, 8138, 8139, 8220, 8314
*Vardhamānacarita*, 8138, 8140, 8141
Vārdhikanyāpariṇaya, 8504, 8506
Varūthapurī, 8310
*Vāsalakṣmīkalyāṇa*, 8504, 8506, 8507
Vāsulakṣmīvilāsa, 8506
*Vasantatilakabhāṇa*, 8209, 8282, 8344, 8347, 8466, 8494 to 8497, 8592
*Vāsantikāpariṇaya*, 8500, 8503, 8504
*Vāsavadattā*, 8325 to 8332, 8341
*Vāsavadattāvivaraṇa*, 8326, 8328
*Vāsavadattāvyākhyā*, 8324, 8327 to 8331
*Vāsavadattāvyākhyā : Tattvadīpanī*, 8332, 8334
Vāsiṣṭha, 8178
Vāsudēva, 8119, 8120, 8323, 8324, 8356
Vasumaṅgalanāṭaka, 8498 to 8500
*Vasumaṅgalanāṭaka with commentary*, 8351, 8497, 8499
Vaṭēśvarapura, 8196
Vatsa, 8481, 8562
Vaṭukanātha, 8310
Vēdadhara, 8539
Vēdādhinātharnahācārya, 8196 to 8198
Vēdāṅgatīrtha, 8133, 8134
Vēdāntācārya, 8130, 8255, 8285, 8295, 8296
Vēdāntācārya (Kauśika), 8203, 8204
Vēdāntācārya (Kavitārkikasiṁha), 8290, 8293
Vēdāntācārya (Manaḷḷikaṭṭai), 8424 to 8426
*Vēdāntācāryavijayacampu*, 8290, 8293 to 8295
*Vēdāntācāryavijayacampuvyākhyā*, 8295, 8297

Vēdāntadēśika, 8130, 8204, 8271, 8281, 8282, 8285, 8290, 8298, 8299, 8521, 8522, 8530, 8531, 8544, 8546 to 8549
Vēdāntādēśikugadya, 8409
Vēdāntasāra, 8573
*Vēdāntavilāsa*, 8530 to 8532
Vēdāntōdayanācārya, 8232, 8235
Vēdapādarāmāyaṇa, 8275, 8279, 8290, 8504, 8506
Vēdapurīśvarādhvarin, 8268, 8269
Vēdēśvara, 8332, 8333
Vēkaramanni, 8511
Vellāla, 8262
Vellore, 8268
Vēma (Reḍḍi King), 8334, 8335
*Vēmabhūpālacarita*, 8334
Vēṅgalāryaguruparamparā, 8241
Vēṇimādhava, 8511, 8512
*Vēṇīsaṁhāra*, 8132, 8392, 8526 to 8528
Vēṇīsaṁhāracchāyā, 8392
*Vēṇīsaṁhāraṭīkā*, 8528, 8530
Vēṅkaṭa, 8222, 8225, 8241, 8252, 8497
Vēṅkaṭabhānu, 8498
Vēṅkaṭācala, 8243, 8311
Vēṅkaṭācala (Avasarāla), 8159
Vēṅkaṭācala Jōsyulu, 8543
Vēṅkaṭācārya, 8225, 8271, 8273, 8281, 8287, 8298, 8299, 8342, 8422, 8423, 8454
Vēṅkaṭācārya (Cakravarti), 8232, 8233, 8235
Vēṅkaṭācārya (Kauśika), 8290
Vēṅkaṭācārya (Kumāra), 8345, 8346
Vēṅkaṭācārya (Navīna), 8408, 8409
Vēṅkaṭācārya (Paravastu), 8290 to 8296
Vēṅkaṭācāryulu (Naḍādūr), 8288
Vēṅkaṭadāsa, 8409
Vēṅkaṭadāsa (Dīvāpradīpa), 8280
Vēṅkaṭadēśika, 8487 to 8489
Vēṅkaṭādhvarin, 8180, 8181, 8223, 8281 to 8289
Vēṅkaṭādri, 8182, 8183
Vēṅkaṭa (Kauśika), 8497, 8499
Vēṅkaṭakavi, 8285 to 8287
Vēṅkaṭakṛṣṇa, 8232, 8233
Vēṅkaṭakṛṣṇa (Bhāradvāja), 8362, 8363
Vēṅkaṭakṛṣṇakavi, 8182, 8183
Vēṅkaṭakṛṣṇasūri, 8251, 8252
Vēṅkaṭāmbā, 8541, 8542
Vēṅkaṭāmbā (Poṇḍūri), 8429 to 8431
Vēṅkaṭanarasiṁhācār, 8281, 8283
Vēṅkaṭanarasiṁhakavi, 8528
Vēṅkaṭanātha, 8130, 8294, 8544, 8547, 8549
Vēṅkaṭapati, 8261, 8314
Vēṅkaṭarāghava, 8372, 8454, 8566
Vēṅkaṭaraya, 8275, 8559
Vēṅkaṭārya, 8184, 8185, 8241, 8262, 8275, 8278
Vēṅkaṭārya (Navīna), 8487 to 8489
Vēṅkaṭaśiva, 8356
Vēṅkaṭasūri, 8362
Vēṅkaṭavarada, 8569, 8572
Vēṅkaṭavaradācārya, 8211
Vēṅkaṭavīrarāghava, 8285, 8286, 8468
Vēṅkaṭēśa, 8207, 8280, 8291 to 8293, 8295, 8429, 8500, 8525
*Vēṅkaṭēśaprabhāta*, 8344, 8525, 8526
Vēṅkaṭēśa (Vādhūla), 8226, 8228, 8229
Vēṅkaṭēśvara, 8201, 8288
Vēṅkaṭēśvara (Allāḍi), 8468, 8476
Vēṅkaṭrāyan, (Raja Cintapaṭla), 8318
*Vēdlapañcaviṁśatikathā*, 8171, 8172, 8592
Vibhāgaratnamālikā, 8482
*Vibudhānandaprabandha*, 8285 to 8287
*Vidagdhamādhava*, 8368, 8513, 8515
*Vidagdhamādhavavyākhyānavivaraṇa*, 8515
Vidagdhamādhavavivaraṇa, 8468, 8516
Vidarbha, 8182, 8183
*Viddhasālabhañjikā*, 8516, 8517, 8519
Viddhasālabhañjikāvyākhyā, 8519
*Viddhasālabhañjikā with the commentary Maryādarāśi*, 8518
*Vidvanmōdataraṅgiṇī*, 8141, 8144
Vidvēśvira, 8310
Vidyādhara, 8332, 8333, 8529
Vidyādhirāja, 8149, 8309
Vadyāhanumat, 8285, 8286
*Vidyāpariṇaya*, 8519, 8520
Vidyāraṇya, 8146, 8313, 8587, 8588
Vidyāśaṅkara, 8307, 8308, 8587, 8588
Vidyātīrtha, 8146, 8589
Vidyullatā, 8394
Vijayā, 8219, 8221
Vijayalakṣmi, 8510
Vijayanagar, 8256, 8275, 8313, 8587
Vijayanandana, 8313, 8314
*Vijayēndrapariṇaya nāṭaka*, 8512, 8513
Vijayīndrayati, 8560, 8561
Vijñānakanda, 8145, 8146
Vikrama, 8449, 8578, 8580, 8588, 8589, 8592
Vikramāditya, 8169, 8170
Vikramārka, 8170, 8171, 8520
*Vikramārkacarita*, 8169 to 8171
*Vikramaśēnacarita*, 8592
Vikramōrvaśīprahāsikā, 8512
*Vikramōrvaśīya*, 8352, 8367, 8368, 8507 to 8509, 8510
*Vikramōrvaśīyavyākhyā*, 8508, 8511
*Vikramōrvaśīyavyākhyā : Kumāragiri-rājīya*, 8510
Vikṣāraṇya, 8275, 8277
Vināyakapūjā, 8402
Vināyakapūjāvidhāna, 8290
Vipradēva, 8310
Vīrācār (Nāṭṭu), 8295
Vīrācārya, 8586
Vīramā, 8539
Vīranārāyaṇa, 8334
Vīranārāyaṇacarita, 8334, 8336
Vīranārāyaṇapura, 8241
Vīranṛsiṁha, 8313, 8314
Vīrarāghava, 8275, 8277, 8385, 8387, 8453, 8484, 8485, 8492, 8493, 8506
Vīrarāghava (Ātrēya), 8230 to 8232
Vīrarāghava Kanakavallīvivāha, 8504, 8506
Vīrarāghavamakhin, 8589, 8590
Vīrarudra, 8312, 8588
Vīravalli, 8569 to 8571
Vīravatī, 8140
Viriñcipuram, 8268, 8269, 8477, 8480, 8490, 8593
Virūpākṣabhaṭṭāraka, 8339

Viśākhadatta, 8466, 8467, 8471, 8473
Viśākhadēva, 8469
Viṣṇubhaṭṭa, 8361, 8362
Viṣṇucitta, 8127, 8196, 8197, 8393
Viṣṇudharmōttara, 8163
Viṣṇudarśanabuddhi, 8310
Viṣṇugupta, 8310
Viṣṇupaṇḍita, 8380
Viṣṇupurāṇa, 8168
Viṣṇuśarman, 8157, 8178, 8179, 8310, 8437
Viṣṇustōtra, 8587
Viśva, 8214, 8332, 8460
*Viśvaguṇādarśa*, 8180, 8223, 8231, 8287 to 8289, 8298, 8312, 8422
Viśvapatitīrtha, 8134
Viśvavṛtiyaprakāśika, 8400
Viśvēśvara, 8411, 8412
*Vṛdhāvijaya*, 8521 to 8523
Vṛddhaviriñcin, 8310
Vṛṣabhanātha, 8140
Vṛṣabhānujā, 8524, 8525
*Vṛṣabhānujānāṭikā*, 8524, 8525
Vṛṣācala, 8311
Vṛṣapura, 8394, 8395
Vṛttālaṅkāramālikā, 8373
Vṛttaratnākara, 8262
Vṛttisiddhārūpasaṅgraha, 8243
*Vyāghrālayēśāṣṭamīmahōtsavacampu*, 8301
Vyaṅgyavyākhyā, 8406
Vyāsa, 8310, 8388, 8389
Vyāsācala, 8146, 8147
Vyāsadāsa, 8165, 8310
Vyāsa Rāmadēva, 8486
Vyōmakēśapura, 8511, 8512

Waraṅgal, 8213

*Yādavābhyudaya*, 8587
Yajñanārāyaṇa, 8275, 8278
Yajñanārāyaṇādhvarin, 8379, 8380
Yajñarāmadīkṣita, 8402
Yakṣapraśna, 8230
Yallayārya (Pakṣadhara), 8262, 8263
Yāmuna, 8241, 8272, 8292, 8384, 8570
Yāmunastōtravyākhyāna, 8573
Yaśōdhara, 8136, 8137
*Yaśōdharacarita*, 8136, 8137
*Yaśōdharacarita with Kanarese meaning*, 8138
Yatirāja, 8241, 8271, 8276, 8299, 8566, 8571
Yatirājacarita, 8273
Yatirājavijaya, 8530 to 8532
*Yatirājavijayacampu*, 8371
Yatiśēkhara, 8388, 8389
*Yayātitaruṇānanda*, 8477, 8478
*Yayātidēvayānīcarita*, 8479
Yuktimallikā, 8124, 8125

২০/১২/৭৮

Central Archaeological Library,
NEW DELHI.
23617
Call No. 091.41912/G.O.ML.M
Author— S. Kuppuswami Sastri
Title— A Descriptive Catalogue of the Sanskrit Manuscripts Vol. ...

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL LIBRARY
GOVT. OF INDIA
Department of Archaeology
NEW DELHI.

Please help us to keep the book clean and moving.

S. B., 148. N. DELHI.